श्रीमद्भट्टिविरचितं

# भट्टिमहाकाव्यम्

'काव्यमर्मविमर्शिकाख्य'-संस्कृत-हिन्दीव्याख्योपेतम्

९८-22

व्याख्याकारः—

**म० म० पण्डितराज डॉ० श्रीगोपालशास्त्री 'दर्शनकेशरी'**

[ काशीपण्डितसभाध्यक्षः, राष्ट्रपतिसम्मानितश्च ]

सम्पादकः—

**प्रो० गोपालदत्तपाण्डेयः** एम० ए०, व्याकरणाचार्यः,

( अवकाशप्राप्त उप-शिक्षानिदेशकः, उत्तरप्रदेशस्थः )

चौखम्बा सुरभारती प्रकाशन
वाराणसी 221 001

संस्कृत महाविद्यालय
विद्या भवन, नई दिल्ली-1

॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला
१७

श्रीमद्भट्टिविरचितं

# भट्टिकाव्यम्

'काव्यमर्मविमर्शिकाख्य'-संस्कृत-हिन्दीव्याख्योपेतम्
( चतुर्दशादि-द्वाविंशसर्गपर्यन्तम् )

व्याख्याकार—
**म० म० पण्डितराज डॉ० श्रीगोपालशास्त्री 'दर्शनकेशरी'**
( काशी-पण्डित-सभाध्यक्षः, राष्ट्रपतिसम्मानितश्च )

सम्पादकः—
**प्रो० गोपालदत्तपाण्डेयः**
( अवकाशप्राप्त उप-शिक्षानिदेशकः, उत्तरप्रदेशस्थः )

Sri Sankaracharya Sanskrit Mahavidyalaya
Bharatiya Vidya Bhavan
527

DIRECTOR
BHARATIYA VIDYA BHAVAN
KASTURBA GANDHI MARG
NEW DELHI-110001

चौखम्बा सुरभारती प्रकाशन
वाराणसी

प्रकाशक

**चौखम्बा सुरभारती प्रकाशन**
( भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक )
के० ३७/११७, गोपालमन्दिर लेन
पो० बा० नं० ११२९, वाराणसी २२१००१

सर्वाधिकार सुरक्षित

चतुर्थ संस्करण १९८७

Rs 24/-

अन्य प्राप्तिस्थान
**चौखम्बा संस्कृत प्रतिष्ठान**
३८ यू. ए., जवाहरनगर, बंगलो रोड
पो० बा० नं० २११३
दिल्ली ११०००७
दूरभाष : २३६३९१

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
527

प्रमुख वितरक
**चौखम्बा विद्याभवन**
चौक ( बनारस स्टेट बैंक भवन के पीछे )
पो० बा० नं० १०६९, वाराणसी २२१००१
दूरभाष : ६३०७६

मुद्रक
**श्रीजी मुद्रणालय**
वाराणसी

THE

CHAUKHAMBA SURBHARATI GRANTHAMALA

17

⁂

# BHAṬṬIKĀVYA

OF

## ŚRĪ BHAṬṬI

( Cantos XIV–XXII )

*With 'Kavyamarmavimarshika' Sanskrit and Hindi Commentaries*

By

**M. M. Panditraj Dr. Gopal Shastri**

*'Darshanakeshari'*

*Edited by*

**Prof. Gopal Dutt Pande**

*M A., Vyakaranacharya,*

*Retired Deputy Director of Education, U. P. and Former Professor and Head of Sanskrit Department, D. S. B. Government Post-Gradute College, Nainital.*

CHAUKHAMBA SURBHARATI PRAKASHAN
VARANASI

© CHAUKHAMBA SURBHARATI PRAKASHAN
*(Oriental Publishers & Booksellers)*
K. 37/117, Gopal Mandir Lane
Post Box No. 1129
VARANASI 221001

Fourth Edition
1987

*Also can be had of*
CHAUKHAMBA SANSKRIT PRATISHTHAN
38 U. A., Jawaharnagar, Bungalow Road
Post Box No. 2113
DELHI 110007
*Telephone : 236391*

*

*Sole Distributors*
CHOWKHAMBA VIDYABHAWAN
CHOWK ( Behind The Benares State Bank Building )
Post Box No. 1069
VARANASI 221001
*Telephone : 63076*

# प्रस्तावना

( वसन्ततिलकया )

जागर्यतां युवजना भवतां समक्षे,
कीदृग् विचित्र-समयः समुपस्थितोऽस्ति ।
शृण्वन्ति नैव गुरवो हितमस्ति यद्व-
स्तत् साधयध्वमधुना स्वबलेन नूनम् ॥

( शालिन्या )

अष्टाध्यायी-पाठनेनैव युष्मत्, कल्याणं स्यात् स्वल्प-कालेन नूनम् ।
ततश्च,
स्वल्पायासादेव वो भट्टि-बोधः, शास्त्राण्यन्यान्येवमेवाप्यधीध्वम् ॥

सर्वदाऽहं पूर्व-प्रकरणे भट्टि-टीकायां काव्य-मर्म-विमर्शिकायां मूलत एव भट्टि-पाठकान् अध्याय्यध्यापकान् निवेदयामि यद् भट्टिकाव्यमिद व्याकरणदिशैव पठन्तु पाठयन्तु च, न केवलं काव्यदिशा । यतो हि स्वयमेतत् ग्रन्थकर्त्राऽवसानेऽभिहितम् अस्ति यत्—

दीप-तुल्यः प्रबन्धोऽयं शब्द-लक्षण-चक्षुषाम् ।
हस्तामर्ष इवान्धानां भवेद् व्याकरणादृते ॥ ( २२।३३ ) इति

अत्र व्याकरण-शब्देन पाणिनीयाष्टकम् (अष्टाध्यायीग्रन्थः) अभिप्रेतोऽस्ति कवेः । यतो हि प्रकीर्णाऽधिकार-प्रसन्न-तिङन्तेतिकाण्डचतुष्टयात्मकं प्रसाद-गुण-गुम्फितं कोशालङ्कार-ध्वनि-विशिष्टं रामकथाऽमृतप्लावितं राजनीति-समाज-नीतिमद् रावणवधाभिधमिदं महाकाव्यशास्त्रम् पाणिनीयाष्टकमेवाधिकृत्य निबद्धं तेन ।

सन्ति बहूनि काव्य-शास्त्राणि प्राचीनानि—वासुदेव-विजयम्, सुभद्राहरणम्, अव्ययकृद्विलसितम्—इत्यादीनि एवंविधानि । तत्र—

विद्या ह वै ब्राह्मणमाजगाम,
गोपाय मा शेवधिस्तेऽहमस्मि ।
असूयकायाऽनृजवेऽयताय,
न मा ब्रूया वीर्यवती यथा स्याम् ॥

इदं वेदवाक्यं महतीं लोकशिक्षां ददाति यद् शास्त्राध्येतारोऽसूयका न स्युः। अनृजवो न भवेयुः । अयता इन्द्रियसंयमशून्या अपि न स्युः । यतो हि विद्या तदैव सफला भवति । समेधतेऽपि च सत्पात्रमासाद्यैव सा ।

अयमेव भाव एतदुपर्युक्तवचःप्रतियोगिविषयोक्तोऽन्यत्र । तथाहि—

**जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।**
**गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः ॥**

इति सर्वं शिक्षयति शिष्टाचारमिदं पद्यम् ।

भर्तृहरीत्यपरनामभृता भट्टिकविना भट्टिमहाकाव्यशास्त्रं विरचितम् । यत्र प्रकीर्णाऽधिकार-प्रसन्न-तिङन्तकाण्डेतिनाम्ना व्याकरणं, तत्रापि च पाणिनीयं विवृतमस्ति । यच्च पाणिनीयाष्टकशब्दानुशासनाधारमधीतं फलदं भवति, नहि काव्यधिया ।

तत्रापि च उत्तरोत्तरं वैशिष्टयं निवद्धमत्र महाकविना । प्रकीर्णकाण्डादधिकं वैचित्र्यमधिकारकाण्डे । सूत्राण्यपि क्रमशश्चलन्ति, रामचन्द्रस्येतिवृत्तमपि क्रमशश्चलति, रचनावैचित्र्मपि शब्दार्थयोश्चलतीति दर्शनीयः प्रतिभाप्रकर्षो महाकवेः ।

तथैवाऽग्रे प्रसन्ने काण्डे यथार्थनाम्नि दृश्यताम् प्रारम्भतः पञ्चम-सर्गस्य षण्णवतिपद्यान्तं प्रकीर्णं, ततो नवमसर्गावधिरधिकारस्ततो दशमसर्गतस्त्रयोदशावधिकेऽस्मिन् प्रसन्ने काव्यवर्णनच्छटाद्भुता दृशेलिमा विद्यते । दशमेऽलङ्काराणामेकादशे माधुर्यगुणस्य काव्यरसरहस्यस्य, द्वादशे स-काव्यालङ्कार-रस-राजनीति-रहस्यं दृशेलिमं काव्यरसिकैः । द्वितीयसर्गे शरद्वर्णनेऽपि, तथैव चतुर्थसर्गे सूर्पणखा-संवादे राजनीति-बहुला काव्यच्छटा । प्रथमसर्गे हि किं न्यूनमन्यकविभ्योऽस्य महाकवेः काव्यवैदग्ध्यम् ? किम्बहुनाऽध्येतारो हि काव्यरसवेदिनोऽस्य महाकाव्यम् विदन्तु । नहि वर्णनीयतामर्हति अस्य महाकवेर्वाग्वैदग्ध्यम् ।

अग्रे पश्यन्तु चतुर्दशसर्गतो द्वाविंशसर्गावधि(ग्रन्थसमाप्ति यावदित्यर्थः)तिङन्तकाण्डं चलति । तत्र हि महाकविः सर्वतिङन्तपदानां प्रयोगवैचित्र्यं दधत् "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये, सद्यः परनिर्वृतये" इति सर्वमपि लक्षणं सङ्गमयन् लकारवैचित्र्यं निबध्नाति । अत्र महाकवेरस्य महत्त्वं स्फुटं स्फुरितं विद्यते ? अहो लकाराणां प्रयोगशिक्षया सहैव राजनीतिशिक्षां व्यवहारनीतिशिक्षां समाजनीति-शिक्षां धर्मनीतिशिक्षां यद्यद्धि जगति चातुर्य-

प्राचुर्यं तत्सर्वमत्र तिङन्तकाण्डे सम्भृतं महाकविना। अत एवोक्तं मया भट्टिकाव्येऽस्मिन्नुत्तरोत्तरं वाग्वैदग्ध्यम्। धातोः कथं कस्मिन्नर्थे लकाराः प्रयोक्तव्याः। एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवति—इति प्रत्यक्षमत्र लकार-विलसितमुपलक्ष्यते। चतुर्दशे लिटः, पञ्चदशे लुङः, षोडशे लृटो विलासे रावणविलापेन सर्वमपि व्यवहारमविवेकिनां शिक्षयन् महाकवी रामवद् व्यवर्तव्यं न रावणवदिति स्फुटमाख्याति। तथैवाग्रे सप्तदशतो विंशतिसर्गान्तं लङ्-लट्-लिङ्-लोड्-लकाराणां सार्वधातुकानां सन्निवेशेन सर्वमपि गणकृत्यं शबादिविकरणशिक्षया बोधयन् लोकव्यवहारमपि सम्यक् विभीषणविलापेन शिक्षितवान्। आशीर्लिङोऽपि आर्द्धधातुकस्य सार्वधातुकेन सहैव प्रयोगान् दर्शयन् आर्द्धधातुकप्रयोगा अनायाससाध्या इत्यपि प्रत्यक्षं दर्शितवान्। एकविंशे लुटो विलासं दर्शयन् सर्वान् सार्वधातुकार्द्धधातुकप्रयोगान् प्रदर्शयन् तिङन्तकाण्डं लकारविलसितं समाप्तवान्।

संक्षेपेण महाकवेरस्य महाकाव्यस्य विषयसमालोचना तु अध्ययनत एव भवति। वचसा वयं किं कुर्मः। स्वयं महाकविरेव—

इदमधिगतमुक्तिमार्गचित्रं विवदिषतां वदतां च सन्निबन्धात्।
जनयति विजयं सदा जनानां युधि सुसमाहितमैश्वरं यथाऽस्त्रम्।

इत्येवं सर्वोपरि समालोचनामस्य महाकाव्यस्याकरोत्। लक्षणरूपस्य तिङन्तकाण्डस्यापि सर्वोपरि माहात्म्यमिह धातुतस्तिङन्तपदप्रयोगसूचनया। लक्ष्यरूपविषयतोऽपि जगति अविवेकेन व्यवहरतां महतामपि कीदृगधःपातो जायते। विवेकी सर्वसाधनहीनः पदातिरकिञ्चनोऽपि समुद्योगबलेन मदमत्तद्विपेन्द्रोपरि लघुकार्यसिंहवद्विजयी भूत्वा जगति सर्वपूज्यो भवतीति निःसाधनस्य अरण्येऽपहृतभार्यस्य रामस्योद्योगं मूढस्य सर्वशास्त्रविदोऽपि असंयतेन्द्रियस्य रावणस्य प्रमादमग्नस्य विनिपातं दर्शयन् नारीणां सतीत्वसंरक्षणादिसर्वं जगद्व्यवहारं सुबन्ततिङन्तशब्दरूपात्मकं च व्याकरणशास्त्रं संग्रन्थ्य छात्राणां पुरतः स्थापितवान्।

मम दृष्टौ भट्टिमहाकाव्यशास्त्रदिशैव व्याकरण-शिक्षा वैज्ञानिकी सरलेति अस्य ग्रन्थस्य परीक्षायां पूर्वतः सन्निवेशः सर्वात्मना छात्रवर्गाणां परमश्रेयोऽभ्युदयप्रद इति सर्वैरवधार्यं, तथैव गम्भीरमध्ययनं च व्याकरणस्य सर्वात्मना सर्वथा चैतद्ग्रन्थद्वारैव विधेयमिति न विस्मरणीयम्।

समाजशास्त्रावगतिर्भवेदितस्तथेतिहासादि नयादि बुध्यते।
न केवलं व्याकृतिकाव्यशिक्षकं सर्वात्मना रामचरित्रबोधकम्॥

कवि-रहस्य-विवृतये मयापि भट्टिकाव्यम् मर्म-विमर्शिकाख्यटीकया विभूषितं विहितम् । पुनः पुनस्तत्र बहुशो भृशम् अनुरुद्धा अपि अक्रम- प्रक्रियाविदः सुधियो न त्यजन्ति स्वमोहं स्वसुखासिकया च न पश्यन्ति छात्र-कल्याणम् इति पूर्वोक्त-पद्यद्वयेन छात्रानेवोद्‌बोधयामि यत्ते स्वयं स्वकल्याणं सम्पादयन्तु । पाणिनीयाष्टकं हस्ते गृहीत्वैव भट्टिकाव्यं पठन्तु ( शालिन्या )—

हस्ते धृत्वा पाणिनीयाष्टकं तच्छात्रैः सर्वैः पठ्यतां भट्टिकाव्यम् ।
येयं रीतिः काव्य-बुद्ध्यास्य पाठः काव्यस्यैषा वर्जनीया जघन्या ॥

स्रग्विण्या—

पद्धतिः पाणिनीयाऽद्‌भुता विद्यते, तत्प्रवक्ताऽप्यहो भाग्यतो लभ्यते ।
पाणिनीयाष्टकेनैव संसाध्यते, लोकवेदोद्भवं यत्पदं श्रूयते ॥

तदर्थमिह मनाक् पाणिनीयाष्टकं पठितुम्प्रकारम् उपदिशामि—–पाणिनिर्मुनिः 'स्वरितेनाधिकारः १।३।११' इति सूत्रं प्रणिनीय सर्वत्राधिकारानुवृत्ति-सूत्रपदेषु स्वरितचिह्नं दत्त्वाऽष्टक-पुस्तकं लिखितवान् । तथैव लेखकैर्लिखितमपि तत्पुस्तकं पुराकाले प्रचलति स्म। यतः कालात् मुद्रणयन्त्राविर्भावोऽभूत् तत एव सूत्रेभ्यः स्वरित-चिह्नापगमो जात इत्यहं तर्कयामि । यदीश्वरानुग्रहात् पुनः ( स्वरित-चिह्नानुगतं = ) वैशिष्ट्यान्तरानुगतं पाणिनीयाष्टकं [1]मुद्रितं स्यात्तर्हि बहूपकारः स्याच्छात्राणाम् ।

तावत् मन्निर्दिष्टप्रकारेण सूत्रार्थं कुर्वन्तु भवन्तः ( स्रग्विणी–छन्दसा )–

सम्प्रघुष्य क्रमात्पाणिनीयाष्टकं
सन्धिबोधात्पदच्छेदतोऽर्थं चरेत् ।
पूर्व-सूत्रं परस्मिन्समासज्जयन्
निर्विशेषां जहत्तद्विभक्तिं समाम् ॥

यतोहि—

पूर्वसूत्रं परस्मिन् समासज्जदा
स्वाधिकारावधि शृङ्खला-वृद्धितः ।
तत्समानं पदं स्वं जहद्धीतरत्
सर्वमेवोपहारी करोत्यादरात् ॥

---

१. चौखम्बा सुरभारतीग्रन्थमालायन्त्रालय, वाराणसी इति संकेते तादृश एव सवृत्तिरष्टाध्यायी सूत्रपाठो मुद्रितोऽस्ति । मया ऋजुपाणिनीयं ( संक्षिप्ताष्टकं ) च वैशिष्ट्यान्तरानुगतं मुद्रापितम् । सर्वत्रापणे प्राप्यते ।

किन्तु तत्रापि चेद् यद्विशेष्यादिकं
तत्समानं पदं चापि याति स्वतः ।
इत्थमाविष्करोत्यर्थमत्यद्भुतं
यो न जन्मान्ततः क्वापि विस्मर्यंते ॥

स्पष्टार्थंतत्र पद्यानाम् इत्युदाहरणमात्रं प्रदर्श्यंते । तथाहि--'क्ङिति च १।१।१५' । क्ङिति ( ७।१ ), च–अव्ययम्–इति पदच्छेदो विभक्तिश्चेति उभयं ज्ञेयम् । उपरितो नियमात् 'न' इति "इको गुणवृद्धी" इति पदत्रयम् अनुवृत्या आयाति । ततश्च क् च ग् च् ङ् चेति क्ङः, ते इतः यस्येति क्ङित्, तस्मिन् क्ङिति वहुव्रीहौ, 'यरोऽनुनासिकेऽनुनासिको वा ८।४।४५' इति गकारस्यानुनासिके ङकारे कृते "हलो यमां यमि लोपः ८।४।६४" इति ङो लोपो ज्ञेयः । अत्र निमित्त–सप्तमीति निमित्तेऽर्थे लब्धे 'षष्ठी स्थानेयोगा १।१।४९' इति 'स्थाने' इति पदयोगे 'द्वन्द्वान्ते द्वन्द्वादौ श्रूयमाणं पदं प्रत्येकं सम्बध्यते' इति परिभाषाबलात् किति गिति ङिति निमित्ते इकः स्थाने गुणवृद्धी न स्तः इत्यर्थो जायते ।

इत्थं हि अनुवृत्या सूत्राणामर्थः स्वयं कार्यः । प्रकारोऽयं 'पाणिनीय-प्रबोधे' तथा 'ऋजुपाणिनीये' उभयत्रापि विशदो दर्शितोऽस्ति । तत्रैव दृश्यः स इत्यलम् ।

अत्र तिङन्त-काण्डे सर्वतोऽपि सौविध्यमिदमस्ति यदेक एव लकारः सर्गान्तं चलति । तत्र तल्लकार-प्रत्ययानां ज्ञानं कृत्वा धात्वर्थं जानन् धातु-प्रत्यय-योगेन मध्ये पदाधिकारिणाम् ८।१।१६–८।३।५४ यावत्, अङ्गाधिकारिणां ६।४।१–७।४।९७ यावत्, संहिताधिकारिणां ६।१।७३–६।१।१५८ यावत्, तथा ८।२।१–८।४।६८ यावत् च सूत्राणां साहाय्येन प्रयोगसिद्धिः कार्य्या स्यात् । प्रत्यया धातवश्च तत्रैव सर्गे निर्दिष्टाः स्युः सार्थाः । अत्र सामान्यतोऽष्टक-सूत्राणामध्यायपाद-सूत्रसंख्या-निर्देश-पूर्वकं सामान्यतोऽधिकाराः कार्य्याणि च निर्दिश्यन्ते । येन अष्टाध्यायी-पाठश्छात्राणां स्वायत्तः स्यात् । तत्र—

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अधिकारो निषेधश्चातिदेशः सूत्र-सप्तकम् ॥

इति सप्तविधान्येव सूत्राणि अष्टके । तानि यथास्थानं जिज्ञासुभिर्ज्ञेयानि । तत्राधिकारानुवृत्ति-प्रधानसंज्ञा-विशेष-निर्देशो यथा—

संज्ञाश्च परिभाषाश्च प्रथमाध्यायगोचराः ।
प्रधानसंज्ञा आद्याङ्घ्रौ गौण्यः पादे द्वितीयके ॥

इत्संज्ञा चात्मनेपद्यं परस्मैपद्यमेव च ।
तृतीये, कारकं तुर्ये कर्म-प्रवचनीयकम् ।।
द्वितीयाध्याय-पादौ स्तः समास-प्रतिपादकौ ।
विभक्त्यर्थास्तृतीयाङ्घ्रौ तन्निषेधोऽपि चान्ततः ।।
तुर्ये क्लीबत्वमेकत्वं धात्वादेशस्ततोऽथ लुक् ।
तृतीये धातु-विहिताः प्रत्ययास्तद्विकारिणः ।।
तुर्ये पञ्चमकेऽध्याये शब्दतश्च समासगाः ।
षष्ठाद्ये द्वित्व-कार्याणि स्वर-सन्धिर्द्विके स्वरः ।।
तत्तृतीयाङ्घ्रिणोऽलुक् स्यात् पूर्वप्रकृति-विक्रियाः ।
दीर्घाधिकारश्च मस्तुर्याष्टादश-सूत्रगः ।। [६।४।१–६।४।१८ यावत्]
षष्ठान्ताङ्घ्रेः सप्तमान्तमङ्गाधिकृतिराचिता ।
तत्र दीर्घो न-लोपादिः षाष्ठाऽसिद्धिर्भसंज्ञकम् ।।
तत्रैव सप्तमाद्याङ्घ्रौ प्रत्ययादेशनुण्नुमः ।
सिज्वृद्धिश्चानिडिड्द्वयङ्घ्रौ युष्मदादिविधिस्तथा ।।
आदैजादिविधेः पश्चात्तृतीयाङ्घ्रौ गुणादयः ।
ह्रस्वाद्यास्तुर्यपादे स्युरन्तेऽप्याभ्यासिको विधिः ।।
अष्टमाद्ये पदद्वित्वं पदाधिकृति-वस्नसौ ।
ते-मयाऽदि पदस्येति पदादिति च संहिता ।।
पूर्वत्र यान्यसिद्धानि त्रिपाद्यां तान्यवेशयत् ।
एवमष्टकसंक्षेपः षत्वणत्वविधिस्तथा ।।
अष्टमस्य तृतीयेऽङ्घ्रौ तुर्ये चापि क्रमादिमौ ।
सर्गेतिवृत्तसंक्षेपः कियान् गद्यैः प्रदर्श्यते ।।

१४–चतुर्दशसर्गे–मायिककृत्त-(च्छिन्न-)राममूर्ध्ना सीता-विमोहनेऽसफलस्य रावणस्य रामयुद्धे सैन्यप्रेषणम् । तत उभयोः सैन्ययोः सन्नाह-वर्णनम् । तत उभयोर्युद्धवर्णनम् । तत्र रावणेर्नागपाशेन रामलक्ष्मणयोर्मूर्छनम्, सीता-विलापश्च । तत्रैव त्रिजटया बोधितायाः सीतायाः शान्तिः । गरुडागमनेन नागपाश-विमुक्तिश्च । ततो हनूमता धूम्राक्षवधः, अकम्पनस्यापि तेनैव वधः । ततः प्रहस्त-युद्ध-वर्णनानन्तरं नीलकर्तृक-प्रहस्तवधेनैव सर्ग-समाप्तिः । लिङ्विलासोऽत्र ।

१५–पञ्चदशे–प्रथमं कुम्भकर्णस्य जागरण-प्रयासः। उत्थितस्य तस्य रावणान्तिकं गतस्य नीत्युपदेशः । तच्छ्रुत्वा क्रुद्धेन रावणेन तस्य युद्धोत्साहवर्द्धनम् ।

तस्य युद्धक्षेत्रोपस्थितिः । तत्र घोरयुद्धं कृत्वा रामास्त्रेण हतस्स रावणं व्यलापयत् । ततोऽतिकायदेवान्तकादीनां रावणपुत्राणां रणप्रस्थानम् । तेषां विनाशे मेघनादस्य युद्धस्थले प्रवेशः । तेन ब्रह्मास्त्रद्वारा सर्वेऽपि मोहिताः ( मूर्च्छिताः कृताः ) । ततो हनूमच्छैलानीतौषधिभिः सर्वेषां मूर्छापगमः । ततः कुम्भनिकुम्भयोः कुम्भकर्णसुतयोर्वधेन सर्गसमाप्तिः । सर्गेऽस्मिन् लुङ्-विलसितम् ।

१६–षोडशे–सर्गोपान्तं प्रधान-राक्षसानां नामग्राहं रावणविलापः । तदन्ते रावणेर्मेघनादस्यागमनेन तद्वचसैव रावण-प्रोत्साहः, अत्रैव लृङ्-विलसितम् । तत्र विविधेऽर्थे लृट्-प्रयोग इति सर्ग-समाप्तिः ।

१७–सप्तदशे–प्रथमं युद्ध-प्रस्थानारम्भः । राक्षसानां विविध-मङ्गल-कृत्य-वर्णनम् । ततोऽपशकुन-प्रदर्शनम् । तान्यगणयतां यातुधानानामुत्साहवर्णनम् । तत्रैव कपिसैन्यानामपि युद्धवर्णनम् । ततो मेघनाद-कृत-मायिक-सीतावधं विलोक्य विषीदतां राघवाभ्यां सहैव कपि-सैन्यानां विभीषण-कर्तृक उद्बोधः । रावणेश्च निकुम्भिलागमन-निर्देशः । ततो विभीषणेन सह सर्वेषां तत्रैव गत्वा तत्कृत्ये विघ्नपात-धिया युद्धायाह्वानम् । तेन च विभीषणगर्धनं तस्यापि च तद्भर्त्सनम् । ततः परस्पर-युद्धे लक्ष्मण-कर्तृको रावणिशिरश्छेदः । ततो हि सीतां हन्तुमुद्यतस्य रावणस्य कर्मेदमनुचितमिति राक्षसैरेव निरोधः । ततो घोर-युद्धम् सैन्ययोरुभयोः । तत्रैवावशिष्टानां सेनापतीनां विनाशे रावणशक्तितो लक्ष्मणमूर्छा । हनूमदानीतौषध्यैव विशल्यता । ततोन्ते च घोर-युद्धानन्तरं रामकर्तृको रावणवध इति सर्गसमाप्तिः । अत्र सर्गे लङ्विलसितमिति सार्वधातुकलकारत्वाद् दशानामपि गणानां सविकरण-परस्मैपदात्मनेपदप्रत्ययेषु धातुरूपनिर्माणमावश्यकम् ।

१८–अष्टादशे सर्गे––रावण-मृत्यौ विभीषण-विलापः । तत्रैव मन्त्रावसरे प्रदत्तस्य स्वीयनीत्युपदेशस्यावधीरण-परिणाम एवायम् अनुमीयते । इति विचार्यैव मानवैः सर्वदा व्यवहरणीयमिति विभीषण-विलापदिशा काव्योपदेशः । रामस्यापि रावणाशोच्यत्वोक्त्या विभीषणं तदीयौर्ध्वकृत्ये नियुञ्जानस्य 'शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि' इति स्फारहृदयतया लोकशिक्षा । अवसाने च लङ्विलसितेनाष्टादश-सर्गसमाप्तिः ।

१९–ऊनविंशे सर्गे–राजप्रथानुसारं रावणशवनिर्हारविधानं सचिवेभ्य आदिश्य तदनुष्ठानानन्तरं सचिवाभ्यर्थनया स्वयमपि शोकापनोदानन्तरं श्रद्धया ज्येष्ठभ्रातुरौर्ध्वदैहिकं कृत्यानुष्ठानम् । तदनुष्ठाय रामपार्श्वमुपेताय विभीषणाय राम-

कर्तृको राज्यशासनप्रकारोपदेशः । ततः सामन्तशासकतया लङ्का-राज्याभिषेकोऽवसाने लिङ्विलसितेनोनविंशसर्गसमाप्तिः ।

२० विंशे सर्गे—सर्व-प्रथमं हनूमत्कर्तृकम् एव सीतायै रावणवधसूचनम् । ततो रामाज्ञया विभीषणानुगतायाः सीतायाः हैमीं शिविकामारुह्य रामसभाप्रवेशः । रामस्य च स्वशुद्धवंशमर्यादया सीतात्यागप्रस्तावः । सीतायाश्च वज्रधैर्येणाग्निवायुगगनजलभूमिदेवादीन् साक्षित्वेन स्वचारित्र्यशुद्धिमुद्घोषयन्त्याःसर्वजनसमक्षं समिद्धतमे चिताग्नौ प्रवेशः । इत्थं हि लोड्विलासेन विंशसर्गसमाप्तिर्ज्ञेया ।

२१ एकविंशे सर्गे—साक्षादग्निदेवो रक्ताम्बरो रक्तजटः सीतामुत्क्षिप्याग्निज्वालातो रामपार्श्वमुपेत्य विविधैर्हेतुभिस्सतर्कं रामोपालम्भं तनोति । ततश्च ब्रह्मा शङ्करादयश्च देवाः स्व-स्वानुरूप-शब्दराजिभिः 'सीताचारित्र्यशुद्धिप्रशंसनम् रामकृत्यसमर्थनञ्च विस्तीर्णं लङ्विलसितेन विदधति । अन्ते च मघवाऽमृतवर्षया पञ्चत्वमितानपि कपीन्द्रसैनिकाञ्जीवयन् देवैः सहैव यथागतं गच्छतीति सर्गसमाप्तिः ।

२२ द्वाविंशे सर्गे—रामो हनूमन्तं लुङ्विलासेनैव पूर्वं निजपुरीं गन्तुमुपदिशति । ततः सुग्रीवलङ्केशावपि तत्र गन्तुं शास्ति । तावपि रामादेशमभिनन्दयतः । ततो रात्रिमतिवाह्य प्रातः कुवेर-विमानं रावणापहृतं पुष्पकमारुह्य स-सैन्य-सीतोऽयोध्यां प्रस्थितो रामो मार्गे क्रमशः समुपस्थितानि प्रसिद्धस्थलानि सीतायै दर्शयन् वर्णयंश्च विविधैश्छन्दोभिरलंकारैश्चायोध्यां प्राप्य विमानादवतीर्णः सहर्षैर्वशिष्ठादिसन्त्रिगणैस्सपौरजानपदैर्भरतादिभ्रातृभिर्मातृभिश्चानुयातो नगरं प्रविवेश । कालेन विधिवच्च चतुर्दश-वर्षानन्तरं राज्याभिषेकमासाद्य भरतं युवराजं विधायाश्वमेधेनाग्निं जुहाव । अखिलां धरामविहत-कण्टकां शशास । इति चतुर्दशतो द्वाविंशतितम—सर्गान्तस्य संक्षेपः सर्वमपि पद्यैर्गद्यैरध उपरि च संक्षिप्तं वैशिष्ट्यं महाकाव्यस्य सावधानेन परिशीलनीयमध्यायिभिरिति शिवम् ।

कण्ठस्थीकरणाय पद्यैरपीह तानि वृत्तानि संक्षिप्यन्ते । चतुर्दशे सर्गे—

तिङन्तकाण्डं तु चतुर्दशादि-द्वाविंशसर्गान्तमुपैति तत्र ।
लिटो विलासोऽस्ति चतुर्दशेऽस्मिन् सीताविमोहोऽपि च राममूर्च्छा ॥ १ ॥
युद्धे प्रहस्तादिबलाधिपानां दृढोद्यमश्चेन्द्रजितस्तथैव ।
रामादिबन्धोऽपि च नागपाशैः सीताविलापस्त्विह पुष्पकेऽस्ति ॥ २ ॥
तस्याः प्रबोधस्त्रिजटाप्रयत्नात् पाशाद्विमुक्तिर्गरुडस्मृतेश्च ।
प्रहस्तमृत्युः कपिनीलहस्ताच्चतुर्दशस्यास्य समाप्तिरित्थम् ॥ ३ ॥

**पञ्चदशे सर्गे—**

विभाति लुङ् पञ्चदशेऽथ सर्गे यत्नेन जागर्ति स कुम्भकर्णः ।
प्रयाति मृत्युं सुचिरं प्रयुध्याप्यन्ते स वै रामशरप्रहारात् ॥ ४ ॥
ततो दशास्यो विलपत्यजस्रं सुतास्तदीयाः प्रधने प्रयान्ति ।
तेषां वधे तत्सुत-मेघनादो व्यामूमुहद् ब्रह्मवरेण सर्वान् ॥ ५ ॥
हनूमदानीत-महौषधीभिः सञ्जीवनीभिः कपयोऽप्यजीवन् ।
सर्गोऽन्तमैत् कुम्भनिकुम्भमृत्यो रात्रिञ्चराणां समतायि शोकः ॥ ६ ॥

**षोडशे सर्गे—**

लटो विलासोऽप्यथ षोडशेऽस्मिन्मुहुर्मुहू रोदिति राक्षसेन्द्रः ।
तत्रागतस्येन्द्रजितो दृढोक्तेरुत्साहमासाद्य भवत्यशोकः ॥ ७ ॥

**सप्तदशे सर्गे—**

विभाति लङ् सप्तदशेऽथ सर्गे स रावणिर्याति रणेऽत्र योद्धुम् ।
मायामयीं कृन्तति तत्र सीतां हनूमदादीन् व्यथितान् करोति ॥ ८ ॥
निकुम्भिलामेत्य करोति यागं विभीषणप्रेरणयेह विघ्नम् ।
उद्भाव्य तं हन्ति च लक्ष्मणो द्राक् ततो ज्वलद्रावणशक्तिविद्धः ॥ ९ ॥
अयं पुनर्जीवति रावणस्तु मृत्युं समायाति स रामबाणात् ।
इन्द्रार्पिताद्दैवबलाभिपन्नात् सर्गोऽन्तमैद्रामबलप्रहर्षात् ॥ १० ॥
लङः पदानीह गणप्रभेदाद् दशप्रकाराणि शबादिभेदात् ।

**अष्टादशाद्द्वाविंशान्तसर्गाणामितिवृत्तं—**

अष्टादशेऽप्यस्ति लटो विलासो विभीषणो रोदिति बन्धुशोकात् ॥ ११ ॥
विधिर्लिङाशीस्तत ऊनविंशे रामाज्ञया रावण-देह-दाहः ।
त्यागोद्यतं राममुवाच सीता विंशेऽपि सर्गे बहु लोड्-विलासम् ॥ १२ ॥
अग्न्यादि-देवोक्तिरथैकविंशे सर्गेऽपि सीताग्नि-परीक्षया लृङ् ।
द्वाविंशसर्गेऽस्ति लुटो विलासो वक्तीह रामो हनुमन्तमादौ ॥ १३ ॥

( वंशस्थेन )

कपीश-लंकेश्वर-तुष्टिदस्ततः स-सीत-रामोऽप्युपविश्य पुष्पके ।
त्वरायमाणो भरतप्रतीक्षया स्वराजधानी-गमने मनो दधे ॥ १४ ॥

( शालिन्या )

याने तस्मिञ्जानकीं दिव्यरूपां, देशान् सर्वान् दर्शयन् रामचन्द्रः ।
पौरैर्भृत्यैर्मातृभिर्हर्षभृद्भिः स्वं सम्प्राप्तं भ्रातरं स्वाससञ्ज ॥ १५ ॥

( द्रुतविलम्बितेन गायन् )

**अथ स सम्भ्रमपौरजनावृतो भरत-पाणि-धृतोज्ज्वल-चामरः ।**
**गुरुजनद्विजवन्द्यभिनन्दितः प्रविशति स्म पुरं रघुनन्दनः ॥ १६ ॥**

( सुन्दरीछन्दसा )

**प्रविधाय धृतिं परां जनानां**
**युवराजं भरतं ततोऽभिषिच्य ।**
**जघटे तुरगाध्वरेण यष्टुं**
**कृत-सम्भार-विधिः पतिः प्रजानाम् ॥ १७ ॥**

**छात्रा अनेन विधिना मृदु भट्टिकाव्यं,**
**पाणिन्युपज्ञमिदमष्टकमाश्रयन्तः ।**
**सम्यक् प्रशील्य समवाप्तविशिष्टबोधा**
**भूत्वाऽथ शाब्दिकवरा ददतां परीक्षाम् ॥ १८ ॥**

## अथ परीक्षोपयोगी चतुर्दशसर्गोपक्रमः—

**योऽपाययत् पाणिनिशब्दवारिधेः,**
**पदाऽमृतं रामकथाऽप्लुतं कविः ।**
**सोऽयं महाशाब्दिकभट्टिकाव्यकृत्,**
**सदाभिवन्द्यः कविभिश्च शाब्दिकैः ॥**

**न प्राप्यते भट्टिकवेर्विमर्शो यः पूरयेत्पाठकहृत्पिपासाम् ।**
**तत्पूर्तये शम्भुवरप्रसादात् सम्बध्यते काव्यविमर्शिकेयम् ॥**

सर्गेऽस्मिन् लिड्विलासः कविना व्याकरणदृष्ट्या निबद्ध इति तस्यैव लकारस्य रूपाणि परस्मैपदे आत्मनेपदे चोभयवाच्ये कर्तृकर्मरूपे सन्ति । तेषां सिद्धये सरलः प्रकारः पूर्वमेव प्रदर्श्यते । एतज्ज्ञानेनैव सर्वेषामपि लिट्लकार-प्रयोगाणाम् सिद्धिर्हस्तगता स्यात् । नास्ति दुरूहस्यापि लिटो लस्य प्रतिपद्यं प्रयोग-साधन-प्रयोजनम् ।

**लिटः प्रत्ययाः परस्मैपदे—** **आत्मनेपदे——**

| | ए० व० | द्वि० | बहु० | | ए० व० | द्वि० | बहु० |
|---|---|---|---|---|---|---|---|
| प्र०पु० | अ ( णल् ) | अतुः | उः | प० पु० | ए | आते | इरे |
| म०पु० | थ ( थल् ) | अथुः | अ | म० पु० | से | आथे | ध्वे |
| उ०पु० | अ ( णल् ) | व | म | उ० पु० | ए | वहे | महे |

अत्रेट्-प्रत्ययाः थ, व, म, से, ध्वे, वहे, महे इति सप्तैव । अत्रानुगमधिया १–अजन्ताः २–हलन्ता इति द्विधा धातवो भवन्ति । अजन्तेष्वपि एजन्ता धातवः 'आदेच उपदेशेऽशिति ६।१।४५' इति सूत्रबलाद् आर्द्धधातुकलकारेषु आदन्ता भवन्ति । तेषामुभयेषामपि अजन्तानां हलन्तधातूनां अदुपधानां लिटि प्रथमपुरुषे, उत्तमपुरुषे च णलि वृद्धिकार्यम् । ( तत्राप्युत्तमपुरुषे ) णलो वैकल्पिकणित्वात् पक्षे अदुपधभिन्नानाम् इगुपधानामित्यर्थः गुणकार्यम् । थलि च गुणकार्यमेव । अन्येषामवशिष्टानां पञ्चदशानामपि अपित्प्रत्ययानाम् 'असंयोगाल्लिट् कित् १।२।५' इति सूत्रबलात् कित्वात् तत्र गुणाभावः । थ, व, म, से, ध्वे वहे, महे, इति सप्तसु इटोऽपि अनुगमपद्यम् ।

ज्ञातव्यमवश्यम्—

'अजन्तोऽकारवान् वा यस्तास्यनिड् थलि वेडयम् ।
ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत् ॥

स्पष्टार्थता—

यः अजन्तः अकारवान् वा धातुः तासि प्रत्यये (लुटि) अनिट् अस्ति, अयमेव धातुः थलि प्रत्यये वेट् (वैकल्पिकेट्) भवेत् (तस्य थलि विकल्पेन इट् स्यादित्यर्थः )। ईदृक् तासि प्रत्यये (लुटि) अनिट् ऋदन्तो धातुः थलि नित्यम् अनिट् भवेत् । (तस्य थलि इड् भवेदेव नहीत्यर्थः)। क्राद्यन्यो धातुः 'कृ सृ भृ वृ स्तु द्रु स्रु श्रु' इत्यष्ट-धातुभिन्नः सर्वोऽपि सेट् अनिट् वा धातुः लिटि अवशिष्टप्रत्ययेषु कित्सु (व, म, से, ध्वे, वहे, महे इति षट्सु) सेट् भवेद् (नित्यमिट्शाली स्यादित्यर्थः )। इयं कारिका अधस्तनसूत्राणामाशयं गृहीत्वा निर्मितास्ति । तथाहि– 'एकाच उपदेशेऽनुदात्तात् ७।२।१०' 'कृ-सृ-भृ-वृ-स्तु-द्रु-स्रु-श्रुवो लिटि ७।२।१३' 'आर्द्धधातुकस्येड्वलादेः ७।२।३५' 'अचस्तास्वत्थल्यनिटो नित्यम् ७।२।६१ 'उपदेशेऽत्वतः ७।२।६२' 'ऋतो भारद्वाजस्य ७।२।६३' इति षट् सूत्राणि सम्यगभ्यस्यानि।

अत्र प्रथमम् आदन्तधातूनां रूपाणि प्रदर्श्यन्ते । समाधिना बोध्यम् इदम् । लिटि [1]द्वित्वमभ्यासकार्यन्तु[2] सामान्यं कृत्यम् । आदन्तधातौ तु 'आत औ णलः

---

टिप्पणी—( १ ) द्वित्वसूत्राणि—'एकाचो द्वे प्रथमस्य ६।१।१' 'अजादेर्द्वितीयस्य २, 'नन्द्राः संयोगादयः ३' 'पूर्वोऽभ्यासः ४' 'उभे अभ्यस्तम् ५' 'जक्षित्यादयः षट् ६' 'लिटि धातोरनभ्यासस्य ८' 'परोक्षे लिट् ३।२।११५' इति ।

( २ ) अभ्यासकार्ये 'अत्र लोपोऽभ्यासस्य ७।४।५८' इत्यारभ्य 'ह्रस्वः ५९' 'हलादिः शेषः ६०' 'शर्पूर्वाः खयः ६१' 'कुहोश्चुः ६२' 'उरत् ६६' । 'भवतेरः ७३' इत्यादि सप्तमाध्यायचतुर्थपादसूत्राणामुपयोगः ।

७।१।३४' 'आतो लोप इटि च ६।४।६४' 'थलि च सेटि ६।४।१२१' 'णलुत्तमो वा ७-१-९१' 'वृद्धिरेचि ६।१।८८' इति विशेषसूत्राणि। अनेन अनुगमेन आदन्त-धातु-रूपाणि ज्ञेयानि। यथा कर्तृवाच्ये—पपौ पपतुः पपुः। पपिथ–पपाथ पपथुः पप। पपौ पपिव पपिम। कर्मवाच्ये—पपे पपाते पपिरे। पपिषे पपाथे पपिध्वे। पपे पपिवहे पपिमहे।

इगन्तानां धातूनां प्रथम-णलि वृद्धिः। अतश्च आय् आव् इति यथाप्राप्तम् भवतः। ऋतस्तु आर् वृद्धिः। उत्तम-णलि तु पाक्षिकौ वृद्धिगुणौ। अतश्च आय् आव् अय् अव् इति यथाप्राप्तम् भवति। ऋतस्तु अर् गुणः। अन्यत्र थलि सर्वेषाम् गुणः। किति तु (१) असंयुक्तस्य इकारस्य ऋकारस्य च यण् एव भवति। (२) संयुक्तेकारस्य (३) सर्वस्य चोकारस्य इयङ्-उवङौ भवतः। (४) संयुक्तस्य ऋकारस्य अर् गुणो जायते। क्रमेण उदाहरणानि कर्तृवाच्ये—(१) निनाय निन्यतुः[1] निन्युः। निनयिथ-निनेथ निन्यथुः निन्य। निनाय-निनय निन्यिव निन्यिम। कर्मणि—निन्ये निन्याते निन्यिरे। निन्यिषे निन्याथे निन्यिध्वे। निन्ये निन्यिवहे निन्यिमहे। कर्तरि—चकार चक्रतुः चक्रुः। चकर्थ चक्रथुः चक्र। चकार-चकर चकृव चकृम। कर्मणि—चक्रे चक्राते चक्रिरे। चकृषे चक्राथे चकृढ्वे[3]। चक्रे चकृवहे चकृमहे। (अत्र क्रादिनियमान्नेट्)। (ऋद्भिन्नस्य सेटोऽनिटश्च थलि वैशिष्टचम्, सेटो नित्यमिट्। अनिटस्तु वेट् इति विशेषः)।

(२) संयुक्तेकारस्य-क्षिधातोरनिटः—कर्तरि—चिक्षाय चिक्षियतुः[3] चिक्षियुः। चिक्षयिथ-चिक्षेथ चिक्षियथुः चिक्षिय। चिक्षाय-चिक्षय चिक्षियिव चिक्षियिम। श्रिञ् धातोः सेटः-कर्तरि—शिश्राय शिश्रियतुः शिश्रियुः। शिश्रयिथ शिश्रियथुः शिश्रिय। शिश्राय—शिश्रय शिश्रियिव शिश्रियिम। (कर्मणि-उभयोरेकविधमेव रूपम् थलोऽभावात्) चिक्षिये शिश्रिये इत्यादि। उपरि ये उभयपदिनो धातवः (णीञ् डुकृञ् श्रिञ्), तेषां कर्तरि आत्मनेपदेऽपि तान्येव रूपाणि ज्ञेयानि यानि कर्मवाच्ये निर्दिष्टानि।

(३) सर्वस्योकारस्येति—तत्रासंयुक्तस्यानिटः—कुधातोः—कर्तरि—चुकाव चुकुवतुः चुकुवुः। चुकविथ—चुकोथ चुकुवथुः चुकुव। चुकाव—चुकव चुकुविव चुकुविम। कर्मणि चुकुवे। असंयुक्तस्य सेटः युधातोः—युयाव युयुवतुः युयुवुः। युयविथ युयुवथुः युयुव। युयाव—युयव युयुविव युयुविम। कर्मणि—युयुवे इत्यादि।

---

१. 'एरनेकाचोऽसंयोगपूर्वस्य ६।४।८२'। २. 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६।४।७७'

३. 'इणः षीध्वंलुङ्लिटां धोऽङ्गात् ८।३।७८' इति ढत्वम्।

संयुक्तस्यानिटः ऋादेः श्रु धातोः–शुश्राव शुश्रुवतुः शुश्रुवुः। शुश्रोथ शुश्रुवथुः शुश्रुव। शुश्राव–शुश्रव शुश्रुव शुश्रुम। कर्मणि–शुश्रुवे।

ऋादिभिन्नस्यानिटः संयुक्तस्य ध्रु धातोः–दुध्राव दुध्रुवतुः दुध्रुवुः। दुध्रविथ–दुध्रोथ दुध्रुवथुः दुध्रुव। दुध्राव–दुध्रव दुध्रुविव दुध्रुविम। कर्मणि–दुध्रुवे।

ऋादिभिन्नस्य संयुक्तस्य सेटः क्षु धातोः–चुक्षाव चुक्षुवतुः चुक्षुवुः। चुक्षविथ चुक्षुवथुः चुक्षुव। चुक्षाव-चुक्षव चुक्षुविव चुक्षुविम। कर्मणि–चुक्षुवे (नात्र कर्मणि सेडनिटोर्भेदः)। (लिटि ऋादीनामष्टानां कुत्रापि नेट्। तद्भिन्नानामृतां थलि नेट्, वमयोरिट्। ऋद्भिन्नोऽगन्तानामनिटां वेट्, सेटां च नित्यमिट्। वमयोरात्मनेपदे च सर्वेषामेव ऋादिभिन्नानामिट्। इत्युपरि उदाहृतेषु द्रष्टव्यम्।)

(४) संयुक्तस्य ऋकारस्य स्मृ धातोः कर्तरि–सस्मार[1] सस्मरतुः सस्मरुः। सस्मर्थ सस्मरथुः सस्मर। सस्मार–सस्मर सस्मरिव सस्मरिम। कर्मणि–सस्मरे सस्मराते सस्मरिरे इत्यादि।

हलन्तेषु बहुविधा धातवः सन्ति। अदुपधाः, आदुपधाः, इगुपधाः, एजुपधाः, अकारवन्तः, आकारवन्तः, इग्वन्तः, एज्वन्तः इत्यादि। तत्र कियतामेव अदुपधादीनां विशेष-कार्य्यं भवतीति तदिह विवृणोमि। तथाहि अदुपधस्य णलि उपधावृद्धिः। उत्तम-णलि तु पाक्षिकी वृद्धिः। तस्यैव धातोः यदि अभ्यासे अक्षर-परिवर्तनं न भवति तदा किति थलि च सेटि एत्वाभ्यासलोपावपि भवतः, नान्यस्य। यथा—सेटः पठ धातोः, पच्धातोश्चानिटः कर्तरि–पपाठ पेठतुः पेठुः। पेठिथ पेठथुः पेठ। पपाठ–पपठ पेठिव पेठिम। पपाच पेचतुः पेचुः। पेचिथ–पपक्थ पेचथुः पेच। पपाच–पपच पेचिव पेचिम। कर्मणि–पेठे, पेचे।

अनिटः अभ्यासाक्षरपरिवर्तनशालिनस्तु। हन्—जघान जघ्नतुः जघ्नुः। जघनिथ–जघन्थ जघ्नथुः जघ्न। जघान–जघन जघ्निव जघ्निम। कर्मणि—जघ्ने। सेटः तथाभूतस्यैव—गदः कर्तरि–जगाद जगदतुः जगदुः। जगदिथ जगदथुः जगद। जगाद–जगद जगदिव जगदिम। कर्मणि–जगदे।

इगुपधानान्तु सेटामनिटां हलन्तानाम् द्वयोर्णलोः थलि च गुणोऽन्यत्र किति तु गुणाभावः। इट् तु सर्वत्र। सेटः चितः कर्तरि–चिचेत चिचिततुः चिचितुः। चिचेतिथ चिचितथुः चिचित। चिचेत चिचितिव चिचितिम। अनिटः रुध—

---

१. 'ऋतश्च संयोगादेर्गुणः ७।४।१०'। २. 'अत एकहल्मध्येऽनादेशादेर्लिटि ६।४ १२०'। ३. हो हन्तेर्ञ्णिन्नेषु ७।३।५४'। ४. 'गमहनजनखनघसां लोपः क्ङित्यनङि ६।४।९८'।

कर्तरि—रुरोध रुरुधतुः रुरुधुः । रुरोधिथ रुरुधथुः रुरुध । रुरोध रुरुधिव रुरुधिम । कर्मणि—-चिचिते, रुरुधे । अनिटः कृषः कर्त्तरि—चकर्ष चकृषतुः चकृषुः । चकर्षिथ चकृषथुः चकृष । चकर्ष चकृषिव चकृषिम । कर्मणि—चकृषे इत्यादि । सेटः वृषः—ववर्ष ववृषतुः ववृषुः । ववर्षिथ ववृषथुः ववृष । ववर्ष ववृषिव ववृषिम । कर्मणि—ववृषे इत्यादि । अन्येषां तु एजुपधादीनां केवलं लिटि अभ्यासकार्येण ‘एच इग्घ्रस्वादेशे १।१।४८’ इति एचः इगादेशः । अन्यत्र ह्रस्वमात्रम्, हलादिशेषकार्यमात्रम् च विशेषः ।

णिजादि प्रत्ययान्तधातूनाम्(णिच् सन् यङ् इत्यादि) अनेकाचाम् तथा कास् आस् दय् अय् भी ह्री भृ हुवाम् गुरुमताम् इजादीनाम् ऋच्छतिभिन्नानाम् आम्-प्रत्ययेन योगं विधाय तत्र ‘**अयामन्ताल्वाय्येत्न्विष्णुषु** ६।४।५५’ ‘**भी-ह्री-भृ-हुवां श्लुवच्च** ३।१।३९’ इत्यादि—विशेषकार्यानन्तरम् ‘**कृञ्चानुप्रयुज्यते लिटि** ३।१।४०’ इति कृ भू अस् इति धातुत्रयस्य सन्निविष्टस्य रूपाणि लिङन्तानि निर्मातव्यानि। तत्र कृञस्तु ‘**आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य** १।३।६३’ इति सूत्रबलाद् आमन्तधातुवदात्मनेपदपरस्मैपदादि-प्रयोगः । अस्भुवोस्तु सर्वथा परस्मैपदमेवेति विशेषः ।

तत्र णिजन्तस्य चोरेः कर्तरि—चोरयाञ्चकार चोरयाञ्चक्रतुः इत्यादि। ‘**णिचश्च** १।३।७४’ इति सूत्रबलात् णिजन्तधातूनामुभयपदित्वात् कृञोऽपि तथा—चोरयाञ्चक्रे चोरयाञ्चक्राते इत्यादि। कर्मण्यपि केवलमात्मनेपदरूपाणि। अस्भुवोः चोरयामास चोरयामासतुः इत्यादि (अस्विधानारम्भ—सामर्थ्यान्न ‘अस्तेर्भूः २।४।५२’ इति भूरादेशः), चोरयाम्बभूव चोरयाम्बभूवतुः इत्यादि (परस्मैपदमात्रम् अनयोः)। एवं हि सन्नन्तानां यङन्तानां कास्दयायासामिजादीनां गुरुमतां भीह्रीभृहुवामुषादीनामनेकाचां च[1] स्वबुद्ध्यात्मनेपद-परस्मैपदान्तानि कर्तरि रूपाणि ज्ञेयानि । कर्मणि तु सर्वेषामात्मनेपदान्तान्येव रूपाणि—चोरयामासे, चोरयाम्बभूवे इत्यादि ।

अत्र बहूपयोगित्वात् भू-धातो रूपनिर्माणं निर्दिश्यते—भू-सत्तायाम् इति भ्वादि-गणस्थः सेट् धातुः परस्मैपदी। ‘भूवादयो धातवः १।३।१’ इति धातु-संज्ञायां, ‘**लः कर्मणि च भावे चाकर्मकेभ्यः** ३।४।६९’ इति कर्तरि लकार-विवक्षायां ‘**परोक्षे**

---

[1] ‘उषविदजागृभ्योऽन्यतरस्याम् ३।१।३८’ आमोऽमित्वम् विदेश्चादन्तत्वम् इत्यादि विशेषकार्याणि तु तत्तत्स्थले एव द्रष्टव्यानि । इह केवलं दिङ्निर्देशः क्रियते—उषाञ्चकार उषामास, उषाम्बभूव । उवोष ऊषतुः ऊषुः । विदाञ्चकार, विदामास, विदाम्बभूव ( आमोऽमित्वान्न ‘हलन्त्यम् १।३।३’ इति मलोपः । विदश्च अदन्तत्वान्न गुणः ) ।

लिट् ३।२।११५' इति लिट्। भू ल्लिट् इत्यत्र 'उपदेशेऽजनुनासिक इत् १।३।२' 'हलन्त्यम् १।३।३' एताभ्याम् इटोर्लोपः। भू + ल्[1]। 'लस्य ३।४।७७' 'तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-तातम्-झ-थासाथाम्-ध्वम्-इड्-वहि-महिङ् ३।४।७८' इत्यतः भू + तिप् इत्यादि १८ अष्टादशोपस्थितौ 'तङानावात्मनेपदम् १।४।१०० इति तङ आत्मनेपद-संज्ञायाम्, 'लः परस्मैपदम् १।४।९९' इति तिबादि-मसन्तस्य परस्मैपदसंज्ञायाम् 'तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः १।४।१०१' इति क्रमशः प्रथमादि-संज्ञायाम् 'तान्येक-वचन-द्विवचन-बहुवचनान्येकशः १-४-१०२', इति क्रमेणैक-वचनादि-संज्ञायाम् 'शेषे प्रथमः १।४।१०८' इति प्रथम-पुरुषोपस्थितौ, 'द्व्येकयोर्द्विवचनैकवचने १।४।२२' इति तिप उपस्थितौ 'लिट् च ३।४।११५' इति आर्द्धधातुकतया विकरणाभावे भू + तिप् इत्यत्र 'परस्मैपदानां णलतुसुस्थल-थुसणल्वमाः ३।४।८२' इति 'अनेकाल्शित्सर्वस्य १।१।५५ इति सर्वादेशे भू + णल् इति स्थितौ क्रमेण यण् वृद्ध्योर्निरासे, वुकि, द्वित्वादिकार्ये बभूव बभूवतुः बभूवुः। बभूविथ बभूवथुः बभूव। बभूव बभूविव बभूविम इत्यादि रूपाणि लिटि साध्यानि।

सन्धीनां प्रयोग-साधने सदुपयोगाय सन्धि-पद्यानि घोष्याणि—

## अच्-सन्धिः

अकोऽकि दीर्घसन्धिमाहुराद् गुणो भवेदिकि,
त्ववर्ण एचि वृद्धिमेत्विको यणच्ययादयः।
स्युरेच एङ एत्यति प्रपूर्वता पदान्तगात्,
सदा द्वितीयमीत्व-मूत्व-मेत्व-मेति नान्यताम् ॥ १ ॥

## हल्-सन्धिः

सतू शचू षटू समेत्य तत्सवर्णतामितः,
पदान्तझल् तु जश् सदा स चर्खरि प्रजायते।
स नम् ञमि प्रयाति वा लघोः परोऽचि ङम् तदा,
द्विरेति वा पदान्त-झय्-परोऽमि श-श्छकारताम् ॥ २ ॥

---

[1] लस्य ३।४।७७ इतिसूत्रस्य उच्चारणसामर्थ्यात् नात्र 'लशक्वतद्धिते' १।३।८ इति लस्येत्संज्ञा।

पदान्त-झय्-परो ह एति वा पुरः सवर्णतां,
लघुं तुगेति सन्धिगश्छकारवर्णके परे ।
तवर्ग एति जे परे लकारतामिति ध्रुवम्,
स्वनुस्वरंस्त्रयं समेति नः सवणतश्छवि ॥ ३ ॥
नमौ पदस्य मध्यगावनुस्वरौ परे झलि,
त्वनुस्वरो ययि ध्रुवं सवर्णतां स विन्दते ।
म आप्त्वनुस्वरत्वमेति हल्परः पदान्तगः,
स वैत्यनुस्वरः पदान्तगः सवर्णतां ययि ॥ ४ ॥

## विसर्ग-सन्धिः

कखो≍पफोर्विसर्ग एति वार्द्धतां स वा शरि
च्छवि त्रयं तथा समेति तस्य वर्णसाम्यतः ।
अतोऽति रुत्वमुत्वमेत्यतो हशीदमेव हि
त्ववर्णतोऽसि रुत्वमेति लोपगां यकारताम् ॥ ५ ॥

## अपवादपद्यम्

स एष एत आलपरौ विसर्गशून्यतां सदा
रि रश्च लोपमेति तत्पुरोऽण्समेति दीर्घतांम् ।
सुबुद्धिभिः सुपाठकैः स्वसन्धिरोगनाशकैः
समग्रसन्धिरुच्यते रसैर्हि पञ्चचामरैः ॥ ६ ॥

## ( द्वाभ्यामेव पद्याभ्यां सन्धि-संक्षेपः )

स्थानयत्नैर्हलां सन्धिराधीयताम्, स्थान-मात्र-प्रभावादचां सन्धयः ।
झश्खरोर्भेदतः स्यात् स वैसर्गिको, रुर्भवेल्लोपभृद् योऽप्यवर्णादशि ॥
हश्यति स्यादतोऽरुः स उः सन्धिगः, स्थान-साम्येन खर्षु व्यवस्था मता ।
आलि चैषोऽपि सोऽयं विसर्गप्रहृद्, रोरि लोपे पुरोऽण् दीर्घतां विन्दते ॥

इत्येवं मनोयोगेन भट्टि-महाकाव्य-शास्त्रं पठन्तः छात्राः व्याकरणे साहित्ये महाविद्वांसः स्युरिति नास्ति सन्देहः ।

गुरुपूर्णिमा }
२०३४ वै० } डॉ० श्रीगोपालशास्त्री ( दर्शनकेशरी )

# 'काव्यशास्त्र' का विकास एवं परम्परा

संस्कृत वाङ्मयमें काव्यके माध्यमसे शास्त्रीय पदार्थोंका निर्वचन करनेकी परम्परा प्राचीन कालसे चली आ रही है। रामायण एवं महाभारतमें प्रसङ्गवश दार्शनिक पदार्थोंका निर्वचन विद्यमान है। इसी प्रकार अश्वघोषने भी अपने दोनों ग्रन्थों बुद्धचरित एवं सौन्दरनन्दको बौद्धदर्शनका परिचय देने हेतु माध्यम बनाया है। इसी परम्पराको परिष्कृत एवम् उज्जीवित रखनेके लिए व्याकरण-शिक्षणको सरल एवं रोचक बनानेकी दृष्टिसे संस्कृत-भाषाके अनेक कवियोंने व्याकरणात्मक-काव्योंकी रचना की है। इन कवियोंका प्रमुख उद्देश्य व्याकरणशास्त्रके नियमोंकी जटिलताको दूर कर सरल एवं बोधगम्य बनाना रहा है। संसारकी सभी प्राचीन एवम् अर्वाचीन भाषाओंमें व्याकरण-शिक्षणका समस्या व्याकरणकी दुरूहताके समान अद्यावधि जटिल बनी हुई है। पाश्चात्य शिक्षाविद् व्याकरणको काव्यसे सर्वथा दूर रखते हैं। उनकी सम्मतिमें व्याकरणकी शिक्षाका माध्यम गद्यात्मक भाषा ही हो सकती है, काव्य नहीं। वे उसका कारण यह बतलाते हैं कि व्याकरणके शिक्षणसे काव्यकी सरसता लुप्त हो जाती है। किन्तु संस्कृत-भाषामें इसके अपवादस्वरूप काव्यको व्याकरण-शिक्षणका माध्यम बनाकर एक अभिनव-शैलीका सर्जन किया गया। इन काव्योंको **क्षेमेन्द्र**ने अपने **सुवृत्ततिलक**में **काव्यशास्त्र**को संज्ञा दी है[1]। यह नाम ऐसे काव्योंके लिए सार्थक है, क्योंकि एक ओर तो इन काव्योंमें शास्त्रीय नियमोंका प्रयोगों द्वारा निर्वचन किया जाता है तो दूसरी ओर वास्तविक काव्यके गुणोंका समावेश भी किया गया है।

**काव्यशास्त्र**की परम्परामें **महाकवि भट्टि** सर्वाग्रणी माने जाते हैं। इनकी रचना **भट्टिकाव्य**के नामसे ही अधिक प्रसिद्ध है। इसका दूसरा नाम **रावण-वध** है। इस महाकाव्यकी रचना स्वयं ग्रन्थकारके अनुसार **श्रीधरसेन**के

---

[1] **शास्त्रं, काव्यं, शास्त्रकाव्यं, काव्यशास्त्रं** च भेदतः।
चतुष्प्रकारः प्रसरः सतां सारस्वतो मतः॥
**शास्त्रं** काव्यविदः प्राहुः सर्वकाव्याङ्गलक्षणम्।
**काव्यं** विशिष्टशब्दार्थसाहित्यसदलङ्कृति॥
**शास्त्रकाव्यं** चतुर्वर्गप्रायं सर्वोपदेशकृत्।
**भट्टि-भौमक-काव्यादि 'काव्यशास्त्रं'** प्रचक्षते॥ सुवृत्ततिलक ३।२,३,४।

राज्यकालमें सौराष्ट्रकी **वलभी** नगरीमें हुई ।[1] गुप्त-साम्राज्यके पतन होनेपर वलभीके नरेशोंने पण्डितोंको आश्रय दिया । यद्यपि वलभीमें श्रीधरसेन नामक चार नरेश हो चुके हैं तथापि अधिकतर विद्वानोंके मतानुसार **श्रीधरसेन द्वितीय** ( ५७१ ई० ) महाकवि **भट्टि**के आश्रयदाता थे । इसके अनुसार भट्टि-महाकाव्यका रचना-काल ५८८-८९ ई० के पूर्व माना जाता है । इसमें यह प्रमाण दिया जाता है कि श्रीधरसेन द्वितीयके द्वारा प्रसारित एक शिलालेखमें किसी **भट्टि** नामक विद्वान्को कुछ भूमिदान देनेका उल्लेख किया गया है । किन्तु ध्रुवसेन प्रथमके ताम्रपत्रोंमें राज्यके विरुद-वर्णन-प्रसङ्गमें **'दीनानाथोपजीव्यमानविभवः परममाहेश्वरः सेनापतिर्धरसेनः'** उल्लेख मिलता है । इसकी पुष्टि भट्टिकाव्यके अन्तिम पद्य द्वारा अभिव्यञ्जित होती है । उक्त पद्यमें राजा **श्रीधरसेनको 'प्रजानां क्षेमकरः'** उपाधिसे मण्डित किया गया है । तदनुसार अधिकतर विद्वान् अब **भट्टिको श्रीधरसेन प्रथम**–(लगभग ४६० ई०) का समकालीन मानते हैं ।

भट्टिके **रावण-वध** काव्यका आधार **वाल्मीकि रामायण** है । रामके जन्मसे लेकर रामके राज्याभिषेक तक रामायण-कथाको भट्टिने २२ सर्गोंमें निबद्ध किया है । भट्टिका ध्येय काव्यके इतिवृत्तपर विशेष ध्यान देना नहीं है, किन्तु व्याकरणसम्मत शुद्ध प्रयोगोंका निदर्शन करना है । महाकविने इन २२ सर्गोंको **चार** काण्डोंमें विभक्त किया है—( १ ) प्रकीर्णकाण्ड, ( २ ) अधिकार-काण्ड, ( ३ ) प्रसन्नकाण्ड तथा ( ४ ) तिङन्त काण्ड ।

( १ ) इनमेंसे प्रथम **पाँच सर्ग प्रकीर्णकाण्ड**के नामसे विख्यात हैं । इस काण्डमें रामजन्मसे लेकर रामप्रवास तथा सीताहरण तक कथा वर्णित है । व्याकरणके नियमोंकी दृष्टिसे प्रथम चार सर्ग योजनाबद्ध नहीं हैं । इस भागमें तथा प्रसन्नकाण्डमें भट्टिकी कवित्वशक्तिका अच्छा परिचय मिलता है । पञ्चम सर्गके अधिकतर पद्य प्रकीर्ण हैं । केवल दो स्थलोंपर क्रमशः 'ट' प्रत्यय ( टाधिकार ९७–१०० ) तथा **'आम्'** अधिकार ( १०४–१०७ ) के प्रयोगोंका संकेत मिलता है ।

( २ ) अग्रिम ६, ७, ८ तथा ९ सर्ग **अधिकारकाण्ड**के नामसे प्रख्यात हैं ।

[1] काव्यमिदं विहितं मया **वलभ्यां श्रीधरसेन**नरेन्द्रपालितायाम् ।
कीर्तिरतो भवतान्नृपस्य तस्य क्षेमकरः क्षितिपो यतः प्रजानाम् ॥
( भट्टिकाव्य २२।३५ )

इन चार सर्गोंमें सुग्रीवाभिषेक, सीतान्वेषण, अशोकवनिकाभङ्ग तथा मारुति-संयमकी कथा वर्णित है। इस भागमें भी अनेक पद्य प्रकीर्ण हैं। अधिकारकाण्डमें प्रमुख रूपसे क्रियाओंके प्रयोगसम्बन्धी नियमोंका विवरण प्रस्तुत किया गया है। निम्नलिखित विवरणसे यह बात स्पष्ट हो जायगी:—

| अधिकार | सर्ग | श्लोकसंख्या | पाणिनिसूत्र | सूत्रसंख्या |
|---|---|---|---|---|
| ट | ५ | ४ ( ९७–१०४ ) | ३-२-१६–३-२-२३ | ८ |
| आम् | ५ | ४ (१०४–१०७) | ३·१-३५–३·१-३९ | ५ |
| दुह्यादि | ६ | ३ ( ८–१० ) | १-४·५१ | १ |
| सिच् | ६ | २० ( १६–३५ ) | ३·१·४५–३-१·६६ | २१ |
| श्नम् | ६ | ५ ( ३५–३९ ) | ३-१-७८ | १ |
| कृत्य | ६ | २२ ( ४६–६७ ) | ३-१·९६-३-१-१३२ | ३७ |
| कृत् ( निरुपपद ) | ६ | १६ ( ७१–८६ ) | ३-१-१३२–३-१-१५० | १८ |
| कृत् ( सोपपद ) | ६ | ७ ( ८७–९३ ) | ३-२-१–३-२-१५ | १५ |
| खश् तथा खच् | ६ | १५ ( ९४–१०८ ) | ३-२-२८–३-२·४७ | २० |
| डा | ६ | ३ (१०९–१११) | ३-२-४८–३-२-५० | ३ |
| कृत् ( सोपपद ) | ६ | ३२ (११२–१४३) | ३·२-५१–३-२·१२६ | ७६ |
| कृत् (ताच्छीलक) | ७ | २७ ( १–२७ ) | ३-२-१३४–३-२·१७७ | ४४ |
| कृत् (निरधिकार) | ७ | ६ ( २८–३३ ) | ३-३·१–३-३-१७ | १६ |
| भावे | ७ | ५२ ( ३४–८५ ) | ३-३-१८–३-३-१२८ | १११ |
| स्त्रीलिङ्ग | ७ | ११ ( ६७–७७ ) | ३-३-९४–३-३-११२ | १९ |
| कृत्य-ल्युट् | ७ | ८ ( ७८–८५ ) | ३-३-११३=३-३·१२८ | १६ |
| णित् | ७ | ३ ( ९१–९३ ) | १-२-१–१-२·४ | ४ |
| कित् | ७ | १४ ( ९४–१०७ ) | १-२-५–१-२-२७ | २२ |
| आत्मनेपद | ८ | ४६ ( १–४९ ) | १-३-१२–१-३-७७ | ६६ |
| परस्मैपद | ८ | २१ ( ४९–६९ ) | १-३-७८–१-३-९३ | १६ |
| कारक | ८ | १५ ( ७०–८४ ) | १·४-२४–१-४-५४ | ३१ |
| कर्मप्रवचनीय | ८ | ९ ( ८५–९३ ) | १-४-८३–१-४-९८ | १८ |
| अनभिहित तथा विभक्ति | ८ | ३७ ( ९४–१३० ) | २·३·१–२-३-७३ | ७३ |
| सिचि वृद्धि | ९ | ४ ( ८–११ ) | ७-२-१–७-२-७ | ७ |
| इट् | ९ | ३५ ( २३–५७ ) | ७-२-३५–७-२-७८ | ४४ |

| | | | | |
|---|---|---|---|---|
| इट्प्रतिषेध | ९ | ११ ( १२–२२ ) | ७·२·८–७·२·३४ | २७ |
| सत्व | ९ | ९ ( ५८–६६ ) | ८-३-३४–८-३-४८ | १५ |
| षत्व | ९ | २५ ( ६७–९१ ) | ८-३-५५–८-३-११९ | ६५ |
| णत्व | ९ | १८ ( ९२–१०९ ) | ८-४·१–८-४-३९ | ३९ |

( ३ ) तीसरा **प्रसन्नकाण्ड** अलङ्कारशास्त्रसे सम्बद्ध है। अतः इस काण्डका नाम 'प्रसन्नकाण्ड' सर्वथा सार्थक है। इसके अन्तर्गत १०,११,१२ तथा १३ सर्ग आते हैं। दशम सर्गमें **शब्दालङ्कारों** एवम् **अर्थालङ्कारों**का सोदाहरण स्पष्टीकरण है। ११ वें तथा १२ वें सर्गमें क्रमशः **माधुर्य** तथा **भावुक**का विवेचन है। १३ वें सर्गमें **भाषासम**-नामक श्लेष-भेदका प्रदर्शन है।

( ४ ) चौथे **तिङन्त काण्डमें** यथानाम संस्कृत-व्याकरणके लौकिक ( वैदिक-रहित ) **नौ लकारों**का निरूपण है। इस प्रसङ्गमें १४ वें सर्गसे लेकर २२ वें सर्ग तक एक एक सर्गमें एक एक लकारका प्रायोगिक दिग्दर्शन है। निम्नलिखित चक्रसे यह स्पष्ट विदित हो जायगा—

| लकार | सर्ग | प्रयोग-संख्या |
|---|---|---|
| लिट् | १४ | ४३७ |
| लुङ् | १५ | ४१६ |
| लृट् | १६ | १११ |
| लङ् | १७ | ३४५ |
| लट् | १८ | १२६ |
| लिङ् | १९ | ७३ |
| लोट् | २० | ८४ |
| लृङ् | २१ | ३५ |
| लुट् | २२ | ३१ |

उपर्युक्त निर्वचनको देखनेसे यह निष्कर्ष निकलता है कि भट्टिने ( १ ) वैदिक प्रकरणको बिलकुल छोड़ दिया है। ( २ ) लौकिक प्रयोगोंमें भी लोकमें प्रचलित महत्त्वपूर्ण उदाहरणों तक ही उन्होंने अपने काव्यको सीमित रखा है। ( ३ ) इसी प्रकार उन्होंने सूत्रोंके प्रत्युदाहरणों एवं वार्तिकोंपर भी विचार नहीं किया है। ( ४ ) वैदिक स्वरोंके सूचक इत्संज्ञक-वर्णोंके उदाहरणोंको भी उन्होंने अपने काव्यमें स्थान नहीं दिया है। ( ५ ) इन बातोंके साथ ही संज्ञा तथा प्रत्याहारोंके सूत्रोंका निदर्शन न कर भट्टिने लाघव दिखाया

२१ वां सर्ग अपूर्ण है। उपान्त्य पृष्ठके १५०वें श्लोकके बाद अन्तिम पृष्ठ न होनेसे कुछ श्लोक उपलब्ध नहीं हैं। अन्तमें **पुष्पिका** देकर कविने स्वयम् अपना एवम् अपने आश्रयदाताका उल्लेख किया है। वह भी अपूर्ण है, जो इस प्रकार है—

**"इति श्री महाराजदेवीसिंहाज्ञानुवर्तिनः कविपण्डितापरनाम्नो मोहनभट्टस्य कृतौ आनन्दाङ्क पदसमुच्चये कंसवधे महाकाव्ये०"।**

इसके साथ ही सबके अन्तमें **मोहनभट्टने** अपने आश्रयदाताके पूर्वजोंका नामोल्लेख कर उनके पिता भारतसाह तक राजाओं की इस प्रकार गणना की है—**महीपाल–कर्णसहजाग्रदेव–राम–पृथ्वीराज–तमाल्ह–रामचन्द्र–अर्जुनदेव–मल्लखान–प्रतापरुद्र–मधुकरसाह**[1]–( १५५४-१५९२ ई० ओरछानरेश ) **रामसाह**[2]–( दक्षिणतटवर्ती शासकोंको आतङ्कित करनेवाला )–**संग्रामसिंह**[3]–**भारतसाह**[4]। तदनन्तर सर्वान्तमें अपने आश्रयदाता का उल्लेख कर अपनी कृतज्ञता प्रकट की है—

**"देवीसिंह[5] इति क्षितीशतिलकस्तस्याभवन्नन्दनः"।**

१. यत्पाणी नृहरेः सदैव चरणावानर्चतुः सादरं,
दाने चाङ्घ्रियुगं महीदिविषदां प्रक्षालयांचक्रतुः।
युद्धे चिक्षिपतुश्च मार्गणगणं हन्तुं परानीकिनीं,
त्रैलोक्यप्रथिताह्वयो **मधुकरो** राजा स यत्राभवत्॥
—सिंहसिद्धान्तसिन्धु–श्लो० ८।

२. रामास्त्रयो भक्तिभरेण तुष्टास्तस्मै ददुः स्वीयगुणान् समस्तान्।
लोकास्ततस्तं प्रथितप्रभावं **श्रीराम** इत्येव समाख्ययोचुः॥
—सिंहसिद्धान्तसिन्धु–श्लो० १२।

३. आसीत्तदीयतनयो विनयोपपन्नः स्वच्छाशयो बहुदयो विबुधव्रजेषु।
युद्धे निकाममभयो विनयेऽर्जितश्रीः संग्रामसाहिरिति भूमिपतिः प्रसिद्धः॥
—सिंहसिद्धान्तसिन्धु–श्लोक १४।

४. तस्यात्मजो बलरजोभररुद्धभानुर्दृप्तद्विषद्दलनतीव्रमदः कृशानुः।
अत्यद्भुतो गुणगणैः प्रथितो धरण्यां **श्रीभारतो** बहुलदानरतो बभूव॥
—सिंहसिद्धान्तसिन्धु–श्लोक १६।

५. आसते भुवि नृपाः सहस्रशो भारतात्मज न ते भवत्समाः।
नन्दने कति सन्ति शाखिनः कोऽपि कल्पतरुसन्निभः श्रुतः॥
—सिंहसिद्धान्तसिन्धु–श्लोक ३०।

यहीं पर पुस्तक खण्डित हो गई है।

**देवीसिंह** चन्देरी नरेश थे। इनका समय-निर्धारण करनेमें मतैक्य नहीं है। श्रीयुत एम० वी० गर्देके अनुसार देवीसिंहने १६५४-१६६३ ई० तक शासन किया। किन्तु इसके विपरीत 'इम्पीरियल गजेटियर' ( मध्यभारत खण्ड ) के अनुसार **देवीसिंह**को **औरंगजेब**ने सन् १६८० ई० में चन्देरीका शासक नियुक्ति किया था। इन दोनोंमें से प्रथम मत अधिक समीचीन प्रतीत होता है, क्योंकि इनके आश्रित[1] दूसरे विद्वान् **श्री शिवानन्द भट्टने** अपने ग्रन्थ **'सिंहसिद्धान्त-सिन्धु'** में देवीसिंहके चार पूर्वपुरुषोंका वर्णन कर अन्तमें देवीसिंहकी प्रशस्ति की है। इस ग्रन्थकी समाप्ति विक्रम सं० १७३१ तदनुसार १६७४ ई० में हुई। उस समय प्रकृत ग्रन्थकारके अनुसार **देवीसिंह** चन्देरीमें शासन कर रहे थे।[2]

यह महाकाव्य अष्टाध्यायीको अभिलक्षित कर प्रक्रियाग्रन्थोंकी रचना हो जानेके बाद रचा गया है। अतः इसका विषय-विभाजन तदनुसार सन्धिप्रकरणसे आरम्भ होकर कृदन्त-प्रकरणमें पर्यवसित होता है। भागवतसे कथानक लेकर कविने अपने उद्देश्यकी पूर्ति सुचारु रूपमें की है। महाकाव्योचित प्रसङ्गोंका वर्णन भी यथास्थान किया गया है। भाषाके लौकिक-पक्ष का निदर्शन होनेके कारण वैदिक-प्रक्रियाका न होना स्वतः सिद्ध है।

इन काव्यशास्त्रोंके अतिरिक्त संस्कृत साहित्यके इतिहास ग्रन्थोंमें अन्य काव्योंका भी उल्लेख मिलता है, जिनका वर्णन करना आवश्यक है। उनका विवरण इस प्रकार है—

( १ ) **दशाननवधकाव्यम्**—इसके रचयिता **योगीन्द्रनाथ** तर्कचूडामणि

---

[1] ज्येष्ठस्तस्य सुता जनोदितशिवानन्दाभिधानः क्षितौ,
श्रीविद्याचरणारविन्दयुगलध्यानैकतानोऽनिशम् ।
**देवीसिंह**नृपेण धर्मकलितस्वान्तेन सम्प्रार्थित-
स्तत्प्रीत्यै वितनोति धार्मिकजनश्रव्यं निबन्धोत्तमम् ॥
—सिंहसिद्धान्तसिन्धु-श्लोक ३६।

[2] तत्सूनुः परिपन्थिमाथिविलसद्वीरोऽतिधीरो रणे,
वल्गातुङ्गतुरङ्गनिष्ठुरखुरक्षुण्णक्षमामण्डलः ।
दानाम्भःशमितार्थिनैत्यदहनः ख्याताभिधानः क्षितौ,
**देवीसिंह** नरेश्वरो निरुपमो राजोत्तमो राजते ॥
—सिंहसिद्धान्तसिन्धु-श्लोक २२।

है। प्रकृत काव्य 'रावणार्जुनीयम्'की रीतिका अवलम्बन कर लिखा गया है। ( २ ) **लक्षणादर्श**—इसके रचयिता महापण्डित **दिवाकर** हैं। १४ सर्गों में निवद्ध इस रचनामें महाभारतकी कथाका आश्रय ले व्याकरणशास्त्रके नियमोंको स्पष्ट किया गया है। ( वैद्येश्वरके पुत्र **कवीन्द्राचार्य** भी **दिवाकर** नामसे विख्यात हुए हैं। इन्होंने **भारतामृतम्** ग्रन्थ २० सर्गोंमें लिखा है )। यह **विजयनगर**के **कृष्णार्य** नामक राजाके दरबारी कवि थे। ( २ ) **यदुवंशकाव्यम्**के रचयिता **काशीनाथ**ने यदुवंशका ( यादवों ) आख्यान प्रस्तुत करते हुए पाणिनीय-सूत्रोंके उदाहरण प्रस्तुत किये हैं। ( ४ ) **सुभद्राहरणम्**में ब्रह्मदत्तके पुत्र **नारायण**ने २० सर्गोंमें सुभद्राके साथ भगवान् कृष्णका विवाह-वर्णन करते हुए व्याकरणके उदाहरण प्रस्तुत किये हैं। ( ५ ) वर्तमान शताब्दीके मध्यमें **म० म० पं० देवीप्रसाद शुक्ल कविचक्रवर्ती**ने कौमुदीके क्रमको अभिलक्षित कर **पाणिनि-प्रकाशः** नामसे काव्यात्मक रचनाके कुछ अंश तत्कालीन **सुप्रभातम्** नामक संस्कृत-मासिक पत्रमें प्रकाशित करवाये थे। जिसमें उदाहरण द्वारा सूत्रोंकी सार्थकता बताई गई है। इसे व्याकरणात्मक काव्य तो नहीं कहा जा सकता, किन्तु कविताके माध्यमसे पाणिनिसूत्रोंकी व्याख्या कर उदाहरण प्रस्तुत किये गये हैं। ( ६ ) इसी क्रमको अभिलक्षित कर सिद्धान्तकौमुदीकी फक्किकाओं ( पङ्क्तियों—दुरूह स्थलों ) को काव्यबद्ध कर उसे सरल बनानेकी दिशामें **स्व० पण्डित केशवदत्त पाण्डेय,** साहित्याचार्यका नाम विशेषरूपसे उल्लेखनीय है। उनकी कुछ दुरूह पङ्क्तियोंकी काव्यमयी सरसता इस शताब्दीके मध्यमें प्रकाशित होने वाली सुप्रसिद्ध संस्कृत मासिक-पत्रिका **अमरभारती**में देखी जा सकती है। पण्डितजीने अपनी यह रचना अपने सहारनपुरस्थ मित्र पं० माधवप्रसादजीको दे दी थी।

व्याकरणात्मक-काव्योंकी उपयोगिता अनेक शताब्दियोंसे चली आरही है। भट्टिकाव्यका प्रचार पठन-पाठनमें अद्यावधि है। अध्येताओंको व्युत्पन्न बनानेके लिये साधु-शब्द-प्रयोग द्वारा व्यावहारिक ज्ञान प्रदान करनेमें इन ग्रन्थोंने बड़ी सहायता दी है। लगभग एक शताब्दी पूर्व संस्कृत-परीक्षाओंके अभ्युदय-कालमें भी इस बात पर ध्यान दिया गया था कि व्याकरणका व्यावहारिक-प्रशिक्षण अवश्य दिया जाय। मध्यम-परीक्षा तक जो छात्र सैद्धान्तिक नियमोंको जाननेमें कठिनाईका अनुभव करें, उन्हें **'काव्यशास्त्र'**के माध्यमसे व्याकरणका ज्ञान कराया जाय। इस हेतु व्याकरण-ग्रन्थके विकल्पमें **'भट्टिकाव्य'**का सन्निवेश किया

गया था। तदनुसार व्याकरण की शिक्षा किसी न किसी रूपमें आवश्यक थी। इतना ही नहीं इन ग्रन्थोंको पढ़ानेकी परम्परा भी रही है। प्राचीन गुरु धातु-जन्य रूपोंके आयामसे परिचित करानेके लिए छात्रोंको **'धातुकाव्य'** एवं **'कवि-रहस्य'** पढ़ाते रहे हैं। इस प्रकार व्याकरण एवं काव्यका एकत्र समावेश होनेके कारण इन ग्रन्थोंका समादर हुआ है। व्याकरणात्मक काव्योंके शब्दजन्य चमत्कार एवं प्रयोगसौष्ठवसे प्रभावित होकर वैयाकरणोंने अनेक प्रक्रियाग्रन्थोंमें उनके उद्धरण यथास्थान दिये हैं।

वस्तुतः ये सभी चमत्कारवादी कवि रहे हैं। कुछ आलोचक व्याकरणात्मक काव्योंपर कृत्रिमता और आडम्बरका आरोप लगाते हैं। किन्तु वस्तुस्थिति इसके विपरीत है। इन काव्योंमें 'सहृदय-हृदय-संवेद्य' काव्यके सभी लक्षण और गुण विद्यमान हैं। किन्तु उन्हें कवि-विशेष-प्रयोजनकी दृष्टिसे देखना चाहिये। एक तो इन कवियोंको अपने-अपने काव्योंके कथानकको मौलिक रूपमें प्रस्तुत करना था, दूसरे व्याकरणके जटिल नियमों और प्रयोगोंके उदाहरण प्रस्तुत करने थे। ऐसे नितान्त कठिन कार्यका निर्वाह इन काव्योंमें बड़ी मनोज्ञताके बीच प्राकृतिक दृश्योंके आकर्षक चित्र प्राञ्जल भाषामें अभिव्यक्त कर कवियोंने बड़ी योग्यता प्रदर्शित की है।

उपर्युक्त विवरणसे यह स्पष्ट होता है कि व्याकरण-शिक्षणको सरल बनानेकी दिशामें अनेक कवियोंने प्रयत्न किया है तथा वे इस कार्यमें सफल भी हुए हैं। इस अभिनव उपायने व्याकरणके प्रायोगिक शिक्षणको बड़ा सरल बना दिया है: इन ग्रन्थोंमें भी सर्वाधिक प्रचार भट्टिकाव्यका ही है।

—**गोपालदत्त पाण्डेय**

॥ श्रीः ॥

# भट्टिमहाकाव्यम्

## काव्य-मर्मविमर्शिकाख्यटीकोपेतम्

## अथ चतुर्दशः सर्गः

( सुप्तिङ् व्युत्पत्तौ यत्सौष्ठवं तदपि काव्याङ्गमेव । अतो हि १०-१३ सर्ग-चतुष्टयस्थप्रसन्नकाण्डस्यानन्तरं तिङन्त-काण्डं शब्दलक्षण-प्रयोगार्थं कथ्यते । लकाराश्च १० दशैव भाषायां प्रयुज्यन्ते, लेटो वेदविषयत्वात् । तत्रापीह विधिलिङाशीर्लिङोरेकस्मिन्नेवोनविंशे सर्गे विलसितत्वात् नवसर्गैरेव दशलकार-रूप-विलासः । चतुर्दशे अस्मिन् लिड्-विलासः । तस्य सर्वोऽपि साधनप्रकारः पूर्वमुक्त एवेति केवलमन्वयादि-विषया इह विवृताः स्युः।) सम्प्रति लङ्कानगर्य्याम् युद्धोपक्रममाख्याति कविः—पूर्वं रावणसैन्य-सञ्चारमाह—

**ततो दशाऽऽस्यः स्मर-विह्वलाऽऽत्मा चार-प्रकाशीकृत-शत्रु-शक्तिः ।**
**विमोह्य माया-मय-राम-मूर्ध्ना सीतामनीकं प्रजिघाय योद्धुम् ॥ १ ॥**

**अन्वयः**—तत स्मर-विह्वलात्मा चार-प्रकाशीकृत-शत्रुशक्तिः दशास्यः मायामयराम-मूर्ध्ना सीताम् विमोह्य योद्धुम् प्रजिघाय ।

**हिन्दी**—इसके पश्चात् ( रामचन्द्रकी सेना जब समुद्रपर पुल बनाकर उसके द्वारा लङ्कामें उतर गई ) कामवश बेचैन होकर अपने गुप्तचरोंके द्वारा शत्रु-शक्तिका प्रकाश पाजानेपर रावणने मायाके द्वारा बनाये गये रामके कटे शिरसे सीताको मूर्छित कर युद्ध करनेके लिये सेना भेजी ।

**व्याख्या**—ततः समुद्रोत्तरणानन्तरम् ( सेतुबन्धद्वारा ), स्मरविह्वलात्मा कामवशीकृतकायः, चार-प्रकाशीकृतशत्रुशक्तिः गुप्तचर-ज्ञात-रिपु-प्रभावः, दशास्यः रावणः, मायामयराममूर्ध्ना मायिक-राघव-शिरसा (छिन्नेन),सीतां जानकीं, विमोह्य मूर्छयित्वा, योद्धुम् युद्धं कर्तुम्, अनीकम् सैन्यम्, प्रजिघाय प्रेषयामास ।

सीताविमोहने स्मरविह्वलत्वस्य, सैन्यप्रेषणे चारप्रकाशीकृतशत्रुशक्तित्वस्य हेतोरुपादानात् काव्यलिङ्गमलङ्कार इत्यग्रे स्वयमलङ्कारा ऊह्याः । प्रायः क्रियादीपकबाहुल्यमत्र । विशेषदृष्ट्या 'अष्टाध्यायी जगन्माताऽमरकोशो जगत्पिता । भट्टिकाव्यं गणेशश्च त्रयीयं शुभदास्तु वः ॥' 'व्याकृत्या कोशवृत्ताभ्यामलङ्कृत्या रसेन च । पञ्चकेनान्वितं भव्यं भट्टिकाव्यं विराजते ॥' इति सर्वथा चिन्तनीयम् ।

**समासः**—स्मरेण विह्वल आत्मा यस्य स इति बहुव्रीहिः । चारेण प्रकाशीकृता शत्रु-शक्तिः यस्मै स इत्यत्रापि बहुव्रीहिः। रामस्य मूर्द्धेति—तत्पुरुषसमासानन्तरम् मायामयश्चासौ राममूर्द्धेति कर्मधारयः । दश आस्यानि यस्यासौ बहुव्रीहिः ।

**कोशः**—'वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम्' इत्यमरः ।

**तद्धितः**—'तत आगतः ४।३।७४' इत्यधिकारे मायात आगतः मायामय इति विगृह्य '**मयट् च ४।३।८२**' इति मयटि मायामयः इति ।

**कृदन्तः**—युध सम्प्रहारे दैवादिकात् तुमुन् । '**झषस्तथोर्धोऽधः ८।२।४०**' इति धत्वे '**झलां जश् झशि ८।४।५३**' इति दत्वम् इति योद्धुम् रूपम् ।

**तिङन्तः**—'हेरचङि ७।३।५६' इति विशेषसूत्रबलात् कुत्वे 'हि गतौ' इति स्वादिस्थ-धातुरूपम् पूर्वोक्तदिशा साधनीयम् ।

**वाच्यपरिवर्तनम्**—स्मरविह्वलात्मना चारप्रकाशीकृतशत्रुशक्तिना दशास्येन अनीकम् प्रजिघ्ये ।

**शिक्षा**—कामान्धो हिताहितं न पश्यति । रावणस्य यथा सीतावशीकारे प्रबलो यत्नो न तथा स्वहित-चिन्तायाम्[१] ॥ १ ॥

---

[१] मायाकल्पितं छिन्नं रामशिरो यदाऽशोकोद्याने सीताऽग्रेऽपतत् तदा सा मूर्च्छिताऽभूत् । ततस्त्रिजटोपचारात् प्रकृतिस्थाऽजनि । यदा हि त्रिजटा मायिकच्छिन्नशिरसो नेत्रपलकस्फुरणादि चिह्नं दर्शितवती तदा सीता नेदं रामशिरो मायिकमेतत् इति तथ्यज्ञानाच्छान्ता जातेति ( अद्भुत-रामायणम् ) । अन्यत्र सर्गे कुत्र लिटः प्रयोगा इति सर्गसंख्याग्रे निर्देश-( डैस- ) चिह्नं दत्त्वा श्लोकसंख्यायां स्वल्पविराम( कामा, )चिह्नेन निर्दिश्यते—१—४, ९, २०, २३-२४, २७ ॥ २—१-९, १५, १७-२०, २३-२५, २९-३२, ३६-३७, ३९, ४७, ५१, ५४ ॥ ३-२, ५-६, ८, १०-१२, १८-१९, २४, २७-२८, ३१, ३५, ३७-४३, ४९, ५६ ॥ ४—२-३, ७-१२, १५-१९, २१, ३१, ४०, ४२-४५ ॥ ५—१३-१५, ३०, ३३, ४३, ४८, ५०-५१, ५९, ६१-६४, ७६, ९४-९६, १०२-१०७, ( १०४-पद्यारब्धो हि आमधिकारः षष्ठसर्गस्य चतुर्थ ४ पद्यावधि गच्छति ) ६—१-८, ११, ३५, ४४-४७, ५९-६१, ६३, ७२, ८७, ८९, ९९, १०४, १२३-१२४, १३४, १३६, १४०-१४२ ॥ ७—१-४, ३०-३१, ५०, ५२-५८, ६५, ६७, ७१-७२, ७६, ८५, ८७ ॥ ८-४, ९, २०, ३७-३८, ४५, ६५,

लिङ्विलास-प्रारब्धिरिह तु उपजातिच्छन्दसा कृताग्रेऽनुष्टुभा वृत्तमाख्याति--

**कम्बूनथ समादध्मुः, कोणैर् भेर्यो निजघ्निरे ।**
**वेणून् पुपूरिरे, गुञ्जा जुगुञ्जुः कर-घट्टिताः ॥ २ ॥**

**अन्वयः**—अथ (रावणसैनिकाः) कम्बून् समादध्मुः, कोणैः भेर्यः निजघ्निरे, वेणून् पुपूरिरे, ( तेषाम् ) करघट्टिता गुञ्जा जुगुञ्जुः ।

**हिन्दी**–युद्धार्थ रावणकी आज्ञा पाकर सैनिकोंने शंख बजाये, डण्डोंसे नगाड़े पीटने लगे, वंशी बजाने लगे । अङ्गुलियोंकी रगड़ पाकर युद्धके बाजे बजने लगे ।

**व्याख्या**—अथ युद्धार्थं रावणाज्ञामासाद्य, सैनिकाः वीराः, कम्बून् शंखान्, समादध्मुः शब्दयामासुः । कोणैः काष्ठमयैर्वाद्यवादनैः, भेर्यः दुन्दुभयः, निजघ्निरे आहता बभूवुः । वेणून् वंशान्, पुपूरिरे मुखमारुता पूरितवन्तः । करघट्टिताः अङ्गुलिघृष्टाः, गुञ्जाः करध्वनिवाद्यानि, जुगुञ्जुः शब्दितवत्यः ।

**कोशः**—'कम्बुर्ना वलये शखे' । 'कोणो वीणादिवादनम्' । 'भेरी स्त्री दुन्दुभिः पुमान्' । 'गुञ्जा च काकचिञ्चायां पटहे च कलध्वनौ'–इत्यमरः । 'वंशः संघेऽन्वये वेणौ पृष्ठाद्यवयवेऽपि च'–इति हैमः ।

**तिङन्तः**—ध्मा शब्दाग्निसयोगयोः, गुजि अव्यक्ते शब्दे ( भ्वादी ) । हन हिंसागत्योः ( अदादिः ) । पूरी आप्यायने ( दिवादिः ) ।

**वाच्यपरिवर्तनम्**–कर्मणि—कम्बवः समादध्मिरे । कर्तरि–भेरीः निजघ्नुः सैनिकाः । वेणवः पुपूरिरे सैनिकैः । करघट्टिताभिः गुञ्जाभिः जुगुञ्जे ॥ २ ॥

रणोद्योगमेव त्रयोदशपद्यान्तमाह—

**वादयांचक्रिरे ढक्काः, पणवा दध्वनुर् हताः ।**
**काहलाः पूरयांचक्रुः पूर्णाः पेराश् च सस्वनुः ॥ ३ ॥**

**अन्वयः**—(सैनिकैः) ढक्काः वादयाञ्चक्रिरे, हताः पणवा दध्वनुः, सैनिकाः काहलाः पूरयांचक्रुः, पूर्णाः ( मुखमरुता ) पेराः सस्वनुः ।

---

९३–९४, ९७, ११०, १२४, १३१ ॥ ९--४–५, ७, १२–१५, २०, २९–३०, ३६, ३८–४३, ४७–४८, ६०–६४, ६६, ६८–७०, ७८, ८०, ८८, ९०–९४, ९६–९७, १०१, १०९, १२५–१२६, १२८, १३०, १३३, १३७ ॥ १०—७–८, १०, १२–१५, १९, २२, २६–२७, २९, ३५, ४३–५१, ५६–६२, ६४, ६६–७१ ॥ ११--१–२, ५–६, ८, १०–१३, १५, १९–२१, २३–२४, २६–२८, ३३–३८, ४०, ४२ ॥ १२—१, ७, १३, १६, २४, ५५, ५८–५९, ८० ॥ १३--८, १५, २१, २७–२८ ॥

**हिन्दी**--सैनिकोंने नगाड़े पीटे, सैनिकोंसे पीटेगये ढोल बजने लगे। काहला नामके बाजे मुखवायुसे भर दिये गये, योंही पेरा भी हवा भरे जाने पर(वायुपूर्ण होकर ) शब्द करने लगे।

**व्याख्या**—( सैनिकैः ) ढक्काः यशःपटहाः, वादयाञ्चक्रिरे वादिताः। (तैः) हताः ताडिताः, पणवाः मुरजाः, दध्वनुः सस्वनुः । ( सैनिकाः ) काहलाः वाद्यविशेषान्, पूरयाञ्चक्रुः पूरितवन्तः । पूर्णाः मुखमरुता भृताः, पेराः खरमुखा वाद्यविशेषाः, सस्वनुः शब्दितवन्तः ।

**कोशः**—'स्याद्यशःपटहो ढक्का'। 'मर्दलः पणवोऽन्ये च'–इत्यमरः।

**तिङन्तः**—वदेर्हेतुमण्णिजन्तादाम्। स्वन, ध्वन शब्दे ( भ्वादिः ) ॥ ३ ॥

मृदङ्गा धीरमास्वेनुर्, हतैः स्वेने च गोमुखैः।
घण्टाः शिशिञ्जिरे दीर्घं, जह्लादे पटहैर् भृशम् ॥ ४ ॥

**अन्वयः**--मृदङ्गाः धीरम् आस्वेनुः, हतैः गोमुखैः स्वेने, घण्टाः दीर्घं शिशिञ्जिरे, पटहैः भृशम् जह्लादे।

**हिन्दी**—मृदङ्ग गम्भीर शब्द करने लगे, बजाये गये सींङ्गे शब्द करने लगे। घण्टे देरतक गूंजने लगे तथा नगारे खूब गरजने लगे।

**व्याख्या**—मृदङ्गाः मुरजवाद्यानि, धीरं गम्भीरम्, आस्वेनुः दध्वनुः। हतैः वादितैः, गोमुखैः वाद्यविशेषैः, स्वेने शब्दितम्। घण्टाः प्रसिद्धाः, दीर्घं चिरं, शिशिञ्जिरे जुगुञ्जुः। पटहैः आनकैः, भृशम् अत्यर्थम्, जह्लादे शब्दितम्।

**तिङन्तः**--आस्वेनुः, स्वेने इत्युभयम् **'फणां च सप्तानाम् ६।३।१२५'** इति एत्वाभ्यासलोपे विशेषसूत्रम्। ह्लाद अव्यक्ते शब्दे ( भ्वादिः )। शिजि अव्यक्ते शब्दे ( अदादिः )।

**वाच्यपरिवर्तनम्**—छात्रा ज्ञातवाच्यप्रकारा इति यत्र वाच्यपरिवर्तनं कृतं न स्यात्तत्र स्वयं कार्यमेव। अलङ्कारादयोऽप्येवं स्वयं बोध्याः ॥ ४ ॥

हया जिहेषिरे हर्षाद्, गम्भीरं जगजुर् गजाः।
संत्रस्ताः करभा रेटुश्, चुकुवुः पत्तिपङ्क्तयः ॥ ५ ॥

**अन्वयः**—हयाः हर्षाद् जिहेषिरे, गजाः गम्भीरं जगजुः, सन्त्रस्ताः करभा रेटुः, पत्तिपङ्क्तयः चुकुवुः।

**हिन्दी**—घोड़े खुशीसे हिनहिनाने लगे, हाथी गम्भीर चिकारने लगे, डरे ऊँट शब्द करने लगे, पैदल चलने वालोंकी कतारें ( चलो चलो ) ऐसा शब्द करने लगीं।

**व्याख्या**—हयाः तुरगाः, हर्षाद् मोदात्, जिहेषिरे हेषितवन्तः। गजाः करिणः, गम्भीरं मन्द्रं, जगजुः जगर्जुः। सन्त्रस्ताः भीताः (नानावादित्रश्रवणात्), करभाः उष्ट्राः, रेटुः नेदुः (ववल्गुरिति यावत्)। पत्तिपङ्क्तयः पदातिसंहतयः, चुकुवुः शब्दितवन्तः ( गच्छताग्रे कि तिष्ठत इत्यादि )।

**तिङन्तः**—हेष, ह्रेष अव्यक्ते शब्दे। गज—गजी शब्दार्थौ। रट परिभाषणे ( सर्वे भ्वादयः )। कु शब्दे ( अदादिः )॥ ५.॥

**तुरङ्गाः पुस्फुटुर् भीताः, पुस्फुरुर् वृषभाः परम्।**
**नार्यश् चुक्षुभिरे मम्लुर् मुमुहुः शुशुचुः पतीन्॥ ६॥**

**अन्वयः**—भीताः तुरङ्गाः पुस्फुटुः, वृषभाः परम् पुस्फुरुः। नार्यः (काश्चित्) चुक्षुभिरे, मम्लुः, मुमुहुः, ( कियत्यः ) पतीन् शुशुचुः।

**हिन्दी**—डरे घोड़े भड़क चले, बैल इधर-उधर बहक गये, कुछ स्त्रियां क्षुब्ध हो गयीं, कुछ मलिन हो गयीं, कुछ मोहमें पड़ गयीं तथा कितनी ही पति के लिए सोचने लगीं।

**व्याख्या**—भीताः भयार्ताः, तुरङ्गाः हयाः, पुस्फुटुः पलायिताः। वृषभाः बलीवर्दाः, परम् भृशं, पुस्फुरुः चलिताः ( युगमुन्मोच्य )। नार्यः रमण्यः, चुक्षुभिरे क्षुब्धा अभूवन्, (वियोगशंकया) मम्लुः च। काश्चित् मुमुहुः मोहमुपगताः ( सौकुमार्यात् )। कियत्यस्तु प्रौढाः, पतीन् शुशुचुः ( युद्धेऽनिष्टाशङ्कया )।

**तिङन्तः**—स्फुर, स्फुल संचलने (तुदादिः)। स्फुट विशरणे। म्लै गात्रक्षये। शुच शोके ( भ्वादयः )। तत्र स्फुट धातुः तुदादिः चुरादिश्च॥ ६॥

**जगर्जुर्, जहृषुः, शूरा रेजुस्, तुष्टुविरे परैः।**
**बबन्धुरङ्गुलि-त्राणि, सन्नेहुः परिनिर्ययुः॥ ७॥**

**अन्वयः**—शूराः जगर्जुः, जहृषुः, रेजुः। परैः तुष्टुविरे। अङ्गुलित्राणि बबन्धुः, सन्नेहुः, परिनिर्ययुः।

**हिन्दी**—वीर ( सैनिक ) गर्जने लगे, खुश हुए, चमकने लगे, दूसरोंके द्वारा प्रशंसित हुए, हाथों में दस्ताने बाँधने लगे, कवच पहनने लगे तथा रणाङ्गणमें निकल पड़े।

**व्याख्या**—शूराः वीराः, जगर्जुः गर्जितवन्तः, जहृषुः हर्षिता बभूवुः, रेजुः दिदीपिरे। परैः अन्यैः, तुष्टुविरे प्रशंसिता जाताः ( भवतामग्रे कः स्थास्यति इत्यादि वाक्यैः )। अङ्गुलित्राणि करत्राणसाधनानि, बबन्धुः बध्नन्ति स्म, सन्नेहुः कवचं परिदधुः, परिनिर्ययुः रणाङ्गणे निर्गताः।

**तिङन्तः**—गर्ज शब्दे, राजृ दीप्तौ (भ्वादी)। हृष तुष्टौ, णह बन्धने (दिवादी)। ष्टुञ् स्तुतौ, या प्रापणे (अदादी)। बन्ध बन्धने (क्र्यादिः) ॥७॥

**धनूंष्यारोपयांचक्रुरारुरुहू रथाऽऽदिषु।**
**असीनुद्ववृहुर् दीप्तान्, गुर्वीरुच्चिक्षिपुर् गदाः ॥ ८ ॥**

**अन्वयः**—(सैनिकाः) धनूंषि आरोपयांचक्रुः, रथादिषु आरुरुहुः, दीप्तान् असीन् उद्ववृहुः, गुर्वीः गदाः उच्चिक्षिपुः।

**हिन्दी**—सैनिक धनुष चढ़ाने लगे, रथ प्रभृति वाहनोंपर चढ़ने लगे, चमकती तरवारें भाजने लगे तथा भारी गदाएं घुमाने लगे।

**व्याख्या**–सैनिकाः वीराः, धनूंषि चापान्, आरोपयाञ्चक्रुः आसञ्जितगुणानि चक्रुः। रथादिषु स्यन्दनादिवाहनेषु (अधिकरण–विवक्षया सप्तमी), आरुरुहुः आरूढाः। दीप्तान् तीक्ष्णान्, असीन् खड्गान्, उद्ववृहुः कोशादाकृष्य भ्रामितवन्तः। गुर्वीः महतीः, गदाः शस्त्रविशेषाः, उच्चिचक्षिपुः आवर्तयाञ्चक्रुः।

**तिङन्तः**—बीज जन्मनि प्रादुर्भावे च–भ्वादिस्थधातोर्णिचि 'रुहः पोऽन्यतरस्याम् ७।३।४३' इति पकारः। वृहू उद्यमने (भ्वादिः)। क्षिप प्रेरणे (भ्वादिस्तुदादिश्च)॥ ८॥

**शूलानि भ्रमयांचक्रुर्, बाणानाददिरे शुभान्।**
**भ्रेमुश् चुकूर्दिरे, रेसुर् ववल्गुश् च पदातयः ॥ ९ ॥**

**अन्वयः**—(सैनिकाः) शूलानि भ्रमयाञ्चक्रुः, शुभान् बाणान् आददिरे। पदातयः भ्रेमुः, चुकूर्दिरे, रेसुः, ववल्गुः च।

**हिन्दी**—सैनिकोंने त्रिशूलोंको नचाया, अच्छे बाणोंकों तरकसोंमें भरा। पैदल सैनिक इधर-उधर घूमने लगे, कूदते उछलते थे, डरानेके लिये शब्द करते थे तथा दौड़ते थे।

**व्याख्या**—सैनिकाः वीराः, शूलानि भ्रमयाञ्चक्रुः भ्रमितवन्तः (मित्वाद्ध्रस्वः)। शुभान् तीक्ष्णान्, बाणान् इषून्, आददिरे गृहीतवन्तः–तूणीरेषु भृतवन्तः। पदातयः पत्तयः, भ्रेमुः इतस्ततः चलिताः, चुकूर्दिरे कूर्दितवन्तः, रेसुः भयोत्पादकान् निनादान् विमुमुचुः, ववल्गुः धाविताः।

**कोशः**—'पदातिपत्तिपदगपादातिकपदाजयः'–इत्यमरः।

**तिङन्तः**—भ्रमु सञ्चलने (दिवादिः)। डुदाञ् दाने (जुहोत्यादिः)। कुर्द खुर्द गुर्द गुद क्रीडायामेव। रस शब्दे। वल्ग गतौ। सर्वे भ्वादयः॥ ९॥

समुत्पेतुः कशाघातै, रश्म्याकर्षैर् ममङ्गिरे ।
अश्वाः, प्रदुद्रुवुर् मोक्षे रक्तं निजगरुः श्रमे ॥ १० ॥

अन्वयः--अश्वाः कशाघातैः समुत्पेतुः, रश्म्याकर्षैः ममङ्गिरे, मोक्षे दुद्रुवुः, श्रमे रक्तं निजगरुः ।

हिन्दी--घोड़े कोड़ेके मारपर उछलते थे, लगाम खींचनेपर शोभायुक्त ड़जाते थे, छोड़ देनेपर सरपट भागते थे तथा बहुत थक जानेपर लगामकी गड़से निकले हुए रुधिरको पीते थे ।

व्याख्या--अश्वाः तुरगाः, कशाघातैः चर्मलताप्रहारैः, समुत्पेतुः उत्प्लुताः । रश्म्याकर्षैः प्रग्रहाकर्षणैः, ममङ्गिरे शोभया परावर्तन्ते स्म सङ्कुचितघोणतया । ोक्षे रश्मिशैथिल्ये, प्रदुद्रुवुः वेगेन धावन्ति स्म । श्रमे अत्यधिकपरिश्रमे, क्तं खलीनघर्षणजं रुधिरं, निजगुरुः पपौ ।

कोशः—'घोटके पीतितुरगतुरङ्गाश्वतुरङ्गमाः' ।

तिङन्तः--पत्लृ पतने, मगि मण्डने, द्रु गतौ ( भ्वादयः ) । गॄ निगरणे तुदादिः ) ॥ १० ॥

गजानां प्रददुः शारीन्, कम्बलान् परितस्तरुः ।
तेनुः कक्षां, ध्वजांश् चैव समुच्छिश्रियुरुच्छिखान् ॥ ११ ॥

अन्वयः--गजानां शारीन् प्रददुः, कम्बलान् परितस्तरुः, कक्षां तेनुः; च्छिखान् ध्वजान् चैव समुच्छिश्रियुः ।

हिन्दी—सैनिकोंने हाथियोंपर हौदे डाले, चित्र-विचित्र कम्बल उनपर ोढाये, सुवर्ण प्रभृति कक्षायें बनाईं और ऊँचे झण्डे फहराये ।

व्याख्या—(हस्तिपक-सैनिकाः) गजानां करिणां, शारीन् पुरुषोपवेशनसाधनानि, प्रददुः पृष्ठेषु आरोपितवन्तः । कम्बलान् विचित्रक्षौमवस्त्राणि, परिस्तरुः आच्छादितवन्तः । कक्षां हेमादिमयीं, तेनुः विस्तारितवन्तः । उच्छिखान् ऊर्ध्वमुखान, ध्वजान् केतून्, उच्छिश्रियुः उत्क्षिप्तवन्तः ।

तिङन्तः—स्तॄञ् आच्छादने ( भ्वादिः ) । तनु विस्तारे ( तनादिः ) । श्रञ् सेवायाम् ( भ्वादिः ) ॥ ११ ॥

विशिश्वासयिषांचक्रुरालिलिङ्गुश् च योषितः ।
आजघ्रुर् मूर्ध्नि बालांश् च चुचुम्बुश् च सुत-प्रियाः ॥ १२ ॥

अन्वयः--(सैनिकाः) योषितः ( आत्मीयाः ) विशिश्वासयिषाञ्चक्रुः ( वयं

शीघ्रं जित्वा परावर्तितास्महे इति ), ( ताश्च ) आलिलिङ्गुः, सुतप्रिया बालान् मूर्ध्नि आजघ्रुः, चुचुम्बुः च ।

**हिन्दी**—सैनिकोंने स्त्रियोंको विश्वास देना चाहा ( कि हम शीघ्र जीतकर लौटते हैं ) तथा उनका आलिङ्गन किया । प्रियपुत्रवालोंने पुत्रोंके शिर सूंघे और उनका चुम्बन किया ।

**व्याख्या**–(योद्धारः) योषितः स्त्रीः (आत्मीयाः स्वीयाः), विशिश्वासयिषाञ्चक्रुः विश्वासयितुमिष्टवन्तः । ताश्च आलिलिङ्गुः आलिङ्गितवन्तः । सुतप्रिया प्रियपुत्राः, बालान् पोतान्, मूर्ध्नि शिरसि, आजघ्रुः आघ्रातवन्तः आघ्राणवन्तः वा, चुचुम्बुः निनिंशे च ।

**तिङन्तः**—श्वस प्राणने इत्यादिकस्य ण्यन्तात्सन्नन्तस्य रूपम् । गत्यर्थो लिगि आङ्पूर्वोऽत्रालिङ्गनेऽस्ति । घ्रा गन्धोपादाने । चुबि वक्त्र-संयोगे ( भ्वादयः )

**समासः**–प्रियः सुतः येषामिति बहुव्रीहौ राजदन्तादित्वात् प्रियस्य परत्वम्

**गम्भीर-वेदिनः संज्ञां गजा जगृहुरक्षताः ।**
**ववृधे शुशुभे चैषां मदो, हृष्टैश् च पुप्लुवे ॥ १३ ॥**

**अन्वयः**—गम्भीरवेदिनः गजा अक्षताः सन्तः संज्ञा जगृहुः । एषां मद ववृधे, शुशुभे च, हृष्टैः ( गजैः ) पुप्लुवे च ।

**हिन्दी**—गम्भीरवेदी हाथियोंने अपनी संज्ञा को सार्थक वनाया । उनका मद बढ़ा और शोभायमान हुआ । अन्य हाथी खुशीसे रणमें खूब चलते थे ।

**व्याख्या**—'ये गजा मदमत्तत्वादङ्कुशैर्दृढमाहताः । न विदन्ति हि गम्भीरं व्रणं गम्भीरवेदिनः' इति हि गम्भीरवेदीति गजसंज्ञा । तदेवाह—गम्भीरवेदिन गजाः तत्संज्ञका हस्तिनः, अक्षताः अनाहताः, स्वसंज्ञां जगृहुः यथार्थसंज्ञिनो बभूवुः । एषाम् मदः गण्डस्थः, ववृधे एधामास, शुशुभे शोभितो बभूव ! हृष्टै अन्यगजैः, पुप्लुवे प्लुतम् ( भावे लिट् अकर्मकतया ) ।

**तिङन्तः**—ग्रह उपादाने ( क्र्यादिः ) । वृधु वर्द्धने, शुभ–शुम्भ भासने, शु दीप्तौ, प्लुङ् गतौ ( भ्वादयः ) । शुभ–शुम्भ शोभार्थे ( तुदादिः ) ॥ १३ ॥

**मृगाः प्रदक्षिणं सस्रुः, शिवाः सम्यग् ववाशिरे ।**
**अ-वामैः पुस्फुरे देहैः, प्रसेदे चित्त-वृत्तिभिः ॥ १४ ॥**

**अन्वयः**—मृगाः प्रदक्षिणं सस्रुः, शिवाः सम्यग् ववाशिरे, अवामैः देहै पुस्फुरे, चित्तवृत्तिभिः प्रसेदे ।

**हिन्दी**—समरमें मरना इनका मङ्गल होगा इसलिये शकुन हो रहा है—

मृग दाहिने निकल रहे थे, सियारिन वायें कॅखर रहीं थीं ( मरण चिह्न )। वाम अङ्गसे भिन्न देह ( दक्षिणाङ्ग ) फड़क रहे थे तथा चित्तवृत्तियां प्रसन्न थीं ( सभी समरमें मरेंगे )।

**व्याख्या**––समरे मरणं राक्षसानां मङ्गलं गृहे मरणं नरकदमिति मङ्गलं सूचयति कविः––मृगाः हरिणाः, दक्षिणं वामतो दक्षिणां दिशं, सस्रुः पलायाञ्चक्रिरे। शिवाः गोमायवः,सम्यक् साधु(वामदिशि),ववाशिरे शब्दितवत्यः। अवामैः वामाङ्गभिन्नैः, देहैः दक्षिणाङ्गैः, पुस्फुरे स्फुरितम्, मङ्गलदम् इति (भावे लिट्)।

**कोशः**—'स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः'। 'वामौ वल्गुप्रतीपौ द्वौ' इत्यमरः।

**तिङन्तः**––सृ गतौ, वाशृ शब्दे ( भ्वादौ )। स्फुर किञ्चिच्चलने, षद्लृ विशरणगत्यवसादनेषु ( तुदादौ ) ॥ १४ ॥

**प्राच्यमाञ्जिहिषांचक्रे प्रहस्तो रावणाऽऽज्ञया।**
**द्वारं ररङ्घतुर् याम्यं महापार्श्व-महोदरौ ॥ १५ ॥**

**अन्वयः**––प्रहस्तः रावणाज्ञया प्राच्यम् आञ्जिहिषाञ्चक्रे, महापार्श्वमहोदरौ याम्यं द्वारं ररङ्घतुः।

**हिन्दी**––प्रहस्त मन्त्री ने रावणकी आज्ञासे पूर्वदिशाको चलना चाहा। महापार्श्व और महोदर नामके दो राक्षस दक्षिण द्वारको गये।

**व्याख्या**–प्रहस्तो नाम मन्त्री सेनापतिः, रावणाज्ञया दशास्याऽऽदेशेन, प्राच्यं पूर्वद्वारम्, आञ्जिहिषाञ्चक्रे गन्तुमियेष। महापार्श्व-महोदरनामानौ द्वौ सेनान्यौ, याम्यं दक्षिणद्वारम्, ररङ्घतुः जग्मतुः।

**तद्धितः**––प्राचि भवं प्राच्यम्, '**द्युप्रागुदक्०** ४।२।१०१' इति यत्। यमो देवता अस्येति विग्रहे यम शब्दात् '**यमाच्चेति वाच्यम्** ४।१।८५ वा०' इति ण्ये, आदिवृद्धौ, मलोपे याम्यम्।

**तिङन्तः**—अहि गताविति भौवादिकात्सनि '**नन्द्राः०** ६।१।३' इति न–रहितस्य 'हि'–मात्रस्य द्वित्वे प्रत्ययान्तात् आङ् पूर्वादाञ्जिहिष–धातोः आमि कृ–प्रयोगे रूपम्। रघि लघि गत्यर्थौ ( भ्वादौ ) ॥ १५ ॥

**प्रययाविन्द्र-जित् प्रत्यगियाय स्वयमुत्तरम्।**
**समध्यासिसिषांचक्रे विरूपाऽक्षः पुरोदरम् ॥ १६ ॥**

**अन्वयः**—इन्द्रजित् प्रत्यक् प्रययौ, स्वयम् ( रावणः ) उत्तरम् इयाय। विरूपाक्षः पुरोदरम् समध्यासिसिषाञ्चक्रे।

**हिन्दी**—मेघनाद पश्चिम द्वारको गया । स्वयं रावण उत्तर द्वार पर रहा । विरूपाक्ष नामक सेनानी ने लङ्काके बीच भागमें रहना चाहा ।

**व्याख्या** — इन्द्रजित् रावणिः, प्रत्यक् पश्चिमद्वारं, प्रययी जगाम । स्वयं रावणः, उत्तरम् कुबेरदिग्द्वारम्, इयाय ररङ्घ । विरूपाक्षः राक्षसः, पुरोदरम् पुरस्य मध्यभागम्, अध्यासिसिषाञ्चक्रे अधिवस्तुमियेष ।

**तद्धितः**—प्रतीच्यामित्यर्थे '**दिक्शब्देभ्यः सप्तमी०** ५।३।२७' इति विहितस्य अस्तातेः '**अञ्चेर्लुक्** ५।३।३०' इति लुक्, भत्वाभावात् अलोपः दीर्घाभावश्च—प्रत्यक् इति ।

**तिङन्तः**—इण् गतौ, आस उपवेशने ( अदादी ) । आसः '**पूर्ववत्सनः** १।३।६२' इत्यात्मनेण्दम् ।। १६ ।।

सम्प्रति रामसैन्य-प्रस्थानमाह—

**शुश्राव रामस् तत् सर्वं प्रतस्थे च स-सैनिकः ।**
**विस्फारयांचकाराऽस्त्रं बबन्धाऽथ च बाणधी ।। १७ ।।**

**अन्वयः** — रामः तत् सर्वं शुश्राव,ससैनिकः प्रतस्थे च । अस्त्रं विस्फारयाञ्चकार । अथ बाणधी बबन्ध ।

**हिन्दी**—रामजीने वह सब सुना तथा सेनाके साथ प्रस्थान किया । अस्त्रोंको सजाया तथा तरकस बाँधा ।

**व्याख्या**—रामः राघवः, तत् रावणचेष्टितं, चारैः दूतैः, शुश्राव आकर्णयामास । ससैनिकः सैन्यसहितः, प्रतस्थे प्रस्थितो बभूव । अस्त्रं धनुरादिकं, विस्फारयाञ्चकार सन्तेजयामास । अथ ततः, बाणधी इषुधी, बबन्ध सन्ननाह ।

**तिङन्तः**—श्रु श्रवणे, ष्ठा गतिनिवृत्तौ । '**समवप्रविभ्यः स्थः** १।३।२२' इत्यात्मनेपदम् । स्फुरतेर्ण्यन्तस्य '**चिस्फुरोर्णौ** ६।१।५४' इत्यात्वम् ।

**कृत्**—वाणा 'धीयन्तेऽस्मिन्निति' '**कर्मण्यधिकरणे च** ३।३।९३' इति किः । वाणधी द्विवचने ।। १७ ।।

**ईक्षांचक्रेऽथ सौमित्रिमनुजज्ञे बलानि च ।**
**नमश्चकार देवेभ्यः पर्ण-तल्पं मुमोच च ।। १८ ।।**

**अन्वयः**—अथ ( रामः ) सौमित्रिम् ईक्षाञ्चक्रे, बलानि अनुजज्ञे च । देवेभ्यः नमः चकार, पर्णतल्पं च मुमोच ।

**हिन्दी**—इसके पश्चात् रामने लक्ष्मणको देखा, सेनाको आज्ञा दी, देवोंको नमस्कार किया तथा पर्णशय्याको छोड़ा ।

**व्याख्या**—अथ तदनन्तरम्, रामः राघवः, सौमित्रिम् लक्ष्मणम्, ईक्षाञ्चक्रे चक्षे । बलानि सैन्यानि, अनुजज्ञे आज्ञापयामास । देवेभ्यः सुरेभ्यः, नमः अभि- दनम्, चकार चक्रे । पर्णतल्पम् भूमिपत्रशय्यां, मुमोच जहौ ।

**तिङन्तः**—ईक्ष दर्शनाङ्कनयोः । इजादित्वादाम्, ततो लिटि साधनीयं रूपम् । अवबोधने क्र्यादिस्थधातोः स्व-कर्त्रभिप्राये क्रियाफले 'अनुपसर्गाज्ज्ञः ।३।७६' इति सोपसर्जनस्यात्मनेपदनिषेधात् पराभिप्राये तु क्रियाफले सोपसर्गा- त्मनेपदम् भवत्येव । मुच्लृ ( तुदादिः ) मोचनेऽर्थे ॥ १८ ॥

चकासांचक्रुरुत्तस्थुर्, नेदुरानशिरे दिशः ।
वानरा, भूधरान् रेधुर् बभञ्जुश्, च ततस् तरून् ॥ १९ ॥

**अन्वयः**—ततः वानराः उत्तस्थुः, नेदुः, दिशः आनशिरे । भूधरान् रेधुः, रून् च बभञ्जुः ।

**हिन्दी**—आज्ञा पानेके बाद वानर उठे, गर्जने लगे, दिशाओंमें फैल गये । र्वतोंको तोड़ने फोड़ने लगे एवं पेड़ोंको उखाड़ने लगे ।

**व्याख्या**—ततः आज्ञानन्तरम्, वानराः कपयः ( रामसैनिकाः ), उत्तस्थुः दतिष्ठन् ( सुवेलपर्वतात् ), नेदुः जगर्जुः । दिशः ककुभः, आनशिरे व्याप्ताः । धरान् पर्वतान्, रेधुः जिहिंसुः । तरून् द्रुमान्, बभञ्जुः आममर्दुः ।

**तिङन्तः**—णद अव्यक्ते शब्दे (भ्वादिः)। अशू व्याप्तौ—स्वादिस्थस्याश्नोतेः त आदेः ७।४।७०' इति अभ्यासदीर्घः। 'अश्नोतेश्च७।४।७२' इति नुट् । 'राधो सायाम् ६।४।१२३' इत्यभ्यासलोपैत्वौ । भञ्जो-आमर्दने ( रुधादिः ) ॥१९॥

अग्रे भाविब्रह्मास्त्रबन्धनसूचकमपशकुनं रामलक्ष्मणयोर्द्वाभ्यां सूचयति—

ददाल भूर्, नभो रक्तं गोष्पदप्रं ववर्ष च ।
मृगाः प्रससृपुर् वामं, खगाश् चुकुविरेऽशुभम् ॥ २० ॥

**अन्वयः**—भूः ददाल, नभः गोष्पदप्रं रक्तं ववर्ष च, मृगाः वामं प्रससृपुः, गाः अशुभम् चुकुविरे ।

**हिन्दी**—पृथ्वी फट गयी । आकाश ने गौके खुर डूबने भर रुधिर बरसाया । ग दाहिनेसे बाँये चले गये तथा पक्षी अशुभ शब्द करने लगे ।

**व्याख्या**—भूः धरा, ददाल विशशार । नभः व्योम, गोष्पदप्रं गोखुरमज्जप्रमाणं, रक्तं शोणितं, ववर्ष वृष्टवत् । मृगाः हरिणाः, वामं दक्षिणतो मभागम्, प्रससृपुः प्रसस्रुः । खगाः शकुन्ताः, अशुभम् अमङ्गलम्, चुकुविरे ब्दितवन्तः ।

**तिङन्तः**—दल विशरणे, वृष वर्षणे, सृप गतौ, कुङ् शब्दे ( सर्वेऽ भ्वादयः )। गोष्पदं पूरयित्वेत्यर्थे **'वर्षप्रमाण० ३।४।३२'** णमुल् । गोष्प तु **'सेवितासेवित० ६।१।१४५'** इति सुटि ज्ञेयम् ।। २० ।।

**उल्का ददृशिरे दीप्ता, रुरुवुश् चाऽशिवं शिवाः ।**
**चक्ष्माये च मही, रामः, शशङ्के चाऽशुभाऽगमम् ।। २१ ।।**

**अन्वयः**—दीप्ताः उल्काः ददृशिरे, शिवाः अशिवं रुरुवुः, मही च चक्ष्मा रामः अशुभागमम् च शशङ्के ।

**हिन्दी**—दिनमें ही चमकती लुकारियां दीख पड़ीं, सियारिनियां अशुट् शब्द करने लगीं, पृथ्वी काँपने लगी । राम तो अशुभके आगमनकी शङ् करने लगे ।

**व्याख्या**—दिनेऽपि दीप्ताः महाप्रकाशाः, उल्काः केतुतारा-प्रभृतयः, ददृशि दृष्टाः । शिवाः गोमायवः, अशिवम् अमङ्गलम्, रुरुवुः शब्दितवत्यः । म धरा, चक्ष्माये कम्पिता । रामः राघवः, अशुभागमम् अनिष्टप्राप्तिम्, शश शङ्कते स्म ।

**तिङन्तः**—दृशिर् प्रेक्षणे, रु शब्दे, क्ष्मायी विधूनने, शकि शङ्कायाम्- ( सर्वे भ्वादयः ) ।। २१ ।।

**रावणः शुश्रुवान् शत्रून् राक्षसानभ्युपेयुषः ।**
**स्वयं युयुत्सयांचक्रे प्राकाराऽग्रे निषेदिवान् ।। २२ ।।**

**अन्वयः**—यदा रावणः राक्षसान् अभ्युपेयुषः शत्रून् शुश्रुवान् तदा प्राकार निषेदिवान्, स्वयं युयुत्सयाञ्चक्रे ।

**हिन्दी**—रावणने जब 'राक्षसोंके पास शत्रु पहुँच गये हैं' ऐसा सुना, त कोठेके ऊपर खड़े होकर स्वयं युद्ध करनेकी इच्छा वालोंको प्रेरित किया ।

**व्याख्या**–(यदा) रावणः दशास्यः, राक्षसान् निशाचरान्, अभ्युपेयुषः उ पतस्थुषः, शत्रून् रामादीन्, शुश्रुवान् आकर्णयामास, तदा प्राकाराग्रे प्रासाद परि, निषेदिवान् उपतस्थिवान्, स्वयं रावणात्मना, युयुत्सयांचक्रे युद्धेच्छू प्रेरयामास ।

**तिङन्तः**—**'भाषायां सदवसश्रुवः ३।२।१०८'** इति सर्वत्र क्वसुः । तत लिण्निमित्त-द्वित्वादिकार्याणि । इण् धातोः क्वसुः **'उपेयिवाननाश्वाननूचानः ३।२।१०९'** इत्यनेन ज्ञेयः । युध सम्प्रहारे इति दैवादिकस्य सन्नन्ताण्णिचि लि रूपम्, प्रत्ययान्तादाम् ।। २२ ।।

**निरासू राक्षसा बाणान्, प्रजहुः शूल-पट्टिशान् ।**
**असींश् च वाहयांचक्रुः पाशैश् चाऽऽचकृषुस् ततैः ॥ २३ ॥**

**अन्वयः**——राक्षसाः बाणान् निरासुः, शूलपट्टिशान् प्रजहुः, असीन् च हयाञ्चक्रुः, ततैः पाशैः आचकृषुः च ।

**हिन्दी**——राक्षसोंने बाणोंको चलाया, त्रिशूल भाले चलाये, तलवारें मारीं रा पाशोंसे शत्रुओंको खींचा ।

**व्याख्या**——राक्षसाः रात्रिचराः, बाणान् शरान्, निरासुः चिक्षिपुः । शूल-ट्टिशान् त्रिशूल-भल्लादीन्, प्रजहुः प्रेरयामासुः । असीन् खड्गान्, वाहयामासुः पारयामासुः । ततैः विस्तृतैः, पाशैः जालैः, आचकृषुः आकृष्टवन्तः ।

**समासः**—शूलैः सहिताः पट्टिशाः शूलपट्टिशाः इति शाकपार्थिवादित्वात्स-सः । द्वन्द्वे '**जातिरप्राणिनाम्** २।४।६' इत्येकत्वं स्यात् ।

**कोशः**—'वेतालमल्लभल्लाश्च पुरोडाशोऽपि पट्टिशः'—इत्यमरः ।

**तिङन्तः**—आस उपवेशने इति आदादिक-धातोः निर्-पूर्वस्य प्रक्षेपणमर्थः । हाक् त्यागे ( जुहोत्यादिः ) । वह प्रापणे इति भौवादेर्ण्यन्तस्य आम् । कृष -लेखने ( भ्वादिः तुदादिश्च ) ॥ २३ ॥

**भल्लैश् च बिभिदुस् तीक्ष्णैर्, विविधुस् तोमरैस् तथा ।**
**गदाभिश् चूर्णयांचक्रुः, शितैश् चक्रैश् च चिच्छिदुः ॥ २४ ॥**

**अन्वयः**—ते तीक्ष्णैः भल्लैः बिभिदुः, तथा तोमरैः विविधुः, गदाभिः यांचक्रुः, शितैः चक्रैः चिच्छिदुः ।

**हिन्दी**—उन्होंने तीखे भालोंसे भेदन किया, तोमरोंसे व्यथित किया, ओंसे चूर्ण किया तथा चोखे चक्रोंसे काट डाले ।

**व्याख्या**—तीक्ष्णैः प्रखरैः, भल्लैः भलाख्यशस्त्रैः, बिभिदुः चिच्छिदुः । तथा , तोमरैः सर्वलाभिः, विविधुः विद्धवन्तः । गदाभिः गदाशस्त्रैः, चूर्णयांचक्रुः यामासुः । शितैः तीक्ष्णैः, चक्रैः प्रहरणविशेषैः, चिच्छिदुः बिभिदुः ।

**कोशः**—'सर्वला तोमरोऽस्त्रियाम्' (इत्यमरः) । 'चक्रं प्रहरणे गणे'–हैमः ।

**तिङन्तः**—भिदिर् विदारणे, छिदिर् द्वैधीकरणे ( रुधादी ) । व्यध ताडने वादिः ) । चूर्ण प्रेरणे ( चुरादिः ) ॥ २४ ॥

**वानरा मुष्टिभिर् जघ्नुर् ददंशुर् दशनैस् तथा ।**
**निरासुश् च गिरींस् तुङ्गान्, द्रुमान्, विचकरुस् तथा ॥ २५ ॥**

**अन्वयः**—वानराः ( राक्षसान् ) मुष्टिभिः जघ्नुः, तथा दशनैः ददं तथा तुङ्गान् गिरीन् निरासुः, द्रुमान् विचकरुः ( राक्षासानामुपरि )।

**हिन्दी**—वानरोंने मुक्कोंसे ( राक्षसोंको ) मार डाला, दाँतोंसे काट डा राक्षसोंके ऊपर पर्वत फेंके और पेड़ोंको भी फेंका।

**व्याख्या**—वानराः कीशाः, ( राक्षसान् ) मुष्टिभिः बद्धाङ्गुलिपाणिभि जघ्नुः जिहिंसुः। दशनैः दन्तैः, दष्टवन्तः। तथा तद्वत्, राक्षसानामुपरि, तुङ्गा उच्चान्, गिरीन् पर्वतान्, निरासुः चिक्षिपुः। द्रुमान् वृक्षान्, विचकरुः विचिक्षि

**तिङन्तः**—दंश दंशने ( भ्वादिः )। असु क्षेपणे ( दिवादिः )। कॄ वि ( तुदादिः )॥ २५ ॥

**लाङ्गूलैर् लोठयांचक्रुस्, तलैर् निन्युश् च संक्षयम्।**
**नखैश् च चकृततुः, क्रुद्धाः पिपिषुश् च क्षितौ बलात्॥ २६ ॥**

**अन्वयः**—वानराः राक्षसान् लाङ्गूलैः लोठयाञ्चक्रुः, तलैः संक्षयं नि नखैः च चकृतुः, क्रुद्धाः सन्तः बलात् क्षितौ पिपिषुः।

**हिन्दी**—बन्दरोंने राक्षसोंको पूछोंसे लपेटकर (पृथ्वीपर) गिरा कर दिया। तलहत्थियोंसे मारकर जान ले ली। नखोंसे काट डाला तथा होकर पृथ्वीपर गिराकर पीस डाला।

**व्याख्या**—वानराः कपयः, राक्षसान् रात्रिचरान्, लाङ्गूलैः पुच्छ ( क्षितौ ) लोठयाञ्चक्रुः व्यापादयामासुः। तलैः हस्ततलैः, क्षयं विन निन्युः नीतवन्तः। नखैः कररुहैः, चकृतुः चिच्छिदुः। क्रुद्धाः कुपिताः, ब हठात्, पिपिषुः सञ्चूर्णयामासुः।

**कोशः**—'पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम्'—इत्यमरः।

**तिङन्तः**—रुठ, लुठ प्रतिघाते इति भौवादिकस्य ण्यन्तस्य लिटि प्रत्ययान्त दाम्। णीञ् प्रापणे ( भ्वा० )। कृती छेदने, पिष्लृ पेषणे ( तु० )॥ २६

**संबभूवुः कबन्धानि, प्रोहुः शोणित-तोय-गाः।**
**तेरुर् भटाऽऽस्य-पद्मानि, ध्वजैः फेणैरिवाऽऽबभे॥ २७॥**

**अन्वयः**—कबन्धानि सम्बभूवुः, शोणित-तोयगाः प्रोहुः, भटास्यपद्म तेरुः, ध्वजैः फेणैः इव आबभे।

**हिन्दी**—कबन्ध ( शिर कटे ) पैदा हो गये, खून की नदियां बह चल कटे सैनिकोंके मुखरूपी-कमल नदीमें तैरने लगे। सब ध्वज फेनके सम मालूम होने लगे।

**व्याख्या**—कबन्धानि छिन्न-शिरसः कायाः, सम्बभूवुः सम्भूतानि। णिततोयणाः रक्तनद्यः, प्रोहुः प्रवृत्ताः प्रकर्षेण। भटास्यपद्मानि सैनिकमुखाानि, तेरुः ( तत्र रक्तसरिति ) तरन्तिस्म। ध्वजैः केतनैः, फेणैः हिण्डीरैः, न, आबभे शुशुभे।

**समासः**—शोणितानां तोयगाः ( तत्पु० )। भटानाम् आस्यानि एव ानि। मयूरव्यंसकादित्वात् समासः।

**कोशः**—'केतनं ध्वजमस्त्रियाम्'। 'हिण्डीरोऽब्धिकफः फेणः'—इत्यमरः।

**तिङन्तः**—भू सत्तायाम्, वह प्रापणे, तॄ प्लवनतरणयोः (भ्वादयः)। भा ौ–( अदादिः )।

**वाच्यपरिवर्तनम्**–कबन्धैः सम्बभूवे। शोणिततोयणाभिः प्रेहे। भटास्यपद्मैः तेरे। ध्वजाः फेना इव आबभुः। अतिशयोक्तिरलङ्कारः ॥ २७ ॥

रक्त-पङ्के गजाः सेदुर्, न प्रचक्रमिरे रथाः।
निममज्जुस् तुरङ्गाश् च, गन्तुं नोत्सेहिरे भटाः ॥ २८ ॥

**अन्वयः**—गजाः रक्तपङ्के सेदुः, रथाः न प्रचक्रमिरे, तुरङ्गाः निममज्जुः, ः गन्तुं न उत्सेहिरे।

**हिन्दी**—हाथी रुधिरके कीचड़में डूब गये। रथ नहीं चल सके। घोड़े डूब । सैनिक चलनेमें असमर्थ हो गये।

**व्याख्या**—गजाः हस्तिनः, सेदुः निमग्नाः। रथाः स्यन्दनाः, न नहि, क्रमिरे चेलुः। तुरङ्गाः अश्वाः, निममज्जुः निमग्नाः। भटाः सैनिकाः, गन्तुं , न नहि, उत्सेहिरे शेकुः। सर्वत्रैवातिशयोक्तिश्चलति।

**कोशः**—'शताङ्गः स्यन्दनो रथः'। 'घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः' त्यमरः )।

**तिङन्तः**—षद्लृ विशरणगत्यवसादनेषु, टुमस्जो शुद्धौ (तुदादी)। क्रमु पादपे, षह मर्षणे ( भ्वादी )। **'प्रोपाभ्याम् १।३।४२'** इत्यात्मनेपदं क्रमेः।

**वाच्य०**–गजैः सेदे। रथैः प्रचक्रमे। तुरङ्गैः निममज्जे। भटैः उत्सेहे ॥२८॥

कोट्या कोट्या पुर-द्वारमेकैकं रुरुधे द्विषाम्।
षट्-त्रिंशद्धरि-कोट्यश् च निवव्रुर् वानराऽधिपम् ॥ २९ ॥

**अन्वयः**—द्विषाम् एकैकं पुरद्वारम् ( वानराणाम् ) कोट्या कोट्या रुरुधे त्रिंशत् हरिकोट्यः वानराधिपम् ( सुग्रीवम् ) निवव्रुः।

**हिन्दी**--शत्रुओं के एक एक पुरद्वार को करोड़ों करोड़ों बन्दरोंने लिया। ३६ छत्तीस करोड़ वानर वानराधिप सुग्रीवके बचावमें उन्हें रहते थे।

**व्याख्या**--द्विषाम् अरीणाम्, एकैकम्, पुरद्वारं नगरगोमुखम्, वानरा कपीनां, कोटचा कोटचा, रुरुधे रुद्धम्। षट्त्रिंशत्, हरिकोटचः वानरकोट वानराधिपं कपीशं, निवव्रुः आवृत्य स्थिताः तद्रक्षायाम्।

**समासः**--एकं च एकं चेति तयोः समाहारः एकैकम्। वानराणाम् अ पम् वानराधिपम्। हरीणां कोटचः हरिकोटचः।

**तिङन्तः**—रुधिर् आवरणे ( रुधादिः )। वृञ् संवरणे ( स्वादि-क्र्यादी

**वाच्यपरिवर्तनम्**--कोटिः पुरद्वारं रुरोध। त्रिंशता हरिकोटिभिः वा राधिपो निवव्रे॥ २९॥

तस्तनुर्, जह्वलुर्, मम्लुर्, जग्लुर्, लुलुठिरे क्षताः।
मुमूर्च्छुर्, ववमू रक्तं, ततृषुश् चोभये भटाः॥ ३०॥

**अन्वयः**--उभये भटाः क्षताः सन्तः तस्तनुः, जह्वलुः, मम्लुः, ज लुलुठिरे, मुमूर्च्छुः, रक्तं ववमुः, ततृषुः च।

**हिन्दी**— दोनों तरफ के सैनिक क्षतविक्षत होकर चिल्लाने लगे एवं वि लित हो उठे। म्लान हो गये, शोकार्त हो उठे, पृथ्वी पर लोट पड़े, मूर्च्छि हो गये, खून फेंकने लगे तथा प्यास से व्याकुल हो उठे।

**व्याख्या**--उभये रामरावणपक्षगाः, भटाः सैनिकाः, क्षताः शस्त्रप्रह सन्तः, तस्तनुः शब्दं कृतवन्तः। जह्वलुः विचलिता आसन्, मम्लुः म्ल जाताः, जग्लुः ग्लानिमापुः, लुलुठिरे भूमौ लुठन्ते स्म, मुमूर्च्छुः मूर्च्छां ज रक्तम् रुधिरं, ववमुः उद्गीर्णवन्तः, ततृषुः तृष्यन्ति स्म।

**तिङन्तः**—ष्टन शब्दे, ह्वल ह्मल चलने, ग्लै म्लै हर्षक्षये, मुर्च्छा मोह च्छ्राययोः, टुवम उद्गिरणे ( भ्वादयः )। रुठ लुठ प्रतिघाते ( तुदादी आत्म पदिनौ )। ञितृषा पिपासायाम् ( दिवादिः )। 'न शसददवादिगुणा ६।४।१२६' इति नैत्वाभ्यासलोपौ–ववमुः।

**वाच्यपरिवर्तनम्**—क्षतैः उभयैः भटैः तस्तने, जह्वले, मम्ले, जग्ले, लु मुमूर्च्छे, ववमे, रक्तम् ततृषे॥ ३०॥

सम्पातिना प्रजङ्घस् तु युयुधे, ऽसौ द्रुमाहतः।
चकम्पे ऽतीव चुक्रोश, जीवनाशं ननाश च॥ ३१॥

**अन्वयः**——सम्पातिना ( वानरेण ) सह प्रजङ्घः ( राक्षसः ) युयुधे । द्रुमा-
ः असौ चकम्पे, अतीव चुक्रोश, जीवनाशं च ननाश ।

**हिन्दी**–सम्पाति वानरके साथ प्रजङ्घ राक्षसने युद्ध किया । वह पेड़से ताड़ित
कर काँप उठा, अत्यन्त क्रुद्ध हो गया और जीवनसे छुटकारा पाकर मर गया ।

**व्याख्या**—सम्पातिनाम्ना कपिना सह, प्रजङ्घो नाम राक्षसः, युयुधे
ते स्म । द्रुमाहतः वृक्षताडितः, असौ सः, चकम्पे वेपथुं प्राप । अतीव अत्यन्तं,
ोश रुरोद । जीवनाशं प्राणनाशं यथा स्यात्तथा, ननाश मृतः ।

**कृदन्तः**--जीवो नश्यति इत्यर्थे **'कर्त्रोर्जीवपुरुषयोर्नशिवहोः ३।४।४३'** इति
लि **'कषादिषु यथाविध्यनुप्रयोगः ३।४।४६'** इति नशेरनुप्रयोगश्च ।

**तिङन्तः**—युध सम्प्रहारे, णश अदर्शने ( दिवादी )। क्रुश आह्वाने रोदने
( भ्वादिः ) ।

**वाच्यपरिवर्तनम्**--प्रजङ्घेन युयुधे, अमुना द्रुमाहतेन चकम्पे, चुक्रुशे, नेशे
नाशम् ॥ ३१ ॥

**उच्चखनाते नलेनाऽऽजौ स्फुरत्-प्रतपनाक्षिणी ।**
**जम्बुमाली जहौ प्राणान् ग्राव्णा मारुतिना हतः ॥ ३२ ॥**

**अन्वयः**---आजौ नलेन ( वानरेण ) स्फुरत्–प्रतपनाक्षिणी उच्चख्नाते ।
तिना ग्राव्णा हतः जम्बुमाली ( राक्षसः ) प्राणान् जहौ ।

**हिन्दी**--संग्राममें नलने प्रतपनकी चञ्चल आँखे निकाल लीं । हनूमान्‌के
पत्थरोंकी मार खाकर जम्बुमाली मर गया ।

**व्याख्या**--आजौ संग्रामे, नलेन तन्नाम्ना कपिना, स्फुरत्प्रतपनाक्षिणी प्रत-
ञ्चलनेत्रे, उच्चख्नाते उत्खन्येते स्म । मारुतिना हनूमता, ग्राव्णा पाषाणेन,
ताडितः, जम्बुमाली राक्षसः, प्राणान् असून्, जहौ तत्याज ।

**समासः**---प्रतपनस्य अक्षिणी प्रतपनाक्षिणी, स्फुरन्ती च ते प्रतपनाक्षिणी
त्प्रतपनाक्षिणी । अत्र तत्पुरुषगर्भः कर्मधारयः, नतु कर्मधारयगर्भस्तत्पुरुषः ।
न् चासौ प्रतपनः स्फुरत्प्रतपनः तस्याक्षिणीति असम्भवात् ।

**तिङन्तः**– खनु अवदारणे (भ्वादिः) । **'गमहन० ६।३।९८'** इत्युपधालोपः ।
ाक् त्यागे ( जुहोत्यादिः ) । **'आत औ णलः ७।१।३४'** इति णल औकारे
: ।

**वाच्यपरिवर्तनम्**---नलोऽक्षिणी उच्चखान । हतेन जम्बुमालिना प्राणाः
े ॥ ३२ ॥

मित्रघ्नस्य प्रचुक्षोद गदयाऽङ्गं विभीषणः ।
सुग्रीवः प्रघसं नेभे, बहून् रामस् ततर्द च ॥ ३३ ॥

**अन्वयः**—विभीषणः गदया मित्रघ्नस्य अङ्गं प्रचुक्षोद । सुग्रीवः प्रघसं ने राम: बहून् ततर्द ।

**हिन्दी**—विभीषणने गदासे मित्रघ्नके अङ्गको चूर्ण कर डाला । सुग्री प्रघसको मार डाला । रामने बहुतोंको समाप्त किया ।

**व्याख्या**—विभीषणः भाविलङ्केशः, गदया गदास्त्रेण, मित्रघ्नस्य तन्ना रक्षसः, अङ्गं गात्रं, चुक्षोद सम्पिपेष । सुग्रीवः कपीशः, प्रघसं राक्षसं, जिहिंस । रामः प्रधानपुरुषः,बहून् भूरिशः, ततर्द जघान ।

**तिङन्तः**—क्षुदिर् संपेषणे, उतृदिर् हिंसानादरयोः ( रुधादी ) । णभ, हिंसायाम् ( भ्वादी दिवादी च ) ।

**वाच्यपरिवर्तनम्**—विभीषणेनाङ्गं प्रचुक्षुदे । सुग्रीवेण प्रघसः नेभे । राम बहवः ततृदिरे ॥ ३३ ॥

वज्रमुष्टेर् विशिश्लेष मैन्देनाऽभिहतं शिरः ।
नीलश् चकर्त चक्रेण निकुम्भस्य शिरः स्फुरत् ॥ ३४ ॥

**अन्वयः**—मैन्देन अभिहतं वज्रमुष्टेः शिरः विशिश्लेष (भूमिम् इति शेष नीलः निकुम्भस्य स्फुरत् शिरः चक्रेण चकर्त ।

**हिन्दी**—मैन्द वानरके द्वारा नाश कर दिये गये वज्रमुष्टि राक्षसके ने पृथ्वीको चूम लिया । नीलने निकुम्भका चमकदार ( रोबीला ) शिर च काट डाला ।

**व्याख्या**—मैन्देन तन्नामककपिना, अभिहतं भग्नं, वज्रमुष्टेः राक्षस शिरः मस्तकं, विशिश्लेष चुचुम्ब, भूमिमिति शेषः । नीलः कपिसेनापतिः, म्भस्य रक्षसः, स्फुरत् देदीप्यमानं, शिरः शीर्षं, चक्रेण चक्रप्रहरणेन, चिच्छेद ।

**कोशः**—'चक्रं प्रहरणे गणे' ( हैमः ) । 'उत्तमाङ्गं शिरः शीर्षं मूर्द्ध मस्तकोऽस्त्रियाम्' इत्यमरः ।

**तिङन्तः**—श्लिष दाहे ( भ्वादिः ), प्रश्लेषे ( चुरादिः ), आलि ( दिवादिः ) । कृती छेदने ( तुदादिः ) ।

**वाच्य०**—अभिहतेन शिरसा विशिश्लिषे(भूमिः) । नीलेन शिरः चकृते ॥

**विरूपाक्षो जहे प्राणैस् तृढः सौमित्रि-पत्रिभिः।**
**प्रमोचयांचकाराऽसून् द्विविदस् त्वशनिप्रभम् ॥ ३५ ॥**

**अन्वयः**––सौमित्रिपत्रिभिः तृढः विरूपाक्षः प्राणैः जहे। द्विविदः अशनिभम् ( राक्षसम् ) असून् प्रमोचयांचकार।

**हिन्दी**–लक्ष्मणके बाणसे मारा गया विरूपाक्ष प्राणोंसे हाथ धो बैठा। द्विविदने अशनिप्रभके प्राण छोड़वा दिये।

**व्याख्या**—सौमित्रिपत्रिभिः लक्ष्मणबाणैः, तृढः हिंसितः, विरूपाक्षः राक्षसः, ाणैः असुभिः, जहे तत्यजे। द्विविदः कपिः, अशनिप्रभम् राक्षसम्, असून् ाणान्, मोचयाञ्चकार प्रमोचयामास।

**समासः**––सौमित्रेः पत्रिणः तैः। अशनिवत् प्रभा यस्य स अशनिप्रभः इति हुव्रीहिः। ण्यन्तो मुचिः। ओहाक् पूर्वं गतः।

**वाच्यपरिवर्तनम्**––प्राणाः तृढं विरूपाक्षं जहुः। द्विविदेन अशनिप्रभः णान् मोचयाञ्चक्रे ॥ ३५ ॥

**गदा शक्र-जिता जिघ्ये, तां प्रतीयेष वालि-जः।**
**रथं ममन्थ स-हयं शाखिनाऽस्य ततोऽङ्गदः ॥ ३६ ॥**

**अन्वयः**—शक्रजिता गदा जिघ्ये। वालिजः तां प्रतीयेष। ततः अङ्गदः य सहयं रथं शाखिना ममन्थ।

**हिन्दी**––मेघनादने गदा फेंकी। अङ्गदने उसे रोक लिया। तब अङ्गदने के घोड़े सहित रथको पेड़ के द्वारा चकनाचूर कर दिया।

**व्याख्या**––शक्रजिता रावणिना, गदास्त्रं, जिघ्ये प्रैषि। वालिजः अङ्गदः, गदां, प्रतीयेष प्रतीष्टवान्। ततः तदनन्तरम्, अङ्गदः वालिजः, अस्य णेः, सहयं साश्वं, रथं स्यन्दनं, शाखिना वृक्षेण, ममन्थ बभञ्ज।

**तिङन्तः**––हि गतौ ( स्वादिः )। 'हेरचङि ७।३।५६' इति कुत्वम्। इषु छायाम् ( तुदादिः )। '**अभ्यासस्यासवर्णे** ६।४।७८' इतीयङ्। मथि हिंसाेशनयोः ( क्र्यादिः )।

**वाच्यपरिवर्तनम्**—शक्रजित् गदां जिघाय। वालिजेन सा प्रतीये। अङ्गदेन ः रथः ममन्थे ॥ ३६ ॥

**तत् कर्म वालि-पुत्रस्य दृष्ट्वा विध्वं विसिष्मिये।**
**संत्रेसू राक्षसाः सर्वे, बहु मेने च राघवः ॥ ३७ ॥**

**अन्वयः** — वालिपुत्रस्य तत् कर्म दृष्ट्वा विश्वं विसिष्मिये । सर्वे राक्षसा सन्त्रेसुः । राघवः बहु मेने ।

**हिन्दी**—बालिपुत्र अङ्गदके उस कार्यको देखकर त्रिलोक विस्मित हो गय ( आश्चर्यमें पड़ गया ) । सभी राक्षस डर गये । रामने बड़ा आदर किया ।

**व्याख्या**--वालिपुत्रस्य अङ्गदस्य, तत् अद्भुतं, कर्म कर्तव्यं, दृष्ट्वा वीक्ष्य विश्वं त्रिभुवनम्, विसिष्मिये विस्मितमभवत् । सर्वे अशेषाः, राक्षसाः रात्रिचराः, सन्त्रेसुः बिभ्युः । राघवः रामः, बहु भृशं, मेने आदद्रे ( तम् )।

**तिङन्तः**--ष्मिङ् ईषद्धसने, त्रसि उद्वेगे ( भ्वादी ) । मनु अवबोधे ( दिवादि–तनादी ) । **'वा जॄ-भ्रमु-त्रसाम्** ६।४।१२४' ( पाक्षिकावेत्वाभ्या लोपौ ) ।

**वाच्य०**–विश्वेन विसिष्मिये । सर्वैः राक्षसैः सन्त्रेसे । राघवेण बहु मेने ॥३

**सुग्रीवो मुमुदे, देवाः साध्वित्यूचुः स-विस्मयाः ।**
**विभीषणोऽभितुष्टाव, प्रशशंसुः प्लवङ्गमाः ॥ ३८ ॥**

**अन्वयः**—सुग्रीवः मुमुदे । सविस्मया देवाः साधु इति ऊचुः । विभीष अभितुष्टाव । प्लवङ्गमाः प्रशशंसुः ( तम् इति शेषः उभयत्र ) ।

**हिन्दी**—सुग्रीव खुश हुए । विस्मित होकर देवताओंने साधुवाद कह विभीषणने स्तुति की तथा वानरोंने ( अङ्गदकी ) प्रशंसा की ।

**व्याख्या**--सुग्रीवः कपीशः, मुमुदे जहर्ष । सविस्मयाः विस्मिताः, दे सुराः, साधु शोभनमभूत्, इति एवम्, ऊचुः जगदुः । विभीषणः रामानुक अभितुष्टाव स्तुतिं चकार । प्लवङ्गमाः कपयः, प्रशशंसुः प्रशंसितवन्तोऽङ्गदम्।

**तिङन्तः**—मुद हर्षे, शंसु स्तुतौ ( भ्वादी ) । ब्रूञ् व्यक्तायां वाचि, ष्ट स्तुतौ ( अदादी ) । **'वचिस्वपियजादीनां किति** ६।१।१५' सम्प्रसारणम् ऊचुः । **'उपसर्गात्०** ८।३।६५' इति षत्वम्-अभितुष्टाव ।

**वाच्यपरिवर्तनम्**—सुग्रीवेण मुमुदे । देवैः ऊचे । विभीषणेनाभितुष्टु प्लवङ्गमैः प्रशशंसे ॥ ३८ ॥

**ही चित्रं लक्ष्मणेनोदे, रावणिश् च तिरोदधे ।**
**विचकार ततो रामः शरान्, संतत्रसुर् द्विषः ॥ ३९ ॥**

**अन्वयः**—ही ( इत्याश्चर्ये ) चित्रं लक्ष्मणेन ऊदे, रावणिः तिरोदधे । रामः शरान् विचकार, द्विषः संतत्रसुः ।

**हिन्दी**--अहो ! यह विचित्र है ! ऐसा लक्ष्मणने कहा । मेघनाद तो छिप गया । तब रामचन्द्रने बाणकी वर्षा कर दी । शत्रु डर गये ।

**व्याख्या**--ही इत्याश्चर्ये, लक्ष्मणेन सौमित्रिणा, चित्रम् अद्भुतम् इदम्, इति एवम्, ऊदे ऊचे । रावणिः मेघनादः, तिरोदधे अन्तर्हितः । ततः तदनन्तरं, रामः राघवः, शरान् बाणान्, विचकार विचिक्षेप । द्विषः शत्रवः, संतत्रसुः बिभ्युः ।

**तिङन्तः**--वद व्यक्तायां वाचि, त्रसी उद्वेगे ( भ्वादी )। डुधाञ् धारणधोषणयोः ( जुहोत्यादिः )। कॄ विक्षेपे ( तुदादिः )।

**वाच्यपरिवर्तनम्**--लक्ष्मणः चित्रम् उवाद । रावणिना तिरोदधे । रामेण विचकरिरे। शत्रुभिः संत्रेसे ॥ ३९ ॥

**विभिन्ना जुघुरुर् घोरं, जक्षुः क्रव्याऽशिनो हतान् ।**
**चुश्च्योत व्रणिनां रक्तं, छिन्नाश् चेलुः क्षणं भुजाः ॥ ४० ॥**

**अन्वयः**—विभिन्ना घोरं जुघुरुः, क्रव्याशिनो हतान् जक्षुः । व्रणिनाम् रक्तं चुश्च्योत, छिन्नाः भुजाः क्षणं चेलुः ।

**हिन्दी**–बाणसे विद्ध सैनिक भयानक शब्द कर रहे थे। मांसाहारी जानवर रे वीरोंको खा रहे थे। कटे अङ्गवालोंका खून बह रहा था तथा कटी भुजाएँ क्षणभर हिल रही थीं ।

**व्याख्या**--(शस्त्रेण) विभिन्नाः विदीर्णाः,घोरं भयानकं, जुघुरुः आचुक्रुशुः । क्रव्याशिनः मांसादाः, हतान् मृतान्,जक्षुः चखादुः । व्रणिनां क्षतानां, रक्तं रुधिरं, चुश्च्योत चक्षार। छिन्नाः कृत्ताः, भुजाः बाहवः, क्षणं स्वल्पकालं, चेलुः पुस्फुरुः।

**तिङन्तः**—घुर भीमार्थशब्दयोः ( तुदादिः ), श्च्युतिर क्षरणे ( भ्वादिः )। अद भक्षणे ( अदादिः )। 'लिटयन्यतरस्याम् २।४।४०' इति घस्लादेशः ।

**वाच्यपरिवर्तनम्**--विभिन्नैः जुघुरे । क्रव्याशिभिः हताः जक्षिरे । रक्तेन छिन्नैः भुजैः चेले ॥ ४० ॥

**कृत्तैरपि दृढ-क्रोधो वीर-वक्त्रैर् न तत्यजे ।**
**पलायांचक्रिरे शेषा, जिह्रियुः शूरमानिनः ॥ ४१ ॥**

**अन्वयः**--कृत्तैः अपि वीर-वक्त्रैः दृढक्रोधः न तत्यजे । शेषाः पलायाञ्चक्रिरे। रमानिनः जिह्रियुः ।

**हिन्दी**--कटे हुए वीरोंके क्रोधी मुखकी आभा झलक रही थी, दृढ क्रोध शान्त नहीं हुआ था । बचे हुए योद्धा भाग गये । मानी वीर शरमा गये ।

**व्याख्या**—कृत्तैः छिन्नैः, वीरवक्त्रैः शूरमुखैः, दृढ-क्रोधः स्थिरकोपः, नहि, तत्यजे जहे। शेषाः अवशिष्टाः, पलायाञ्चक्रिरे पलायिताः। शूरमानिन वीरम्मन्याः, जिह्रियुः लज्जन्ते स्म।

**तिङन्तः**—त्यज हानौ (भ्वादिः)। ह्री लज्जायाम् (जुहोत्यादिः)। पल याञ्चक्रिरे–सिद्धिप्रकारः सर्गादावेवोक्तः ॥ ४१ ॥

**राघवो न दयांचक्रे, दधुर् धैर्यं न केचन।**
**मम्रे पतङ्गवद् वीरैर् हाहेति च विचुक्रुशे ॥ ४२ ॥**

**अन्वयः**—राघवः दयां न चक्रे। केचन धैर्यं न दधुः। वीरैः पतङ्गवद् मम्र हा हा इति चुक्रुशे च।

**हिन्दी**—राघवने दया नहीं की। सभीने धैर्य छोड़ दिया। वीर कीड़ समान मरने लगे और 'हा हा' चिल्लाने लगे।

**व्याख्या**—राघवः रामः, दयां कृपां, न नहि, चक्रे दधौ। केचन केऽपि, ध धीरतां, न नहि, दधुः धृतवन्ताः। वीरैः शूरैः, पतङ्गवत् शलभवत्, मम्रे प्रा जहिरे, 'हा हा' इति–हन्त हन्त इति चुक्रुशे रुदितम् च।

**वाच्यपरिवर्तनम्**—राघवेण दया न चक्रे। कैश्चन धैर्यं न दधे। वीर मम्रुः, विचुक्रुशुः च ॥ ४२ ॥

**तिरोबभूवे सूर्येण, प्रापे च निशयाऽऽस्पदम्।**
**जग्रसे काल-रात्रीव वानरान् राक्षसांश् च सा ॥ ४३ ॥**

**अन्वयः**—सूर्येण तिरोबभूवे, निशया आस्पदम् प्रापे। सा कालरात्री वानरान् राक्षसान् च जग्रसे।

**हिन्दी**—सूर्य छिप गये, रात्रि आ गयी। वह कालरात्रि के समान वान तथा राक्षसोंको ग्रसने ( खाने ) लगी।

**व्याख्या**—सूर्येण रविणा, तिरोबभूवे अन्तर्दधे। निशया रजन्या, आस्प स्थानं, प्रापे प्राप्तम्। सा निशा, कालरात्री यमनिशा, इव यथा, वानर कपीन्, राक्षसान् क्षणदाचरान्, जग्रसे ग्रसते स्म।

**तिङन्तः**—आप्लृ प्राप्तौ ( स्वादिः )। ग्रस भक्षणे ( भ्वादिः )। 'आस प्रतिष्ठायाम् ६।१।१४६' इति निपातितम् आस्पदम्। 'कृदिकारादक्ति ४।१।३१' इति ङीष्—कालरात्री।

**वाच्यपरिवर्तनम्**—सूर्यः तिरोबभूव, निशा आस्पदं प्राप। तया वान राक्षसाः च जग्रसिरे ॥ ४३ ॥

**चुकोपेन्द्रजिदत्युग्रं सर्पाऽस्त्रं चाऽऽजुहाव सः ।**
**आजुहुवे तिरोभूतः परानीकं, जहास च ॥ ४४ ॥**

**अन्वयः**—इन्द्रजित् अत्युग्रं चुकोप, स सर्पास्त्रं च आजुहाव । तिरोभूतः ीकम् आजुहुवे, जहास च ।

**हिन्दी**—मेघनाद अत्यन्त क्रुद्ध हुआ और उसने सर्पास्त्रका आह्वान किया । । छिपे रहकर शत्रु-सेनाको ललकारा और हँसा ।

**व्याख्या**—इन्द्रजित् रावणिः, अत्युग्रम् अत्यर्थं, चुकोप चुक्रोध । स इन्द्र-, सर्पास्त्रम् तन्नामकम् अस्त्रविशेषम्,आजुहाव आहूतवान् । तिरोभूतः अन्त-ः, परानीकं शत्रुसैन्यम्, आजुहुवे स्पर्धते स्म, जहास च विहसितवान् ।

**तिङन्तः**—कुप क्रोधे ( दिवादिः ) । ह्वेञ् स्पर्धायां शब्दे च ( भ्वादिः ) । यस्तस्य च ६।१।३२' इति सम्प्रसारणे द्वित्वादि । **'स्पर्धायामाङः १।३।३१'** त्मनेपदम् । सर्वं कार्य्यं पूर्ववत् ।

**वाच्यपरिवर्तनम्**—इन्द्रजिता चुकुपे, तेन सर्पास्त्रम् आजुहुवे । तिरोभूतेन ीकम् आजुहुवे जहसे च ॥ ४४ ॥

**बबाधे च बलं कृत्स्नं, निजग्राह च सायकैः ।**
**उत्ससर्ज शरांस् तेऽस्य सर्प-सात् च प्रपेदिरे ॥ ४५ ॥**

**अन्वयः**—( सः ) कृत्स्नं बलं बबाधे, सायकैः निजग्राह च । शरान् सर्ज । अस्य ते शराः सर्पसात् च प्रपेदिरे ।

**हिन्दी**—उसने सारी सेनाको बेचैन कर दिया और सर्पास्त्रोंसे बाँध । वह बाणोंको छोड़ने लगा । उसके वे सभी बाण सर्प ही हो जाते थे ।

**व्याख्या**—स इन्द्रजित्, कृत्स्नं सर्वं, बलं शत्रुसैन्यं, बबाधे पीडितवान् । कैः सर्पेषुभिः, निजग्राह निगृहीतवान् । शरान् बाणान्, उत्ससर्ज मुमोच । इन्द्रजितस्ते बाणाः, सर्पसात् सर्वे सर्पतां, प्रपेदिरे सम्पन्नाः ।

**तिङन्तः**—बाधृ विलोडने ( भ्वादिः ) । ग्रह उपादाने ( क्र्यादिः ) । सृज र्गे ( तुदादिः ) । पद गतौ ( दिवादिः ) । **'विभाषा साति कार्त्स्न्ये'** ।५२' इति कार्त्स्न्ये सातिः ।

**वाच्यपरिवर्तनम्**—तेन बलं बबाधे, निजगृहे च । शराः उत्ससृजिरे । तैः प्रपेदे ॥ ४५ ॥

**आचिचाय स तैः सेनामाचिकाय च राघवौ ।**
**बभाण च, 'न मे मायां जिगायेन्द्रोऽपि, किं नृभिः' ॥ ४६ ॥**

**अन्वयः**—स तैः सेनाम् आचिचाय, राघवौ च आचिकाय। बभाण इन्द्रोऽपि मे मायां न जिगाय, नृभिः ( वराकैः ) किं प्रयोजनम् ?

**हिन्दी**—उसने उन बाणोंसे सेनाको ढक दिया और राम-लक्ष्मणको ढक दिया तथा बोला कि 'मेरी मायाको इन्द्र भी नहीं जीत सका तो म बेचारा क्या कर सकेगा'।

**व्याख्या**—स इन्द्रजित्, तैः बाणैः,सेनां शत्रुबलम्, आचिचाय आच्छन्नव राघवौ रामलक्ष्मणौ च, आचिकाय आच्छादितवान्, बभाण उवाच च। शक्रः, अपि ( अवज्ञायाम् अपिः ), न नहि, जिगाय विजितवान्। मानवैः, वराकैः दीनैः, किम् साध्यमिति शेषः।

**तिङन्तः**—चिञ् चयने ( स्वादिः )। 'विभाषा चेः ७।३।५८' इति कुत भण शब्दे ( भ्वादिः )। जि जये ( भ्वादिः )। 'सन्लिटोर्जेः ७।३।५७' कुत्वम्।

**वाच्यपरिवर्तनम्**—तेन चिच्ये सेना, राघवौ चिक्याते। बभणे च इन्द्रे माया न जिग्ये, नराः के ? ॥ ४६ ॥

आचिक्याते च भूयोऽपि राघवौ तेन पन्नगैः।
तौ मुमुहतुरुद्विग्नौ, वसुधायां च पेततुः ॥ ४७ ॥

**अन्वयः**—तेन भूयोऽपि पन्नगैः राघवौ आचिक्याते। उद्विग्नौ तौ मु वसुधायां च पेततुः।

**हिन्दी**—उसने पुनः सर्पास्त्रोंसे राम-लक्ष्मणको बाँध दिया। वे उद्विग्न होकर मूर्च्छित हो गये और पृथ्वी पर गिर पड़े।

**व्याख्या**—तेन रावणिना, भूयः पुनरपि, पन्नगैः सर्पास्त्रैः, राघवौ सौमित्री, आचिक्याते आच्छन्नौ। उद्विग्नौ विपन्नौ, तौ द्वौ, मुमुहतुः मुमू वसुधायां पृथिव्यां, पेततुः लुलुठुः।

**वाच्य०**—स तौ चिकाय। उद्विग्नाभ्याम् ताभ्याम् मुमुहे पेते च ॥ ४

ततो रामेति चक्रन्दुस्, त्रेसुः परिदिदेविरे।
निशश्वसुश् च सेनान्यः, प्रोचुर् धिगिति चाऽऽत्मनः ॥ ४८ ॥

**अन्वयः**—ततः सेनान्यः 'हा राम हा राम' इति चक्रन्दुः, त्रेसुः, प विरे, निशश्वसुः, आत्मनः धिक् इति प्रोचुः च।

**हिन्दी**—तब सब सेनापति 'हा राम हा राम' ऐसा चिल्लाने लगे। वे ड और विलाप करने लगे, गरम श्वास लेने लगे एवम् अपनेको धिक्कारने

**व्याख्या**—ततः तदनन्तरम्, सेनान्यः बलाध्यक्षाः, हा राम हा राम, इति, चक्रदुः रुदितवन्तः, त्रेसुः बिभ्युः, परिदिदेविरे विलेपुः, आत्मनः स्वम्, इति, प्रोचुः जगदुः।

**तिङन्तः**—क्रदि आह्वाने रोदने च, देवृ देवने ( भ्वादौ )। श्वस प्राणने दिरदादिः।

**वाच्यपरिवर्तनम्**—सेनानीभिः चक्रन्दे, त्रेसे, दिदेवे, प्रोचे ॥ ४८ ॥

**मन्युं शेकुर् न ते रोद्धुं, नाऽस्रं संरुरुधुः पतत्।**
**विविदुर् नेन्द्रजिन्-मार्गं, परीयुश् च प्लवङ्गमाः ॥ ४९ ॥**

**अन्वयः**—ते मन्युं रोद्धुं न शेकुः, पतत् अस्रं न संरुरुधुः। इन्द्रजित् मार्गं विविदुः। प्लवङ्गमाः ( अन्ये ) परीयुः।

**हिन्दी**—वे सेनापति अपना शोक रोक न सके। गिरते आँसूको नहीं रोक। मेघनादके मार्गको समझ न सके। अन्य वानर ( उसकी तलाशमें ) ों ओर निकल पड़े।

**व्याख्या**—ते सेनान्यः, मन्युं शोकं, रोद्धुं वारयितुं, न नहि, शेकुः पारितवन्तः। क्षरत्, अस्रम् नेत्रजलम्, न नहि, संरुरुधुः निवारयामासुः। इन्द्रजिन्मार्गं ादपथं, न नहि, विविदुः जज्ञुः। प्लवङ्गमाः ( अन्ये ) वानराः, परीयुः ाद् गतवन्तः, क्वासौ अगमदिति तदन्वेषणाय।

**तिङन्तः**—शक्लृ शक्तौ ( स्वादिः )। इण् गतौ ( अदादिः )। परिपूर्व- 'अभ्यासस्यासवर्णे ६।३।७८' इतीयङ्।

**वाच्यपरिवर्तनम्**—तैः मन्युं रोद्धुं न शेके, अस्रं न संरुरुधे। मार्गं न दे, प्लवङ्गमैः परीये ॥ ४९ ॥

**दधावाऽद्भिस् ततश् चक्षुः सुग्रीवस्य विभीषणः।**
**विदाञ्चकार धौताऽक्षः स रिपुं खे, ननर्द च ॥ ५० ॥**

**अन्वयः**—ततो विभीषणः सुग्रीवस्य चक्षुः अद्भिः दधाव। धौताक्षः स खे विदाञ्चकार, ननर्द च।

**हिन्दी**—इसके पश्चात् विभीषणने सुग्रीवकी आँख जलसे धोई। धुली हुई वाले उसने आकाशमें शत्रुको देखा और गरजा।

**व्याख्या**—ततः इन्द्रजिदन्तर्हित्यनन्तरम्, विभीषणः भावि-लङ्केशः, सुग्रीवस्य स्य, चक्षुः नेत्रम्, अद्भिर्जलेन, दधाव ममार्ज। धौताक्षः प्रक्षालितचक्षुः, ग्रीवः, खे नभसि, रिपुं शत्रुं, विदांचकार विवेद, ननर्द जगर्ज च।

**तिङन्तः**—धावु प्रक्षालने, नर्द शब्दे ( भ्वादी )। विद ज्ञाने( अदादि:
'उषविद० ३।१। ३८' इति आम् । ततः कृञो योगः ।

**समासः**—धौते अक्षिणी यस्य सः। 'बहुव्रीहौ० ५।४। ११३' इति षचि धौत

**वाच्य०**—विभीषणेन चक्षुः दधावे, धौताक्षेण रिपुः विविदांचक्रे, ननर्दे

**उज्जुगूरे ततः शैलं हन्तुमिन्द्रजितं कपिः ।**
**विहाय रावणिस् तस्मादानंहे चाऽन्तिकं पितुः ॥ ५१ ॥**

**अन्वयः**—ततः कपिः इन्द्रजितं हन्तुं शैलम् उज्जुगूरे । रावणिः ( ख
विहाय तस्मात् ( स्थानात् ) पितुः अन्तिकम् आनंहे ।

**हिन्दी**—तत्पश्चात् सुग्रीवने इन्द्रजित् को मारनेके लिये पर्वत (उखाड़
फेंका, पर इन्द्रजित् आकाश छोड़कर वहाँ से पिताके पास चला गया ।

**व्याख्या**—ततः गर्जनानन्तरम्, कपिः सुग्रीवः, इन्द्रजितं रावणिं,
मारितुं, शैलं गिरिम्, उज्जुगूरे उत्खाय प्रचिक्षेप । रावणिः मेघनादः, वि
त्यक्त्वा (खम्), तस्मात् स्थानात्, पितुः जनकस्य, अन्तिकम् पार्श्वम्, जग

**तिङन्तः**—गूरी हिंसागत्योः, अहि गतौ (भ्वादी)। '**तस्मान्नुड्०** ७।४
इत्यभ्यासान्नुट् ।

**वाचयपरिवर्तनम्**—कपिना शैलम् उज्जुगूरे । रावणिना आनंहे ॥ ५

**आचचक्षे च वृत्तान्तं, प्रजहर्ष च रावणः ।**
**गाढं चोपजुगूहैनं, शिरस्युपशिशिङ्घ च ॥ ५२ ॥**

**अन्वयः**—( स ) वृत्तान्तम् च आचचक्षे । रावणः प्रजहर्ष । एनं
उपजुगूह, शिरसि उपशिशिङ्घ च ।

**हिन्दी**—उसने युद्ध की बाते ( राघवोंको बांधना इत्यादि ) कहीं ।
बहुत खुश हुआ । उसका गाढ आलिङ्गन किया और शिर चूमा ।

**व्याख्या**—मेघनादः रावणिः, वृत्तान्तं युद्धोदन्तम् (राघवबन्धनादि),आ
कथितवान् । रावणः दशास्यः, प्रजहर्ष ननन्द । एनम् मेघनादं, गाढं दृढम्
जुगूहे आलिलिङ्ग । शिरसि मस्तके, उपशिशिङ्घ आघ्रातवान्, आघ्राणवा

**तिङन्तः**—चक्षिङ् व्यक्तायां वाचि ( अदादिः )। हृष प्रहर्षे, गुहू सं
शिघि आघ्राणे ( भ्वादयः )। क्रियाफलस्याविवक्षितत्वान्न तङ् । 'ऊदु
गोहः ६।४।८९' इत्यूत्वम् ।

**वाच्यपरिवर्तनम्**—तेन वृत्तान्तम् आचचक्षे । रावणेन प्रजह
अयं गाढम् उपजुगूहे उपशिशिङ्घे च ॥ ५२ ॥

**ध्वजानुद्दुधुवुस् तुङ्गान्, मांसं चेमुर्, जगुः, पपुः ।**
**कामयांचक्रिरे कान्तास्, ततस् तुष्टा निशाचराः ॥ ५३ ॥**

**न्वयः**—ततः तुष्टा निशाचराः तुङ्गान् ध्वजान् उद्दुधुवुः । मांसं चेमुः, पुः । कान्ताः कामयाञ्चक्रिरे ।

**न्दी**——तब सन्तुष्ट होकर सभी निशाचर लम्बे-लम्बे ध्वज फहराने लगे, ाने लगे, गीत गाने लगे, मद्य पीने लगे तथा स्त्रियोंकी चाह करने लगे ।

**ख्या**——ततः राघवादिबन्धनोदन्तश्रवणानन्तरम्, सन्तुष्टाः हृष्टाः, ाः राक्षसाः, तुङ्गान् दीर्घान्, ध्वजान् केतून्, उद्दुधुवुः उत्क्षिप्तवन्तः । आमिषम्, चेमुः चखादुः । जगुः गानं चक्रुः । पपुः मद्यं पीतवन्तः। कान्ताः कामयाञ्चक्रिरे कामितवन्तः ।

ङन्तः—धूञ् कम्पने ( स्वादिः ) । चमु छमु अदने, कै गै शब्दे, पा मु कान्तौ (भ्वादयः) । **'कमेर्णिङ् ३।१।३०'** इति णिङि कुञोऽनुप्रयोगः।

**च्यपरिवर्तनम्**—तुष्टैः निशाचरैः ध्वजा उद्दुधुविरे, मांसं चेमे, जगे, न्ताः चकमिरे ॥ ५३ ॥

**दर्शयांचक्रिरे रामं सीतां राज्ञश् च शासनात् ।**
**तस्या मिमीलतुर् नेत्रे, लुलुठे पुष्पकोदरे ॥ ५४ ॥**

**वयः**——राज्ञः शासनात् सीतां रामं च दर्शयाञ्चक्रिरे । तस्या नेत्रे निमि- । पुष्पकोदरे सा लुलुठे ( मूर्च्छयेति शेषः ) ।

**न्दी**—राजाकी आज्ञासे राक्षसोंने सीताको राम का दर्शन कराया । आँखें बन्द हो गयीं और वह मूर्छित होकर पुष्पक विमानमें लोट गयी ।

**ख्या**—राज्ञः दशास्यस्य, शासनात् आज्ञायाः, सीतां (गौणं कर्म), रामं कर्म) च दर्शयांचक्रिरे ( राक्षसाः इति शेषः ) । तस्याः सीतायाः, नेत्रे निर्मिमीलतुः मुद्रिते बभूवतुः । पुष्पकोदरे पुष्पकविमानमध्ये, सा सीता, मूर्छं ।

**ङन्तः**—मील निमीषणे, मुर्च्छा मोह-समुच्छ्राययोः, लुठ प्रतिघाते ः ) । **'अभिवादिदृशोरात्मनेपदे वेति वाच्यम् १।४।५३ वा०'** इति द्विकर्मकता रामे ।

**च्यपरिवर्तनम्**—राक्षसैः सीता रामं दर्शयाञ्चक्रे, नेत्राभ्यां निमिमीले, लुठे ॥ ५४ ॥

**प्राणा दध्वंसिरे, गात्रं तस्तम्भे च प्रिये हते ।**
**उच्छश्वास चिराद् दीना, ररोदाऽसौ ररास च ॥ ५५ ॥**

**अन्वयः**——प्रिये हते तस्याः प्राणाः दध्वंसिरे, गात्रं तस्तम्भे, असं सती उच्छ्श्वास, रुरोद, ररास, च।

**हिन्दी**—प्रियके मूर्छित होजानेपर उसके प्राण नष्ट हो गये। ग हो गये। दीन-दु:खी होकर बड़ी देरमें श्वास लेने लगी, फिर रोने चिल्ला

**व्याख्या**—प्रिये रामे, हते मूर्च्छिते सति, तस्याः सीतायाः, प्राणाः दध्वंसिरे ध्वस्ताः। गात्रम् अङ्गम्, तस्तम्भे स्तम्भितम् अभूत्। दुःखिनी सती, चिराद् विलम्बेन, उच्छश्वास श्वसितवती। ततः रुरोद रुदितवती, ररास चक्रन्द च।

**वाच्यपरिवर्तनम्**—प्राणैः दध्वंसे, गात्रेण तस्तम्भे। अमुया दीन श्वसे, रुरुदे, ररासे च॥ ५५॥

**लौह-बन्धैर् बबन्धे नु, वज्रेण किं विनिर्ममे।**
**मनो मे, न विना रामाद् यत् पुस्फोट सहस्र-धा॥ ५६**

**अन्वयः**—(सीता विललाप, तथाहि-) मे मनः लौहबन्धैः बबन् वज्रेण विनिर्ममे किम्? रामाद् विना सहस्रधा न पुस्फोट।

**हिन्दी**—मेरा मन लोहोंके बन्धनसे बँधा है क्या? वज्रसे बनाय क्या? जिससे रामचन्द्रके न रहनेपर हजारों टुकड़ोंमें फट नहीं जाता

**व्याख्या**--(सीता विललाप) तथाहि—मे मम, मनः चेतः, लौहबन्धै शृङ्खलाभिः, बबन्धे बद्धम् किम्? वज्रेण हीरकेण, विनिर्ममे निर्मित इत्याश्चर्यम्। यद् यतः, रामाद् राघवाद्, विना ऋते, सहस्रधा सहस्र नहि, पुस्फोट स्फुटितम्।

**तिङन्तः**——बन्ध बन्धने (क्र्यादिः)। मा माने (अदादिः)। स्फुट (तुदादिः)। 'शर्पूर्वाः खयः ७।४।६१' इति खयः शेषः।

**वाच्यपरिवर्तनम्**—लौहबन्धाः मनो बबन्धुः, वज्रं मनः विनिर्ममे

**उत्तेरिथ समुद्रं त्वं मदर्थे ऽरीन् जिहिंसिथ।**
**ममथं चाऽतिघोरां मां धिग् जीवित-लघूकृताम्॥ ५७॥**

**अन्वयः**——त्वं मदर्थे समुद्रम् उत्तेरिथ, अरीन् जिहिंसिथ, ममर्थ च अतिघोरां जीवितलघूकृताम् मां धिक्।

**हिन्दी**—हे राम! तूने मेरे लिये ही समुद्र को पार किया, शत्रुओं किया और अब मूर्च्छित पड़े हो। अतः अत्यन्त क्रूर तथा जीवित रहने तुच्छ बनी हुई मुझे धिक्कार है।

**ख्या**—हे राम ! त्वं, मदर्थे सीतायै, समुद्रं सागरं, तेरिथ उल्ललङ्घिथ, ात्रून्, जिहिंसिथ जघन्थ, ( स्वयं च ) ममर्थ मुमूर्च्छिथ। अस्मात् त्, अतिघोरां रौद्रतमां, जीवितलघूकृताम् जीवनकारणात् तुच्छतां गतां, ां, धिक् धिक्कारः ।

**ङन्तः**—–तॄ प्लवनतरणयोः (भ्वादिः) । तृह, हिसि हिंसायां (रुधादिः)। गत्यागे ( तुदादिः ) । **'तॄफलभजत्रपश्च** ६।४।१२२' इति एत्वाभ्यास- **'ऋतो भारद्वाजस्य** ७।२।६३' इति नेट् । ममर्थ । जीविताय लघूकृता ा चतुर्थीतत्पुरुषः । अलघुः लघुः कृता इति लघूकृता । **'च्वौ च** ७।४। ते दीर्घः ।

**च्यपरिवर्तनम्**–त्वया समुद्र उत्तेरे, अरयः जिहिंसिरे, मम्रे च ॥ ५७ ॥

**न जिजीवाऽसुखी तातः प्राणता रहितस् त्वया ।**
**मृतेऽपि त्वयि जीवन्त्या किं मयाऽऽणकभार्यया' ॥ ५८ ॥**

**न्वयः**—प्राणता त्वया रहितः तातः असुखी सन् न जिजीव। मृतेऽपि ीवन्त्या आणकभार्य्यया मया किम् ।

**न्दी**—–आपके जीते जी वियोग होने पर पिताजी दुःखी होकर मर गये। मूर्छित हो जाने पर जीती हुई मुझ पापिनी भार्यासे क्या मतलव ?

**ख्या**—–प्राणता जीवता, त्वया रामेण, विरहितः वियुक्तः, तातः पिता , असुखी दुःखी सन्, न नहि, जिजीव जीवितवान्, ममार इत्यर्थः । मृते ऽपि, त्वयि प्रिये, जीवन्त्या प्राणान् धारयन्त्या, आणकभार्य्यया कुत्सित- मया सीतया, किम् ? न किमपि प्रयोजनम् इति काकुः ।

**ङन्तः**—–जीव प्राणने ( भ्वादिः ) । अन प्राणने ( अदादिः ) । प्रायोऽयं

**ासः**–आणका चासौ भार्या आणकभार्या । **'पापाणके कुत्सितैः** २।१।५४' मासः ।

**च्यपरिवर्तनम्**–रहितेन असुखिना तातेन न जिजीवे । केन भूयते ॥५८॥

**सा जुगुप्सान् प्रचक्रेऽसून्, जगर्हे लक्षणानि च ।**
**देहभाञ्जि, ततः केशान् लुलुञ्च, लुलुठे मुहुः ॥ ५९ ॥**

**न्वयः**—–सा असून् जुगुप्सान् ( निन्दितान् ) प्रचक्रे ( अथवा जुगुप्सां इत्येकम् पदम् ) । देहभाञ्जि लक्षणानि च जगर्हे । ततः केशान् लुलुञ्च, लुठे च ।

**हिन्दी**––उसने प्राणोंको निन्दित बताया, देहमें विद्यमान लक्षणो निन्दा की । अनन्तर केशोंको नोच डाला, बारबार पृथ्वी पर लोटती

**व्याख्या**––सा सीता, असून् प्राणान्, जुगुप्सान् निन्दितान्, प्रचक्रे कृ अथवा जुगुप्साम्प्रचक्रे इति क्रियापदमेकम् । देहभाञ्जि कायगतानि, ल चिह्नानि, जगर्हे निनिन्द । ततः पश्चात्, केशान् कचान्, लुलुञ्च अपहि मुहुः वारं वारं, लुलोठ भूमौ असकृत् पपात ।

**तिङन्तः**–**'गुप्तिज्किद्भ्यः सन् ३।१।५'** इति सनि द्वित्वादिना जुगुप्स सिद्धः।ततः जुगुप्स्यन्ते इति जुगुप्साः–कर्मणि घञ्। तस्य शसि रूपम्। अथव प्रत्ययान्तधातुत्वादाम्–प्रत्यये कृञोऽनुप्रयोगः । प्रोपसर्गेण कृञो योगो नतु स धातोः । एवं कविप्रयोगा दृश्यन्ते । 'तं पातयां प्रथममास पपात पश्चात्' 'प्र यो नहुषं चकार' इत्यादि । अत्र तु केवलमुपसर्गस्यैव व्यत्यासः । तत्र प्रयोगधातुमध्ये पदव्यवधानम् दृश्यते । गर्ह निन्दायाम्, गुप गोपने ( भ्वा

**वाच्यपरिवर्तनम्**–तया असवः जुगुप्साम्प्रचक्रिरे, लक्षणानि जगर्हिरे लुलुञ्चिरे, स्वयं स्वात्मना लुलुठे भूमौ ।। ५९ ।।

**जग्लौ, दध्यौ, वितस्तान, क्षणं प्राण न विव्यथे ।**
**दैवं निनिन्द चक्रन्द, देहे चाऽतीव मन्युना ।। ६० ।।**

**अन्वयः**—( सा ) जग्लौ, दध्यौ, वितस्तान, क्षणं न प्राण, विव्य निनिन्द, चक्रन्द, मन्युना अतीव देहे ।

**हिन्दी**—वह म्लान हो गयी, ध्यानपरायणा हो गयी, शब्द करने क्षण भर मूर्छित हो गयी, व्यथित हो गयी, भाग्यको कोसने लगी, लगी ( और ) शोकसे अत्यन्त जल उठी ।

**व्याख्या**––सा सीता, जग्लौ ग्लानिं प्राप । दध्यौ ध्यातवती । वि ( पीडया ) विरुराव । क्षणं मुहूर्तं, न नहि, प्राणं श्वासं, जग्राह गृही मुमूर्छेत्यर्थः । विव्यथे व्यथां प्राप, दैवं भाग्यं, निनिन्द जगर्हे, चक्रन्द मन्युना शोकेन, अतीव अत्यर्थं, देहे जज्वले ।

**तिङन्तः**–ध्यै चिन्तायाम्, स्तन शब्दे, व्यथ पीडायाम्, क्रदि आह्वाने च, दह भस्मीकरणे (भ्वादयः) । **'अत आदेः ७।४।७०** इति अभ्यासदीर्घ **'व्यथो लिटि ७।४।६८'** इत्यभ्याससम्प्रसारणम्–विव्यथे। देहे इति कर्मणि

**वाच्यपरिवर्तनम्**–जग्ले, तया दध्ये, वितस्तने, प्राणे, विव्यथे, निनिन्दे, चक्रन्दे । तां मन्युः ददाह ।। ६० ।।

BYBSSMV

**आश्वासयांचकाराऽथ त्रिजटा तां, निनाय च ।**
**ततः प्रजागरांचक्रुर् वानराः स-विभीषणाः ।। ६१ ।।**

**अन्वयः**—अथ त्रिजटा ताम् आश्वासयाञ्चकार । ततो निनाय च (स्वस्था- ततः सविभीषणाः वानराः प्रजागराञ्चक्रुः ।

**हिन्दी**—बाद त्रिजटाने उसे ( सीताजीको ) आश्वस्त किया ( समझा र ) और वहांसे अशोक वाटिकामें ले गयी । अनन्तर विभीषणके साथ वानरोंने जागरण किया ।

**व्याख्या**—अथ सीताविलापानन्तरम्, त्रिजटा रावणभगिनी, तां सीताम्, सयामास (विष्णुरयं रामः नास्य क्षतिः स्यादित्यादिना) आश्वासितवती । 'प्रबुद्ध-स्थलात्, अशोकवनिकां वाटिकां, निनाय नीतवती । ततः तदनन्तरम्, षणाः विभीषणेन सहैव, वानराः कपयः, प्रजागराञ्चक्रुः जजागरुः । दजागृभ्योऽन्यतरस्याम् ३।१।३८' इति पाक्षिक आम् । श्वसेर्ण्यन्तादाम् । वाच्यपरिवर्तनम्—त्रिजटया आश्वासयाञ्चके सा, निन्ये च । सविभीषणैः प्रजागराञ्चक्रे ।। ६१ ।।

**चिचेत रामस् तत् कृच्छ्रमोषांचक्रे शुचाऽथ सः ।**
**मन्युश् चाऽस्य समापिप्ये, विरुराव च लक्ष्मणम् ।। ६२ ।।**

**न्वयः**—रामः तत् कृच्छ्रं चिचेत । अथ स शुचा ओषांचक्रे ( कर्मणि ) । अस्य मन्युः समापिप्ये, लक्ष्मणं विरुराव च ।

**हिन्दी**—रामचन्द्र ने उस बन्धन-दुःखको जाना, तत्पश्चात् शोक उन्हें जलाने एवं उनका शोक बढ़ने लगा । तब उन्होंने लक्ष्मण को पुकारा ।

**याख्या**—रामः राघवः, तत् वर्तमानं कृच्छ्रं शरबन्धदुःखं, चितेत विवेद । दनन्तरं, शुचा शोकेन ( कर्त्री ), स रामः ( कर्म ), ओषाञ्चक्रे देहे । रामस्य, मन्युः शोकः, समापिप्ये वृद्धिङ्गतः । लक्ष्मणं सौमित्रिं, विरुराव तं स्म जीवसीत्यादि विलापैः ।

**तिङन्तः**—चिती संज्ञाने । उष दाहे । पूर्वसूत्रेणाम् । ओप्यायी वृद्धौ ादिः ) । रु शब्दे ( अदादिः ) ।

**वाच्यपरिवर्तनम्**—रामेण कृच्छ्रं चिचिते । शुक् तम् ओषाञ्चकार । मन्युना प्ये । लक्ष्मणस्तेन विरुरुवे ।। ६२ ।।

**समीहे मर्तुमानर्चे तेन वाचाऽखिलं बलम् ।**
**आपपृच्छे च सुग्रीवं स्वं देशं विससर्ज च ।। ६३ ।।**

527

**अन्वयः**—स मर्तुं समीहे । तेन अखिलं बलं वाचा आनर्चे (कर्मणि
सुग्रीवम् आपपृच्छे, स्वं देशं च विससर्ज ।

**हिन्दी**—रामने प्राण छोड़ देना चाहा । उन्होंने वचन से सारी
सम्मान किया, सुग्रीवसे सलाह की तथा उन्हें अपने देशको भेजना चा

**व्याख्या**—स रामः, मर्तुं प्राणान् हातुं, समीहे इयेष । तेन रामेण,
सर्वं, बलं सैन्यं, वाचा वचसा, आनर्चे सम्मानितम् । सुग्रीवं कपीशम्, आ
आमन्त्रितवान् । स्वं स्वीयं तदीयं, देशं किष्किन्धां नगरीं, विससर्ज विस
मियेष । सम्भावनायां लिट् ।

**तिङन्तः**—ईह चेष्टायाम्, अर्च पूजायाम् ( भ्वादी ) । प्रच्छ ज्ञी
सृज विसर्गे ( तुदादी ) । **'आङि नु-पृच्छयोरुपसंख्यानम् १।३।२१'** इति

**वाच्यपरिवर्तनम्**—तेन ईहे, स बलम् आनर्च, सुग्रीव आपपृच्छे तेन
देशं स विससृजे रामेण ॥ ६३ ॥

**आदिदेश स किष्किन्धां राघवौ नेतुमङ्गदम् ।**
**प्रतिजज्ञे स्वयं चैव सुग्रीवो रक्षसां वधम् ॥ ६४ ॥**

**अन्वयः**—स राघवौ किष्किन्धां नेतुम् अङ्गदम् आदिदेश । सुग्रीवः
एव रक्षसां वधं प्रतिजज्ञे च ।

**हिन्दी**—उसने ( सुग्रीवने ) रामलक्ष्मणको किष्किन्धा ले जाओ-
अङ्गदको आज्ञा दी । मैं अकेले राक्षसोंका वध करूँगा, ऐसी प्रतिज्ञा की

**व्याख्या**—स सुग्रीवः, राघवौ रामलक्ष्मणौ, किष्किन्धां स्वनगरीं
प्रापयितुम्, अङ्गदम् वालिजम्, आदिदेश आजज्ञौ । स्वयम् एकाकी, ए
रक्षसां रात्रिञ्चराणां, वधं विनाशम्, प्रतिजज्ञे प्रतिज्ञातवान् ।

**तिङन्तः**—दिश अतिसर्जने ( तुदादिः ) । ज्ञा अवबोधने ( क्र्यादि
**'सम्प्रतिभ्याम्०** १।३।४६' इति तङ् ।

**वाच्यपरिवर्तनम्**—तेन अङ्गद आदिदिशे, सुग्रीवेण वधः प्रतिजज्ञे ॥

**'नागाऽस्त्रमिदमेतस्य विपक्षस् तार्क्ष्य-संस्मृतिः' ।**
**विभीषणादिति श्रुत्वा तं निदध्यौ रघूत्तमः ॥ ६५ ॥**

**अन्वयः**—रघूत्तमः 'इदं नागास्त्रम्, एतस्य विपक्षः तार्क्ष्यसंस्मृतिः
इति विभीषणात् श्रुत्वा तं निदध्यौ ।

**हिन्दी**—रामचन्द्रने 'यह नागास्त्र है, गरुड़को स्मरण करना, इसका
पक्षी अस्त्र है' यह विभीषणसे सुनकर उनका ( गरुड़का ) ध्यान किया

याख्या—रघूत्तमः रामः, 'इदम् आबद्ध-नागास्त्रम्, सर्पास्त्रम्, एतस्य, शत्रुः, तार्क्ष्यस्मृतिः गरुडस्मरणम् अस्ति'इति–विभीषणात्, श्रुत्वा आकर्ण्य, डम् निदध्यौ सस्मार ।

तङन्तः—ध्यै चिन्तायाम् ( भ्वादिः ) । 'आदेच उपदेशेऽशिति ६।१।४५' , द्वित्वे, 'आत औ णलः ७।१।३४' इत्यौत्वे वृद्धिः ।

च्यपरिवर्तनम्—रघूत्तमेन दध्ये । नागास्त्रेणानेन, विपक्षेण तार्क्ष्यस्मृत्या । ६५ ॥

मस्य गरुडस्मृत्यनन्तरं तदागमनचिह्नं सूचयति द्वित्रैः पद्यैः--

ततो विजघटे शैलैरुद्वेलं पुप्लुवेऽम्बुधिः ।
वृक्षेभ्यश् चुच्युते पुष्पैर्, विरेजुर् भासुरा दिशः ॥ ६६ ॥

न्वयः—ततः शैलैः विजघटे, अम्बुधिः उद्वेलम् पुप्लुवे, वृक्षेभ्यः पुष्पैः भासुरा दिशः विरेजुः ।

न्दी—तब ( गरुडकी स्मृति करनेके बाद ) पर्वत ( आपसमें ) पृथक् होने समुद्र किनारा लाँधकर बढ़ चला । पेड़ोंसे फूल झड़ने लगे । दिशाएँ होकर शोभने लगीं ।

ाख्या—ततः गरुडस्मृत्यनन्तरम्, शैलैः पर्वतैः, विजघटे बिभिदे । अम्बुधिः उद्वेलम् वेलाम् अतिक्रम्य, पुप्लुवे ववृधे । वृक्षेभ्यः द्रुमेभ्यः, पुष्पैः कुसुमैः, पतितम् । भासुराः दीप्ताः, दिशः ककुभः, विरेजुः दिदीपिरे ।

ङन्तः—घट-चेष्टायाम् । प्लुङ्-तरणे । च्युनिर्-क्षरणे । राजृ-दीप्तौ पः ) । 'फणां च सप्तानाम् ६।४।१२५' इत्यभ्यासलोपैत्वे ।

ासः–वेलामतिक्रम्येति अव्ययीभावः । 'दिशस्तु ककुभः काष्ठाः'–इत्यमरः ।

च्यपरिवर्तनम्—शैलाः विजघटिरे, अम्बुधिना पुप्लुवे, पुष्पाणि चच्यतुः, सुराभिर्विरेजे ॥ ६६ ॥

जगाहिरेऽम्बुधिं नागा, ववौ वायुर् मनोरम ।
तेजांसि शंशमांचक्रुः, शर-बन्धा विशिश्लिषुः ॥ ६७ ॥

यः—नागा अम्बुधिम् जगाहिरे, मनोरमो वायुः ववौ, तेजांसि शंशमा- रबन्धाः विशिश्लिषुः ।

ी—सर्प समुद्रमें घुस गये, सुन्दर मनोहर हवा बहने लगी, तेज शान्त सर्पबन्धन छूट गया ।

या—नागाः सर्पाः, ( भयात् ) अम्बुधिम् समुद्रं, जगाहिरे प्रविष्टाः ।

मनोरमः चेतोहरः, वायुः मरुत्, ववौ वाति स्म । तेजांसि उग्रदीप्तयः, शंशम अतिशान्तान्यभूवन् । शरबन्धाः नागपाशाः, विशिश्लिषुः विदीर्णाः, दूरत तत्प्रभावात् ।

**तिङन्तः**—गाहू-विलोडने ( भ्वादिः )। वा-गतिगन्धनयोः ( अदादि शम-उपरमे, श्लिष-आलिङ्गने ( दिवादी )। यङ्लुगन्तप्रयोगात्परस्म शंशमाञ्चक्रुः ।

**वाच्यपरिवर्तनम्**—नागैरम्बुधिर्जगाहे, वायुना मनोरमेन ववे, तेजोभि माञ्चक्रे, शरबन्धैः विशिश्लिषे ॥ ६७ ॥

**भ्रेजिरेऽक्षत-वद् योधा, लेभे संज्ञां च लक्ष्मणः ।**
**विभीषणोऽपि बभ्राजे, गरुत्मान् प्राप चाऽन्तिकम् ॥ ६८ ॥**

**अन्वयः**—योधाः अक्षतवत् भ्राजिरे, लक्ष्मणः संज्ञां लेभे, विभीषणः बभ्राजे, गरुत्मान् अन्तिकम् प्राप च ।

**हिन्दी**—सैनिक, मानो कुछ भी चोट न लगी हो, ऐसे हो गये । लक्ष्मण होश आ गया । विभीषण भी चमक उठे । नाग-फांस टूट गया ।

**व्याख्या**—योधाः सैनिकाः, अक्षतवत् अनाहता इव, भ्रेजिरे दिदी लक्ष्मणः सौमित्रिः, संज्ञां चेतनां, लेभे प्राप । विभीषणः रावणभ्राता, रेजे । गरुत्मान् तार्क्ष्यः, अन्तिकम् सन्निधिं, प्राप उपतस्थौ ।

**तिङन्तः**—भ्राजृ दीप्तौ । डुलभष्-प्राप्तौ ( भ्वादी )। **'फणां च स** ६।४।१२५' इत्येत्वाभ्यासलोपौ ( ६६ पद्ये )।

**वाच्यपरिवर्तनम्**—योधैः भ्रेजे, लक्ष्मणेन संज्ञा लेभे, विभीषणेन गरुत्मताऽन्तिकं प्रापे ॥ ६८ ॥

**संपस्पर्शाऽथ काकुत्स्थौ, जज्ञाते तौ गत-व्यथौ ।**
**तयोरात्मानमाचख्यौ, ययौ चाऽथ यथा-गतम् ॥ ६९ ॥**

**अन्वयः**—अथ ( गरुत्मान् ) काकुत्स्थौ संपस्पर्श, तौ गतव्यथौ तयोः ( पार्श्वे ) आत्मानम् आचख्यौ । अथ यथागतम् ययौ च ।

**हिन्दी**—गरुड़ने रामलक्ष्मण दोनोंका स्पर्श किया । वे दोनों व्यथ हो गये । उन्होंने अपना परिचय दिया और जैसे आये थे उसी प्रकार च

**व्याख्या**–अथ आगमनानन्तरं, सः गरुडः, काकुत्स्थौ राघवौ, संपस्पर्श स्पृ तौ गतव्यथौ, जज्ञाते सम्बुबुधाते । तयोः रामलक्ष्मणयोः, आत्मानम्

स्मृत्याऽऽगतवान्—इति आचख्यौ कथयामास । अथ तदनन्तरम्, यथागतम् नानुसारम्, ययौ जगाम ।

तिङन्तः—स्पृश-आमर्शने (तुदादिः)। या-प्रापणे (आदादिकः)। टि २।४।५५' इति चक्षिङः ख्याञ् ।

वाच्यपरिवर्तनम्—काकुत्स्थौ पस्पृशाते, तेन गतव्यथाभ्यां जज्ञे इति आचख्ये, न ॥ ६९ ॥

स्वेनुस् तित्विषुरुद्येमुरुच्चक्लुः पर्वतांस् तरून् ।
वानरा दद्रमुश् चाऽथ संग्रामं चाऽऽशशासिरे ॥ ७० ॥

न्वयः—अथ वानराः स्वेनुः, तित्विषुः, उद्येमुः, पर्वतान् तरून् उच्चक्लुः, संग्रामम् आशशासिरे ।

हिन्दी—इसके बाद (खुशीमें) वानर शब्द करने लगे, चमक उठे, उद्योग लगे तथा पर्वत एवं वृक्षों को उखाड़ने लगे । (इधर उधर) दौड़ने लगे ग्राम की आशा करने लगे ।

याख्या—अथ रामोत्थानानन्तरम्, वानराः (हर्षोन्मत्ताः), स्वेनुः शब्दि- तित्विषुः दिदीपिरे, उद्येमुः उद्यमं चक्रुः, पर्वतान् गिरीन्, तरून् द्रुमान्, ुः उत्क्षिप्तवन्तः, दद्रमुः इतस्ततः भ्रान्ताः, संग्रामं युद्धम्, आशशांसिरे षुः ।

तिङन्तः—स्वन-शब्दे । त्विष-दीप्तौ । यम-उपरमे । क्नु-अवदारणे । द्रम, मीमृ-गतौ (भ्वादयः)। 'आङः शासु इच्छायाम्' अनुदात्तेत् (अदादिः)'।

वाच्यपरिवर्तनम्—वानरैः स्वेने, तित्विषे, उद्येमे, पर्वताः तरव उच्चक्निरे संग्रामः आशशासे ॥ ७० ॥

डुढौकिरे पुनर् लङ्कां, बुबुधे तान् दशाननः ।
जीवतश् च विवेदाऽरीन्, बभ्रंशेऽसौ धृतेस् ततः ॥ ७१ ॥

वयः—ते पुनः लङ्कां डुढौकिरे, दशाननः तान् बुबुधे, अरीन् जीवतः ततः असौ धृतेः बभ्रंशे ।

दी—वानर फिर लङ्कामें गये । रावणने उनको जाना, शत्रुओं को जीवित जाना । तब वह अपना धैर्य खो बैठा ।

ख्या—वानराः कपयः, पुनः भूयः, लङ्काम् रावणराजधानीं, डुढौकिरे दशाननः रावणः, तान् कपीन्, बुबुधे विवेद । अरीन् शत्रून्, जीवतः विवेद जज्ञौ । ततः, असौ रावणः, धृतेः धैर्यात्, बभ्रंशे भ्रष्टोऽभूत् ।

**तिङन्तः**—ढौकृ—गतौ । भ्रंशु ध्वंसु स्रंसु अधःपतने ( भ्वादौ अनुदात्तेत

**वाच्यपरिवर्तनम्**—वानरैः लङ्का डुढौके, दशाननेन ते वुवुधिरे, जीवन्तो विविद्रिरे, अमुना बभ्रंशे ॥ ७१ ॥

सस्रंशे शरबन्धेन दिव्येनेति बुबुन्द सः ।
बभाजाऽथ परं मोहमूहांचक्रे जयं न च ॥ ७२ ॥

**अन्वयः**—दिव्येन शरबन्धेन सस्रंसे इति सः बुबुन्द । अथ परं मोहं जयं च न ऊहाञ्चक्रे ।

**हिन्दी**—उसने यह सुना कि दिव्य नागफाँस छूट गया । तब वह मूर्छि गया और जयकी आशा छोड़ दी ।

**व्याख्या**—दिव्येन दैवबलशालिनापि, शरबन्धेन नागपाशेन, सस्रंसे इति स रावणः, बुबुन्द शुश्राव । अथ अनन्तरं, परं दृढं, मोहं मूर्च्छां, शिश्रिये । जयं विजयं च, न ऊहाञ्चक्रे न वितर्कितवान् ।

**तिङन्तः**—बुंदि-निशामने । ऊह-वितर्के । भज-सेवायाम् ( भ्वादयः )

**वाच्यपरिवर्तनम्**—दिव्यः शरबन्धः सस्रंसे ( इति ) तेन बुबुन्दे । मो जयो नोहाञ्चक्रे ॥ ७२ ॥

धूम्राक्षोऽथ प्रतिष्ठासांचक्रे रावण-संमतः ।
सिंहाऽऽस्यैर् युयुजे तस्य वृकाऽऽस्यैश् च रथः खगैः ॥ ७३ ॥

**अन्वयः**—अथ रावणसम्मतः धूम्राक्षः प्रतिष्ठासाञ्चक्रे । अस्य रथः सिं वृकास्यैः च खगैः युयुजे ।

**हिन्दी**—अब रावण के बड़े प्रिय व्यक्ति धूम्राक्षने ( युद्धमें ) करना चाहा उसका रथ सिंहसदृश तथा हुंडारसदृश मुखवाले गगनचारी जोड़ा गया ।

**व्याख्या**—अथ अनन्तरम्, रावण-सम्मतः रावणप्रियः, धूम्राक्षः तन्नामा सेनापतिः, प्रतिष्ठासाञ्चक्रे गन्तुमियेष । अस्य धूम्राक्षस्य, रथः स्यन्दनः, हरिमुखैः, वृकास्यैः व्याघ्रमुखैः, खगैः गगनचारिभिः ( वाहनैः ), युयुजे

**तिङन्तः**—प्रपूर्वात् सन्नन्तात् तिष्ठतेः 'समवप्रविभ्य. स्थः १।३।२२' इ 'उपसर्गात्० ८।३।६५' इति षत्वम् । युयुजे इति कर्मणि लिट् ।

**वाच्यपरिवर्तनम्**—धूम्राक्षेण प्रतिष्ठासाञ्चक्रे । सिंहास्या वृकास्य ( वाहनाः ) रथं युयुजुः ॥ ७३ ॥

त्वक्-त्रैः संविव्ययुर् देहान्, वाहनान्यधिशिश्रियरे ।
मानर्जुर् नृ-भुजोऽस्त्राणि, ववञ्चुश् चाऽऽहव-क्षितिम् ॥ ७

न्वयः—धूम्राक्षसम्बधिनो नृभुजो देहान् त्वक्त्रैः संविव्ययुः। चाहनान्ि शियरे, अस्त्राणि आनर्जुः, आहवक्षितिम् ववञ्चुः।

इन्दी—धूम्राक्षकी सेनाके राक्षसोंने कवचोंसे शरीरको ढका। सवारियोंपर सो रहे, शस्त्रोंको तेज बनाया और रणभूमिको गये।

ाख्या—धूम्राक्षसैनिकाः, नृभुजो राक्षसाः, देहान् कायान्, त्वक्त्रैः सन्नाहैः, युः छादितवन्तः। वाहनानि यानानि, अधिशिश्यिरे अधिशयानाः स्म ), अस्त्राणि साधनानि, आनर्जुः गृहीतवन्तः (प्रेरतः), आनर्चुः इतिपाठे न्तः, आहवक्षितिम् रणभूमिम्, ववञ्चुः जग्मुः।

ङन्तः—व्येञ् सवरणे। 'न व्यो लिटि ६।१।४६' इत्यात्वनिषेधः। भ्या० ६।१।१७' इत्यभ्याससम्प्रसारणम्। 'अधिशीङ् १।४।४६' इत्याधारः अर्ज प्रतियत्ने। पाठभेदे अर्च पूजायाम्, वञ्चु गतौ (भ्वादयः)।

ाच्यपरिवर्तनम्—देहाः संविव्ययिरे नृभुग्भिः, वाहनानि अधिशिश्ये अधि- वा (कालादिकर्मकाणामकर्मकाणां कर्मणि भावे च लकारः)। शस्त्राणि रे आनर्चिरे वा। आहवक्षितिः ववञ्चे॥ ७४॥

अध्युवास रथं, तेये पुराच्च् चुक्षाव चाऽशुभम्।
संश्रावयांचकाराऽऽख्यां धूम्राक्षस् तत्वरे तथा॥ ७५॥

न्वयः—धूम्राक्षः रथम् अध्युवास, पुरात् तेये, अशुभं चुक्षाव, आख्यां संश्रा कार तथा तत्वरे।

न्दी— धूम्राक्ष रथपर चढ़ा, नगरसे (बाहर) निकला, भयानक शब्द था अपनी बड़ाईका बखान किया एवं युद्धमें जल्दी गया।

ाख्या—धूम्राक्षः सेनापतिः, रथं स्यन्दनम् अध्युवास, पुरात् नगरात्, तेये म, अशुभम् भयानकं, चुक्षाव विरुराव, आख्याम् आत्मीयां ख्यातिं, ाञ्चकार सम्यग् वेदयामास, तथा तत्वरे त्वरते स्म युद्धाय।

ङन्तः—वस-निवासे। अधिपूर्वस्य 'पान्वध्याङ्वसः १।४।४८' इत्याधारः इ य अयगतौ (भ्वा० अनुदात्तेत् उदात्तः)। टुक्षु-शब्दे। (अदादिः)। त्वरगतौ (भ्वादिः)।

व्यपरिवर्तनम्—रथोऽध्यूषे धूम्राक्षेण, अशुभं चुक्षुवे, आख्या श्रावया- । ७५॥

निलिल्ये मूर्ध्नि गृध्रोऽस्य, क्रूरा ध्वाङ्क्षा ववाशिरे।
शिशीके शोणितं व्योम, चचाल क्ष्मा-तलं तथा॥ ७६॥

**अन्वयः**——अस्य मूर्ध्नि गृध्रः निलिल्ये, क्रूरा ध्वाङ्क्षाः ववाशिरे, शोणितं शिशीके तथा क्ष्मातलं चचाल।

**हिन्दी**——धूम्राक्षके शिरपर गीध पक्षी मँडराने लगा, कौए काँव काँव, लगे, आकाश रक्त बरसाने लगा और भूचाल हो चला।

**व्याख्य**—अस्य धूम्राक्षस्य गच्छतः, मूर्ध्नि शिरसि, गृध्रः दाक्षाय्यः, उड्डिड्ये। ध्वाङ्क्षाः काकाः, ववाशिरे क्रूरशब्दान् चक्रुः। व्योम नभः, रक्त, शिशीके चक्षार, तथा क्ष्मातलं भूतलं, चचाल चकम्पे।

**कोशः**——'आतापिचिल्लौ दाक्षाय्यगृध्रौ कीरशुकौ समौ' ( इत्यमरः )

**तिङन्तः**—वाशृ क्रूरशब्दे। शीकृ सेचने ( भ्वा० उदात्तौ अनुदात्तेतौ

**वाच्यपरिवर्तनम्**—गृध्रेण निलिल्ये, ध्वाङ्क्षैः ववाशे, व्योम्ना शिशीके। भूतलेन चेले ॥ ७६ ॥

ततः प्रजघटे युद्धं, शस्त्राण्यासुः परस्परम्।
वव्रश्चुराजुघूर्णुश् च स्येमुश्, चुकुर्दिरे तथा ॥ ७७ ॥

**अन्वयः**—ततः युद्धम् प्रजघटे, ( ते हरिराक्षसाः ) परस्परं शस्त्राणि वव्रश्चुः, आजुघूर्णुः, स्येमुः तथा चुकूर्दिरे।

**हिन्दी**—तब युद्ध होने लगा। दोनों ओरके योद्धा परस्पर शस्त्र प्रहा लगे, काटने लगे; पैतरा देने लगे, चिल्लाने लगे तथा उछलने कूदने ल

**व्याख्या**—ततः तदनन्तरम्, युद्धम् आयोधनम्, प्रजघटे घटिता ह साः, परस्परम् अन्योन्यम्, शस्त्राणि प्रहरणानि, आसुः चिक्षिपुः, वव्रश्चुः आजुघूर्णुः भ्रेमुः, स्येमुः शब्दं चक्रुः तथा चुकूर्दिरे चिक्रीडुः।

**तिङन्तः**—असु क्षेपणे ( दिवादिः )। ओव्रश्चू छेदने घूर्ण भ्रमणे ( तुद स्यम शब्दे। कूर्द खूर्द गुदक्रीडायाम्। भ्वादिस्थो घूर्णिरनुदात्तेत्।

**वाच्यपरिवर्तनम्**—युद्धेन प्रजघटे, आसिरे, ववृश्चिरे ( शस्त्राण्ये कर्माणि ), आजुघूर्ण, स्येमे, चूकूर्दे ( हरिराक्षसैरिति ) ॥ ७७ ॥

रुरुजुर्. भ्रेजिरे, फेणुर्, बहुधा हरि-राक्षसाः।
वीरा न बिभयांचक्रुर्, भीषयांचक्रिरे परान् ॥ ७८ ॥

**अन्वयः**—( तत्र युद्धे ) हरिराक्षसाः बहुधा रुरुजुः, भ्रेजिरे, फेणु ( स्वयं ) न विभयाञ्चक्रुः, परान् भीषयाञ्चक्रिरे।

**हिन्दी**—( उस युद्धमें ) बन्दर तथा राक्षस दोनों बहुत प्रकारसे पी दमके, इधर उधर घूमे। वे स्वयं तो नहीं डरे किन्तु उन्होंने दूसरेको ही

**ाख्या**—तत्र युद्धे, हरिराक्षसाः उभयेऽपि, बहुधा बहुप्रकारेण, रुरुजुः भग्ना भ्रेजिरे दिदीपिरे, फेणुः बभ्रमुः। (स्वयं) न बिभयाञ्चक्रुः, (किन्तु) भीषयाञ्चक्रिरे।

**तङन्तः**—रुजो भङ्गे (तुदादिः)। भ्राजृ-दीप्तौ, फण-गतौ (भ्वादी)। भये (जुहोत्यादिः)। तस्यैव ण्यन्तस्य 'भीस्म्योर्हेतुभये १।३।६८' इति तङि, हेतुभये षुक् ७।३।४०' (णौ) इति षुकि च भीषयाञ्चक्रिरे।

**ाच्यपरिवर्तनम्**—हरिराक्षसैः रुरुजे, भ्रेजे, बभ्राजे वा, फेणे पफणे वा ञ्चक्रे, भीषयाञ्चक्रिरे परे॥ ७८॥

रक्तं प्रचुश्चुतुः क्षुण्णाः शिश्वियुः शर-विक्षताः।
अस्यतां शुशुवुर् बाणान् भुजाः साऽङ्गुष्ठ-मुष्टयः॥ ७९॥

**न्वयः**—क्षुण्णाः रक्तं प्रचुश्चुतुः, शरविक्षताः शिश्वियुः, बाणान् अस्यतां, ष्टयः भुजाः शुशुवुः।

**न्दी**—काटे गये सैनिक रक्त बहा रहे थे, बाणोंसे विक्षत हुए फूलने लगे। कने वालोंकी भुजायें, अँगूठे तथा मुट्ठीके साथ, फूल उठीं।

**ाख्या**—क्षुण्णाः खण्डिताः, रक्तं शोणितं, चुश्चुतुः क्षरितवन्तः, शरविक्षताः द्धाः, शिश्वियुः श्वयथुं भेजिरे। बाणान् इषून्, अस्यतां क्षिपताम् चालयतां, मुष्टयः अङ्गुष्ठमुष्टिसहिताः, भुजाः बाहवः, शुशुवुः शोथम् गताः।

**ङन्तः**—श्चुतिर्-क्षरणे टुओश्वि गतिवृद्धयोः (भ्वादी)। शिश्वियुः इति श्वेः ६।१।३०' इति सम्प्रसारणाभावपक्षे, शुशुवुः इति सम्प्रसारणपक्षे रूपम्।

**च्यपरिवर्तनम्**—क्षुण्णैः रक्तं प्रचुश्चुते, शरविक्षतैः शिश्विये, साङ्गुष्ठमुष्टिभिः शुवे॥ ७९॥

रणे चिक्रीड धूम्राक्षस्, तं ततर्जाऽनिलाऽऽत्मजः।
आददे च शिलां, साऽश्वं पिपेषाऽस्य रथं तया॥ ८०॥

**न्वयः**—धूम्राक्षः रणे चिक्रीड, अनिलात्मजः तं ततर्ज, शिलां च आददे। य साश्वं रथं पिपेष।

**न्दी**—धूम्राक्ष रणमें खेल कर रहा था। हनूमान्‌ने उसे डाँटा और शिला उठायी तथा उसने इसके घोड़े सहित रथ को चूर्ण कर दिया।

**ख्या**—धूम्राक्षः राक्षसः, रणे युधि, चिक्रीड क्रीडति स्म। अनिलात्मजः तं, ततर्ज भर्त्सयामास, शिलां पर्वतखण्डं च, आददे जग्राह। तया शिलया, म्राक्षस्य, साश्वं सहयं, रथं स्यन्दनं, पिपेष चूर्णयामास।

**तिङन्तः**——तर्ज-भर्त्सने । पिष्लृ-पेषणे । क्रमशः भ्वादिरुधादी ।

**वाच्यपरिवर्तनम्**——धूम्राक्षेण चिक्रीडे, अनिलात्मजेन ततर्जे, शिल साश्वो रथः पिपिषे ॥ ८० ॥

पपात राक्षसो भूमौ, रराट च भयंकरम् ।
तुतोद गदया चाऽरिं, तं दुध्रावाऽद्रिणा कपिः ॥ ८१ ॥

**अन्वयः**—राक्षसो धूम्राक्षः भूमौ पपात, भयङ्करं रराट च । गद तुतोद, कपिः अद्रिणा तम् दुध्राव ।

**हिन्दी**—धूम्राक्ष पृथ्वी पर गिर गया, भयङ्कर शब्द करने लगा त उसने शत्रुको मारा । हनुमान्ने पर्वतसे कुचलकर उसे मार डाला ।

**व्याख्या**—राक्षसो धूम्राक्षः, भूमौ धरायां, पपात लुलोठ । पतितः ङ्करं भयानकं, रराट चक्रन्द, गदया, अरिं शत्रुं, तुतोद आहतवान् । मान्, अद्रिणा पर्वतेन, तं धूम्राक्षं, दुध्राव जघान ।

**तिङन्तः**—रट परिभाषणे, ध्रु स्थैर्ये ( भ्वादी ) । धातूनामने हिंसार्थकोऽत्र ।

**वाच्यपरिवर्तनम्**—राक्षसेन पेते, रेटे, अरिः तुतुदे । कपिना स दुध्र

अकम्पनस् ततो योद्धुं चकमे रावणाऽऽज्ञया ।
स रथेनाऽभिदुद्राव, जुघुरे चाऽतिभैरवम् ॥ ८२ ॥

**अन्वयः**—ततः अकम्पनः रावणाज्ञया योद्धुं चकमे । स रथेन अतिभैरवं च जुघुरे ।

**हिन्दी**—तब अकम्पन नामके राक्षस ने रावणकी आज्ञासे युद्ध कर वह रथ द्वारा युद्धस्थलमें गया तथा अत्यन्त भयानक शब्द करने लगा

**व्याख्या**— ततः तदनन्तरम्, अकम्पनो नाम राक्षसः, रावणाज्ञयां देशेन, योद्धुं युद्धं कर्तुं, चकमे इयेष । सः राक्षसः, रथेन स्यन्दनेन, ययौ ( युद्धस्थलम् ), अतिघोरं अत्यन्तक्रूरं, जुघुरे ररास ।

**तिङन्तः**—'कमेर्णिङ् ३।१।३०' इत्यस्य 'आयादय आर्धधातुके वा इति निषेधे रूपम् चकमे । द्रु गतौ ( भ्वादिः ) । घुर भीमार्थशब्दयोः । दात्तेत् ॥ ८२ ॥

पस्पन्दे तस्य वामाऽक्षि, सस्यमुश् चाऽशिवाः खगाः ।
तान् वव्राजावमत्याऽसौ बभासे च रणे शरैः ॥ ८

यः—तस्य वामाक्षि पस्पन्दे, अशिवाः खगाः सस्यमुः। असौ तान् णे वव्राज, तत्र शरैः बभासे।

—उसकी बाँई आँख फड़कने लगी, अशकुनसूचक पक्षी बोलने लगे। बोंकी परवाह न कर (युद्धमें) गया और वहां बाणोंसे सुशोभित हुआ।

या—तस्य अकम्पनस्य, वामाक्षि वामनेत्रं, पस्पन्दे पुस्फोर। अशिवाः चकाः, खगाः पक्षिणः, सस्यमुः शशब्दुः। तान् सर्वान्, अवमत्य तिरस्कृत्य, सः, रणे युद्धस्थले, वव्राज। तत्र, शरैर्बाणैः, बभासे दिदीपे।

त्तः—स्पन्द-ईषच्चलने। स्यमु, स्वन, ध्वनशब्दे। व्रज-गतौ ( भ्वा- सस्यमुः इति '**फणां च सप्तानाम् ६।४।१२५**' इति एत्वाभ्यासलोपाभावे।

परिवर्तनम्—वामाक्षणा पस्पन्दे, अशिवैः खगैः सस्यमे, वव्रजेऽमुना ८३॥

**खमूयुर् वसुधामूवुः सायका रज्जुवत् ततः।**
**तस्माद् बलैरपत्रेपे पुप्रोथाऽस्मै न कश्चन॥ ८४॥**

यः—( तस्य ) रज्जुवत् तताः सायकाः खम् ऊयुः, वसुधाम् ऊवुः, बलैः तं वीक्ष्य ) अपत्रेपे, कश्चन अपि तं न पुप्रोथ।

—उसके रस्सीके समान लगातार छूटनेवाले वाण आकाश तथा पृथ्वी गये। उसको देखकर सैनिक डर गये। कोई उसका सामना करने

या· तस्य पूर्वोक्तस्य, रज्जुवत् शुल्ववत्, तताः विस्तृताः, सायकाः शराः, म्, वसुधां धरां, च, ऊयुः ऊवुः। बलैः सैन्यैः, तस्मात् ( तं वीक्ष्य ), जतम्। कश्चन कोऽपि, सेनानीः सैनिकः, तं न पुप्रोथ न प्रभवति स्म।

तः—त्रपूष्-लज्जायां (अनुदात्तेत् भ्वा०)। वेञ्-तन्तुसन्ताने (भ्वादिः)। यः ६।१।३८' यकारे ऊयुः। '**वश्चान्यतरस्यां किति ६।१।३९**' इति कर्मणि लिटि '**तॄफलभजत्रपश्च ६।४।१२२**' इति एत्वाभ्यासलोपौ त्रेपे। ( भ्वादिः )।

:—तस्मात् तं वोक्ष्येति ल्यब्लोपे पञ्चमी। अस्मै इति '**नमः स्वस्ति०** इति सूत्रेऽलंशब्दस्य पर्याप्तबोधात् तदर्थयोगे चतुर्थी।

परिवर्तनम्—ततैः सायकैः खं वसुधा चोये, ऊवे, बलानि अपत्रेपिरे, पुप्रोथे।

—'शुल्वं हराट्कं स्त्री तु रज्जुस्त्रिषु वटी गणः'। (इत्यमरः)॥८४॥

स भस्मसाच् चकाराऽरीन्, दुदाव च कृतान्तवत्।
चुक्रोध मारुतिस् तालमुच्चख्ने च महाशिखम्॥ ८५

**अन्वयः**—सः अरीन् भस्मसात् चकार, कृतान्तवत् दुदाव, मारु महाशिखम् तालम् उच्चख्ने।

**हिन्दी**—उसने शत्रुओंको धूलमें मिला दिया। वह यमके समा था। ( तब ) हनुमान्‌ने क्रोध किया और बड़े माथ वाले तालके पेड़क

**व्याख्या**—सः अकम्पनः, अरीन् शत्रून्, भस्मसात् धूलिसात्, च कृतान्तवत् यमवत्, दुदाव उपतताप ( अरीन् )। मारुतिः हनुमान्, चु महाशिखम् बृहच्छिरः, तालं तालवृक्षम्, उच्चख्ने ( कर्तरि तङ् स्व उच्चखान।

**तिङन्तः**—टुदु उपतापे (स्वादिः उदात्तेत्)। क्रुध कोपे (दिवा खनु अवदारणे ( भ्वा० स्वरितेत् )। ( ७० पद्येऽपि खनः प्रयोगः )

**वाच्यपरिवर्तनम्**—तेनारयो भस्मसात् चक्रिरे, दुद्रुवे, मारु तालमुच्चख्ने॥ ८५॥

यमायाऽकम्पनं तेन निरुवाप महापशुम्।
बभ्रज्ज निहते तस्मिन् शोको रावणमग्निवत्॥ ८६

**अन्वयः**—हनूमान् तेन ( तालेन ) महापशुम् अकम्पनम् यमा तस्मिन् निहते शोकः अग्निवत् रावणम् बभ्रज्ज।

**हिन्दी**—उस ताल वृक्ष द्वारा हनुमान्‌ने महापशु अकम्पनको बलि दे डाली। उसके मर जाने पर शोकने अग्निके समान रावणको

**व्याख्या**—हनूमान् मारुतिः, तेन तालवृक्षेण, महापशुम् मलत्रय राक्षसम्, अकम्पनम् तन्नामकं, यमाय कृतान्ताय, निरुवाप बलिम् चक प्रधानराक्षसे, निहते मृते, शोकः मन्युः, अग्निवत् अनल इव, राव बभ्रज्ज ददाह।

**तिङन्तः**—टुवप् बीजसन्ताने। निपूर्वो वपिर्दाने (भ्वा०-अनुदात्त भ्रस्ज पाके ( तुदादिः उदात्तेदनुदात्तः )। (महापशुः आणवमायिकका युतो जीवोऽस्ति, यो हि एभिः शून्यः स पशुपतिः शिवः इत्यागमो नय

**वाच्य०**—महापशुः अकम्पनो निरूपे हनूमता। शोकेन रावणो बभ्र

स बिभ्रेष, प्रचुक्षोद, दन्तैरोष्ठं चखाद च।
प्रगोपायांचकाराऽऽशु यत्नेन परितः पुरम्॥ ८७

—स विभ्रेष, प्रचुक्षोद, दन्तैः ओष्ठं चखाद। पुरम् परितः आशु याञ्चकार।

—वह ( वहांसे ) चला, मार्गमें पड़ी रुकावटोंको रोंधता चला गया। काटने लगा, फिर शीघ्र ही नगरके चारों ओर रक्षाका प्रबन्ध किया।

—स राक्षसेन्द्रः, ( स्थानात् ) विभ्रेष चचाल, मार्गगान् लोष्टादीन्, तैः दशनैः, ओष्ठम् अधरम्, चखाद चिच्छेद। पुरम् लङ्कां, परितः शीघ्रम्, प्रगोपयाञ्चकार जुगोप।

—भ्रेषृ-चलने ( भ्वा० उदातः स्वरितेत् )। खादृ-भक्षणे तथैव। ‘गूपुधूपविच्छि० ३।१।२८’ इत्याय-प्रत्यये प्रत्ययान्तादाम्।

रिवर्तनम्—विभ्रेषे, चुक्षुदे, ओष्ठं चखादे, प्रगोपयाञ्चक्रे ॥ ८७ ॥

र्णयति युग्मेन—

**प्रहस्तमर्थयांचक्रे योद्धुमद्भुत-विक्रमम्।**
**किं विचारेण राजेन्द्र ! युद्धाऽर्था वयमित्यसौ’ ॥ ८८ ॥**
**चक्वाणाऽशङ्कितो योद्धुमुत्सेहे च महा-रथः।**
**निर्येमिरेऽस्य योद्धारश्, चक्लृपे चाऽश्व-कुञ्जरम् ॥ ८९ ॥**

—ततः रावणः अद्भुतविक्रमम् प्रहस्तम् अर्थयाञ्चक्रे ( योद्धुम् )। : ) हे राजेन्द्र ! विचारेण किम् ( काकुः ) ? न किञ्चित् प्रयोजन- सर्वे युद्धार्था इति चक्वाण। महारथः ( सः ) अशङ्कितः सन् । रावणेन अस्य योद्धारः निर्येमिरे, अश्वकुञ्जरम् चक्लृपे च।

तब रावणने अद्भुतपराक्रमवाले प्रहस्तसे युद्धार्थ तैयार होने के लिये उत्तरमें उसने कहा, इसमें क्या विचार करना है ? हमलोग तो इसी बाद वह महारथी निःशङ्क हो युद्ध करनेको तैयार हो गया। सैनिकों के सम्बन्ध में निर्णय किया ( इतने रहेगें ऐसे रहेगें थी घोड़ोंको भी सजाया।

—ततो राक्षसेन्द्रः, अद्भुतविक्रमम विचित्रपराक्रमम्, प्रहस्तं तन्नामानं ोद्धुम युद्धं कर्तुम्, अर्थयाञ्चक्रे प्रार्थितवान्। असौ प्रहस्तः, हे राजेन्द्र ! किम ? न किमपि प्रयोजनमिति काकुः। वयं सर्वे मेनापतयः, युद्धार्था ं, चक्वाण बभाण। तदनन्तरम्, महारथः महायोद्धा, असौ, अशङ्कितः धुम युद्धाय, उत्सेहे संननाह। रावणेनापि, अस्य प्रहस्तस्य, योद्धारः

सैनिकाः, निर्येमिरे नियमिताः ( इयती सेना तवाधीनेत्थं स्थास्यतीत्या कुञ्जरम् हयगजं च, चक्लृपे सज्जयामास ( पशुत्वात्समाहारद्वन्द्वः ) ।

**तिङन्तः**—अर्थ-उपयाच्ञायाम् चौरादिकस्तङ्-प्रत्ययी । क्वण, शब्दे ( भ्वा० उदात्त उदात्तेत् ) । यम उपरमे भ्वा० उदात्तेत् अनु सामर्थ्ये ( भ्वा० उदात्तोऽनुदात्तेत् ) '**कृपो रो लः** ८।२।१८' इति लः

**वाच्यपरिवर्तनम्**—अद्भुतविक्रमः प्रार्थयांचक्रे, अमुना चक्वणे, उत्सेहे, योद्धृन् निर्ययाम ॥ ८८-८९ ॥

**युयुजुः स्यन्दनानश्वैरीजुर् देवान् पुरोहिताः ।**
**आनर्चुर् ब्राह्मणान् सम्यगाशिशष् चाऽऽशशंसिरे ॥ ९०**

**अन्वयः**—सैनिकाः अश्वैः स्यन्दनान् युयुजुः । पुरोहिताः देवान् णान् सम्यक् आनर्चुः । ( अर्चितास्ते ) आशिषः आशशंसिरे ।

**हिन्दी**—सैनिकोंने घोड़ोंके साथ रथोंको जोड़ा, पुरोहितोंने देवों ब्राह्मणोंका खूब सत्कार किया । सत्कृत ब्राह्मणोंने आशीर्वाद दिया ।

**व्याख्या**—सैनिकाः, अश्वैः हयैः, स्यन्दनान् रथान्, युयुजु पुरोधसः, देवान् सुरान्, ईजुः इष्टवन्तः, ब्राह्मणान् विप्रान्, सम्यक् पूजयामासुः । पूजितास्ते, आशिषः आशीर्वादान्, आशशंसिरे ऊदुः ।

**तिङन्तः**—युजिर् योगे (रुधादिरनुदात्तः स्वरितेत्) । यज देवपू अनुदात्तः स्वरितेत् ) । अर्च गतौ पूजायां च ( उदात्तेत् उदात्तो भ्व स्तुतौ ( उदात्त उदातेत् भ्वा० ) आङ् पूर्वोऽनुदात्तेत् ।

**वाच्यपरिवर्तनम्**—सैनिकैः स्यन्दना युयुजिरे, पुरोहितैः देवा ई आनर्चिरे, आशिष आशशंसिरे ॥ ९० ॥

**ऊहिरे मूर्ध्नि सिद्धार्था, गावश् चाऽऽलेभिरे भटैः ।**
**प्रचुक्षणुवुर् महाऽस्त्राणि, जिज्ञासांचक्रिरे हयान् ॥ ९१**

**अन्वयः**—सिद्धार्थाः मूर्ध्नि ऊहिरे, गावः च[1] आलेभिरे प्रचुक्षणुवुः, हयान् जिज्ञासाञ्चक्रिरे ।

**हिन्दी**—भटाने सिरपर सरसों रखी, गायों का ( गुड़ खिल किया । बड़े-बड़े अस्त्रोंको तेज किया एवं घोड़ोंकी परीक्षा की ।

---

[1] घरसे यात्रापर गायको गुड़ खिलाकर उसका गलकम्बल सु की प्रथा है ।

ा—भटैः सैन्यैः, मूर्ध्नि शिरसि, सिद्धार्थाः पीतसर्षपाः, ऊहिरे दध्रिरे। ।, गुडं भोजयित्वा, आलेभिरे पस्पर्शिरे। महास्त्राणि वृहत्प्रहरणानि, ,( इति कर्तरि प्रयोगः ), हयान् अश्वान्, जिज्ञासांचक्रिरे परीक्षितवन्तः ुला न वेति )।

ः—वह-प्रापणे। ( भ्वा० स्वरितेदनुदात्तः )। डुलभष् प्राप्तौ। ,दात्तेदनुदात्तः )। क्ष्णु-तेजने ( अदाद्युदात्तेऽनुदात्तः )। 'ज्ञाश्रुस्मृदृशां ।७' इत्यात्मनेपदम्।

रिवर्तनम्—सिद्धार्थान् ऊहुर्भटाः, गाः आलेभिरे, चुक्ष्णुविरे भटैर्महा- ः जिज्ञासाञ्चक्रिरे ॥ ९१ ॥

ैव विशिनष्टि—

**लुः खड्गान्, ममार्जुश् च ममृजुश् च परश्वधान्।**
**अलंचक्रे, समालेभे, ववसे, बुभुजे, पपे ॥ ९२ ॥**

—ते खड्गान् ललुः ममार्जुः च, परश्वधान् ममृजुः, तैः अलञ्चक्रे वसे, बुभुजे, पपे ( कर्मणोऽविवक्षितत्वाद् भावे लिट् )।

—उन्होंने तलवारें लीं, उन्हें चोखा किया, फरसोंको शोधा। ( अपने कृत किया, संभाला, वस्त्र पहने, भोजन किया एवं जल पिया।

—ते भटाः, खड्गान् असीन्, ललुः आददुः, ममार्जुः शोधयांचक्रुः च, रशून्, ममृजुः शोधितवन्तः। अलञ्चक्रे विभूषितम्, समालेभे सज्जी- परिहितम्, बुभुजे भुक्तम्, पपे पीतम्।

:—ला आदाने। मृजूष् शुद्धौ। वस आच्छादने। भुज पालनाभ्यव- योऽदादयोऽनिटः, अन्तिमो रुधादिरनिट् )।

रिवर्तनम्—खडगाः ललिरे, ममृजिरे, परश्वधाः सैनिकाः अलञ्चक्रुः। क्षयाऽकर्मकत्वतः लेभिरे, ववसिरे, बुभुजिरे, पपुः ॥ ९२ ॥

**जहसे च क्षणं, यानैर् निर्जग्मे योद्धृभिस् ततः।**
**विप्रान् प्रहस्त आनर्च, जुहाव च विभावसुम् ॥ ९३ ॥**

—योद्धृभिः क्षणं जहसे, यानैर्निर्जग्मे, ततः प्रहस्तः विप्रान् आनर्च, च जुहाव।

—योद्धा क्षण भर खूब हंसे, यानों द्वारा चले गये। तव प्रहस्तने ा की एवं अग्निमें हवन किया।

**व्याख्या**—योद्धृभिः सैन्यैः, क्षणं मूहूर्तं, जहसे हसितम्, य
निर्जग्मे निर्गतम्। ततः प्रहस्तः सेनापतिः, विप्रान् ब्राह्म
पूजयामास, विभावसुम् अग्नि, जुहाव जुहोति स्म।

**वाच्यपरिवर्तनम्**—योद्धारः जहसुः, निर्जग्मुः, प्रहस्तेन वि
विभावसुः जुहुवे ॥ ९३ ॥

**संवर्गयाञ्चकाराप्तान् चन्दनेन लिलेप च।**
**चचाम मधु मार्द्वीकं त्वक्त्रं चाचकचे वरम् ॥ ९४**

**अन्वयः**—आप्तान् संवर्गयाञ्चकार चन्दनेन लिलेपे च, मार्द्वीकं
वरं त्वक्त्रम् आचकचे च।

**हिन्दी**—प्रहस्तने श्रेष्ठोंका सत्कार किया, चन्दन लगाया। अङ
पिया, श्रेष्ठ कवच पहना।

**व्याख्या**—आप्तान् श्रेष्ठान्, संवर्गयाञ्चकार सच्चकार, चन्दने
लिलेप उपदिदेह च। मार्द्वीकं द्राक्षोद्भवं मधुररं, चचाम पपौ। व
कवचम्, आचकचे आबद्धवान्। **मृद्वीकाया विकार इत्यर्थे 'तस्य विकार**
इत्यणि आदिवृद्धिः।

**तिङन्तः**—संवर्गं करोति संवर्गयति, संवर्गशब्दात् 'तत्करोति
३।१।२६' इति णिचि संवर्गि धातोः प्रत्ययान्तादाम्। कच ब
अनुदात्तेदुदात्तः )।

**वाच्य०**—आप्ताः संवर्गयाञ्चक्रिरे, लिलिपिरे, मधु मार्द्वीकम्

**उष्णीषं मुमुचे चारुं रथं च जुजुषे शुभम्।**
**आलम्बे महाऽस्त्राणि गन्तुं प्रववृते ततः ॥ ९५**

**अन्वयः**—चारुं उष्णीषं मुमुचे, शुभं रथम् जुजुषे, महा
ततः गन्तुं प्रववृत्ते।

**हिन्दी**—प्रहस्तने सुन्दर पाग बाँधा। अच्छे रथ पर चढ़ा
लिये तब चलनेको तैयार हुआ।

**व्याख्या**—प्रहस्तः तन्नामको योद्धा, चारुं सुन्दरम्, उष्णोषम् शि
आबबन्ध। शुभम् दृढम्, रथं स्यन्दनम्, जुजुषे सिषेवे, महास्त्राणि
आलम्बे आददौ। ततः पश्चात्, गन्तुं प्रस्थातुं, प्रववृते प्रवृत्तोऽभूत्
**तिङन्तः**—मुच्लृ-मोचने (तु० स्वरितेदनुदात्तः)। जुषी प्रीति
उदात्तोऽनुदात्तेत् )। लवि-अवस्रंसने, वृतु-वर्तने भ्वा० उदात्तावनु

—चारुः उष्णीषः मुमुचे, रथः शुभो जुजुषे, महास्त्राणि आललम्बिरे,
। ९५ ॥

आजघ्नुस् तूर्यजातानि तुष्टुवुश् चानुजीविनः ।
रजः प्रववृधे घोरं घोषश्च व्यानशे दिशः ॥ ९६ ॥

—अनुजीविनः तूर्यजातानि आजघ्नुः तुष्टुवुः च, घोरं रजः प्रववृधे ।
ः व्यानशे ।

—आश्रितोंने बाजे बजाये, स्तुति की । घोर धूलि उड़ने लगी । प्रति-
ओंमें गूंज उठी ।

—अनुजीविनः आश्रिताः, तूर्यजातानि वाद्यसमूहान्, आजघ्नुः
तुष्टुवुः जय जीव इति तं स्तुवन्ति स्म । घोरं उग्रं, रजः धूलिः,
म्, घोषः प्रतिध्वनिः, दिशः ककुभः, व्यानशे व्याप्तवान् ।

—अशूङ्-व्याप्तौ ( स्वा० ) । 'अश्नोतेश्च ७।४।७२' इति नुट् ।

रवर्तनम्—अनुजीविभिः तूर्यजातानि आजघ्निरे, तुष्टुवे, रजसा
, घोषेण दिशो व्यानशिरे ॥ ९६ ॥

तं यान्तं दुद्रुवुर् गृध्राः क्रव्यादश्च सिषेविरे ।
आववुर् वायवो घोराः खादुल्काश् च प्रचक्षरुः ॥ ९७ ॥

—गृध्राः यान्तं तं दुद्रुवुः, क्रव्यादः सिषेविरे, घोरा वायवः आववुः ।
त् प्रचक्षरुः ।

—गीध पक्षियोंने जाते हुए उसका पीछा किया, सियार फेंकरने लगे ।
रें बहने लगी । उल्काएं आकाशसे गिरने लगीं ।

ध्रा दाक्षाय्याः, यान्तं गच्छतं, तं प्रहस्तम्, दुद्रुवुः अनुसस्रुः ।
सिषेविरे सेवितवन्तः । घोराः दोहाः, वायवः वाताः, आववुः
न्ति स्म । उल्काः तेजःपुञ्जाः, खात् नभसः, प्रचक्षरुः पेतुः ।

रवर्तनम्—गृध्रैः यान् स दुद्रुवे, क्रव्याद्भिः सिषेवे, घोरैर्वायुभिराववे,
क्षरे । ( क्षर-संचलने अकर्मकः ) ॥ ९७ ॥

सस्यन्दे शोणितं व्योम रणाऽङ्गानि प्रजज्वलुः ।
रथाः प्रचस्खलुः साऽश्वा न ररंहाश्वकुञ्जरम् ॥ ९८ ॥

—व्योम शोणितं सस्यन्दे, रणाङ्गानि प्रजज्वलुः, नाश्वा रथाः
अश्वकुञ्जरं न ररंह ।

**हिन्दी**--आकाशसे रुधिर बरसने लगा, युद्धस्थल प्रज्वलित हो सहित रथ धँस गये, हाथी घोड़े चल न सके।

**व्याख्या**--व्योम नभ:, शोणितं रुधिरं, सस्यन्दे सिषेच, रणा स्थलानि, प्रजज्वलु: ज्वलितानि, साश्वा: सहया:, रथा: स्यन्दना: स्खलन्ति स्म। अश्वकुञ्जरं हयगजं, न ररंह न चचाल।

**तिङन्त:**—स्यन्दू प्रस्रवणे। ज्वल दीप्तौ ( भ्वा० )। स्खल सञ्चल उदात्तावुदात्तेत्तौ )। रहि-गतौ ( तथैव )।

**वाच्यपरिवर्तनम्**--व्योम्ना शोणितं सस्यन्दे, रणाङ्गै: प्रजज्वले, प्रचस्खले, अश्वकुञ्जरेण ररंहे ॥ ९८ ॥

**प्रतोदा जगलुर् वाममानञ्चुर् यज्ञिया मृगा:।**
**ददाल भू: पुपूरे द्यौ: कपीनामपि नि:स्वनै: ॥ ९९ ॥**

**अन्वय:**--प्रतोदा: जगलु:, यज्ञिया मृगा: वामम् आनञ्चु:, भू: कपीनां नि:स्वनै: पुपूरे।

**हिन्दी**--कोड़े हाथ से गिर गये, यज्ञके मृग ( कृष्णसार ) वां पृथ्वी फट गयी, आकाश कपियोंके किलकिलाहटसे गूँज उठा।

**व्याख्या**--प्रतोदा: अश्वप्रेरकसाधनानि, हस्तेभ्य: करेभ्य:, ज यज्ञिया: यागसाधका:, मृगा: कृष्णसाराख्या:, वामम् दक्षिणत सव्यभागे, आनञ्चु: जग्मु:, भू: धरा, ददाल विससार, द्यौ: आका हरीणां, नि:स्वनै: किलकिलध्वनिभि:, पुपूरे पूर्णोऽभूत्।

**तिङन्त:**—गल अदने, दल विसरणे ( भ्वा० उदात्तौ उदात्तेत्तौ आप्यायने ( दिवादि:, उदात्तोऽनुदात्तेत् )।

**वाच्य०**--प्रतोदैर्जगले, यज्ञियैर्मृगैर्वाम आनञ्चे, भुवा देले, दिवा पु

**मिमेह रक्तं हस्त्यश्वं राक्षसाश्च नितिष्ठिवु:।**
**तत: शुशुभतु: सेने निर्दयं च प्रजह्रतु: ॥ १००**

**अन्वय:**—हस्त्यश्वं रक्तं मिमेह, राक्षसा: च रक्तं नितिष्ठिवु:, शुशुभतु:, निर्दयं प्रजह्रतु:।

**हिन्दी**—हाथी घोड़े खूनका पेशाब करने लगे। राक्षस भी खून उसके वाद दोनों तरफकी सेना शोभायमान हुई। निर्दय प्रहार करने सु

**व्याख्या**—हस्त्यश्वम् गजहयम्, रक्तं शोणितं, मिमेह मूत्रयति स्म

रक्तं रुधिरं, नितिष्ठिवुः निरासुः। ततः तदनन्तरं, सेने उभयसैन्ये; भितवत्यौ, निर्दयं निष्कृपं, प्रजह्रतुः प्रहृतवत्यः।

–मिह सेचने, ष्ठिवु निरसने, शुभ दीप्तौ ( भ्वा० ) उदात्ताः सर्वे। त्तेतौ अन्तिमोऽनुदात्तेत्। हृञ् हरणे ( भ्वादिः )।

रिवर्तनम्—हस्त्यश्वेन रक्तं मिमिहे, राक्षसैः तिष्ठिवे, सेनाभ्यां ॥ १०० ॥

**दिद्विषुर्, दुद्युवुश्, चच्छुश् चक्लमुः सुषुपुर्हताः।**
**खादिरे, चखादुश् च, विलेपुश् च रणे भटाः ॥ १०१ ॥**

–भटाः रणे दिद्विषुः,वु दुद्युः, बाणैः चच्छुः, हताः चक्लमुः, सुषुपुः, खादुः च, विलेपुः च।

–दोनों तरफकी सेनाएं संग्राममें परस्पर द्वेष करती थीं। सामने बाणोंसे छेद देती थीं। हत होकर कराहती थीं, सो जाती थीं, ा ली जाती थीं तथा खाती थीं ( स्वयं राक्षस कपियोंको खा एवं विलाप करती थीं।

–भटाः उभयसैनिकाः, रणे युधि, दिद्विषुः द्विष्टवन्तः। दुद्युवुः मुः। चच्छुः चिच्छिदुः, बाणैरिति शेषः। हताः विद्धाः, चक्लमुः षुपुः ( मृताः ), चखादिरे बभाक्षिरे ( खादिताः राक्षसैः ), चखादुः क्षुः कपीन्। विलेपुः विरुरुवुः च।

--द्विष अप्रीतौ ( अदादिः स्वरितेदनुदात्तः )। द्यु अभिगमने ात्त उदात्तेत् )। छो छेदने ( दिवादिरनुदात्त उदात्तेत् )। ञिष्वप् दरनुदात्त उदात्तेत् )।

रिवर्तनम्–भटैः दिद्विषे, दुद्युवे, चच्छे। हतैः चक्लमे, सुषुपे, चखादुः, लेपे ॥ १०१ ॥

**प्रहस्तस्य पुरोऽमात्यान् जिहिंसुर् दधृषुस् तथा।**
**ानराः कर्म सेनानी रक्षसां चक्षमे न तत् ॥ १०२ ॥**

--वानराः प्रहस्तस्य पुरः अमात्यान् जिहिंसुः तथा दधृषुः, रक्षसां कर्म न चक्षमे।

–वानरोंने प्रहस्तके सामने उनके अमात्योंको मार डाला तथा ई। राक्षसोंका सेनापति तो यह उनका कर्म सह न सका।

—वानराः कपयः, प्रहस्तस्य सेनापतेः, अमात्यान् सचिवान्,

जिहिंसुः हतवन्तः । तथा दधृषुः जगल्भिरे । रक्षसां क्रव्यादां, सेना तत् प्रत्यक्षं क्रियमाणं कर्म, न नहि, चक्षमे सेहे ।

**तिङन्तः**—ञिधृषा प्रागल्भ्ये ( स्वा० उदात्त उदात्तेत् ) । ( भ्वा० उदात्तोऽनुदात्तेत् ) । क्षमू सहने ( दिवादिरषित् ) । 'अषि क्षान्तिः क्षमूषः क्षमतेः क्षमा' ।

**वाच्यपरिवर्तनम्**—वानरैः अमात्या जिहिंसिरे, दधृषे । सेन चक्षमे न ॥ १०२ ॥

**ऊर्णुनाव स शस्त्रौघैर् वानराणामनीकिनीम् ।**
**शशास च बहून् योधान् जीवितेन विवेच च ॥ १०३ ।**

**अन्वयः**—स वानराणाम् अनीकिनीम् शस्त्रौघैः ऊर्णुनाव । शशास, जीवितेन च विवेच ।

**हिन्दी**—उसने वानरोंकी सेनाको शस्त्रोंके समूहसे ढक योद्धाओं को मार डाला, जीवनसे अलग कर किया ।

**व्याख्या**—स राक्षससेनानीः, वानराणां कपीनाम्, अनी शस्त्रौघैः प्रहरणसङ्घैः, ऊर्णुनाव आचच्छाद । बहून् भूयसः, यो शशास जघान । जीवितेन आयुषा, विवेच पृथक् चकार ।

**तिङन्तः**—शसु हिंसायाम् ( भ्वा० उदात्त उदात्तेत् ) । ऊर्णु ( अदादिरुदात्तः ) । **'ऊर्णोतेराम् नेति वाच्यम्** ३।१।३६' वा० इ मोऽभावे **'नन्द्राः संयोगादयः** ६।१।३' इति नु–मात्रस्य द्वित्वे रू पृथग्भावे ( रुधादिः स्वरितेदनुदात्तः ) ।

**वाच्य०**—तेनानीकिनी ऊर्णुनुवे । योद्धा वहवः शशसिरे, विवि

**आससञ्ज भयं तेषां दिद्युते च यथा रविः ।**
**नाऽऽययास द्विषद्देहैर्जगाहे च दिशो दश ॥ १०**

**अन्वयः**—तेषां भयम् आससञ्ज । रविः यथा दिद्युते, न (तथा द्विषद्देहैः दश दिशो जगाहे ।

**हिन्दी**—उनको ( कपियोंको ) भय हो गया । सूर्यके समान उठा, वह थका नहीं । शत्रुओंके शरीरोंसे दसों दिशाओंको विलो ( अर्थात् वे भाग चले ) ।

**व्याख्या**—तेषां कपीनां, भयं भीः, आससञ्ज आसक्तमभूत् ।

सूर्यः, यथा इव, दिद्युते दिदीपे। न नहि, आययास शश्राम। द्विषद्देहैः
ा पंक्तीः, दिशः ककुभः, जगाहे अंवतष्टम्भ। ते पलायिता इति यावत्।
:—षञ्ज सङ्गे ( भ्वा॰ अनुदात्त उदात्तेत् )। द्युत दीप्तौ ( भ्वा॰
त्तेत् )। यमु प्रयत्ने ( दि॰ उदात्त उदात्तेत् )। 'द्युतिस्वाप्योः
७।४।६७' इति सम्प्रसारणम्।
—भयेनाससञ्जे, रविणा दिद्युते, आययासे, दिशो जगाहिरे॥१०४॥

केचित् सञ्चुकुटुर्भीता लेजिरेऽन्ये पराजिताः।
संग्रामाद् बभ्रशुः केचिद् ययाचुश्चापरेऽभयम् ॥ १०५ ॥

—केचित् भीताः सन्तः सचुकुटुः। पराजिताः अन्ये लेजिरे ( प्रह
चित् संग्रामाद् बभ्रशुः। अपरे अभय ययाचुः।
—कुछ तो डर कर संकुचित हो गये और कुछ पराजित होनेसे
गये। कुछ तो संग्रामसे भाग चले और कुछने अभय याचना कर ली।
ा—केचित् कियन्तः, भीताः भयार्ताः सन्तः, सचुकुटुः निष्प्रयत्ना
न्ये अपरे, पराजिताः परास्ताः 'कातरा यूयम्' इति ( तेन ) लेजिरे
वुः। केचित् कियन्तः, संग्रामात् रणात्, बभ्रशुः पलायिताः। अप-
म् अवध्यतां, ययाचुः याचितवन्तः।
:–कुट कौटिल्ये तु॰ उदात्त उदात्तेत्)। लज, लाजि भर्त्सने (भ्वा॰
त्तेतौ)। अत्र कर्मणि लिट् लेजिरे इति। भृशु भ्रंशु अधःपतने ( दि॰
भ्वादिस्था वन्त्यान्तः। 'भट्टिमते भ्रशु भ्रशु' इति पाठः।
रिवर्तनम्—भीतैः कैश्चित् सञ्चुकुटे। अन्यान् पराजितान् स ललाज।
श्चिदभय ययाचे ॥ १०५ ॥

एवं विजिग्ये तां सेनां प्रहस्तोऽति ददर्प च।
शशाम न च संक्रुद्धो निर्जुगोप निशाचरान् ॥ १०६ ॥

—प्रहस्तः ता सेनाम् एव विजिग्ये अतिददर्प च। संक्रुद्धः न शशाम,
निर्जुगोप।
—प्रहस्तने उस सेनाको इस प्रकार जीत लिया और वह खूब खुश
पर भी) क्रोधी वह शान्त नहीं हुआ, उसने निशाचरोंको बचा लिया।
ा—प्रहस्तः सेनापतिः, तां कापेयीं, सेनां सैन्यं, विजिग्ये विजितवान्।
, ददर्प जहर्ष। संक्रुद्धः सुष्ठु कुपितः, न नहि, शशाम शम जगाम।
स्वामात्यान्, च, जुगोप ररक्ष।

**तिङन्तः**—'विपराभ्यां जेः १।३।१९' इत्यात्मनेपदम् । 'सन्लि ५७' कुत्वम् । दृप हर्षविमोचनयोः (दि० उदात्तेदनुदात्तः)। गुपू रक्ष 'आयादय आर्धधातुके वा ३।१।३१' इति आयाभावे रूपम् ।

**वाच्यपरिवर्तनम्**—प्रहस्तेन सा सेना विजिग्ये, अति ददृपे, संक्रु निशाचराः जुगुपिरे ॥ १०६ ॥

**चुक्रुधे तत्र नीलेन तरुश् चोच्चिक्षिपे महान् ।**
**प्रहस्तोऽभिहतस्तेन बाणान् विससृजे बहून् ॥ १०७ ॥**

**अन्वयः**—तत्र नीलेन चुक्रुधे, महान् तरुश्च उच्चिक्षिपे । तेन बहून् बाणान् विससृजे ।

**हिन्दी**—उस संग्राममें नील ( कपि सेनापति ) क्रुद्ध हुए । उखाड़कर ( प्रहस्तके ऊपर ) फेंका । उससे ताड़ित होकर बाण फेंके ।

**व्याख्या**—तत्र रणे, नीलेन कपिसेनापतिना, चुक्रुधे चुकुपे । तरुः वृक्षः, उच्चिक्षिपे प्रेरयामास (प्रहस्तोपरि)। तेन तरुणा, अभि प्रहस्तः राक्षससेनापतिः, बहून् भूयसः, बाणान् शरान्, विससृजे

**तिङन्तः**—क्रुध, कुप कोपे ( दि० उदात्तेदनुदात्तौ )। सृज अनुदात्तेदनुदात्तः )। पूर्वार्द्धे भावकर्मणोर्लिट् । उत्तरार्द्धे कर्तरि

**वाच्यपरिवर्तनम्**—नीलः चुक्रोध, महान्तं तरुम् उच्चि प्रहस्तेन बहवो बाणाः विससृजिरे ॥ १०७ ॥

**सेहे कपी रथाश्वांश् च रिपोस् ततर्ह शाखिना ।**
**धरित्रीं मुसली तेये प्रहस्तश् चिखिदे न च ॥ १०**

**अन्वयः**—कपिः सेहे ( बाणान् ), शाखिना रिपोः रथाश्वा मुशली प्रहस्तः धरित्रीं तेये, न च चिखिदे ।

**हिन्दी**—कपिने ( बाणोंको ) सह लिया और पेड़ द्वारा शत्रुके नष्ट कर दिये । मुशलधारी प्रहस्त पृथ्वीपर गिरा किन्तु वह खिन्न

**व्याख्या**—कपिः नीलः, सेहे सोढवान् (तान् बाणान्)। शा रिपोः शत्रोः, रथाश्वान् स्यन्दनहयान्, ततर्ह जिहिंस । मुशली मुशल राक्षससेनाध्यक्षः, धरित्रीं धरां, तेये जगाम । किन्तु, न नहि, चिखिदे

**तिङन्तः**—षह मर्षणे (भ्वा० अनुदात्तेदनुदात्तः)। तृह हिंसि

: )। अय, तय गतौ ( भ्वा० उदात्तौ अनुदात्तेतौ )। खिद दैन्ये अनुदात्तोऽनुदात्तेत् )। खिद प्रतिघाते ( तु० अनुदात्त उदात्तेत् )। रिवर्तनम्‌--कपिना सेहिरे बाणाः, ततृहिरे रथाश्वाः, न चिखिदे, मुशलिना घरा ॥ १०८ ॥

**संदुधुक्षे तयोः कोपः पस्फाये शस्त्रलाघवम्‌ ।**
**नुनोद शाखिनं नील आवव्रे मुसली तरुम्‌ ॥ १०९ ॥**

—तयोः कोपः संदुधुक्षे, शस्त्रलाघवं पस्फाये। नीलः शाखिनं ली तरुम्‌ आवव्रे ।

—उन दोनोंका क्रोध खूब तेज हो गया और हस्तकौशल भी बढ़ ने (प्रहस्तपर) पेड़ फेंका किन्तु उसने मुसलसे पेड़को रोक लिया।

—तयोः नीलप्रहस्तयोः, कोपः क्रोधः, संदुधुक्षे सन्दिदीपे। शस्त्र-णकौशलम्‌, पस्फाये ववृधे। नीलः कपिसेनाध्यक्षः, शाखिनं द्रुमं, स ( प्रहस्तोपरि ), मुशली गृहीतमुशलः ( सः ), तरुम्‌ पादपम्‌, कार।

धुक्ष, धिक्ष सन्तेजनादौ ( भ्वा० उदात्तानुदात्तेतौ )। स्फायी त्तानुदात्तेत्‌ )। णुद प्रेरणे ( तु० अनुदात्तः स्वरितेत्‌ )। वृञ्‌ : )।

र्तनम्‌--कोपेन सन्दुधुक्षे, शस्त्रलाघवेन पस्फाये। नीलेन शाखी व्रे मुशलिना ॥ १०९ ॥

**यत्यानभ्रतुर्भूमौ मण्डलानि विचेरतुः ।**
**दुद्रुवतुरन्योन्यं वीरौ शश्रमतुर्‌ न च ॥ ११० ॥**

—वीरौ वियति आनभ्रतुः, भूमौ मण्डलानि विचेरतुः, अन्योऽन्यम्‌ तुः, न च शश्रमतुः।

—वे दोनों वीर आकाशमें (मेघके समान) गये, पृथ्वीपर पैंतरा देते र दौड़े ( पर ) थके नहीं।

--वीरौ शूरौ तौ, वियति नभसि, आनभ्रतुः जग्मतुः। भूमौ ण्डलानि तिर्यग्भ्रमणादीनि, विचेरतुः चक्रतुः। अन्योऽन्यं परस्परं, तापयामासतुः, न च नहि, शश्रमतुः श्रान्तौ।

—अभ्र, वभ्र गतौ (उदात्तावुदात्तेतौ भ्वादी)। चर गति-भक्षणयोः

(तथैव)। द्रूञ् हिंसायाम् (क्र्या० उदात्तोभयपदी)। श्रमु श्रा
अनुदात्तोदात्तेत्)।

**वाच्यपरिवर्तनम्**—वीराभ्यामानभ्रे, मण्डलानि विचेरिरे, प्रदुद्रु
न शश्रमे ॥ ११० ॥

समीरयाञ्चकाराऽथ राक्षसस्य कपिः शिलाम् ।
क्षतस् तया ममाराऽसावाशिश्राय च भूतलम् ॥ १११ ॥

**अन्वयः**—अथ कपिः शिलाम् राक्षसस्य समीरयाञ्चकार । तय
ममार, भूतलम् आशिश्राय ।

**हिन्दी**—इसके अनन्तर कपि नीलने पर्वतखण्डको राक्षसप
उससे विक्षत होकर वह मर गया और पृथ्वीपर गिर गया ।

**व्याख्या**—अथ अनन्तरम्, कपिः नीलः, शिलाम् पर्वतख
प्रहस्तस्य, समीरयाञ्चकार चिक्षेप । तया शिलया, क्षतः घातित
ममार प्राणान् तत्याज, भूतलम् धरातलम्, आशिश्राय बभाज

**तिङन्तः**—ईर क्षेपे (चुरादिरुदात्तोदात्तेत्)। मृङ् प्राणत्यागे (
दात्त आत्मनेपदी अपि)। 'म्रियतेर्लुङ्लिङोश्च १।३।६१' इति निय
स्मैपदम्। सिद्धि-प्रकारः सर्गारम्भे विवृतः ।

**वाच्यपरिवर्तनम्**—कपिना शिला समीरयाञ्चक्रे । अमुना क्षते
भूतलं शिश्रिये ॥ १११ ॥

तुतुषुर् वानराः सर्वे नेशुश् चित्रा निशाचराः ।
जेरुराशा दशास्यस्य सैन्यं नीलं नुनाव च ॥ ११२ ॥

**अन्वयः**—सर्वे वानराः तुतुषुः । निशाचरा नेशुः । दशास्यस्य चि
जेरुः । सैन्यं (कर्तृ) नीलं (कर्म) नुनाव ।

**हिन्दी**—सभी वानर सन्तुष्ट हो गये । राक्षस हतप्रभ हो गये ।
विचित्र आशायें काफूर हुईं । सेनाओंने नीलकी प्रशंसा की ।

**व्याख्या**—सर्वे समस्ताः अपि,वानराः हरयः,तुतुषुः तुष्टा बभू
क्षपाटाः,नेशुः विनष्टाः । दशास्यस्य रावणस्य, चित्राः विविधाः,
जेरुः जीर्णाः समाप्ताः । सैन्यं कपिबलं (कर्तृ), नीलं सेनापतिं

**तिङन्तः**—तुष तुष्टौ, णश अदर्शने (अनुदात्तोदात्तेतौ
वयोहानौ (उदात्तोदात्तेद्दिवादिः)। 'वा जॄभ्रमुत्रसाम् ६।४।१
भ्यासलोपपक्षे रूपम् ।

रिवर्तनम्——वानरैः तुतुषे, सर्वैः नेशे निशाचरैः। आशाभिश्चित्राभिः
नोलो नुनुवे ॥ ११२ ॥

**न फेलुः क्षणदा-चराणां मनोरथा राम-बलाऽभियोगे ।**
**तदा भेजुरुदीर्ण-दैन्या व्याचख्युरुच्चैश् च हतं प्रहस्तम् ॥ ११३ ॥**

——यदा रामबलाभियोगे क्षणदाचराणां मनोरथा न फेलुः, तदा
ते लङ्कां भेजुः, प्रहस्तं च हतम् उच्चैः व्याचख्युः ।

न्दी——जब राम–सैन्यके साथ युद्ध करनेमें राक्षसोंका मनोरथ असफल
ा, तब वे मुँह लटकाये लङ्काको लौट गये और प्रहस्त के मारे जानेका
वर्णन उन्होंने किया ।

ाख्या——यदा यस्मिन् काले, रामबलाभियोगे राघवसैन्ययुद्धे, क्षणदाच-
राक्षसानां, मनोरथाः मनःसंकल्पाः, न नहि, फेलुः सफलिताः। तदा
सरे, ते उदीर्णदैन्याः दीर्घदीनताजुषः, लङ्कां काञ्चनीं पुरीं, भेजुः सिषे-
प्रहस्तं स्वसेनाध्यक्षं, हतम् घातितं, उच्चैः शोकाद्रुदन्तस्तारस्वरैः, व्याच-
ासुः ।

-रामस्य बलम्, तेन सह अभियोगः। उभयत्र तत्पुरुषः। अत्र सहार्थे
तीया २।१।३०' इति योगविभागसूत्रेणान्तिमः तत्पुरुषः। उदीर्णं
ते इति बहुव्रीहिः ।

——फल निष्पत्तौ (भ्वा० उदात्तोदात्तेत्)। ख्या प्रकथने ( अदादि-
त )।

रिवर्तनम्——मनोरथैर्न फेले। लङ्का उदीर्णदैन्यैर्भेजे। हतः प्रहस्तो
॥ ११३ ॥

। रावणट्टिमहाकाव्ये तिङन्तकाण्डे लिड्विलसिते लक्ष्यरूपे कथानके शरबन्धो
नाम रावणमुख्यसेनापतिविनाशश्चतुर्दशः सर्गः समाप्तः ।

# पञ्चदशः सर्गः

## ( उपक्रमः )

सर्गेऽस्मिन् लुङ् विलसितं विद्यते। लुङ् लकारो हि 'भूते ३।२।
सूत्रस्याधिकारे 'लुङ् ३।२।११०' इति सूत्रेण सामान्यभूतेऽर्थे भवति।
विकरणे, च्लेः सिचि कृते, सेडनिडभेदेन द्विधा प्रत्ययाः। च्लेः अङ्-च
भेदेन च लङ्वत् प्रत्यया इति त्रिधा प्रत्ययाः च्लिविकरण-शालि
भवन्ति। तथाहि—'च्लि लुङि ३।१।४३' 'च्लेःसिच् ३।१।४४' इत्येव
स्तनाः प्रत्यया निर्मातव्याः—

| | परस्मैपदे | लुङि | अनिट् प्रत्ययाः | आत्मनेपदे | लुङि | अनिट् प्र |
|---|---|---|---|---|---|---|
| | १ | २ | ३ | १ | २ | ३ |
| प्र० | सीत् | स्ताम् | सुः | स्त | साताम् | सत |
| म० | सीः | स्तम् | स्त | स्थाः | साथाम् | ध्वम् |
| उ० | सम् | स्व | स्म | सि | स्वहि | स्महि |
| | परस्मैपदे | लुङि | सेट् प्रत्ययाः | आत्मनेपदे | लुङि | सेट् प्र |
| | १ | २ | ३ | १ | २ | ३ |
| प्र० | ईत् | इष्टाम् | इषुः | इष्ट | इषाताम् | इषत |
| म० | ईः | इष्टम् | इष्ट | इष्ठाः | इषाथाम् | [illegible] |
| उ० | इषम् | इष्व | इष्म | इषि | इष्वहि | [illegible] |
| | च्लेरङादि – विकरणे | | परस्मैपदे | च्लेरङादि—विकरणे | | आत्मने |
| | १ | २ | ३ | १ | २ | ३ |
| प्र० | त् | ताम् | अन् | त | आताम् | [illegible] |
| म० | स् | तम् | त | थाः | आथाम् | ध्वम् |
| उ० | अम् | व | म | इ | वहि | महि |

सिचि अनिट् प्रत्यये सेट् प्रत्यये च प्रकारत्रयेण वृद्धि कृत्वा १–प्रथमप्रकारे
वृद्धिः, २–द्वितीये वैकल्पिकी वृद्धिः, तृतीये वृद्धयभावः इति प्रकारत्रय

१–प्रथमः प्रकारः–एषु सेडनिट् प्रत्ययेषु परस्मैपदे 'सिचि वृद्धिः पर
७।२।१' इति इगन्तानां नित्यं वृद्धिः। उदाहरणानि-चिञ् चयने–अचैषीत्
अचैषुः। अचैषीः अचैष्टम् अचैष्ट। अचैषम् अचैष्व अचैष्म। णीञ् प्राप

म् अनैषुः इत्यादि । अश्रौषीत् (श्रु-श्रवणे)। अहौषीत् ( हु–दाना- डुकृञ् करणे–अकार्षीत् अकार्ष्टाम् अकार्षुः । हृञ् हरणे–अहार्षीत् । त्रलमेकः श्वि धातुः ( टुओश्वि गतिवृद्धयोः ) सेट् । श्रिञ् श्रयणे श्रोतुरपि । किन्तु 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ७।२।५' इति निषेधो जायते । श्रिञस्तु 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ३।१।४८' इति चङ्- सिचोऽभावः । ईकारान्तस्तु न परस्मैपदे सेट् । अन्योवर्णान्तानां सेटा- णानि—अयावीत् अयाविष्टाम् अयाविषुः (यु मिश्रणामिश्रणयोः)। रु —अरावीत् अराविष्टाम् अराविषुः । दीर्घोकारे लूञ् छेदने—अलावीत् । पवने, अपावीत् । कॄ विक्षेपे—अकारीत् । गॄ निगरणे–अगारीत्, इत्यादि । ालन–पूरणयोः–अपारीत् इत्यादि । सेट् ह्रस्वर्कारोऽपि–वृञ् वरणे–अवारीत् ारिष्टाम् अवारिषुः । कॄत आरभ्य वृञ् इत्येतेषां त्रयाणां 'सिचि च परस्मैपदेषु २।४०' इति सूत्रेण "वॄतो वा ७।२।३८" इति प्राप्तः पाक्षिकदीर्घो निषि- तें । ऊर्णुञ् आच्छादने इति सेटोऽपि "ऊर्णोतेर्विभाषा ७।२।६" इति विशेष- ेण वृद्धिविकल्पः । "विभाषोर्णोः १।२।३" इति सूत्रेण ङिद्विकल्पोऽपि– र्णावीत् और्णाविष्टाम् और्णाविषुः । और्णवीत्, और्णुवीत् इत्यादि ।

प्रथमप्रकारे एव सेटोऽतो ल्रान्तस्य वदेः व्रजेश्च नित्यं वृद्धिः । तथा सर्वस्य लन्तस्यानिटो नित्यं वृद्धिः । सूत्राणि क्रमेण–'अतो ल्रान्तस्य ७।२।२' 'वदव्रज- लन्तस्याचः ७।२।३' । उदाहरणानि–अचालीत्, अज्वालीत्, अक्षारीत्, अचा- ीत्, अव्राजीत्, अवादीत् । हलन्ता अनिटः–अपाक्षीत्, अभैत्सीत्, अताप्र्सीत्, कार्क्षीत् । अनेकवर्णव्यवधानेऽपि अन्वत इत्युक्तेः–अभाङ्क्षीत्, अराङ्क्षीत् ।

द्वितीये प्रकारे 'अतो हलादेर्लघोः ७।२।७' इति सेट एव हलादेरदुपधस्य लन्तस्य वा वृद्धिर्भवति । यथा–अगदीत् अगादीत्, अपठीत्–अपाठीत् इत्यादि । लरान्ता वदव्रजौ च एतन्नियमाक्रान्ता अपि अपवादविधिना मुक्ताः )।

तृतीये प्रकारे इडादौ सिचि हलन्तानां तथा ह्म्यन्तानां क्षणश्वसजागृश्वि- ातूनाम् ण्यन्तस्य एदितां च नैव वृद्धिः । सूत्रे 'नेटि ७।२।४', "ह्म्यन्तक्षणश्वस- ागृणिश्व्येदिताम् ७।२।५' । उदाहरणानि–अदेवीत्, अमोषीत्, अतर्पीत्, ग्रहीत्, अक्रमीत्, अव्ययीत्, अक्षणीत्, अश्वसीत्, अजागरीत्, अश्वयीत् । दितः—कटे वर्षावरणयोः–अकटीत् । रगे, कखे–अरगीत्, अकखीत् । ण्यन्तो- ाहरणं छन्दसि । कुटादयोऽपि ङित्वाद् गुणरहिताः–अकुटीत्, अनुवीत् इत्यादि ।

इति सिचि वृद्धिप्रकारत्रयसमाप्तिः ।

१–कियतां धातूनां च्लेः स्थाने क्सः चङ् अङ् इति कृत्वा प्रक
लकारवत् प्रयोगा ज्ञेयाः। विशेषकार्यं तत्तत्सूत्रबलाज्ज्ञेयम्। लि
दुह प्रपूरणे इत्यादीनां ‘शल इगुपधादनिटः क्सः ३।१।४५’ इति च्ले
बन्धलोपे ‘हो ढः ८।२।३१’ इति हो ढे, ‘षढोः कः सि ८।२।४१’ इति
षत्वे अलिक्षत् अलिक्षताम् अलिक्षन्। आत्मनेपदेऽप्येवम्। केवलं
७।३।७२’ इति क्सस्याचो लोपो विशेषः। ‘लुग्वा दुहदिहलिहगुहामा
७।३।७३’ इति लुगपि पाक्षिकः। अलिक्षत–अलीढ अलिक्षाता
( अचीति परसप्तमीत्वान्न भाविबुद्धया पूर्वमलोपः )। क्सो लुकि
‘झषस्तथोर्धोऽधः ८।२।४०’ इति तस्य धे, ष्टुत्वे, ढलोपे, दीर्घे अलीढेति।
क्षथाः–अलीढाः, अलिक्षाथाम् अलिक्षध्वम्–अलीढ्वम्। अलिक्षि अलिक्षाव
अलिह्वहि,अलिक्षामहि। द्रुहोऽप्येवम्। ‘एकाचो बशो भष् झषन्तस्य स्ध्वोः ८
३७’ इति घत्वविशेषः। अधुक्षत्। अधुक्षत–अदुग्ध। ‘दादेर्धातोर्घः ८।२।३२’
घत्वं, ‘झलां जश् झशि ८।४।५’ इति गत्वं च विशेषः। दृशिर् प्रेक्षणे इति धा
‘न दृशः ३।१।४७’ इति क्सनिषेधे, ‘इरितो वा ३।१।५७’ इति पाक्षिकेऽङि
दृशोऽङि गुणः ७।४।१६’ इति गुणे अदर्शत्। अङोऽभावे मिचि ‘सृजिदृशो
क्ङिति ६।१।५८’ इत्यमि हलन्तवृद्धौ अद्राक्षीत् इत्यादि लङ्प्रत्यये प्रथमः प्रका

२–द्वितीयः प्रकारः–‘णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ३।१।४८’ इति चङि
६।१।११’ इति द्वित्वाद्यभ्यासकार्ये ण्यन्तानामुभयपदे अचीकरत् अचीक
श्रिञ् सेवायाम्–अशिश्रियत् अशिश्रियत। द्रु गतौ–अदुद्रुवत् (परस्मैपदमा
एवं स्रुवोऽपि। धेट् पाने इति धातोः विशेषोऽस्मिन् प्रकारे। तथाहि ‘वि
धेट्श्व्योः ३।१।४९’ इति पाक्षिके चङि द्वित्वादौ ‘आतो लोप इटि च ६।४।
इति आलोपे अदधत्। पक्षे ‘विभाषा घ्राधेट्शाच्छासः २।४।७८’ इति सि
लुकि अधात् अधाताम्। ‘आतः ३।४।११०’ इति झेर्जुसि अधुः। पक्षे
रमनमातां सक् च ७।२।७३’ इति सकि सिचश्चेटि अधासीत्। इत्येवं
धेटः। श्वेस्तु अशिश्वियत्। पक्षे ‘जृस्तम्भु० ३।१।५८’ इति च्लेरङि
७।४।१८’ इत्यकारे, अतो गुणे अश्वत्। पक्षे–‘ह्म्यन्तक्षण० ७।२।५’ इति
निषेधे अश्वयीत्। इत्येवं त्रिधास्यापि।

३–तृतीयः प्रकारो यथा–‘अस्यतिवक्तिख्यातिभ्योऽङ् ३।१।५२’ इति अनु
दैवादिक-धातोरङि ‘अस्यतेस्थुक् ७।४।१७’ इति थुकि आस्थत्। उपसर्गे
दस्यत्यूह्योर्वा वचनम्’ इत्यात्मनेपदेऽपि निरास्थत(त्)। ब्रूञः ‘ब्रुवो वचिः २।४।

च उम् ७।४।२०' इत्युमि अवोचत् (त)। ख्यातेः आलोपे अख्यत
सिचिह्वश्च ३।१।५३' इत्यङि, तङि तु 'आत्मनेपदेष्वन्यतरस्याम्'
ति पाक्षिकेऽङि भट्टेरेवोदाहरणानि—

इह सा व्यलिपद् गन्धैः स्नान्तीहाभ्यषिचज्जलैः।
इहाहं द्रष्टुमाह्वं तां स्मरन्नेवं मुमोह सः॥

। 'तस्यालिपत शोकाग्निः' 'अलिप्तेवानिलः शीतः'। 'झलो झलि ८।
सिज्लोपोऽत्र। 'स्नानाभ्यषिचताम्भोऽसौ'। 'तथाभ्यषिक्त वारीणि'।
स मुहुः सुरान्' 'मुहुराह्वत राक्षसान्'। 'आतो लोप इटि च ६।३।६४'
आलोपः। पुष पुष्टौ इत्यादयो गणान्ता दिवादौ धातवो हि पुषादयः। तेषां
रङ् ज्ञेयम्। 'पुषादिद्युताद्युलृदितः परस्मैपदेषु ३।१।५५' इत्यङ्—अपुषत्। द्युता-
ौ भ्वादौ आत्मनेपदिनो धातवः। किन्तु 'द्युद्भ्यो लुङि २।३।९१' इति
क्षिकं परस्मैपदम्। ङित्वाद् गुणाभावः अद्युतत्। तङि सिचि गुणवृद्धौ अद्योति-
त्यादि। कृपू सामर्थ्ये इत्यस्य 'कृपो रो लः ८।२।१८' कृप+उ इति च्छेदेन
पः उः ऋकारस्यापि ल इत्यर्थकरणे ऋकारस्य ऌकारे अक्लृपत्। पक्षे अक-
ल्पष्ट, अक्लृप्त। लृदित्वाद् गम्लृ गतौ अगमत्। पत्लृ पतने 'पतः पुम् ७।४।१९'
ति पुमागमे अपप्तत्। 'सर्तिशास्त्यर्तिभ्यश्च ३।१।५६' इत्यङि सृ गतौ 'ऋदृशो-
ङि गुणः' ७।४।१६' इति गुणे असरत्। शासु अनुशिष्टौ। 'शास इदङ्हलोः
६।४।३४' इति इत्वे 'शासि वसि-घसीनां च' ८।३।६०' इति षत्वे अशिषत्।
र्तिशास्त्योः साहचर्यात् ऋ धातुर्जौहोत्यादिको गृह्यते। आरत्। पृथग् योगकरणादात्मनेपदेऽपि 'अर्तिश्रुदृशिभ्यश्चेति वाच्यम् १।३।२९' वार्तिकेनात्मनेपदे
समारतेत्यादि।

भिदिर् विदारणे 'इरितो वा ३।१।५७' इति पाक्षिके अङि अभिदत्। पक्षे
भैत्सीत् इत्युक्तम्। तङि अभित्त। इत्थं हि सर्वे इरितो ज्ञेयाः।

यद्यपि लङ्-प्रत्ययभेदेषु क्वापि तङि रूपाणि विवृतानि पूर्वम्। परन्तु सेडनिड्भेदे तु परस्मैपदिनामेव पदान्युक्तानि। अतः सम्प्रति तङि संक्षिप्यते। एध वृद्धौ अनुदात्तेत् उदात्तः (सेट्) धातुरयम् भौवादिकः। 'आडजादीनाम् ६।४।७२' इत्याडागमे 'आटश्च ६।१।९०' इति वृद्धौ ऐधिष्ट। 'इणः षीध्वं लुङ्लिटां धोऽङ्गात् ८।३।७८' इति ढत्वे ऐधिढ्वम्। इड्भिन्न एव इणिह गृह्यते इति मते ऐधिध्वम्। हलादि-हलन्त-सेटां भाषादिधातूनां (भाष कथने) अभाषिष्टेत्यादि। अजन्तसेटाम् अशयिष्टेत्यादि। वृञ् वरणे परस्मैपदे तूक्तमेव। केवलं तङि—अवरिष्ट। 'वृतो वा ७।२।३८' इति पाक्षिके इड्दीर्घे अवरीष्ट। 'लिङ्सिचोरात्मने-

पदेषु ७।२४।२' इति इटः पाक्षिकत्वात् **'ह्रस्वादङ्गात् ८।२।२७'** अवृत । अवृढ्वम् । इट्पक्षे ध्वमि तु **'विभाषेटः ८,३।७९'** इति अवरीढ्वम् अवरिढ्वम्, ढत्वाभावे अवरीध्वम् अवरिध्वम् ।

अनिटामजन्तानां हलन्तानां च अनेष्ट । अप्लोष्ट । अकृत । 'उ इति कित्वाद् गुणाभावे **'ह्रस्वादङ्गात् ७।२।२७'** इति पूर्वसूत्रात् स माने इति जुहोत्यादि-दिवादिस्थयोः अमास्त । मनु ज्ञाने इति असंस्त । मनु अवबोधने तनादिस्तु सेट् । इगुपधानां हलन्तानां तु 'लि त्मनेपदेषु १।२।११' इति सिचः कित्वाद् गुणाभावः । अबुद्ध । 'झषस्त ८।२।४०' इति धः । अभुत्साताम् इत्यत्र भष्भावः । सृज विसर्गे इति । अ कर्मकः । असृष्ट । कित्वान्न गुणामौ । क्सादौ तूक्तमेव । इति लुङि लक्षाव पदानुगमः । विशेषो माधवीयधातुवृत्त्यादिभिर्ज्ञेयः ।

## ( सर्गारम्भः )

कुम्भकर्णजागरणप्रकारमादावाख्याति—लुङ्विलसितेन[1]—

**राक्षसेन्द्रस् ततोऽभैषीदैक्षिष्ट परितः पुरम् ।**
**प्रातिष्ठिपच्च बोधाऽर्थं कुम्भकर्णस्य राक्षसान् ॥ १ ॥**

**अन्वयः**—ततः राक्षसेन्द्रः अभैषीत्, पुरम् परितः ऐक्षिष्ट । कुम्भकर्णस प्रबोधार्थं राक्षसान् प्रातिष्ठिपत् ।

**हिन्दी**–इसके बाद (प्रहस्तके मारे जानेपर) राक्षसराज डर गया । उस नगरके चारों ओर देखभाल की। कुम्भकर्णको जगानेके लिये राक्षसोंको भेजा

**व्याख्या**—ततः प्रहस्तवधानन्तरम्, राक्षसेन्द्रो रावणोऽभैषीत् भयमापत् पुरम् लङ्कां, परितः सर्वतः, ऐक्षिष्ट समालुलोकत् । कुम्भकर्णस्य स्वभ्रातु बोधार्थम् जागरणाय, राक्षसान् क्षपाटान्, प्रातिष्ठिपत् प्रस्थातुं प्रैरिरत् ।

---

[1] भाट्टकाव्येऽन्यत्र क्व लुङ् प्रयोग इति सर्ग-श्लोक संख्यया निर्दिश्यते—१-१-३, १०-१२, १४-१९, २१-२२, २५-२६ । २-१०, १४, २१, २६-२८, ३४, ३६, ४१-४ ४५-४६, ४८-४९, ५१-५३ । ३-१, ३, ९, १३-१५, १७, २०-२१, २५-२६, ३०, ४ ५१, ५४ । ४-४, ६, १३, २०, २८-३०, ३२-३४, ३७-३८ । ५-२, ६, १६, ३१, ३ ३५, ३७-३८, ४०, ५२ ५३, ६०, ६६, ७१, ८३, ९७, १०८ । ६-७, ९, १२, १४-१४ ४३, ४८, ६२, ६९-७०, ९१, ९७, ११८-१२१, १२८, १३२, १४० । ७-१३, २६, ३ ३४, ७०, ७७-७९, ९१, १००-१०३ । ८-७, १८, २२-२६, २८-२९, ३३, ३६, ४२ ५०-५२, ५४-५५, ५७, ६६-६७, ७३-७४, ७९-८१, १०३, १२-१३, २०, २३ । इ परीक्ष्य सर्गान्तं दिङ्निर्देशः ।

:—ञिभी भये (अनुदात्त उदात्तेत् जुहोत्यादिः)। 'सिचि वृद्धिः परस्मै- २।१'। ईक्ष दर्शनाङ्कनयोः (उदात्तोऽनुदात्तेद् भ्वादिः)। स्थापेः तुभ्यः कर्तरि चङ् ३।१।४८', 'चङि ६।१।११' इति द्वित्वादिकार्ये रित् ७।४।५' इतीत्वं विशेषः।

च्य०—राक्षसेन्द्रेणाभायि, ऐक्षि। राक्षसाः प्रास्थापिषत ॥ १ ॥

तेऽभ्यगुर्भवनं तस्य सुप्तं चैक्षिषताथ तम्।
व्याहार्षुस्तुमुलान् शब्दान् दण्डैश्चावधिषुर्द्रुतम् ॥ २ ॥

**अन्वयः**—ते द्रुतम् तस्य भवनम् अभ्यगुः। अथ तं सुप्तम् ऐक्षिषत, लान् शब्दान् व्याहार्षुः, दण्डैः च अवधिषुः।

**हिन्दी**—वे राक्षस जल्दी कुम्भकर्णके घर गये। वहाँ उन्होंने उसे सोया हुआ। वे खूब जोर-जोरसे चिल्लाकर उसे उठाने लगे तथा डण्डोंसे मारने लगे।

**व्याख्या**—ते रावणनुन्ना राक्षसाः, द्रुतम् शीघ्रम्, तस्य कुम्भकर्णस्य, भवनं अभ्यगुः अयासिषुः। अथ गमनानन्तरम्, तं कुम्भकर्णं, सुप्तं शयानम् च, षत अद्राक्षुः। तुमुलान् घोरान्, शब्दान् ध्वनीन्, व्याहार्षुः चक्रुः। तम् कर्णम्, दण्डैः लगुडैः, अवधिषुः व्यताडयन्।

**तिङन्तः**—अभिपूर्व इण् गतौ अदादिः। तस्य लुङि **'इणो गा लुङि** २।४। इति गादेशे, **'गातिस्था०** २।४।७७' इति सिचो लुकि **'आतः** ३।४।११०' झेर्जुसि **'उस्यपदान्तात्** ६।१।९६' इति पररूपम्। हन हिंसागत्योः इत्या- स्य लुङि वधादेशे **'नेटि** ७।२।४' इति वृद्धिनिषेधः। वधादेशस्यादन्तत्वा- ऽपि वृद्धिनिषेध इति केचन।

**च्यपरिवर्तनम्**—तैरभ्यगायि भवनम्। स सुप्त ऐक्षि. तुमुलाः शब्दा रिषत, व्याहृषत वा। सः अवधि।

**कोशः**—'निशान्त-वस्त्य-सदनं भवनागारमन्दिरम्' इत्यमरः ॥ २ ॥

कुम्भकर्णमुत्थापयितुमतिशयोक्ति प्रयुङ्क्ते—

केशानलुञ्चिषुस्, तस्य गजान् गात्रेष्वचिक्रमन्।
शीतैरभ्यषिचंस् तोयैरलातैश् चाऽप्यदम्भिषुः ॥ ३ ॥

**:**—तस्य केशान् अलुञ्चिषुः, गात्रेषु गजान् अचिक्रमन्, शीतैः तोयैः , अलातैः अदम्भिषुः।

—उन राक्षसोंने उसके केश उखाड़े, अङ्गोंपर हाथियोंको चलवाया, ींचा तथा लुकारियोंसे जलाया।

**व्याख्या**—ते राक्षसाः, तस्य कुम्भकर्णस्य, केशान्
चीपटन्। गात्रेषु अङ्गेषु, गजान् हस्तिनः, अचिक्रमन् सं
शीतलैः, तोयैः जलैः, अभ्यषिचन् अभ्युक्षायांचक्रुः। सिचिरत्राभ्युक्ष
करणता कर्मणोनुल्लेखश्च। अलातैः उल्मुकैः, अदम्भिषुः अजिज्वल
अनेकार्थत्वादत्र दम्भिः ज्वालनेऽर्थे।

**तिङन्तः**—ण्यन्तस्य क्रमेर्मित्वाद् ह्रस्वत्वम्, चङि सन्वद्भावादित्वम्।
'सिताद्व्यवायेऽपि ८।३।६३' इति षः, 'लिपिसिचिह्वश्च ३।१।५३' इत्यङ् ज्ञे
अभ्यषिचन्।

**वाच्य०**—केशाः अलुञ्चिषत, गजाः अक्रमिषत, अभ्यषेचि, अदम्भि ॥

**नखैरकर्तिषुस् तीक्ष्णैरदाङ्क्षुर् दशनैस् तथा।**
**शितैरतौत्सुः शूलैश् च भेरीश् चाऽवीवदन् शुभाः ॥ ४ ॥**

**अन्वयः**—तीक्ष्णैः नखैः अकर्तिषुः, तथा दशनैः अदाङ्क्षुः, शितैः शू
अतौत्सुः, शुभाः भेरीः अवीवदन्।

**हिन्दी**—तीखे नखोंको चुभाया, दाँतोंसे काटा, चोखे त्रिशूलोंको चुभ
तथा अच्छे नगाड़ों को बजाया।

**व्याख्या**—ते राक्षसाः, तीक्ष्णैः उदग्रैः, नखैः करोरुहैः, अकर्तिषुः अतौत्सु
(तथा) दशनैः दन्तैः, अदाङ्क्षुः दष्टवन्तः। शितैः तीक्ष्णैः, शूलैः शस्त्रविशेषैः, अतौ
अव्यथिषुः। शोभनाः शब्द कुर्वाणाः, भेरीः ढक्काः, अवावदन् वादितवन्तः

**तिङन्तः**—कृती छेदने (तु० उदात्त उदात्तेत्)। दंश दशने (भ्वा०)।
व्यथने (तु० स्वरितेत् अनुदात्तः)। ण्यन्तो वदिः।

**वाच्य०**—नखैः अकर्ति, दन्तैः अदंशि, शूलैः अतोदि, भेरीभिः अवादि ॥४

**स तान् नाऽजीगणत् सर्वानिच्छयाऽबुद्ध च स्वयम्।**
**अबूबुधत कस्मान् मामप्राक्षीच्च निशा-चरान् ॥ ५ ॥**

**अन्वयः**—स तान् सर्वान् न अजीगणत्, स्वयम् इच्छया अबुद्ध
चरान् अप्राक्षीत् च मां कस्मात् अबूबुधत'।

**हिन्दी**—उसने उन सबोंकी कुछ परवाह नहीं की। अपनी इच्छासे अ
आप उठा। उन निशाचरोंसे पूछा कि 'तुम लोगोंने मुझे क्यों जगाया'?

**व्याख्या**—स कुम्भकर्णः, तान् सर्वान् (उपद्रवान्), न नहि, अजीगण
वेदितवान्। स्वयम् स्वत एव, इच्छया स्वेहया, अबुद्ध अजागरीत्। प्रबु
सः, निशाचरान् रात्रिञ्चरान्, अप्राक्षीत् अन्वयुङ्क्त। मां कुम्भकर्णं, कस्म
कुतः कारणात्, अबूबुधत प्रबोधितवन्तो यूयम्।

ङन्तः—गणिः चुरादिः—गण संख्याने । बुध अवगमने (दिवादिरनुदात्तोऽ-त्)। 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः १।३।६' इति परस्मैपदम्। ततश्चङ् कृत्यम् ।

च्यपरिवर्तनम्—तेन ते सर्वे नागणिषत । अबोधि । अप्रक्षत निशाचराः । ोधिषि ॥ ५ ॥

तेऽभाषिषत 'राजा त्वां दिदृक्षुः क्षणदा-चर !' ।
सोऽस्नासीद् व्यालिपन् मांसमप्सासीद्, वारुणीमपात् ॥ ६ ॥

वयः—ते अभाषिषत 'राजा त्वां दिदृक्षुः' इति । स अस्नासीत्, व्यलि- मांसम् अप्सासीत्, वारुणीम् अपात् ।

हिन्दी—उन लोगोंने कहा राजा आपको देखना चाहते हैं । उसने नहाया, लेपा, इत्र-फुलेल लगाया, मांस खाया तथा मदिरा पी ।

ख्या—ते राक्षसाः, अभाषिषत अवोचन्, हे क्षणदाचर हे रक्षः ! राजा ः दिदृक्षुः द्रष्टुमनाः, त्वाम् कुम्भकर्णम् । ततः सः,अस्नासीत् अमार्जीत्, आत्मानं चन्दनादिभिरलमकार्षीत्, मांसम् आमिषम्, अप्सासीत् अघ- णीम् मदिराम्, अपात् पीतवान् ।

न्तः—दृशेः सन्नन्तात् उः । स्ना शौचे, प्सा भक्षणे– अदादी ( अनु- तौ ) । पा पाने ( भ्वादिः ) । 'गातिस्था० २।४।७७' इति सिचो यमरमनमातां सक् च ७।२।७३' इति सगिटौ अस्नासीत् ।

यपरिवर्तनम्—तैरभाषि 'राज्ञा दिदृक्षुणा भूयते' । तेनाऽस्नायि, व्य- प्सायि मांसम्, वारुणी अपायि ॥ ६ ॥

न्यवसिष्ट ततो द्रष्टुं रावणं, प्रावृतद् गृहात् ।
राजायान्तं तमद्राक्षीदुदस्थाच्चेषदासनात् ॥ ७ ॥

वयः—ततः रावणं द्रष्टुं न्यवसिष्ट, गृहात् प्रावृतत् । राजा आयान्तम् ाक्षीत्, आसनात् ईषत् उदस्थात् ।

न्दी—तब रावणको देखनेके लिये उसने दूसरा वस्त्र पहना एवं घरसे ड़ा । राजाने उसे आते देखा तथा (उसके आदरके लिये) वह सिंहासन- ड़ा उठ गया ।

याख्या—ततः भोजनाद्यनन्तरम्, रावणं राक्षसेन्द्रं, द्रष्टुम् दिदृक्षुः, न्यव- ट पूर्ववस्त्रं विहाय सेनापतिवेशं पर्यधात् । गृहात् स्वालयात्, प्रावृतत् तिष्ट । राजा रावणः, आयान्तम् आगच्छन्तम्, तम् कुम्भकर्णम्, अद्राक्षीत् ात् । आसनात् सिंहासनतः, ईषत् किञ्चित्, उदस्थात् उत्तस्थौ ॥ ७ ॥

**तिङन्तः**–वस आच्छादने (अदादिरनुदात्तेदुदात्तः)। वृतु वर्तने। 'द्युङ्
१।३।९१' इति परस्मैपदम्। 'पुषादिद्युताद्दि० ३।१।५५' इत्यङ्।
३।१।४७' इति क्सनिषेधे इरिदितो वैकल्पिकेऽङ्भावे 'सृजिदृशोः ६।१।५८

**वाच्य०**–न्यवासि, प्रावर्ति। राज्ञा आयान् आदर्शि, उदस्थायि॥

अतुषत् पीठमासन्ने निरदिक्षच् च काञ्चनम्।
अस्मेष्ट कुम्भकर्णोऽल्पमुपाविक्षदथाऽन्तिके॥ ८॥

**अन्वयः**—(राजा) अतुषत्, आसन्ने काञ्चनं पीठं निरदिक्षत्। कुम्
अल्पम् अस्मेष्ट। अथ अन्तिके उपाविक्षत्।

**हिन्दी**—(राजा) प्रसन्न हुआ। पासमें ही सुवर्णासन पर बैठनेका नि
किया। कुम्भकर्ण थोड़ा मुस्कुराया तथा बाद पास में बैठ गया।

**व्याख्या**—(राजा तं वीक्ष्य) अतुषत् प्रासदत्। आसन्ने समीपे, का
सौवर्णं, पीठम् आसनं, निरदिक्षत् अदीदृशत्। कुम्भकर्णः रावणभ्राता,
ईषद्, अस्मेष्ट अहसीत्। (पूर्वं वार्तां न पृच्छति इदानीं स्वर्णासनं दद
स्वार्थपरतामालक्ष्याल्पहासः)। अथ अनन्तरम्, अन्तिकेऽभ्यर्णे, उपाविक्षत्

**तिङन्तः**—दिश अतिसर्जने, विश उपवेशने—तुदादी अनुदात्तौ
उभयत्रापि 'शल इगुपधादनिटः क्सः ३।१।४५' इति क्सः।

**वाच्य०**—अतोषि, निरदेशि। कुम्भकर्णेन अस्मायि, उपावेशि॥८॥

अवादीन् 'मां किमित्याह्वो' राज्ञा च प्रत्यवादि सः।
मा ज्ञासीस्त्वं सुखी' रामो यदकार्षीत्स रक्षसाम्॥९॥

**अन्वयः**—(सः) अवादीत् 'किमिति माम् आह्वः'। राज्ञा स प्रत्यवादि
रामो रक्षसां यदकार्षीत् (तत्) त्वं मा ज्ञासीः'। (अतः) सुखी।

**हिन्दी**—उसने कहा–'मुझे क्यों बुलाया है'? राजाने जवाब दिया
रामने राक्षसोंका जो कुछ किया (वह) तुम नहीं जानते'। (इस
तुम) सुखी हो।

**व्याख्या**–स कुम्भकर्णः, अवादीत् अवोचत्, मां कुम्भकर्णं, किमिति
आह्वः आचीकरः? राज्ञा दशास्येन, सोऽनुजः, प्रत्यवादि प्रत्युक्तः। स
चितः, रामः राघवः, रक्षसां जातूनां, यत् किमपि, अकार्षीत् व्यदधात्
सर्वं, त्वं भ्रातः, मा ज्ञासीः मा बोधिष्ठाः, इति सुखी शान्तः असीति

**तिङन्तः**–'ह्वेञ् स्पर्धायां शब्दे च (भ्वा० अनुदात्तोभयपदी)।

५३ इत्यङ्, 'चिणो लुक् ६।४।१०४' इति कर्मंचिणः परंस्य तस्य लुक्, ादि ।

वाच्यपरिवर्तनम्—अवादि, अहम् आह्वायिषि, राजा प्रत्यवादीत् तम् । तेन यत् अकारि, मा ज्ञायि, सुखिना भूयते ॥ ९ ॥

उदतारीदुदन्वन्तं पुरं नः परितोऽरुधत् ।
व्यद्योतिष्ट रणे शस्त्रैरनैषीद्राक्षसान् क्षयम् ॥ १० ॥

अन्वयः—स उदन्वन्तम् उदतारीत्, नः पुरं परितः अरुधत्, रणे शस्त्रैः द्योतिष्ट, राक्षसान् क्षयमनैषीत् ।

हिन्दी— उसने समुद्रको पार किया, हमारी लङ्काको चारों ओरसे घेर या, संग्राममें शस्त्रोंके साथ चमक उठा तथा राक्षसोंका नाश कर दिया ।

व्याख्या—स रामः, उदन्वन्तं समुद्रम्, उदतारीत् उत्तीर्णवान्, नोऽस्माकम्, लङ्काम्, परितः सर्वतः, अरुधत् आवृणोत् । रणे युधि, शस्त्रैः प्रहरणैः, व्यद्यो-ष्ट अचकासीत्, राक्षसान् जातूनि, क्षयं विनाशम्, अनैषीत् प्रापिपत् ।

तिङन्तः—तॄ प्लवनतरणयोः ( भ्वा० उदात्त उदात्तेत् ) । रुधिर्-आवरणे, रिदित्वादङ् वा, अरुधत् । आत्मनेपदपक्षे व्यद्योतिष्ट ।

वाच्यपरिवर्तनम्—उदन्वान् उदतारि, पूररोधि, व्यद्योति, क्षयम् क्षसाः अनायिषत अनेषत वा ॥ १० ॥

न प्रावोचमहं किञ्चित् प्रियं यावदजीविषम् ।
बन्धुस् त्वमर्चितः स्नेहान् मा द्विषो न वधीर् मम ॥ ११ ॥

अन्वयः—अहम् यावत् अजीविषम् तावत् कस्यचित् प्रियम् न प्रावोचम्, न्तु बन्धुः त्वम् स्नेहात् अर्चितः। ( अतः ) मम द्विषो न मा वधीः ।

हिन्दी—मैंने जबसे होश संभाला तबसे किसीके साथ भी प्रिय व्यवहार नहीं या ( यह तुझे ज्ञात है ), किन्तु तुझे बन्धु जानकर बड़े स्नेहसे तुम्हारी पूजा र्चा की है । ( अतः ) तुम हमारे शत्रुओंको अवश्य मार डालो ।

व्याख्या—अहम् रावणः, यावत् कालम्, अजीविषम् प्राणानधार्षम्, तावत्कालं, स्यचित्, प्रियं प्रियव्यवहारं, न नहि, प्रावोचम् प्रावादिषम् । किन्तु, बन्धुः सखा, म्, स्नेहात् प्रेम्णा, अर्चितः पूजितः । ( अतः ) मम रावणस्य, द्विषः शत्रून्, न हि, मा वधीः मा अहिंसीः । अवश्यं जहीत्यर्थः ।

वाच्यपरिवर्तनम्—प्रावाचि प्रियम्, अजीवि, अर्चितेन बन्धुना त्वया द्विषो न घानिषत ॥ ११ ॥

वीर्यं मा न दर्दर्शस् त्वं मा न त्रास्थाः क्षतां पुरम् ।
तवाऽद्राक्ष्म वयं वीर्यं त्वमजैषीः पुरा सुरान् ॥ १२ ॥

**अन्वयः**—त्वं वीर्यं न मा दर्दर्शः, क्षतां पुरम् न मा त्रास्थाः, वयम् तव अद्राक्ष्म, त्वं सुरान् पुरा अजैषीः ।

**हिन्दी**—तुम अपना पराक्रम अवश्य दिखाओ, विनष्ट पुर (नगरी) की अवश्य करो । हमने तुम्हारा पराक्रम देखा है, तुमने पूर्वकालमें देवता जीता है।

**व्याख्या**—त्वं कुम्भकर्णः, वीर्यं पराक्रमं, न मा दर्दर्शः अवश्यं दर्शय । विनष्टां, पुरम् नगरीम्, न मा त्रास्थाः न मा रक्षीः । वयं रावणादयः, तव णंस्य, वीर्यम् पराक्रमम्, अद्राक्ष्म ऐक्षिष्महि । त्वम्, सुरान् देवान्, अजैषीः

**तिङन्तः**—ण्यन्तस्य दृशेः 'णिश्रिद्रुस्रु० ३।१।८४' इति चङि अदर्दर्शः । माङ्योगे अटोऽभावे हि दर्दर्शः । त्रैङ्-रक्षणे ( भ्वा० अनुदात्तः) ।

**वाच्यपरिवर्तनम्**—वीर्यमदर्शि, पुरमत्रायि, अस्माभिरदर्शि, सुरा त्वया ॥ १२ ॥

अवोचत् कुम्भकर्णस् तं, वयं मन्त्रेऽभ्यधाम यत् ।
न त्वं सर्वं तदश्रौषीः फलं तस्येदमागमत् ॥ १३ ॥

**अन्वयः**—कुम्भकर्णस्तम् अवोचत्—वयम् मन्त्रे यत् अभ्यधाम, सर्वम् न अश्रौषीः, तस्य इदं फलम् आगमत् ।

**हिन्दी**—कुम्भकर्णने उससे कहा—'हम लोगोंने मन्त्र ( सलाह ) जो कहा था वह तुमने नहीं सुना' उसीका यह फल है ।

**व्याख्या**—कुम्भकर्णः, तम् रावणम्, अवोचत् व्याहार्षीत्, वयं मन्त्रे नीतिनिर्णयकाले, यत् हितोपदेशम्, अभ्यधाम अवोचाम, त्वं राजा तत् सर्वं, न नैव, अश्रौषीः कर्णेऽकार्षीः । तस्य अश्रवणस्य, इदं पुरो परिणामः, आगमत् उपास्थात् ।

**वाच्यपरिवर्तनम्**—कुम्भकर्णेन सोऽवाचि अस्माभिर्यत् अभ्यधायि त्वया नाश्रावि, फलेनागामि अनेन । ( कर्मणोऽविवक्षया गमिरत्रा स्थानार्थकः ) ॥ १३ ॥

प्राज्ञ-वाक्यान्यवामंस्था मूर्खवाक्येष्ववास्थिथाः ।
अध्यगीष्ठाश् च शास्त्राणि प्रत्यपत्था हितं न च ॥ १४ ॥

**अन्वयः**—( त्वम् ) प्राज्ञवाक्यानि अवामंस्थाः, मूर्ख-वाक्येषु अवास्थिथाः, शास्त्राणि अध्यगीष्ठाः, हितं न प्रत्यपत्थाः ।

हिन्दी—( तुमने ) विद्वानोंके वाक्योंका अनादर किया, मूर्खोंके वाक्यों पर
स किया । तुमने शास्त्रोंको तो पढ़ा है, पर ( अपना ) हित नहीं समझा ।

व्याख्या—प्राज्ञवाक्यानि विद्वद्वचनानि, अवामंस्थाः अवाज्ञासीः, मूर्खवाक्येषु
देशेषु प्रहस्तादिशब्देषु, अवास्थिथाः श्रद्दधिथ । शास्त्राणि राजनीतिशासनानि,
गीष्ठाः अध्यगमः, परन्तु, हितं स्वकल्याणं, न प्रत्यपत्थाः न प्रतिबुद्धवान् ।

तिङन्तः—मनु-ज्ञाने (दिवादिः अनुदात्तोऽनुदात्तेत्) **'समवप्रविभ्यः० १।३।२२'**
तङि **'स्थाघ्वोरिच्च १।२।१७'** इतीत्वकित्वे अवास्थिथाः । **'विभाषा लुङ् लृङोः**
**।५०'** इतीङो गाङादेशः । **'घुमास्था० ६।४।६६'** इतीत्वम्—अध्यगीष्ठाः ।

वाच्यपरिवर्तनम्—वाक्यान्यवामंसत, अवास्थायि, शास्त्राण्यध्यायिषत, हितं
त्यपादि ॥ १४ ॥

**मूर्खास् त्वामववञ्चन्त ये विग्रहमचीकरन् ।**
**अभाणीन् माल्यवान् युक्तमक्षंस्थास् त्वं न तन् मदात् ॥ १५ ॥**

अन्वयः—ये मूर्खाः त्वाम् अववञ्चन्त ( ते ) विग्रहम् अचीकरन् । माल्यवान्
म् अभाणीत्, त्वं मदात् तत् न अक्षंस्थाः ।

हिन्दी—जिन मूर्खोंने आपको ठगा उन्होंने संग्राम करा दिया । माल्यवान्ने
क कहा था किन्तु आप घमण्डसे उसे सह नहीं सके ।

व्याख्या—मूर्खा राजनीतिज्ञानशून्याः, त्वाम् भवन्तम्, अववञ्चन्त विप्राल-
त । ये, विग्रहम् युद्धम्, अचीकरन् व्यदीधपन् अयूयुधन् इत्यर्थः । माल्यवान्
मातामहः मन्त्री, युक्तं समुचितम्, अभाणीत् अगदीत् । त्वम्, मदात् गर्वात्,
कथनं, न नहि, अक्षंस्थाः सोढवानसि ।

तिङन्तः—वञ्चू-प्रलम्भने (ण्यन्तस्य चङि द्वित्वादौ रूपम्) । भण-शब्दे सेट् ।
मू सहने ( दि० उदात्तेदनुदात्तः ) ।

वाच्यपरिवर्तनम्—मूर्खैः त्वम् अवञ्चिष्ठाः यैर्विग्रहोऽकारि । माल्यवता युक्त-
माणि, त्वया न अक्षमि ॥ १५ ॥

**राघवस्याऽमुषः कान्तामाप्तैरुक्तो न चाऽर्पिपः ।**
**मा नाऽनुभूः स्वकान् दोषान् मा मुहो मा रुषोऽधुना ॥ १६ ॥**

अन्वयः—राघवस्य कान्ताम् अमुषः, आप्तैः उक्तः न च आर्पिपः, स्वकान्
षान् न मा अनुभूः, अधुना मा मुहः मा रुषः ।

हिन्दी—तुम तो रामकी स्त्रीको हरकर लाये । आप्तलोगोंके कहने पर भी
से लौटाया नहीं । अपने दोषोंको भोगो, अब न तो मोह करो और न रोष ।

**व्याख्या**—त्वम्, राघवस्य रामस्य, कान्ताम् प्रियाम्, अमुषः अहार्षीः। श्रेष्ठैः, उक्तः अभिहितः, न च अर्पिषः नैव परावर्तितवान्। स्वकान् निजान् अपराधान्, न मा अनुभूः अवश्यमनुभव। अधुना इदानीम्, मा मुहः मा मा रुषः मा क्रुधः।

**तिङन्तः**—मुष-स्तेये ( क्र्या० उदात्तेदनुदात्तः )। ऋ गतिप्रापणयोः ( उदात्तेत् अनुदात्तः ), तस्य णौ 'अर्तिह्री० ७।३।३६' इति पुकि, गुणे 'अर्पि' 'द्विर्वचनेऽचि १।१।५९' इति णिलोपादिनिषेधे, 'अजादेर्द्वितीयस्य ६।१।२', संयोगादयः ६।१।३' रेफवर्जने पिमात्रस्य द्वित्वम्। भुवः 'गातिस्था० २। इति सिचो लुक्। मुह-रुषोः पुषादित्वादङ्।

**वाच्यपरिवर्तनम्**—कान्ताऽमोषि, नार्पि उक्तेन, मा अनुभावि, मा रोषि॥ १६॥

> **तस्याऽप्यत्यक्रमीत् कालो, यत् तदाऽहमवादिषम्।**
> **अघानिषत रक्षांसि परैः, कोशांस् त्वमव्ययीः॥ १७॥**

**अन्वयः**—अहं यत् तदा अवादिषम् ( सन्ध्यर्थम् ) तस्य अपि का क्रमीत्। परैः रक्षांसि अघानिषत, त्वम् कोशान् अव्ययीः।

**हिन्दी**—मैंने जो उस समय ( सन्धिके लिये ) कहा था उसका भी सम बीत गया। शत्रुओंने राक्षसोंको मार डाला। तुमने खजाना खाली कर दि

**व्याख्या**—अहं कुम्भकर्णः, तदा तदानीम्, यत् सन्धीयताम् इति व व्याहार्षम्, तस्य अपि, कालो वेला, अत्यक्रमीत् अत्यगात्। परैः शत्रुभिः, जातूनि, अघानिषत अमारिषत। त्वम् रावणः, कोशान् सञ्चितं धनम्, अत्यस्राक्षीः।

**तिङन्तः**—क्रमु धातोः 'स्नुक्रमोरनात्मनेपदनिमित्ते ७।२।३६' इतीट्, न्तक्षणश्वसजागृणिश्व्येदिताम् ७।२।५' इति वृद्धिनिषेधः।

**वाच्यपरिवर्तनम्**—मया यदवादि, कालेनात्यक्रामि, परे रक्षांसि त्वया कोशा अव्ययिषत॥ १७॥

> **सन्धान-कारणं तेजो न्यगभूत् ते, कृथास् तथा।**
> **यत् त्वं वैराणि कोशं च सह-दण्डमजिग्लपः॥ १८॥**

**अन्वयः**—त्वं वैराणि तथा कृथाः, सहदण्डं कोशं च अजिग्लपः। ( यस्मात् ) ते सन्धानकारणं तेजः न्यग् अभूत्।

**हिन्दी**—तुमने वैरताका भाव ऐसा किया और बल एवं दण्डके साथ

जाना ) समी गवां दिया। तुम्हारा यह काम ऐसा हुआ कि सन्धिका कारण
रा जो तेज था वह समाप्त हो गया है।

व्याख्या—त्वं राजा, वैराणि शत्रुभावान् शत्रुताबलमित्यर्थः, तथा तादृक्,
व्यधिथाः। सहदण्डं स-सैन्यं, कोशं निधिबलम्, अजिग्लपः अजोहरः। यत्
त्, ते तव, सन्धानकारणं सन्धिहेतुः, तेजः सत्त्वम्, न्यक् व्यपगतम्, अभूत्
न। किमिदानीं चिन्तयेति स्पष्टोक्तिः कौम्भकर्णी।

तिङन्तः—ग्लै म्लै-हर्षक्षये ( भ्वा० उदात्तेतौ अनुदात्तौ )। ण्यन्तात् पुकि
स्नावनुवमां च' इति वैकल्पिकमित्वात् ह्रस्वत्वे ग्लपयतेश्चङि ग्लपेर्द्वित्वादि।

वाच्यपरिवर्तनम्—नीचा अभावि, वैराणि अकारिषत, सदण्डः कोशः
ापि ॥ १८ ॥

अक्रुधच् चाऽभ्यधाद् वाक्यं कुम्भकर्णं दशाननः।
किं त्वं मामजुगुप्सिष्ठा नैदिधः स्व-पराक्रमम् ॥ १९ ॥

अन्वयः—दशाननः अक्रुधत्, कुम्भकर्णं वाक्यम् अभ्यधात्—त्वं मां किम्
जुगुप्सिष्ठाः, स्वपराक्रमं न ऐदिधः।

हिन्दी—रावण क्रुद्ध हो गया और कुम्भकर्ण से बोला—'क्या तुम मेरी ही
न्दा कर गये ? अपना पराक्रम नहीं बढ़ाया'।

व्याख्या—दशाननः रावणः, अक्रुधत् अकुपत्, कुम्भकर्णं स्वानुजम्, वाक्यं
समूहम्, अभ्यधात् व्याहार्षीत्। त्वं, मां राजानम्, किं कथम्, अजुगुप्सिष्ठाः
निन्दीः। स्वपराक्रमं निजतेजः, न ऐदिधः न अवीवृधः।

तिङन्तः—एधतेर्ण्यन्तात् 'अजादेर्द्वितीयस्य ६।१।२' इति धिमात्रस्य द्वित्वम्।
-गोपने ( भ्वा० उदात्तोऽनुदात्तेत् )। ततः 'गुप्तिज्किद्भ्यः सन् ३।१।५' इति
हितस्य सनः धातोरविहितत्वेनार्द्धधातुकत्वाभावान्न इड्गुणौ। अतो 'जुगुप्स'
यस्य 'सनाद्यन्ता धातवः ३।१।३२' इति धातुत्वात्सेटो रूपम्।

वाच्यपरिवर्तनम्—दशाननेनाक्रोधि, कुम्भकर्णोऽभ्यधायि, त्वयाहम् अजु-
प्सिषि, पराक्रमो नैधि ॥ १९ ॥

मोज्जिग्रहः सु-नीतानि, मा स्म क्रंस्था न संयुगे।
मोपालब्धाः कृतैर् दोषैर् मा न वाक्षीर् हितं परम् ॥ २० ॥

अन्वयः—( त्वम् ) सुनीतानि मा उज्जिग्रहः, संयुगे न मा स्म क्रंस्थाः, कृतैः
षैः मा उपालब्धाः, परं हितं न मा वाक्षीः।

**हिन्दी**—अब सुनीति मुझे मत सिखाओ, संग्राममें अवश्य जाओ। किये गये दोषोंके द्वारा हमें उलहना न दो, हमारा परम हित अवश्य वह

**व्याख्या**—त्वम् ममानुजः, सुनीतानि सुनयान्, मा उज्जिग्रहः मा उद संयुगे संग्रामे, न मा क्रंस्थाः उत्साहं न मा कार्षीः। कृतैः विहितैः, दोषैः मा उपालब्धाः न उपालभस्व ( लोडर्थे लुङ् )। परम् उत्कृष्टं, हितम् कार्यम्, न मा वाक्षीः न मा वोढाः। ( सर्वं लोडर्थे )।

**तिङन्तः**—ग्रहेर्ण्यन्ताच्चङ् ततो द्वित्वादि। क्रमेः 'वृत्तिसर्गताय १।३।३८' इति सर्गे उत्साहेऽर्थे तङ्। 'स्नुक्रमो० ७।२।३६' इति नेट्। सिज्लोपे 'झषस्तथोर्धोऽधः ८।२।४०'—उपालब्धाः। वहे रूपम् अवाक्षीः।

**वाच्यपरिवर्तनम्**—सुनीतानि अग्राहिषत, अबोधि, अक्रामि, नो अवाहि ॥ २० ॥

कुम्भकर्णस् ततोऽगर्जीद्, भटांश् चाऽन्यान् न्यवीवृतत्।
उपायंस्त महाऽस्त्राणि, निरगाच् च द्रुतं पुरः ॥ २१॥

**अन्वयः**—ततः कुम्भकर्णः अगर्जीत्, अन्यान् भटान् न्यवीवृतत्, मह उपायंस्त, द्रुत पुरः निरगात् ( युद्धार्थम् )।

**हिन्दी**—तब कुम्भकर्ण गरजा और उसने अपने पीछे चलनेवाले सैनिकों दिया। बड़े-बड़े अस्त्रोंको लिया और नगरसे बाहर हो गया ( युद्धके लि

**व्याख्या**—ततः रावणोक्तेरनन्तरम्, कुम्भकर्णः रावणभ्राता, अगर्जी वान्। अन्यान् स्वानुगान्, भटान् सैनिकान्, न्यवीवृतत् न्यषेधीत् अनु महास्त्राणि बृहत्प्रहरणानि, उपायंस्त स्वीचकार। द्रुतं शीघ्रं, पुरः न निरगात् निरगमत्।

**तिङन्तः**—ण्यन्त-वृतेः अवीवृतत्। 'उऋत् ७।४।७' इत्युपधाया ऋ न गुणः। पक्षेऽववर्तत्। 'समुदाङ्भ्यो यमोऽग्रन्थे १।३।७५' इति तङ्। लुङि २।४।४५' इति गाङादेशः।

**वाच्यपरिवर्तनम्**—कुम्भकर्णेनागर्जि, अन्ये भटा न्यवर्तिषत। मह उपायंसत, निरगामि ॥ २१ ॥

मूर्ध्ना दिवमिवाऽलेखीत्, खं व्यापद् वपुषोरुणा।
पादाभ्यां क्ष्मामिवाऽभैत्सीत्, दृष्ट्याऽधाक्षीदिव द्विषः ॥ २२ ॥

**अन्वयः**—मूर्ध्ना दिवम् अलेखीत् इव, उरुणा वपुषा खं व्यापत् इवेत्यु न्वयः। पादाभ्यां क्ष्माम् अभैत्सीत् इव, दृष्ट्या द्विषः अधाक्षीत् इव।

**हिन्दी**—वह शिरसे आकाशको मानो खरोचता-सा रहा अथवा विशाल से आकाशको मानो व्याप्त किया हुआ सा था। पैरोंसे पृथ्वीको मानो विदा-सा था एवं शत्रुओंको दिखाकर ही जला डालता-सा था।

**व्याख्या**—मूर्ध्ना शिरसा, दिवम् आकाशम्, अलेखीत् अनौत्सीत्, इव मन्ये। महता, वपुषा शरीरेण, खं व्योम, व्यापत् आच्छिदत्, इव मन्ये ( उभयत्रा- इवशब्दः )। पादाभ्यां चरणाभ्यां, क्ष्मां भूमिम्, अभैत्सीत् अदारीत्, इव । दृष्ट्या चक्षुषा, द्विषः शत्रून्, अधाक्षीत् भस्मसात् अकार्षीत्, इव मन्ये।

**तिङन्तः**—भिदिर्-विदारणे ( रुधादिः )। दह-भस्मीकरणे ( भ्वा० ) अनु- धातुः परस्मैपदी।

**वाच्यपरिवर्तनम्**—अलेखि, व्यापि, अभेदि, अदाहि ॥ २२ ॥

**दग्ध-शैल इवाऽभासीत्, प्राक्रंस्त क्षय-मेघ-वत्।**
**प्राचकम्पदुदन्वन्तं, राक्षसानप्यतित्रसत् ॥ २३ ॥**

**अन्वयः**—स दग्धशैल इव अभासीत्, क्षयमेघवत् प्राक्रंस्त। उदन्वन्तम् प्राच- त्, राक्षसान् अपि अतित्रसत्।

**हिन्दी**—वह ( काला और बड़ा होनेसे ) जला पहाड़-सा मालूम पड़ता था। प्रलय कालके मेघके समान चला। उसने समुद्रको कँपा दिया एवं राक्षसों भी डरा दिया था।

**व्याख्या**—स कुम्भकर्णः, दग्धशैलः इव ( कृष्णवर्णतया विशालतया च ) ालपर्वत इव, आभासीत् भातिस्म। क्षयमेघवत् कल्पान्ताभ्रवत्, प्राक्रंस्त स्थित। उदन्वन्तम् समुद्रम्, प्राचकम्पत् उदचीचलत्। राक्षसान् क्षपाटान्, त्रसत् अबीभयत्।

**तिङन्तः**—'प्रोपाभ्यां समर्थाभ्याम् १।३।४२' इति तङ्। कपि-कम्पने (भ्वा० ात्तानुदात्तेत् )। तस्य ण्यन्त-रूपम्। त्रसी उद्वेगे ( भ्वा० उदात्तोदात्तेत् )। य ण्यन्त-रूपम्।

**वाच्यपरिवर्तनम्**—अभासि, प्राक्रामि, प्राकम्पि, अत्रासि ॥ २३ ॥

**स-पक्षोऽद्रिरिवाऽचालीत्, न्यश्वसीत् कल्प-वायु-वत्।**
**अभार्षीद् ध्वनिना लोकानभ्राजिष्ट क्षयाऽग्नि-वत् ॥ २४ ॥**

**अन्वयः**—स सपक्षः अद्रिः इव अचालीत्, कल्पवायुवत् न्यश्वसीत्, ध्वनिना ोकान् अभार्षीत्, क्षयाग्निवत् अभ्राजिष्ट।

**हिन्दी**—वह पाँखवाले पर्वतके समान चला तथा कल्पान्तवायुके समा लेता था। ( उसने ) अपनी ध्वनिसे लोकोंको प्रतिध्वनित कर दिया त प्रलयकालके अग्निके समान दमकता था।

**व्याख्या**—स कुम्भकर्णः, सपक्षः पक्षसहितः, अद्रिः पर्वतः इव, अ अभ्रमद्। कल्पवायुवत् प्रलयान्तवातः इव, अश्वसीत् श्वासमग्रहीत्। स्वगर्जनेन, लोकान् भुवनानि, अभार्षीत्। क्षयाग्निवत् प्रलयानलः इव, अ अद्युतत्, पिङ्गलकेशत्वात्।

**तिङन्तः**—चल-कम्पने। '**अतो ल्रान्तस्य ७।२।२**' इति वृद्धिः। अश्व '**अतो हलादेर्लघोः ७।२।७**' इति वृद्धि पाक्षिकीं 'ह्म्यन्तक्षण० ७।२।५' इ धति। भृञ् भरणे, टु भ्राजृ दीप्तौ। भ्वादी स्वरिताऽनुदात्तौ।

**वाच्य०**—सपक्षेणाद्रिणाऽचालि, अश्वासि, लोका अभारिषत, अभ्राजि।

**अनंसीद् भूर् भरेणाऽस्य, रंहसा शाखिनोऽलुठन्।**
**सिंहाः प्रादुद्रुवन् भीताः, प्राक्षुभन् कुल-पर्वताः॥ २५॥**

**अन्वयः**—अस्य भरेण भूः अनंसीत्, रंहसा शाखिनः अलुठन्, सिंहाः सन्तः प्रादुद्रुवन्, कुलपर्वताः प्राक्षुभन्।

**हिन्दी**—इसके भारसे पृथ्वी झुक गयी, वेगसे पेड़ लुढ़क गये, सिंह भाग गये तथा कुलपर्वत काँपने लगे।

**व्याख्या**—अस्य कुम्भकर्णस्य, भयेन भीत्या, भूः धरा, अनंसीत् नत रंहसा वेगेन, शाखिनो वृक्षाः, अलुठन् अलोठिषत। सिंहाः शार्दूलाः, भीताः प्रादुद्रुवन् पलायिषत। कुलपर्वताः कुलाचलाः, प्राक्षुभन् प्राक्षोभिषत।

**तिङन्तः**—णम-प्रह्वत्वे शब्दे च ( भ्वा० उदात्तेदनुदात्तः। 'यमरमन ७।२।७३' इति सगिटौ। लुठ, क्षुभ सञ्चलने। भ्वा० अनुदात्तेदुदात्तौ। अङ् दित्वात्पाक्षिकः। उभयत्र '**णिश्रिद्रु० ३।१।४८**' इति चङि द्वित्वादि—प्राद्रु

**वाच्यपरिवर्तनम्**—भुवाऽनामि, शाखिभिरलोठि, भीतैः सिंहैः प्राद्रावि, वंतैः प्राक्षोभि॥ २५॥

**उत्पाताः प्रावृतंस् तस्य, द्यौरशीफिष्ट शोणितम्।**
**वायवोऽवासिषुर् भीमाः, क्रूराश् चाऽकुषत द्विजाः॥ २६॥**

**अन्वयः**—तस्य ( गच्छतः ) उत्पाताः प्रावृतन्, द्यौः शोणितम् अशीफि भीमाः वायवः अवासिषुः, क्रूरा द्विजाः अकुषत।

**न्दी**—उसके ( जाते समय ) उत्पात होने लगे। आकाश खून सींचने
वायुदेव भयानक रूपसे बहने लगे तथा घोर पक्षी शब्द करने लगे।

**याख्या**—तस्य कुम्भकर्णस्य ( गच्छतः ), तथा उत्पाताः उपद्रवाः, प्रावृतन्
षत। द्यौः व्योम, शोणितम् रक्तम्, अशीकिष्ट असिचत्। भीमाः भयानकाः,
वाताः, अवासीषुः वान्ति स्म। क्रूराः घोराः, द्विजाः पक्षिणः, अकुषत
वन्तः।

तिङन्तः–शीकृ-सेचने (भ्वा० अनुदात्तेदुदात्तः)। वा–गतिगन्धनयोः (अदादिः
त उदात्तेत्)। आदन्तात् सगिटौ। द्युतादित्वादङ्, प्रावृतन्। कुटादित्वान्न
अकुषत। ङित्वादात्मनेपदम्। कुङ्–शब्दे ( तुदादिः )।

**वाच्यपरिवर्तनम्**—उत्पातैः प्रावर्ति, दिवा शोणितमशीकि, वायुभिरवायि,
द्विजैः अकावि।

**कोशः**—'दन्तविप्राण्डजा द्विजाः' ( नानार्थाः ) ॥ २६ ॥

**अस्पन्दिष्टाऽक्षि वामं च, घोराश् चाऽराटिषुः शिवाः।**
**न्यपप्तन् मुसले गृध्रा, दीप्तयाऽपाति चोल्कया ॥ २७ ॥**

**अन्वयः**—वामम् अक्षि अस्पन्दिष्ट, घोराः शिवाः अराटिषुः, मुसले गृध्रा
प्तन्, दीप्तया उल्कया च अपाति।

**हिन्दी**—उसकी बाइँ आँख फड़कने लगी, भयानक गीदड़िनियां फेंफें करने
, गीध मूसलपर बैठ गये, चमकदार उल्मूक ( दिनमें ही ) गिरने लगे।

**व्याख्या**—वामम् सव्येतरम्, अक्षि नेत्रम्, अस्पन्दिष्ट अस्फोरीत्। घोराः क्रूराः,
ः फेरवः, अराटिषुः अरासिषुः। मुशले रथध्वजे, गृध्राः दाक्षाय्याः, न्यपप्तन्
विशन्। दीप्तया ज्वलितया, उल्कया, ( दिने एव ) अपाति पतितम्।

**तिङन्तः**—स्पदि किञ्चिच्चलने भ्वा० उदात्तोऽनुदात्तेत्। 'पतः पुम्
।१९' इति पुम्। लृदित्वाङ्। रट परिभाषणे ( भ्वा० )। 'अतो हलादेः
।७' इति पाक्षिकी वृद्धिः।

**वाच्यपरिवर्तनम्**—वामेनाक्ष्णाऽस्पन्दि, घोराभिः शिवाभिः अराटि, गृध्रैः
ाति, दीप्ता उल्काऽपप्तत् ॥ २७ ॥

**आंहिष्ट तान-संमान्य दर्पात् स प्रधन-क्षितिम्।**
**ततोऽनर्दीदनन्दीच् च, शत्रूनाह्वास्त, चाऽऽहवे ॥ २८ ॥**

**अन्वयः**—स तान् दर्पात् असंमान्य प्रधनक्षितिम् आंहिष्ट, ततः अनन्दीत्
र्दीत् च, आहवे शत्रून् आह्वास्त।

**हिन्दी**—वह तो घमण्डसे उन उपद्रवोंका अनादर कर संग्रामभूमिक वहाँ जाकर खुश हुआ और गरजा तथा संग्राममें शत्रुओंको ललकारा।

**व्याख्या**—स कुम्भकर्णः, दर्पात् गर्वात्, तान् उपद्रवान्, असम्मान्य प्रधनक्षितिम् संग्रामभूमिम्, आंहिष्ट अगमत्। ततः तदनन्तरम्, अनन्दीत् अनर्दीत् जगर्ज। आहवे युधि, शत्रून् अरीन्, आह्वास्त आहूतवान् ( युध्यध्वम् )।

**तिङन्तः**—अहि गतौ ( भ्वा० )। टुणदि समृद्धौ, नर्द शब्दे। उदात्तोदात्तेतौ ) **'स्पर्द्धायामाङः १।३।३१'** इति तङ्। अङोऽभावे रूपम्।

**वाच्य०**—तेन प्रधनक्षितिः आंहि, अनन्दि, अनर्दि, आह्वायि ॥ २८॥

**प्राशीन्, न चाऽतृपत् क्रूरः, क्षुच् चाऽस्याऽवृधदश्नतः।**
**अधाद् वसामधासीच् च रुधिरं वन-वासिनाम् ॥ २९॥**

**अन्वयः**—क्रूरः स ( वनवासिनः ) प्राशीत्, न च अतृपत्। अश्नतः क्षुत् अवृधत्, वनवासिनाम् वसाम् अधात्, रुधिरं च अधासीत्।

**हिन्दी**—खूँखार कुम्भकर्णने वानरोंको खा लिया, पर तृप्त नहीं हुआ खाते उसकी भूख बढ़ने लगी। यहाँ तक कि उसने वनवासियोंकी चर्बी पी खून भी पी गया।

**व्याख्या**—क्रूरः भयङ्करः, स कुम्भकर्णः, ( वनवासिनः ) प्राशीत् च अतृपत् सुहितो नाऽभूत्। अश्नतः जक्षतः, अस्य कुम्भकर्णस्य, क्षुद् बुभुक्षा, अवर्धिष्ट। वनवासिनां वानराणाम्, वसाम् वपाम्, अधात् अपात्, रुधिरम् च अधा

**तिङन्तः**—अशु भोजने ( क्र्या० उदात्त उदात्तेत् )। वृधु वर्द्धने द्युतादि दङ्। घेट् पाने ( भ्वा० )। **'विभाषा घ्राधेट् २।४।७८'** इति सिचो लुक् रूपम् अधात्। **'विभाषा धेट्श्व्योः ३।१।४९'** इति चङभावपक्षे रूपम् अधास

**कोशः**—'हृन्मेदो वपा वसा' ( इत्यमरः )।

**वाच्यपरिवर्तनम्**—तेन वनवासिना प्राशिषत, नातर्पि, क्षुधा अवर्धि, रुधिरम् अधापि ॥ २९॥

**मांसेनाऽस्याऽश्वतां कुक्षी, जठरं चाऽप्यशिश्वियत्।**
**बहूनामग्लुचत् प्राणानग्लोचीच् च रणे यशः ॥ ३०॥**

**अन्वयः**—मांसेन अस्य कुक्षी अश्वताम्, जठरं च अशिश्वियत्, स प्राणान् अग्लुचत्, रणे यशश्च अग्लोचीत् ( बहूनाम् इति शेषः )।

**हिन्दी**—मांससे उसके दोनों कोख फूल उठे, पेट भी फूल गया। प्राण उसने ले लिये और बहुतोंका यश भी ले लिया।

ाख्या—मांसेन आमिषेण, अस्य कुम्भकर्णस्य, कुक्षी उदरपार्श्वौं, अश्वताम् म्। जठरम् उदरं च, अशिश्वियत् अश्वयीत्। बहूनाम् अरिसैनिकानां, जीवितम्, अग्लुचत् अपाहार्षीत्। यशः कीर्तिं च, रणे युधि, अग्लोचीत् ोत्।

तङन्तः—'जृस्तम्भु० ३।१।५८' इत्यङ्। 'श्वयतेरः ७।४।१८' इत्यकारः । 'विभाषा धेट्श्व्योः ३।१।४९' इति चङि अशिश्वियत्। ग्रुचु ग्लुचु स्तेय-( भ्वा० उदात्तोदात्तेत् )। तस्य जृस्तम्भु० इति अङ्पक्षे अग्लुचत्। तद-ग्लोचीत्।

ाच्यपरिवर्तनम्—कुक्षिभ्याम् अश्वायिः, जठरेण च, प्राणाः अग्लोचिषत, अग्लोचि ॥ ३० ॥

सामर्थ्यं चाऽपि सोऽस्तम्भीद् विक्रमं चाऽस्य नाऽस्तभन्।
शाखिनः केचिदध्यष्ठुर् न्यमाङ्क्षुरपरेऽम्बुधौ ॥ ३१ ॥

अन्वयः—स वनवासिनां सामर्थ्यं च अपि अस्तम्भीत्। केऽपि अस्य विक्रमम् स्तभन्। केचित् (अस्य भयात्) शाखिनः अध्यष्ठुः। अपरे अम्बुधौ न्यमाङ्क्षुः।

हिन्दी—उसने वानरोंके सामर्थ्यको ठप कर दिया। किसीने भी उसके मको नहीं रोका। उसके डरसे कुछ तो पेड़ पर चढ़ गये और कुछ समुद्रमें गये।

व्याख्या—स कुम्भकर्णः, वानराणाम् कपीनां, सामर्थ्यं पराक्रमं, च अपि, येन सन्देहरहितेन, अस्तभत् अस्तम्भीत्। केऽपि वानराः, अस्य कुम्भकर्णस्य, मं पराक्रमं, न अस्तभन्, न अरुधन्। ( अस्य भयात् ) केचिद् वानराः, वनो द्रुमान्, अध्यष्ठुः अध्यारुक्षन्। अपरे अन्ये, अम्बुधौ जलनिधौ, ाङ्क्षुः अन्तरधुः।

तिङन्तः—स्तम्भुः सौत्रो धातुः रोधनार्थः। 'जृस्तम्भु० ३।१।५८' इति अङि ावे च रूपद्वयम्। अधिपूर्वस्य स्थः सिचो लुकि 'प्राक्सितादड्व्यवायेऽपि ।६३' इति षत्वे, ष्टुत्वादौ 'आतः ३।४।११०' इति झेर्जुस्। टुमस्जो शुद्धौ ० अनुदात्तोदात्तेत् )। 'मस्जिनशोर्झलि ७।१।६०' इति नुम् मस्जेरन्त्यात् , अनुषङ्गसंयोगादिलोपार्थम्।

वाच्यपरिवर्तनम्—तेन सामर्थ्यम् अस्तम्भि, न कैरप्यस्य विक्रमः अस्तम्भि, वत् शाखिनः अध्यष्ठायिषत अध्यष्ठिषत वा, अपरैः न्यमञ्जि ॥ ३१ ॥

अन्ये त्वलङ्घिषुः शैलान्, गुहास्वन्ये न्यलेषत।
केचिदासिषत स्तब्धा भयात् केचिदघूर्णिषुः ॥ ३२ ॥

**हिन्दी**—वह तो घमण्डसे उन उपद्रवोंका अनादर कर संग्रामभूमिकं वहाँ जाकर खुश हुआ और गरजा तथा संग्राममें शत्रुओंको ललकारा।

**व्याख्या**—स कुम्भकर्णः, दर्पात् गर्वात्, तान् उपद्रवान्, असम्मान्य प्रधनक्षितिम् संग्रामभूमिम्, आंहिष्ट अगमत्। ततः तदनन्तरम्, अनन्दीत् अनर्दीत् जगर्ज। आहवे युधि, शत्रून् अरीन्, आह्वास्त आहूतवान् ( युध्यध्वम् )।

**तिङन्तः**—अहि गतौ ( भ्वा० )। टुणदि समृद्धौ, नर्द शब्दे। ( उदात्तोदात्तेतौ ) **'स्पर्द्धायामाङः १।३।३१'** इति तङ्। अङोऽभावे रूपम्।

**वाच्य०**—तेन प्रधनक्षितिः आंहि, अनन्दि, अनर्दि, आह्वायि ॥ २८ ॥

**प्राशीन्, न चाऽतृपत् क्रूरः, क्षुच् चाऽस्याऽवृधदश्नतः।**
**अधाद् वसामधासीच् च रुधिरं वन-वासिनाम् ॥ २९ ॥**

**अन्वयः**—क्रूरः स ( वनवासिनः ) प्राशीत्, न च अतृपत्। अश्नतः अस्य क्षुत् अवृधत्, वनवासिनाम् वसाम् अधात्, रुधिरं च अधासीत्।

**हिन्दी**—खूँखार कुम्भकर्णने वानरोंको खा लिया, पर तृप्त नहीं हुआ खाते उसकी भूख बढ़ने लगी। यहाँ तक कि उसने वनवासियोंकी चर्बी पी खून भी पी गया।

**व्याख्या**—क्रूरः भयङ्करः, स कुम्भकर्णः, ( वनवासिनः ) प्राशीत् अ च अतृपत् सुहितो नाऽभूत्। अश्नतः जक्षतः, अस्य कुम्भकर्णस्य, क्षुद् बुभुक्षा, अवर्धिष्ट। वनवासिनां वानराणाम्, वसाम् वपाम्, अधात् अपात्, रुधिरम् च अधासी

**तिङन्तः**—अशु भोजने ( क्र्या० उदात्त उदात्तेत् )। वृधु वर्द्धने द्युतादि दङ्। धेट् पाने ( भ्वा० )। **'विभाषा घ्राधेट् २।४।७८'** इति सिचो लुक्। रूपम् अधात्। **'विभाषा धेट्श्व्योः ३।१।४९'** इति चङभावपक्षे रूपम् अधासी

**कोशः**—'हृन्मेदो वपा वसा' ( इत्यमरः )।

**वाच्यपरिवर्तनम्**—तेन वनवासिना प्राशिषत, नातर्पि, क्षुधा अवर्धि, रुधिरम् अधापि ॥ २९ ॥

**मांसेनाऽस्याऽश्वतां कुक्षी, जठरं चाऽप्यशिश्वियत्।**
**बहूनामग्लुचत् प्राणानग्लोचीच् च रणे यशः ॥ ३० ॥**

**अन्वयः**—मांसेन अस्य कुक्षी अश्वताम्, जठरं च अशिश्वियत्, स प्राणान् अग्लुचत्, रणे यशश्च अग्लोचीत् ( बहूनाम् इति शेषः )।

**हिन्दी**—मांससे उसके दोनों कोख फूल उठे, पेट भी फूल गया। प्राण उसने ले लिये और बहुतोंका यश भी ले लिया।

ख्या—मांसेन आमिषेण, अस्य कुम्भकर्णस्य, कुक्षी उदरपार्श्वौ, अश्वताम् म् । जठरम् उदरं च, अशिश्वियत् अश्वयीत् । बहूनाम् अरिसैनिकानां, जीवितम्, अग्लुचत् अपाहार्षीत् । यशः कीर्तिं च, रणे युधि, अग्लोचीत् ीत् ।

ङन्तः—'जृस्तम्भु० ३।१।५८' इत्यङ् । 'श्वयतेरः ७।४।१८' इत्यकारः । 'विभाषा धेट्श्व्योः ३।१।४९' इति चङि अशिश्वियत् । ग्रुचु ग्लुचु स्तेय- ( भ्वा० उदात्तोदात्तेत् )। तस्य जृस्तम्भु० इति अङ्पक्षे अग्लुचत् । तद- ग्लोचीत् ।

ाच्यपरिवर्तनम्—कुक्षिभ्याम् अश्वायिः, जठरेण च, प्राणाः अग्लोचिषत, अग्लोचि ॥ ३० ॥

**सामर्थ्यं चाऽपि सोऽस्तम्भीद् विक्रमं चाऽस्य नाऽस्तभन् ।**
**शाखिनः केचिदध्यष्ठुर् न्यमाङ्क्षुरपरेऽम्बुधौ ॥ ३१ ॥**

**अन्वयः**—स वनवासिनां सामर्थ्यं च अपि अस्तम्भीत् । केऽपि अस्य विक्रमम् स्तभन् । केचित् (अस्य भयात्) शाखिनः अध्यष्ठुः । अपरे अम्बुधौ न्यमाङ्क्षुः ।

**हिन्दी**—उसने वानरोंके सामर्थ्यको ठप कर दिया । किसीने भी उसके मको नहीं रोका । उसके डरसे कुछ तो पेड़ पर चढ़ गये और कुछ समुद्रमें गये ।

**व्याख्या**—स कुम्भकर्णः, वानराणाम् कपीनां, सामर्थ्यं पराक्रमं, च अपि, न सन्देहरहितेन, अस्तभत् अस्तम्भीत् । केऽपि वानराः, अस्य कुम्भकर्णस्य, पराक्रमं, न अस्तभन्, न अरुधन् । ( अस्य भयात् ) केचिद् वानराः, नो द्रुमान्, अध्यष्ठुः अध्यारुक्षन् । अपरे अन्ये, अम्बुधौ जलनिधौ, ङ्क्षुः अन्तरधुः ।

तिङन्तः—स्तम्भुः सौत्रो धातुः रोधनार्थः । 'जृस्तम्भु० ३।१।५८' इति अङि ावे च रूपद्वयम् । अधिपूर्वस्य स्थः सिचो लुकि 'प्राक्सितादड्व्यवायेऽपि ।६३' इति षत्वे, ष्टुत्वादौ 'आतः ३।४।११०' इति झेर्जुस् । टुमस्जो शुद्धौ ० अनुदात्तोदात्तेत् )। 'मस्जिनशोर्झलि ७।१।६०' इति नुम् मस्जेरन्त्यात् , अनुषङ्गसंयोगादिलोपार्थम् ।

वाच्यपरिवर्तनम्—तेन सामर्थ्यम् अस्तम्भि, न कैरप्यस्य विक्रमः अस्तम्भि, त् शाखिनः अध्यष्ठायिषत अध्यष्ठिषत वा, अपरैः न्यमञ्जि ॥ ३१ ॥

**अन्ये त्वलङ्घिषुः शैलान्, गुहास्वन्ये न्यलेषत ।**
**केचिदासिषत स्तब्धा भयात् केचिदघूर्णिषुः ॥ ३२ ॥**

**अन्वयः**—अन्ये तु शैलान् अलङ्घिषुः, अन्ये गुहासु अलेषत, केचि आसिषत, केचिद् भयात् अघूर्णिषुः ।

**हिन्दी**—कुछ भयसे पर्वतों पर चढ़ गये, कुछ गुफाओंमें विलीन कुछ सन्न रह गये और कुछ भयसे घूमने लगे ( चक्कर देने लगे )।

**व्याख्या**—अन्ये अपरे तु ( निश्चये ), शैलान् गिरीन्, अलङ्घिषुः अन्येऽपरे, गुहासु गह्वरेषु, अलेषत विलीनाः । केचित् कियन्तः, स्तब्धाः शू आसिषत आसन्, केचित् अपरे, भयात् कुम्भकर्णभीतेः, अघूर्णिषुः घूर्णन्ते

**तिङन्तः**—लघि रघि गत्यर्थौ ( भ्वा० अनुदात्तेतौ )। लीङ् ( दि० अनुदात्तः )। ङित्वात्तङ् । आस-उपवेशने ( अदादिरुदात्तोऽनुदा घूर्ण घूर्णने ( भ्वादिः स्वरितेदुदात्तः )।

**वाच्यपरिवर्तनम्**—अन्यैः शैला अलङ्घिषत, अन्यैः अलायि, स्त दासि, कैश्चिदघूर्णि ॥ ३२ ॥

**उदतारिषुरम्भो-धिं वानराः सेतुनाऽपरे ।**
**अलज्जिष्टाऽङ्गदस् तत्र, प्रत्यवास्थित चोर्जितम् ॥ ३३ ॥**

**अन्वयः**—अपरे वानराः सेतुना अम्भोधिम् उदतारिषुः, तत्र अलज्जिष्ट, उर्जितं प्रत्यवास्थित ।

**हिन्दी**—कुछ तो पुलके द्वारा समुद्र पार कर भाग गये। वह ( बहुत ) लज्जित हुए। तब वह अपने पराक्रम पर आरूढ हुए।

**व्याख्या**—अपरे कियन्तः, वानराः कपयः, सेतुना सोपानेन, अम् समुद्रम्, उदतारिषुः उत्तीर्णाः। तत्र युद्धे, अङ्गदः रामसेनापतिः, अत् अह्रैषीत् । उर्जितं पराक्रमम्, प्रत्यवास्थित प्रत्यपादि ।

**तिङन्तः**—तॄ प्लवनतरणयोः ( उदात्तोदात्तेद् भ्वादिः )। 'समवप्रवि १।३।२२' इति तङ् । 'स्थाघ्वोरिच्च १।२।१७' इति कित्वेत्वे। 'ह्रस् ८।२।२७' इति सिचो लोपः प्रत्यवास्थित ।

**वाच्यपरिवर्तनम्**—अपरैर्वानरैरम्भोधिरुदतारि । अङ्गदेनालज्जि, स्थायि ॥ ३३ ॥

**सत्त्वं समदुधुक्षच् च वानराणामयुद्ध च ।**
**ततः शैलानुदक्षैप्सुरुदगूरिषत द्रुमान् ॥ ३४ ॥**

**अन्वयः**—स वानराणां सत्त्वं समदुधुक्षत्, (स्वयम्) अयुद्ध च । तत शैलान् उदक्षैप्सुः, द्रुमान् उदगूरिषत ।

**दी**—अङ्गदने वानरोंके बलको बढ़ाया । वह ( स्वयम् ) युद्ध करने लगे । रों ने शैलोंको फेंका और पेड़ोंको उखाड़ा ।

**ख्या**—स अङ्गदः, वानराणां कपीनां, सत्त्वं बलं, समदुधुक्षत् समवीवृधत् । च ) अयुद्ध युध्यतेस्म । ततः बलसन्धुक्षणानन्तरम्, वानराः कपयः, शैलान् उदक्षैप्सुः उत्क्षिप्तवन्तः, द्रुमान् वृक्षान्, उदगूरिषत उत्थापितवन्तः ।

**ङन्तः**—धुक्ष सन्दीपने । भ्वादेर्ण्यन्तस्य रूपम् । गूरी हिंसागत्योः ( दि० नुदात्तेत् ) ।

**च्यपरिवर्तनम्**—तेन सत्त्वम् अधुक्षि, अयोधि, वानरैः शैला उदक्षिप्सत दगूरिषत ॥ ३४ ॥

प्रति वानरोत्साहं वर्णयति—

**अनर्दिषुः कपि-व्याघ्राः, सम्यक् चाऽयुत्सताऽऽहवे ।**
**तानमर्दीदखादीच् च, निरास्थच् च तलाऽऽहतान् ॥ ३५ ॥**

**न्वयः**—कपिव्याघ्राः अनर्दिषुः, आहवे सम्यक् अयुत्सत, कुम्भकर्णः तान् अखादीत् च, तलाहतान् निरास्थत् च ।

**न्दी**—श्रेष्ठ वानर गर्जने लगे तथा युद्धभूमिमें खूब युद्ध करने लगे । कुम्भभी उनको पीस डाला और खा लिया । तलहत्थीसे मार मारकर बाहर दिया ।

**याख्या**—कपिव्याघ्राः वानरसिंहाः, अनर्दिषुः अगर्जिषुः, आहवे संग्रामभूमौ, साधु, अयुत्सत युद्धमकृषत । कुम्भकर्णः रावणभ्राता, तान् कपिपुङ्गवान्, मृदितवान्, अखादीत् च अघसत् च । तलाहतान् हस्ततलाघातताडितान्, तत् दूरमक्षैप्सीत् ।

**ङन्तः**—'अस्यति० ३।१।५२' इत्यङि, 'अस्यतेस्थुक् ७।४।१७' इति थुक् ।

**क्षणा वृद्धिः**—अक्षैप्सीत् ।

**च्यपरिवर्तनम्**—कपिव्याघ्रैरनर्दि, अयोधि, कुम्भकर्णेन ते अनर्दिषत, अखातलाहता निरासिषत ॥ ३५ ॥

**प्राचुचूर्णच् च पादाभ्यामबिभीषत च द्रुतम् ।**
**अतर्हीच् चैव शूलेन कुम्भकर्णः प्लवङ्गमान् ॥ ३६ ॥**

**न्वयः**—कुम्भकर्णः प्लवङ्गमान् पादाभ्याम् अचुचूर्णत्, द्रुतम् अबिभीषत च, अतर्हीत् च ।

**हन्दी**—कुम्भकर्णने वानरोंको पैरोंसे कुचल डाला, उन्हें फौरन डरा दिया शूलसे मार डाला ।

**व्याख्या**—कुम्भकर्णः राक्षसराजः, प्लवङ्गमान् कपीन्, पादाभ्यां च अचुचूर्णत् पिष्टवान्। द्रुतम् आशु, अबिभीषत अतित्रसत, शूलेन शूलप्रहा हींत् अहिंसीत्।

**तिङन्तः**—चूर्ण प्रेरणे चुरादिः। भी धातोर्ण्यन्तस्य 'भियो हेतु ८।३।४०' इति षुक्। 'भीस्म्योर्हेतुभये १।३।६८ इति तङ्। हिंसायाम् ( रुधादिरुदात्तोदात्तेत् )।

**वाच्यपरिवर्तनम्**—कुम्भकर्णेन प्लवङ्गमा अचूर्णिषत, अभीषिषत, अत

**अतौत्सीद् गदया गाढमपिषच्चोपगूहनैः।**
**जानुभ्यामदमीच्चाऽन्यान्, हस्त-वर्तमवीवृतत्॥ ३७॥**

**अन्वयः**—स कांश्चित् गदया गाढम् अतौत्सीत्, कतिचन उपगूहनैः च। जानुभ्याम् अन्यान् अदमीत्, कियतः हस्तवर्तम् अवीवृतत्।

**हिन्दी**—कुछको गदासे गाढ़े पीस डाला, कुछ को गोदमें दबाके पी और दूसरोंको जाँघ से दबाकर मार डाला। कितनोंको हाथसे घुमाकर दिया।

**व्याख्या**—स कुम्भकर्णः, कांश्चित् कपीन्, गदया गदाप्रहारेण, अ व्यथितवान्। कतिचन कांश्चित्, उपगूहनैः आलिङ्गनैः, अचुचूर्णत् अ अन्यान् अपरान्, जानुभ्याम् उरुपर्वभ्याम्, अदमीत् शासितवान्। कियतः हस्ताभ्यां, वर्तयित्वा भ्रामयित्वा, अवीवृतत् पिष्टवान्। हस्तग्राहमगृह्णात् इ

**कोशः**—'जङ्घा तु प्रसृता जानूरुपर्वाष्ठीवदस्त्रियाम्' ( इत्यमरः )।

**तिङन्तः**—अपिषत् लृदित्वादङ्। 'ह्म्यन्तक्षण० ७।२।५' इति वृद्धि वृतेर्ण्यन्तात् 'हस्ते वर्तिग्रहोः ३।४।३६' इति णमुल्। 'कषादिषु० ३ इत्यनुप्रयोगः।

**वाच्यपरिवर्तनम्**—अतोदिषत कियन्तः, अपेषिषत, अवर्तिषत॥ ३७

**अदालिषुः शिला देहे, चूर्ण्यभूवन् महाद्रुमाः।**
**क्षिप्तास् तस्य न चाऽचेतीत् तानसौ, नाऽपि चाऽक्षुभत्॥ ३८**

**अन्वयः**—( तस्य ) देहे शिलाः ( कपिक्षिप्ताः ) अदालिषुः, महाद्रुमा भूवन्, तस्योपरि क्षिप्तान् तान् असौ न अचेतीत्, नापि च अक्षुभत्।

**हिन्दी**—उसके ऊपर फेंकी गयी शिलाएँ टूक टूक हो गयीं, बड़े टुकड़े टुकड़े हो गये। उसपर फेंके गये उन पेड़ोंको उसने कुछ समझा और उससे वह कुछ भी क्षुब्ध नहीं हुआ।

ख्या—वानरैः कपिभिः, तस्य कुम्भकर्णस्य, देहे काये, क्षिप्ताः निहिताः, अद्रिखण्डाः, अदालिषुः विशीर्णा अभूवन् । महाद्रुमाः महान्तस्तरवः, चूर्ण्यंर्णतां गताः । तान् क्षिप्तान्, द्रुमान् वृक्षान्, असौ कुम्भकर्णः, न अचेतीत् ध, नाऽपि नैव, अक्षुभत् अक्षोभिष्ट ।

ङन्तः—दल विशरणे ( भ्वा० उदात्तोदात्तेत् )। लान्ता वृद्धिः। क्षुभ ( भ्वा० दि० क्रयादिषु )। तत्र पुषादित्वादङ् । भ्वादौ अनुदात्तेत् उदात्तेन क्षुभित इत्याद्यपि रूपम् ।

च्यपरिवर्तनम्—शिलाभिरदालि, महाद्रुमैः चूर्ण्यभावि, अमुना क्षिप्तास्ते यत, तेन नापि अक्षोभि ॥ ३८ ॥

अद्राष्टां तं रघु-व्याघ्रौ आख्यच् चैनं विभीषणः ।
एष व्यजेष्ट देवेन्द्रं नाऽशङ्किष्ट विवस्वतः ॥ ३९ ॥

न्वयः—रघुव्याघ्रौ तम् अद्राष्टाम्, विभीषणः च एनम् आख्यत्, एष म् व्यजेष्ट, विवस्वतः न अशङ्किष्ट ।

हन्दी—राम-लक्ष्मण दोनोंने उसको देखा । विभीषणने उसका यह परिचय कि इसने इन्द्रको जीता है और यह सूर्य से भी नहीं डरा था ।

याख्या—रघुव्याघ्रौ रघुवंशश्रेष्ठौ रामलक्ष्मणौ, तम् कुम्भकर्णम्, अद्राष्टाम् लोकेताम् । विभीषणः रावणभ्राता एनम् कुम्भकर्णम्, आख्यत् पर्य्यचीचयत् । वतां प्रतिपक्षी, देवेन्द्रं शक्रं, व्यजेष्ट विजितवान् । विवस्वतः सूर्यात्, न ष्ट न अभैषीत् ।

च्यपरिवर्तनम्—रघुव्याघ्राभ्यां सोऽदर्शि, विभीषणेनाख्यायि, अनेन देवेन्द्रो य, नाशङ्कि ॥ ३९ ॥

यक्षेन्द्र-शक्तिमच्छासीन्, नाऽप्रोथीदस्य कश्चन ।
कुम्भकर्णान् न भैष्टं मा युवामस्मान् नृपाऽऽत्मजौ ॥ ४० ॥

अन्वयः—अयम् यक्षेन्द्रशक्तिम् अच्छासीत्, कश्चन अस्य न अप्रोथीत्, युवाम् जौ अस्मात् कुम्भकर्णात् न मा भैष्टम् ।

हिन्दी—इसने कुबेरकी शक्तिको काट दिया है, इसके आगे कोई ठहर न । आपलोग राजपुत्र हैं, अतः इससे अवश्य बचे रहें ।

व्याख्या—अयम् कुम्भकर्णः, यक्षेन्द्रशक्ति कुबेरशक्तिप्रहरणम्, अच्छासीत् । अस्य कुम्भकर्णस्य, कश्चित् कोऽपि, न अप्रोथीत् न प्राभूत । युवां द्वौ,

नृपात्मजौ राजपुत्रौ स्तः, ( अतः ) अस्मात् अव्यवस्थितात्, राक्षसात् कु
न मा भैष्टम् अवश्यम् सावधानौ भवताम् ।

**तिङन्तः**—छो छेदने ( दि० अनुदात्त उदात्तेत् ) । प्रोथृ पर्याप्तौ
उदात्त उदात्तेत् ) ।

**वाच्यपरिवर्तनम्**—अनेन यक्षेन्द्रशक्तिः अच्छायि, केनचन न अप्रोथि,
नृपात्मजाभ्याम् न मा भायि ॥ ४० ॥

**घ्नन्तं मोपेक्षिषाथां च, मा न कार्ष्टमिहाऽऽदरम् ।**
**'अमुं मा न वधिष्टे' ति रामोऽवादीत् ततः कपीन् ॥ ४१ ॥**

**अन्वयः**—( युवाम् ) घ्नन्तम् ( इमम् ) मा उपेक्षिषाथाम्, इह आ
मा कार्ष्टम् । ततः रामः कपीन् अवादीत्, अमुम् न मा वधिष्ट इति ।

**हिन्दी**—आप दोनों सैन्यका संहार करने वाले इसकी उपेक्षा न क
पर अवश्य ध्यान दें । विभीषणके ऐसा कहने पर रामने वानरोंसे कहा
लोग इसे अवश्य मार डालें ।

**व्याख्या**—युवाम् भ्रातरौ, घ्नन्तम् सैन्यसंहारं कुर्वन्तं, इमम् राक्ष
उपेक्षिषाताम् मा त्याष्टम् । इह कुम्भकर्णे, आदरम् सावधानताम्, न मा
मा न धातम् । ततः तदनन्तरम्, रामः रामचन्द्रः, कपीन् वानरान्,
अगदीत्, ( यत् ) अमुम् राक्षसम्, यूयम् न मा वधिष्ट अवश्यमेव अवधिष्ट इ

**तिङन्तः**—हन् धातोः 'हनो वध लिङि २।४।४२', 'लुङि च २।४।४
वधादेशोऽदन्तः । तेनापि न वृद्धिः ।

**वाच्यपरिवर्तनम्**—घ्नन् मोपेक्षि, आदरो मा न कारि, अयं मा न
इति रामेण कपयोऽवादिषत ॥ ४१ ॥

**ते व्यरासिषुराह्वन्त राक्षसं चाऽप्यपिप्लवन् ।**
**अवभासन् स्वकाः शक्तीर् द्रुमशैलं व्याकारिषुः ॥ ४२ ॥**

**अन्वयः**—ते ( कपयः ) व्यरासिषुः, राक्षसम् आह्वन्त अपिप्लव
स्वकाः शक्तीः अवभासन्, द्रुमशैलम् व्यकारिषुः ।

**हिन्दी**—उन वानरों ने प्रसन्नतासूचक 'किलकिल' शब्द व्यक्त
राक्षस को ललकारा और कुदाया । फिर अपनी शक्तियोंको चमकाया
एवं पर्वतोंको ( उसपर ) फेंका ।

**व्याख्या**—ते रामोक्ताः कपयः, व्यरासिषुः आनन्दव्यञ्जकं शब्द

’ अवोचन् । राक्षसम् कुम्भकर्णम्, आह्वन्त अस्पर्दिषत, अपिप्लवन् प्लुति
वन्तः, स्वकाः स्वीयाः, शक्तीः पराक्रमान्, अवभासन् अदीदिपन्, द्रुम-
तरुपर्वतम्, व्यकारिषुः व्यक्षैप्सुः ।
डन्तः–रस–शब्दे (भ्वा० उदात्तोदात्तेत्)। ‘**अतो हलादेर्लघोः**७।२।७’ इति
द्धः । ‘**आत्मनेपदेष्वन्यतरस्याम्** ३।१।५४’ इति पाक्षिकोऽङ् आह्वन्त । प्ल-
तात् ‘**स्रवतिशृणो०** ७।४।८१’ इत्यभ्यासस्येत्वम् । ‘**भ्राजभास०** ७।४।३’
क्षिको ह्रस्वः अवभासन् । कॄ-विक्षेपे ( तु० उदात्तोदात्तेत् ) ।
च्यपरिवर्तनम्–तैर्व्यरासि, राक्षस आह्वायि, अप्लावि । अभासिषत
शक्तयः, द्रुमशैलम् व्यकारि ॥ ४२ ॥

**ते तं व्याशिषताऽक्षौत्सुः पादैर् दन्तैस् तथाऽच्छिदन् ।**
**आर्जिजच् शरभो वृक्षं, नीलम् त्वाऽऽदित पर्वतम् ॥४३॥**

**न्वयः**---ते तं व्याशिषत, पादैः अक्षौत्सुः, तथा दन्तैः अच्छिदन् । शरभः
आर्जिजत्, नीलः कपिः तु पर्वतम् आदित ।

**न्दी**---वे बन्दर उसपर व्याप्त हो गये, पैरों से उसे कुचल डाला, दाँतों से
ाला । शरभ नामके बन्दरने वृक्ष प्राप्त किया, नील बन्दरने पर्वत लिया ।

**व्याख्याः**–ते कपयः, तं कुम्भकर्णं, व्याशिषत व्यापन्, पादैरङ्घ्रिभिः, अक्षौत्सुः
ई । दन्तैः दशनैः; अच्छिदन् अच्छैत्सुः । शरभः सेनापतिः, वृक्षं द्रुमम्, आर्जि-
ग्रहीत् । नीलः सेनाध्यक्षः, पर्वतं गिरिम्, आदित उत्पाट्य गृहीतवान् ।
डन्तः–अशूङ् व्याप्तौ(स्वा०उदात्तो ङित्)। क्षुदिर्–सम्पेषणे, छिदिर्-द्वैधी-
रुधादी उभयपदिनौ)। अर्ज-प्रतियत्ने । स्वार्थिकण्यन्ताच्चङ् ‘**द्विर्वचनेऽचि**
९’ इति यणादिनिषेधे, ‘**अजादेर्द्वितीयस्य**६।१।२’ इति जि मात्रस्य द्वित्वम् ।
च्यपरिवर्तनम्–तैः स व्याशि, अक्षोदि, अच्छेदि। शरभेन वृक्ष आर्जि, नीलेन
ादायि ॥ ४६ ॥

**ऋषभोऽद्रीनुदक्षैप्सीत्, ते तैररिमतर्दिषुः ।**
**अस्फूर्जीद् गिरि-शृङ्गं च व्यस्राक्षीद् गन्धमादनः ॥ ४४ ॥**

**न्वयः**-ऋषभः अद्रीन् उदक्षैप्सीत्, ते तैः अरिम् अतर्दिषुः । गन्धमादनः
सेनाध्यक्षः ) अस्फूर्जीत्, गिरिशृङ्गं व्यस्राक्षीत् ।

**न्दी**–ऋषभने पर्वतोंको उखाड़ उखाड़कर फेंका । यों वे सभी उन प्रहारों
को तङ्ग करने लगे । (वहां ही) गन्धमादन सेनाध्यक्ष भी चमका और
पर्वतका शिखर ( उखाड़कर उसपर ) फेंका ।

**व्याख्या**—ऋषभः कपिसेनाध्यक्षः, अद्रीन् गिरीन्, अक्षैप्सीत् प्रै:, सर्वे सेनापतयः, तैः प्रहरणैः, अरिम् कुम्भकर्णम् शत्रुम्, अतर्दिषुः अम गन्धमादनः कपिसेनापतिः, अस्फूर्जीत् अदीप्त ( वज्रमिव ), गिरिशृ शिखरं व्यस्राक्षीत् विसृष्टवान् ।

**तिङन्तः**—तृद हिंसायाम् । स्फूर्ज-वज्रनिर्घोषे ( भ्वा० उदात्तोदा सृजविसर्गे ( तुदादिरुदात्तेदनुदात्तः ) ।

**वाच्यपरिवर्तनम्**—ऋषभेण अद्रय उदक्षिप्सत, तैररिरतर्दि । गन् नास्फूर्जि, गिरिशृङ्गं व्यसर्जि ।। ४४ ।।

**अकूर्दिष्ट, व्यकारीच् च गवाक्षो भू-धरान् बहून् ।**
**स तान् नाऽजीगणद् वीरः कुम्भकर्णोऽव्यथिष्ट न ।। ४५ ।।**

**अन्वयः**—गवाक्षः कपिसेनापतिः अकूर्दिष्ट, बहून भूवरान् व्य वीरः स कुम्भकर्णः तान् न अजीगणत्, न अव्यथिष्ट ।

**हिन्दी**—गवाक्ष नामके कपि सेनापतिने खूब खेल खेला । बाद मां पर्वत उसपर उसने फेकें । उस वीर कुम्भकर्णने उनको कुछ नहीं गिनत जरा भी व्यथित नहीं हुआ ।

**व्याख्या**—गवाक्षो नाम कपिसेनाध्यक्षः, अकूर्दिष्ट क्रीडन् अचेष्टिष्ट भूयसः, भूधरान् अद्रीन्, व्यकारीद् व्यक्षैप्सीत् । वीरः शूरः, स कुम तान् गिरीन्, न अजीगणत् न गणयामास । न अव्यथिष्ट न व्यथितोऽभ

**तिङन्तः**—कूर्द खूर्द गूर्द गुद—क्रीडायाम् ( भ्वा० उदात्तोदात्तेतः ) भयसञ्चलनयोः ( भ्वा० अनुदात्तेदुदात्तः ) ।

**वाच्यपरिवर्तनम्**—गवाक्षेणाकूर्दि । बहवो भूधरा व्यकारिषत । वी नागाणि, नाव्यथि ।। ४५ ।।

**अमन्थीच् च पराऽनीकमप्लोष्ट च निरङ्कुशः ।**
**निहन्तुं चाऽत्वरिष्टाऽरीनजक्षीच् चाऽङ्कमागतान् ।। ४६**

**अन्वयः**—स परानीकम् अमन्थीत्, निरङ्कुशः अप्लोष्ट । अरीन् अत्वरिष्ट, अङ्कम् आगतान् अजक्षीत् ।

**हिन्दी**—उसने शत्रुकी सेनाको मथ दिया । निरङ्कुश होकर कूदा उसने शत्रुओंको मारनेमें जल्दी की । गोदमें आ जाने वालोंको खा डा

**व्याख्या**—स कुम्भकर्णः,परानीकं शत्रुसैन्यम्,अमन्थीत् व्यलोडीत्। नि

ः, अप्लोष्ट अकूर्दिष्ट । अरीन् रिपून्, हन्तुम् हिंसितुम्, अत्वरिष्ट मास । अङ्कम् अभ्यर्णम्, आगतान् प्राप्तान्, अजक्षीत् अघसत् ।

ङन्तः—मन्थ-विलोडने (भ्वा० उदात्तोदात्तेत्) । ञित्वरा संभ्रमे (भ्वा० ऽनुदात्तेत् ) । जस—भक्षहसनयोः ( अदादिः जक्षित्यादिश्च ) ।

च्यपरिवर्तनम्—तेन परानीकम् अमन्थि, निरङ्कुशेनाप्लावि, अत्वारि, ताङ्कमागताः ॥ ४६ ॥

**व्यक्रुक्षद् वानराऽनीकं, संपलायिष्ट चाऽऽयति ।**
**हस्ताभ्यां नश्यदक्राक्षीद् भीमे चोपाधिताऽऽनने ॥ ४७ ॥**

वयः—आयति ( तस्मिन् ) वानरानीकं व्यक्रुक्षत् संपलायिष्ट च । स वानरानीकम् हस्ताभ्याम् अक्राक्षीत्, भीमे आनने उपाधित ।

न्दी—उसके आनेपर वानरी सेना चिल्ला उठी और भाग गयी । हुए (कुम्भकर्ण) उनको दोनों हाथोंसे खींचता था और अपने भयानक र लेता था ।

ाख्या—आयति आगच्छति, तस्मिन् कुम्भकर्णे, वानरानीकं कपिसैन्यं, नत् विक्रोशति स्म । संपलायिष्ट च पलायते स्म । नश्यत् पलायमानं, म्, हस्ताभ्यां कराभ्याम्, अक्राक्षीत् अकृक्षत् । भीमे घोरे, आनने मुखे, अपातयत् ।

ङन्तः—क्रुश आक्रोशे (भ्वा० अनुदात्तोदात्तेत्) । 'शल इगुप० ३।१।४५' । कृष-विलेखने (भ्वा० तुदादी अनुदात्तौ) । 'स्पृशमृशकृषतृपदृपां च्लेः ाच्यः ३।१।४४' वा० इति पाक्षिके सिचि 'अनुदात्तस्य० ६।१।५९' हलन्तलक्षणा वृद्धिः । पक्षे अकार्क्षीत् अकृक्षत् इति च ।

च्यपरिवर्तनम्—वानरानीकेन व्याक्रोशि, पलायि, अकर्षि, उपाधायि । यत् ॥ ४७ ॥

**रक्तेनाऽचिक्लिदद् भूमिं, सैन्यैश् चाऽस्तस्तरद्धतैः ।**
**नाऽताप्सीद् भक्षयन् क्रूरो, नाऽश्रमद् घ्नन् प्लवङ्गमान् ॥ ४८ ॥**

वयः—स रक्तैः ( कपिसैन्यस्येत्यर्थः) भूमिम् अचिक्लिदत् । हतैः सैन्यैः तस्तरत् । क्रूरोऽसौ प्लवङ्गमान् भक्षयन् न अताप्सीत्, घ्नन् न अश्रमत् ।

न्दी—उसने कपिसेनाके खूनसे भूमिको गीली कर दिया, मारे गये ने उसे ढक दिया । वानरोंको खाते हुए तृप्त नहीं हुआ । मारते हुए नहीं ।

**व्याख्या**—स कुम्भकर्णः, ( कपिसैन्यानां ) रक्तैः, भूमिं क्षितिम् क्लिदत् क्लिन्नामकार्षीत्। हतैः हिंसितैः, सैन्यैर्बलैः, अतस्तरत् ( ताम् इति शेषः )। क्रूरः हिंसकः, प्लवङ्गमान् कपीन्, भक्षयन् अताप्सीत् न अत्राप्सीत्। घ्नन् हिंसन्, न अश्रमत् न श्रान्तवान्।

**तिङन्तः**—क्लिदू आर्द्रीभावे ( दि० उदात्तोदात्तेत् )। ण्यन्ताच्च प्लवनतरणयोः (स्वा० क्र्यादी), तस्य ण्यन्तस्य चङ्। 'अत्स्मृदृत्वर० इति अत्वम्। तृप प्रीणने। श्रमु तपसि खेदे च ( द्वौ दिवादिपुषादी) पाक्षिकः सिच्।

**वाच्य०**—भूमिरक्लेदि, अस्तारि, भक्षयता नातर्पि,घ्नतानाश्रामि

**न योद्धुमशकन्, केचिन्, नाऽढौकिषत केचन।**
**प्राणशन् नासिकाभ्यां च, वक्त्रेण च वनौकसः॥ ४९**

**अन्वयः**—केचित् योद्धुं न अशकन्, केचन न अढौकिषत। नासिकाभ्यां वक्त्रेण च प्राणशन्।

**हिन्दी**—कुछ तो उसके साथ युद्ध कर न सके। कुछ तो (उसके सा गये ही नहीं। सब वानर उसके दोनों नाकोंसे तथा मुँहसे निकल भा

**व्याख्या**—केचिद् वानराः,योद्धुं, तेन सह, नाशकन् न समर्था अभूवन् कियन्तः,न अढौकिषत(पार्श्वमेव) नागमन्। वनौकसः वानराः,नासिका नासापुटाभ्यां, वक्त्रेण मुखेन च, (भक्षिता अपि), प्राणशन् निर्गत्य पला

**तिङन्तः**--शक्लृ शक्तौ (स्वा० अनुदात्तोदात्तेत्)। लृदित्वादङ्। भ्वादिः अनुदात्तेदुदात्तः। णश अदर्शने धातोः पुषादित्वादङ्। "उपस **सेऽपि णोपदेशस्य' ८।४।१४'** इति णत्वम् प्राणशन्।

**वाच्य०**—कैश्चित् अशाकि। कैश्चन अढौकि। वनौकोभिः प्राणाशि

**उदरे चाऽजरन्नन्ये तस्य पाताल-सन्निभे।**
**आक्रन्दिषुः सखीनाह्वन्, प्रपलायिषताऽस्विदन्॥ ५०॥**

**अन्वयः**--अन्ये पातालसन्निभे तस्योदरे अजरन्। अन्ये आक्रन्दिषु आह्वन्, पलायिषत, अस्विदन्।

**हिन्दी**—कुछ तो पातालके सदृश उसके पेटमें पच गये। दूसरे रहे। मित्रोंको पुकारते रहे तथा भाग गये। भागते भागते पसीना छूट

**व्याख्या**—अन्ये केचन,पाताल-सन्निभे पातालतुल्ये,तस्य राक्षसस्य उ अजरन जीर्णा जाताः। अपरे इतरे, आक्रन्दिषुः अरुदन्। सखीन् सुहृदः,

त्तः, पलायिषत अपाक्रमिषुः । अस्विदन् पलायमानाः प्रस्विन्ना
ो ( इत्यर्थः ) ।

ङन्तः—जॄ—वयोहानौ (दि० उदात्तोदात्तेत्)। 'जॄस्तम्भु० ३।१।५८' ।
ञिष्विदा गात्रप्रक्षरणे ( दि० अनुदात्तोदात्तेत् ) । पुषादित्वादङ् ।

च्य०–अन्यैरजारि, अक्रन्दि, सखाय आह्वासत, पलायि, अस्वेदि ।।५०।।

**रक्तमश्च्योतिषुः क्षुण्णाः, क्षताश् च कपयोऽतृषन् ।**
**उपास्थायि नृपो भग्नैरसौ सुग्रीवमैजिहत् ।। ५१ ।।**

न्वयः—क्षुण्णाः रक्तम् अच्योतिषुः । क्षताः कपयः अतृषन् । भग्नैः नृपैः
ायि । असौ सुग्रीवम् ऐजिहत् ।

न्दी--(कुम्भकर्ण द्वारा) पीसे गये (कुछ वानर) खूनके कय कर रहे थे ।
ये प्यासे होकर पानी माँग रहे थे । भगा दिये गये राजाकी शरणमें आ
तब ) उन्होंने सुग्रीवको युद्धके लिये भेजा ।

ाख्या—(कुम्भकर्णेन) क्षुण्णाः पिष्टाः, रक्तं शोणितम्, अच्योतिषुः अव-
क्षताः ताडिताः, कपयः वानराः, अतृषन् तृषार्ता आसन् । भग्नैः
, नृपः रामः, उपास्थायि उपासादि । असौ रामः, सुग्रीवं कपिसेनाधिपम्,
युद्धार्थं प्रैरिरत् ।

ङन्तः—श्चुतिर क्षरणे ( भ्वा० उदात्तोदात्तेत् ) । ञितृषा पिपासायाम्
पुषादिः उदात्तोदात्तेत् ) । ईह चेष्टायाम् ( भ्वा० उदात्तानुदात्तेत् ) ।
ङ्, अजादित्वाद् द्वितीस्याचो द्वित्वम् ।

च्यपरिवर्तनम्––क्षुण्णैः रक्तमश्च्योति, कपिभिरतर्षि, भग्ना नृपम
:, अमुना सुग्रीव ऐहि ।

**योद्धुं सोऽप्यरुषच्छत्रोरैरिरच् च महा-द्रुमम् ।**
**तं प्राप्तं प्रासहिष्टाऽरिः शक्तिं चोग्रामुदग्रहीत् ।। ५२ ।।**

न्वयः––सः अपि योद्धुम् अरुषत्, शत्रोः महाद्रुमम् ऐरिरत् । अरिः प्राप्तं
हिष्ट, उग्रां शक्तिं च उदग्रहीत् ।

न्दी—सुग्रीव भी युद्धके लिये क्रुद्ध हुआ और बड़ा भारी पेड़ शत्रुपर
शत्रुने प्राप्त हुए पेड़को सह लिया और भयानक शक्ति उठाई ।

ाख्या---स सुग्रीवः, अपि ( निश्चये ), योद्धुं युद्धं कर्तुम्, अरुषत् अकुप्यत् ।
बृहद्वृक्षं, शत्रोः (उपरि), प्रैरिरत् प्राक्षैप्सीत् । अरिः शत्रुः, प्राप्तं लब्धं, तं
म्, प्रासहिष्ट सोढवान् । उग्रां घोरां, शक्तिम् च, उदग्रहीत् उद्गृहीतवान् ।

**तिङन्तः**—रुष कोपे (दि० पुषादिः) । ईर क्षेपे ण्यन्ताच्चङ् । द्विती
रेः द्वित्वम् । पह मर्षणे ( भ्वा० उदात्तोऽनुदात्तेत् ) । 'ह्म्यन्तक्षण०
इति वृद्धिनिषेधः—उदग्रहीत् ।

**वाच्यपरिवर्तनम्**—सुग्रीवेणारोषि, महाद्रुमः प्रैरि । अरिणा सोऽस
शक्तिरग्राहि ॥ ५२ ॥

**स तामबिभ्रमद् भीमां वानरेन्द्रस्य चाऽमुचत् ।**
**प्रापप्तन् मारुतिस् तत्र तां चाऽलासीद् वियद्-गताम् ॥ ५३**

**अन्वयः**—स भीमां तां ( शक्तिम् ) अबिभ्रमत् वानरेन्द्रस्य च
मारुतिः तत्र प्रापप्तत्, वियद्गतां तां च अलासीत् ।

**हिन्दी**—उसने उस भयानक शक्तिको घुमाया और श्रेष्ठ वानर (
पर छोड़ा । वहाँ हनुमान् आ गये और उसे आकाशमें ही उन्होंने पकड़

**व्याख्या**—स कुम्भकर्णः, भीमाम् उग्रां, तां शक्तिम्, अबिभ्रमत्
मास । वानरेन्द्रस्य सुग्रीवस्य, च (उपरि),अमुचत् अत्याक्षीत् । मारुतिः
तत्राकाशे, प्रापप्तत् उपास्थात् । वियद्गताम् आकाशगां,ताम्,अलासीत्

**तिङन्तः**—भ्रमु-चलने दिवादिरुदात्तोदात्तेत् । ण्यन्तस्य चङि द्वि
लृदित्वादङ् अमुचत् । **'पतः पुम् ७।४।१९'** इति पुम् । ला आदाने-
आदन्तात् ।

**वाच्य०**—तेन सा अभ्राभि,अमोचि । मारुतिनाऽपाति,वियद्गता सा

द्वयोः पद्ययोः सम्मिलितोऽन्वय इति दर्शयति—

**अशोभिष्टाऽचखण्डच् च शक्तिं वीरो, न चाऽयसत् ।**
**लौह-भार-सहस्रेण निर्मिता निरकारि मे ॥ ५४**
**शक्तिरित्यकुपद् रक्षो, गिरिं चोदखनीद् गुरुम् ।**
**व्यसृष्ट तं कपी-न्द्रस्य, तेनाऽमूर्च्छीदसौ क्षतः ॥ ५५ ॥**

**अन्वयः**—वीरः (मारुतिः) अशोभिष्ट, शक्तिं च अचखण्डत्, न अय
रक्षः लौहभारसहस्रेण निर्मिता मे शक्तिः अनेन निरकारि इति अकुप
गिरिम् च उदखनीत्, तं कपीन्द्रस्य (उपरि) व्यसृष्ट, तेन क्षतः असौ अ

**हिन्दी**—वीर हनुमान्की शोभा ( शक्ति पकड़ लेनेसे ) बढ़ गयी,
उसे खण्डित कर दिया, पर कुछ भी थके नहीं । हजार लोहेके भारसे
शक्तिको इसने व्यर्थ कर दिया, यह जानकर राक्षस क्रुद्ध हुआ और भा
उखाड़ा और उसे सुग्रीव पर फेंका, जिससे जख्मी होकर वह मूर्छित हो

याख्या–वीरः शूरः (हनुमान्), अशोभिष्ट अदीपि । शक्तिं कुम्भकर्णीयां, ण्डत् खण्डितामकार्षीत्, न च अयसत् आयस्तो नाऽभूत् । रक्षः कुम्भकर्णः, ारसहस्रेण आयससहस्रभारेण, निर्मिता घटिता, मे मम, शक्तिः प्रहरणम्, ारि अभाजि ( मारुतिना ),--इति अकुपत् अरुषत् । ( ततः ) गुरुम् ाम्,गिरिम् अद्रिम्, उदखनीत् उदपीपटत् । तं गिरिम्, कपीन्द्रस्य सुग्रीवस्य, र) व्यसृष्ट अक्षैप्सीत् । तेन गिरिणा, क्षतः ताडितः, असौ, अमूर्च्छीत् त् ।

तिङन्तः—खड खडि भेदने ( चुरादिः )। यसु- प्रयत्ने ( दि० पुषादिः ोदात्तेत्)। सृज विसर्गे ( दिवादिरात्मनेपदी ) सिचः कित्वाद् गुणाभावः । मोहसमुच्छ्राययोः ( भ्वा० उदात्तोदात्तेत् ) ।

वाच्य०—अशोभि, अखण्डि शक्तिः,नायासि, शक्तिं निरकारीत् । अकोपि, : गुरुरुदखानि । स गिरिः व्यसर्जि, क्षतेनामुनाऽमूर्च्छि ।। ५४-५५ ।।

**अलोठिष्ट च भू-पृष्ठे, शोणितं चाऽप्यसुस्रुवत् ।**
**तमादाय पलायिष्ट व्यरोचिष्ट स राक्षसः ।। ५६ ।।**

**अन्वयः**—सुग्रीवः भूपृष्ठे अलोठिष्ट, तस्य शोणितं च असुस्रुवत् । राक्षसः आदाय पलायिष्ट, व्यरोचिष्ट च ।

**हिन्दी**—( मूर्च्छित होकर ) सुग्रीव पृथ्वीपर लोट गया । उसका खून बह । राक्षस उनको लेकर भाग गया और चमकने लगा ।

**व्याख्या**—( मूर्च्छितः ) सुग्रीवः, भूपृष्ठे धरातले, अलोठिष्ठ अलुठत् । स्य) शोणितम्, असुस्रुवत् अक्षारीत् । राक्षसः कुम्भकर्णः, तम् सुग्रीवम्, ाय गृहीत्वा, पलायिष्ट अपाक्रमीत्, व्यरोचिष्ट अदीपि ।

**तिङन्तः**—रुठ लुठ प्रतिघाते । भ्वा० द्युतादिः । 'णिश्रि० ३।१।४८' इति असुस्रुवत् । रुच दीप्तौ लुठिवत् स्थितिः ।

**वाच्य०**—अलोठि, शोणितेनास्रावि, राक्षसेन पलायि, व्यरोचि ।। ५६ ।।

पुनर्युग्मेनान्वयं वक्ति—

**अभैषुः कपयोऽन्वारत् कुम्भकर्णं मरुत्-सुतः ।**
**शनैरबोधि सुग्रीवः, सोऽलुञ्चीत् कर्ण-नासिकम् ।। ५७ ।।**
**राक्षसस्य, न चाऽत्रासीत्, प्रनष्टुमयतिष्ट च ।**
**अक्रोधि कुम्भकर्णेन, पेष्टुमारम्भि च क्षितौ ।। ५८ ।।**

**अन्वयः**—कपयः अभैषुः, मरुत्सुतः कुम्भकर्णम् अन्वारत् । सुग्री अबोधि, स राक्षसस्य कर्णनासिकम् अलुञ्चीत्, न च अत्रसीत्, अयतिष्ट । कुम्भकर्णेन अक्रोधि, क्षितौ पेष्टुं च आरम्भि ।

**हिन्दी**-( सुग्रीवके उठा ले जाने पर ) कपि सब डर गये । ह कुम्भकर्णके पीछे लगे रहे । सुग्रीव धीरे-धीरे होशमें आये । उन्होंने नाक-कान काट लिये और डरे नहीं । भागनेका यत्न कर रहे थे । कु क्रुद्ध होकर ( सुग्रीवको) पृथ्वीपर पीस देना चाहा ।

**व्याख्या**—( सुग्रीवे नीते ) कपयः वानराः, अभैषुः अत्रसिषुः । म हनुमान्, अन्वारत् अन्वगमत् । सुग्रीवः वानरराजः, शनैः मनाक्, अजागरीत् । स सुग्रीवः, राक्षसस्य रक्षसः, कर्णनासिकम् श्रोत्रघ्राण ञ्चीत् अपानेष्ट, न च अत्रसीत् न अभैषीत् । प्रनष्टुं राक्षसात् पल अयतिष्ट यतते स्म । कुम्भकर्णेन अक्रोधि अकोपि, (स्वकर्णनासं छिन्ने क्षितौ भूमौ, पेष्टुम् ( सुग्रीवम् ) आरम्भि । कर्मणोऽविवक्षितत्वात् भाव

**तिङन्तः**—सृ ऋ गतौ ( जु० अनुदात्तोदात्तेत् ) । **'सर्त्तिशास्त्य** ३।१।५६' इत्यङ् । **'ऋदृशोऽङि गुणः** ७।४।१६' इति गुणः । बुध अ ( दि० अनुदात्तोनुदात्तेत् ) । **'दीपजन०** ३।१।६१' इति कर्तरि चिण् अ **'नशेः षान्तस्य** ८।४।३६' इति णत्वाभावः । **'रभेरशब्लिटोः** ७।१।६ नुम् आरम्भि ।

**वाच्य०**—कपिभिरभायि, अन्वारि स मरुत्सुतेन । सुग्रीवेणाबोधि, तेन कर्णनासिकम् । अत्रासि, अयाति च । कुम्भकर्णः अक्रुधत्, आरब्ध च॥५८

**सुग्रीवोऽस्याऽभ्रशद्धस्तात्, समगाहिष्ट चाऽम्बरम् ।**
**तूर्णमन्वसृपद् राममानन्दच् च वानरान् ॥ ५९ ॥**

**अन्वयः**—सुग्रीवः अस्य हस्तात् अभ्रशत्, अम्बरम् समगाहिष्ट च रामम् अन्वसृपत्, वानरान् आनन्दत् च ।

**हिन्दी**—सुग्रीव उसके हाथ से निकल गया, आकाशमें चला गया रामके पास पहुँचा तथा वानरोंको खुश कर दिया ।

**व्याख्या**—सुग्रीवः कपीन्द्रः, अस्य कुम्भकर्णस्य, हस्तात् करात्, अनश्यन् । अम्बरम् गगनम्, अगाहिष्ट आक्रमीत् । तूर्णम् शीघ्रम्, राम मिनम्, अन्वसृपत् अन्वगमत् । वानरान् कपीन्, आनन्दत् आनन्दयामास

**तिङन्तः**–भ्रंशु अधःपतने (भ्वा० द्युतादिः, दि० पुपादिः)। उभयथाऽ

। ( भ्वा० अनुदात्तेदुदात्तः ) । सृप्लृ गतौ ( भ्वा० ) । नन्देर्ण्यन्ता-
त्वादि ।

च्यपरिवर्तनम्–सुगीवेणाभ्रशि, अगाहि, असर्पि, आनन्दि ॥ ५९ ॥

अतत्वरच् च तान् योद्धुमचिचेष्टच् च राघवौ ।
कुम्भकर्णो न्यवर्तिष्ट, रणेऽयुत्सत वानराः ॥ ६० ॥

न्वयः––सुग्रीवः तान् योद्धुम् अतत्वरत् । राघवौ योद्धुम् अचिचेष्टत् च । र्णः न्यवर्तिष्ट । वानराः रणे अयुत्सत ।

न्दी–सुग्रीवने उनको जल्दी युद्ध करनेको कहा। रामलक्ष्मण को भी युद्ध इशारा किया । कुम्भकर्ण फिर लौटा, तब वानर रणमें युद्ध करने लगे ।

ाख्या—सुग्रीवः वानरेन्द्रः, तान् वानरान्, योद्धुम् युद्धं कर्तुं, अतत्वरत् मास । राघवौ रामलक्ष्मणौ, योद्धुम् युद्धं कर्तुम्, अचिचेष्टत् सङ्केतं च । कुम्भकर्णः रावणभ्राता, न्यवर्तिष्ट पुनर्युद्धं कर्तुम् युद्धस्थले समुप- वानराः कपयः, रणे संग्रामे, अयुत्सत युध्यन्ते स्म ।

ङन्तः–ञित्वरा संभ्रमे । ण्यन्ताच्चङ् । 'अत्स्मृदृ० ७।४।९५' इत्यभ्यासेऽस्य 'विभाषा वेष्टिचेष्टचोः ७।४।९६' इति अत्वाभावपक्षे वैकल्पिकमित्वम् ।

च्यपरिवर्तनम्—सुग्रीवेणात्वरिषत वानराः, राघवौ अचेष्टिषाताम् । र्णेन न्यवर्ति । वानरैः अयोधि ॥ ६० ॥

अविवेष्टन् नृपाऽऽदेशादारुक्षंश् चाऽऽशु राक्षसम् ।
तानधावीत् समारूढांस् तेऽप्यस्रंसिषताऽऽकुलाः ॥ ६१ ॥

न्वयः—नृपादेशात् ( वानराः ) राक्षसम् अविवेष्टन् आशु आरुक्षन् च, समारूढान् तान् अधावीत् । ते आकुलाः सन्तः अस्रंसिषत ।

न्दी— राजाकी आज्ञासे वे वानर राक्षसको घेरकर फौरन उसके शिर- गये । उसने शिरपर चढ़े उनको झकझोरकर गिरा दिया । वे व्याकुल गिर पड़े ।

ाख्या––नृपादेशात् राजाज्ञया ( तेषां नृपः सुग्रीवः ), राक्षसम् रक्षः, टन् आच्छादितवन्तः, आशु शीघ्रम्, आरुक्षन् च । ( सः ) समारूढान् समाक्रान्तान्, तान् कपीन्, अधावीत् धूतवान् । ते कपयः, आकुलाः सन्तः, अस्रंसिषत अपतन् ।

ङन्तः---चेष्टिवत् वेष्टेः सिद्धिः । धातोः रुहः 'शल इगुप० ३।१।४५' इति स्रंसु भ्रंसु अवस्रंसने ( भ्वा० द्युतादिः उदात्तोऽनुदात्तेत् ) ।

**वाच्य०**—राक्षसोऽवेष्टि, आरोहि, समारूढा अवविषत। तैराकुलैर

अग्रसिष्ट, व्यधाविष्ट, समाश्लिक्षच् च निर्-दयम्।
ते चाऽप्यघोरिषुर् घोरं रक्तं चाऽवमिषुर् मुखैः ॥

**अन्वयः**—कुम्भकर्णः तान अग्रसिष्ट व्यधाविष्ट, निर्दयम् समा
घोरम् अघोरिषुः च, मुखैः रक्तम् अवमिषुः ।

**हिन्दी**—कुम्भकर्णने उनको ग्रस लिया। कुछको घून दिया,
निर्दय होकर गोदमें पीस डाला। वे बेतरह चिल्लाने लगे। मुँहसे
करने लगे।

**व्याख्या**—कुम्भकर्णः रावणभ्राता, तान् कपीन्, अग्रसिष्ट अघसत्,
अविध्यत्। (कियतः) निर्दयं क्रूरं, समाश्लिक्षत् अपीपिडत्,। ते कप
क्रूरम्, अघोरिषुः अक्रन्दिषुः। मुखैः आस्यैः, रक्तं रुधिरम्, अवमिषुः

**तिङन्तः**—ग्रसु–अदने ( भ्वा० उदात्तोऽनुदात्तेत् )। धावु ग
(भ्वा० उदात्तः स्वरितेत्)। घुरी-शब्दे (भ्वा० उदात्तोदात्तेत्)। टुवम
( भ्वा० उदात्तोदात्तेत् )।

**वाच्यपरिवर्तनम्**—कुम्भकर्णेन तेऽग्रसिषत, व्यधाविषत, सम
तैः अघोरि, रक्तम् अवामि ॥ ६२ ॥

**स चाऽपि रुधिरैर् मत्तः स्वेषामप्यदयिष्ट न।**
**अग्रहीच् चाऽऽयुरन्येषामरुद्ध च पराक्रमम् ॥ ६३ ॥**

**अन्वयः**—रुधिरैः मत्तः स च अपि स्वेषाम् अपि न अदयिष्ट।
आयुः अग्रहीत्, पराक्रमम् च अरुद्ध ।

**हिन्दी**—रुधिर पीने से मतवाले होकर उस कुम्भकर्णने अपने लो
दया नहीं की। दूसरोंकी आयु खतम कर दी तथा पराक्रमको रोक

**व्याख्या**—रुधिरैः कपिरक्तैः, मत्तः क्षीवः, स कुम्भकर्णः, स्वेषाम्
अपि, न अदयिष्ट न दयामकर्षीत्। किमन्येषाम्? अन्येषाम् इतरेषा
जीवितम्, अग्रहीत् गृहीतवान्। पराक्रमं सामर्थ्यम्, अरुद्ध अरुधत्।
वायुरन्येषाम्' इति पाठे कुम्भकर्णं पश्यतामन्येषाम् आयुः स्वयम्
त्यर्थः। आयुः कर्मैव कर्तृतां गतम्। अत्र पाठे कर्मकर्तरि चिण्।

**तिङन्तः**—दय दानगतिरक्षणहिंसादानेषु(उदात्तोऽनुदात्तेत् भ्वा०)।
पाठे 'दुहश्च३।१।६३'इति कर्मकर्तरि णिच्। 'अधीगर्थ २।३।५२'इति स्वे
षष्ठी। अरुद्ध इति तङि सिज्लोपे सन्धिः 'झषस्तथोर्धोऽधः ८।२।४०' इ

**्यपरिवर्तनम्**— तेन मत्तेन अदायि, आयुरग्राहि ( आयुः अदोहि इति )। पराक्रमः अरोधि ॥ ६३ ॥

**संत्रस्तानामपाहारि सत्त्वं च वन-वासिनाम् ।**
**अच्छेदि लक्ष्मणेनाऽस्य किरीटं कवचं तथा ॥ ६४ ॥**

**वयः**—( तेन ) संत्रस्तानां वनवासिनां सत्त्वम् च अपाहारि । लक्ष्मणेन रीटं तथा कवचम् अच्छेदि ।

**दी**—उसने डरे हुए वानरोका बल हर लिया । लक्ष्मणने उसके मुकुट वच काट डाले ।

**ख्या**—तेन कुम्भकर्णेन, संत्रस्तानां भीतानां, वनवासिनां वानराणाम्, लम्, अपाहारि अपाकारि । लक्ष्मणेन सौमित्रिणा, अस्य कुम्भकर्णस्य, मुकुटं, तथा तद्वत्, कवचं सन्नाहम्, अच्छेदि अभेदि ।

**ङन्तः**—हृञ् हरणे । भौवादिकात् ञितः, छिदिर् द्वैधीकरणे रौधादिरेतेतः कर्मणि चिण् ।

**च्य०**—स सत्त्वम् अपाहार्षीत् । लक्ष्मणः किरीटं कवचम् अच्छिदत्॥६४॥

**अभेदि च शरैर् देहः प्राशंसीत् तं निशा-चरः ।**
**अस्पर्धिष्ट च रामेण तेनाऽस्याऽक्षिप्सतेषवः ॥ ६५ ॥**

**न्वयः**—( लक्ष्मणेन अस्य ) देहः शरैः अभेदि, निशाचरः तं प्राशंसीत् । अस्पर्धिष्ट, तेन रामेण अस्य इषवः अक्षिप्सत ।

**न्दी**—लक्ष्मणने उसका शरीर बाणोंसे छिन्न भिन्न कर दिया । उसने प्रशंसा की और रामके साथ युद्ध करनेकी स्पर्द्धा की । उस रामने बाण वाहर फेंक दिये ।

**याख्या**—( लक्ष्मणेन तस्य ) देहः कायः, शरैः बाणैः, अभेदि अच्छेदि । रः राक्षसः, तं सौमित्रि, प्राशंसीत् अस्तावीत् साधुवीरोऽसि इति । महारथिना, अस्पर्द्धिष्ट योद्धुम् । तेन रामेण, अस्य कुम्भकर्णस्य, शराः, अक्षिप्सत् क्षिप्ताः ।

**ाच्यपरिवर्तनम्**—लक्ष्मणः देहम् अभिदत् । निशाचरेण स प्राशंसि । तेन अर्ध्य । स इषून् अक्षैप्सीत् ॥ ६५ ॥

**यैरघानि खरो, वाली, मारीचो, दूषणस् तथा ।**
**अवामंस्त स तान् दर्पात्, प्रोदयंसीच् च मुद्गरम् ॥ ६६ ॥**

**अन्वयः**—यैः (बाणैः) खरः, वाली, मारीचः तथा दूषणः अघानि (ते अघा- ), तान् रामेण प्रयुक्तान् स दर्पात् अवामंस्त, मुद्गरम् च प्रोदयंसीत् ।

**हिन्दी**––जिन बाणोंने खरदूषण मारीच वालीको मार डाला अपनी हेकड़ीसे रामद्वारा प्रयुक्त उन बाणों की अवमानना कर दी अन्द लेकर संग्राममें डट गया ।

**व्याख्या**––यैः बाणैः कर्तृभिः (प्रशंसार्थम् अत्र कर्तरि अनुक्ते तृतीया वाली मारीचः तथा दूषणः ( प्रसिद्धाः अघानिषत ), तान् (रामेण) प्र स कुम्भकर्णः, दर्पात् गर्वात् (घ्नन्) अवामंस्त अवमन्यते स्म । मुद्गरात रणम्, प्रोदयंसीत् उद्गीर्णवान् उदगूरीत् ( पाणिना ) ।

**तिङन्तः**–यम उपरमे (भ्वा० उदात्तेदनुदात्तः) '**यमरम०** ७।२।७३'त

**वाच्यपरिवर्तनम्**—ये अवधिषुः खरं वालिनं मारीचं दूषणम्, तैच सत । मुद्गरं प्रोदयायि ॥ ६६ ॥

**वायव्याऽस्त्रेण तं पाणिं रामोऽच्छैत्सीत् सहाऽऽयुधम् ।**
**अदीपि तरु-हस्तोऽसावधावीच् चाऽरि-संमुखम् ॥ ६७**

**अन्वयः**––रामः सहायुधम् तं ( समुद्गरमित्यर्थः ) पाणिं वाय अच्छैत्सीत् । असौ तरुहस्तस्सन् अदीपि, अरिसम्मुख च अधावीत् ।

**हिन्दी**––रामने आयुध लिये हुए उस हाथको ही वायव्यास्त्र डाला तब वह हाथमें पेड़ लेकर चमक उठा और शत्रुके सम्मुख दौड़ा

**व्याख्या**—रामः रामचन्द्रः, सहायुधम् मुद्गरप्रहरणोपेतम्, तम् पू उद्यतपाणिम् हस्तम्, वायव्यास्त्रेण वायुदेवताकप्रहरणेन, अच्छैत्सीत् अ असौ कुम्भकर्णः, (ततः) तरुहस्तः अपरपाणिना गृहीतवृक्षः, अदीपि अचक अरिसम्मुखं शत्रुसमक्षम्, अधावीत् द्रुतगत्योपास्थात् ।

**तिङन्तः**—छिदिर् द्वैधीकरणे रौधादिकात् '**इरितो वा** ३।१।५७ इ भावे वृद्धिर्हलन्तलक्षणा । '**दीपजन०** ३।१।६१' इति कर्तरि चिण् अदी

**समासः**–वायव्यं च तद अस्त्रम् वायव्यास्त्रम् (कर्मधारयः) । आयु इति सहायुधम् ( बहुव्रीहिः ) । तरुः हस्ते यस्येति विग्रहे '**प्रहरणादि निष्ठासप्तम्यौ** २।२।३७' इति सप्तम्यन्तस्य परनिपातः ।

**वाच्य०**–रामेण स पाणिः अच्छेदि । अमुना अदीपि, अधावि च ॥

**स-वृक्षमच्छिदत् तस्य शक्राऽस्त्रेण करं नृपः ।**
**जङ्घे चाऽशीशतद् बाणैरप्रासीदिषुभिर् मुखम् ॥ ६८ ॥**

**अन्वयः**—नृपः शक्रास्त्रेण तस्य सवृक्षं करम् अच्छिदत्, बाणैः अशीशतद्, इषुभिः मुखम् अप्रासीत् ।

**न्दी**——राजाने शक्रास्त्रसे उसके वृक्षसहित हाथको ही काट डाला। दोनों जाँघें काट डालीं। बाणोंसे मुंह बन्द कर दिया।

**ाख्या**——नृपः रामः, शक्रास्त्रेण वासवास्त्रेण, तस्य कुम्भकर्णस्य, सवृक्षम् न्, करम् हस्तम्, अच्छिदत् छिन्नवान्। बाणैः शरैः, जङ्घे जानुनी, त् शातिते। इषुभिः शरैः, मुखम् आस्यम्, अप्रासीत् अपूरि।

**ङन्तः**——शद्लृ शातने (भ्वा० तुदादौ च)। उभयस्यापि ण्यन्तस्य तौ ७।३।४२' इति तकारः। प्रा पूरणे इत्यादादिकात् सणिटौ।

**च्य०**——नृपेण करोऽच्छेदि, जङ्घे अशात्साताम्, मुखमप्रायि ॥ ६८ ॥

ऐन्द्रेण हृदयेऽव्यात्सीत्, सोऽध्यवात्सीच्च गां हतः।
अपिक्षातां सहस्रे द्वे तद्-देहेन वनौकसाम् ॥ ६९ ॥

**न्वयः**——(सः) ऐन्द्रेण हृदये अव्यात्सीत्, हतः सः गाम् अध्यवात्सीत्। वनौकसां द्वे सहस्रे अपिक्षाताम्।

**न्दी**—उन्होंने ऐन्द्रास्त्रसे हृदयको वेध दिया। वह मरकर पृथ्वीपर पड़ उसकी देहसे दो हजार वानर पिस गये।

**ाख्या**——स रामः, ऐन्द्रेण अस्त्रेण, हृदये वक्षःस्थले, कुम्भकर्णम् राक्षसं, ीत् विद्धवान्। हतः मृतः, स कुम्भकर्णः, गां धराम्, अध्यवात्सीत् ात्। तद्देहेन तत्कायेन, वनौकसां वानराणाम्, द्वे सहस्रे सहस्रयुग्मे, ताम् चूर्णिते जाते।

**ङन्तः**——व्यध ताडने (दि० उदात्तेदनुदात्तः)। अधि-पूर्वकस्य वसेरनिटो दिकस्य हलन्तलक्षणा वृद्धिः। आधारः कर्म च 'उपान्वध्याङ् वसः १।४।४८' पिष्लृ सञ्चूर्णने इति रौधादिकात् कर्मणि लुङ्।

**ाच्यपरिवर्तनम्**——अव्याधि, गौः अध्यवासि हतेन तेन। तद्देहः द्वे सहस्रे त् ॥ ६९ ॥

अस्ताविषुः सुरा रामं दिशः प्रापन् निशा-चराः।
भूरकम्पिष्ट साऽद्रीन्द्रा, व्यचालीदम्भसां पतिः ॥ ७० ॥

**अन्वयः**——सुराः रामम् अस्ताविषुः, निशाचराः दिशः प्रापन्, साद्रीन्द्रा कम्पिष्ट, अम्भसां पतिः व्यचालीत्।

**हिन्दी**——देवताओंने रामकी स्तुति की, निशाचर दिशाओंमें भाग गये। चलके साथ पृथ्वी काँप उठी, समुद्र वेलाको लांघ गया।

**व्याख्या**——सुराः देवाः, रामम् रामचन्द्रम् अस्ताविषुः स्तुवन्ति स्म।

निशाचराः क्षपाटाः, दिशः ककुभः, प्रापन् अभाक्षुः । साद्रीन्द्रा हिमाल
भूः पृथ्वी, अकम्पिष्ट धराऽचालीत् । अम्भसां पतिः वारां निधिः,
उद्वेलोऽभूत् ।

**तिङन्तः**—ष्टुञ् स्तुतौ ( अदादिरनुदात्तो ञित् )। 'स्तुसुधूञ्भ्य
७२' इति वेट् । आप्लृ-व्याप्तौ ( स्वा० अनुदात्तोदात्तेत् )।

**वाच्यपरिवर्तनम्**—सुरैः रामोऽस्तावि, निशाचरैर्दिशो व्याप्सत, भु
अम्भसां पत्या व्यचालि ।

**हतं रक्षांसि राजानं कुम्भकर्णमशिश्रवन् ।**
**अरोदीद् रावणोऽशोचीन्, मोहं चाऽशिश्रियत् परम् ॥ ७१**

**अन्वयः**—रक्षांसि कुम्भकर्णं हतं राजानम् अशिश्रवन् । रावणः
अशोचीत् परं मोहम् च अशिश्रियत् ।

**हिन्दी**—राक्षसोंने कुम्भकर्ण मारा गया--ऐसा राजाको सुनाया
रोया, सोचा, मूर्च्छित भी हुआ ।

**व्याख्या**–रक्षांसि जातूनि, कुम्भकर्णं प्रधानराक्षससेनापतिं, ह
राजानं राक्षसेन्द्रम् रावणम्, अशिश्रवन् श्रावितवन्तः । रावणः दशास्य
दीत् अरुदत् । अशोचीत् शोकमकृत । परम् घोरम्, मोहं मूर्च्छाम
उपागमत् ।

**तिङन्तः**–श्रु श्रवणे भौवादिकात् ण्यन्ताच्चङ् **'स्रवतिशृणो०** ७।४।
अभ्यासस्येत्वम्। अङभावेऽरोदीत् । श्रिञ्-सेवायाम् **'णिश्रि०** ३।१।४८'इ

**वाच्य०**--रक्षोभिः हतं राजा अश्रावि । हतो राजानं वेति बुद्ध
निजेच्छयोक्तार्थता । रावणेनारोदि अशोचि, परो मोहोऽश्रायि ॥ ७१

युग्मेन रावणशोकमाह—

**अपप्रथद् गुणान् भ्रातुरचिकीर्तच् च विक्रमम् ।**
**क्रुद्धेन कुम्भकर्णेन ये ऽदर्शिषत शत्रवः ॥ ७२**
**कथं न्वजीविषुस् ते च, स चाऽमृत महा-बलः ।**
**अयुयुत्सिषताऽऽश्वास्य कुमारा रावणं ततः ॥ ७३**

**अन्वयः**--( रावणः ) भ्रातुः गुणान् अपप्रथत्, विक्रमम् अचि
क्रुद्धेन कुम्भकर्णेन ये शत्रवः अदर्शिषत ते च कथं न्यजीविषुः । महाबल
कथम् अमृत इति (उभयान्वयी कथं शब्दः) । ततः कुमाराः रावणम्
स्य अयुयुत्सिषत ।

न्दी—( रावणने ) भाईके गुणोंका बखान किया, पराक्रमका कीर्तन जिन शत्रुओंको कुम्भकर्णने क्रुद्ध होकर देखा वे कैसे जी रहे हैं और वली कैसे मर गया ? (यही रावण सोचता था) तब कुमारोंने रावण-वासन देकर युद्ध करनेकी अपनी इच्छा प्रगट की ।

ख्या—रावणः राक्षसराजः, भ्रातुः कुम्भकर्णस्य, गुणान् शौर्यादीन्, प्रख्यापितवान् । पराक्रमम् सामर्थ्यम्, अचिकीर्तत् अचीकृतत् । क्रुद्धेन कुम्भकर्णेन भ्रात्रा, ये शत्रवोऽरयोऽदर्शिषत दृष्टाः,ते केन प्रकारेण कथम्, षुः प्राणिषुः । महावलोऽतिबलः स कथम् अमृत मृतः अभूत् इति णशोकः ) । ततः तदनन्तरम्, कुमाराः राजपुत्राः, रावणम् स्वपितरम्, स्य सन्तोष्य, अयुयुत्सिषत योद्धुमैषिषुः ।

तङन्तः—प्रथ प्रख्याने (भ्वा० घटादिः उदात्तोऽनुदात्तेत्)। तस्य ण्यन्तस्य दृ० ७।४।९५' इत्यत्वम् । कृत-संशब्दने (चुरादित्वाण्णिच्) 'उर्ऋत् ' इति ऋत्वाभावपक्षे रूपम् अचिकीर्तत् । 'उपधायाश्च ७।१।१०१' इति । 'उपधायाञ्च ८।२।७८' इति दीर्घश्च । अदर्शिषत इत्यत्र कर्मणि लुङ् । च्सीयुट् ६।४।६२' इति चिण्वदिट् । अमृत-'ह्रस्वादङ्गात् ८।२।२७' लोपः । युधेः सन्नन्तात् 'पूर्ववत्सनः १।३।६२' इति तङ् ।

च्यपरिवर्तनम्—गुणा अप्रथिषत, विक्रमोऽकीर्ति, क्रुद्धो यानद्राक्षीत् तैर-तेनामारि, कुमारैः अयूयुत्सि ।। ७२-७३ ।।

**दैवान्तकोऽतिकायश् च त्रिशिराः स नरान्तकः ।**
**ते चांऽऽहिषत संग्रामं बलिनो रावणाऽऽत्मजाः ।। ७४ ।।**

अन्वयः—देवान्तकः अतिकायः त्रिशिराः स नरान्तकः—ते च बलिनो त्मजाः संग्रामम् आंहिषत ।

हिन्दी—देवान्तक, अतिकाय, त्रिशिरा और प्रसिद्ध नरान्तक वे रावणके वली लड़के युद्ध स्थलमें गये ।

व्याख्या—देवान्तकः अतिकायः त्रिशिराः, स प्रसिद्धः नरान्तकः—ते बलिनः लिनः, रावणात्मजाः राक्षसेन्द्रपुत्राः, संग्रामम् युद्ध-भूमिम्, आंहिषत अहैषुः ।

तिङन्त—अहि गतौ ( भ्वा० उदात्तोऽनुदात्तेत् ) ।

वाच्यपरिवर्तनम्—बलिभिस्तैः संग्राम आंहि ।। ७४ ।।

**युद्धोन्मत्तं च मत्तं च राजा रक्षार्थमाञ्जिहत् ।**
**सुतानां, निरगातां तौ राक्षसौ रण-पण्डितौ ।। ७५ ।।**

**अन्वयः**——राजा सुतानां रक्षार्थम् युद्धोन्मत्तं मत्तं च आञ्जि पण्डितौ राक्षसौ निरगाताम् ।

**हिन्दी**——राजानें पुत्रोंकी रक्षाके लिये युद्धोन्मत्त तथा मत्त राक्षसोंको भेजा । रणमें कुशल वे रणभूमिके लिये निकले ।

**व्याख्या**——राजा राक्षसेन्द्रः, सुतानां पुत्राणां, रक्षार्थं गोपनाय मत्तं च द्वौ, आञ्जिहत् अजीगमत् । रणपण्डितौ युद्धकुशलौ, क्षपाटौ, निरगाताम् निरगमताम् ।

**तिङन्तः**——अहेर्ण्यन्ताल्लुङ् । हिमात्रस्य द्वित्वम् । इण् गतौ अ 'इणो गा लुङि २।४।४५' इति गादेशे सिचो लुक् ।

वाच्य०——राज्ञा आंहिषाताम्, ताभ्यां राक्षसाभ्यां निरगायि ॥

**तैरजेषत सैन्यानि, द्विषोऽकारिषताऽऽकुलाः ।**
**पर्वतानिव ते भूमावचैषुर् वानरोत्तमान् ॥ ७६ ॥**

**अन्वयः**——तैः सैन्यानि अजेषत ( अजायिषत वा ), द्विष आकुला षत । ते वानरोत्तमान् भूमौ पर्वतान् इव अचैषुः ।

**हिन्दी**——उन्होंने सेनाको जीत लिया, शत्रुओंको व्याकुल कर वे उत्तम वानरोंको पृथ्वीपर पर्वतके समान खोजने लगे ।

**व्याख्या**——तैः राजात्मजैः, सैन्यानि बलानि, अजेषत जितानि शत्रवः, आकुलाः उद्विग्नाः, अकारिषत समपादिषत । ते राजपुत्राः, मान् कपिश्रेष्ठान्, भूमौ धरायां, पर्वतान् गिरीन्, इव यथा, अचैषुः अ

**तिङन्तः**——जेः कृञश्च कर्मणि लुङ् । '**स्यसिच्०** ६।४।३२' इति चिण्वद्भावाभावौ । चिञ्-चयने ( स्वादिरनुदात्तो ञित् ) ।

**वाच्यपरिवर्तनम्**——ते अजैषुः सैन्यानि, अकार्षुः व्याकुलान् द्विषः यिषत अचेषत वा वानरोत्तमाः ॥ ७६ ॥

**अङ्गदेन समं योद्धुमघटिष्ट नरान्तकः ।**
**प्रैषिषद् राक्षसः प्रास, सोऽस्फोटीदङ्गदोरसि ॥ ७७ ॥**

**अन्वयः**——नरान्तकः अङ्गदेन समं योद्धुम् अघटिष्ट, राक्षसः प्रा पत्, स अङ्गदोरसि अस्फोटीत् ।

**हिन्दी**——नरान्तक अङ्गदके साथ युद्ध करनेमें जुट गया । राक्षस नामका अस्त्र फेंका, वह अङ्गदकी छातीपर जाकर टूट गया ।

ख्या–नरान्तको राजपुत्रः, अङ्गदेन कपिसेनाध्यक्षेण, सह साकं, योद्धुम् म्, अघटिष्ट अचेष्टिष्ट । राक्षसः सः, प्रासं कुन्तं, प्रैषिषत् अनीत्सीत् । :, अङ्गदोरसि अङ्गदवक्षसि, अस्फोटीत् विशीर्णोऽभूत् ।

न्तः––इषु इच्छायाम् इति तौदादिकात् ण्यन्तात् लुङ्, षिमात्रस्य स्फुट विकसने ( तुदादिरुदात्तोदात्तेत् )।

च्यपरिवर्तनम्—नरान्तकेनाघाटि, प्रैषि प्रासः । तेनास्फोटि ॥ ७७ ॥

अश्वान् वालि-सुतोऽहिंसीदतताडच्च मुष्टिना ।
रावणिश्च चाऽव्यथो योद्धुमारब्ध च महीं गतः ॥ ७८ ॥

यः––वालिसुतोऽश्वान् अहिंसीत्, मुष्टिना अतताडत् च । अव्यथः महीं गतः, योद्धुम् आरब्ध च ।

दी—अङ्गदने उसके घोड़ोंको मार डाला, उसे भी मुक्केसे मारा । वह होकर पृथ्वीपर पैदल युद्ध करने लगा ।

ख्या––वालिसुतोऽङ्गदः, तस्याश्वान् हयान्, अहिंसीत् अवधीत् । बद्धपाणिना, अतताडत् आहतवान् । अव्यथः व्यथा–शून्यः, रावणिः ः,भूमिं धरापृष्ठं,गतः स्थितः। योद्धुं युद्धं कर्तुम्,आरब्ध प्रारब्धवान् च ।

न्तः–घञन्तात् ताड शब्दात् 'तत्करोति तदाचष्टे (ग०) ३।१।१६' इति लोपित्वान्न ह्रस्वः । रभ राभस्ये ( भ्वा० अनुदात्तानुदात्तेत् ) ।

सन्धिः–आरब्धः ।

०–वालिसुतेनाश्वा अहिंषिषत, अताडि, रावणिनारम्भि ॥ ७८ ॥

तस्याऽहारिषत प्राणा मुष्टिना वालि-सूनुना ।
प्राद्रुद्रुवंस् ततः क्रुद्धाः सर्वे रावणयोऽङ्गदम् ॥ ७९ ॥

यः–वालि-सूनुना मुष्टिना तस्य प्राणा अहारिषत । ततः क्रुद्धः सर्वे ( रावणपुत्राः ) अङ्गदं प्राद्रुद्रुवन् ।

दी—अङ्गदने मुक्केसे मारकर उसके प्राण ले लिये । तब क्रुद्ध होकर वणके लड़के अङ्गद पर टूट पड़े ।

ख्या––वालिसूनुना अङ्गदेन, मुष्टिना बद्धपाणिना, तस्य नरान्तकस्य, असवः, अहारिषत हृताः। ततः तदनन्तरम्, क्रुद्धाः कुपिताः, सर्वे रावणयः रावणपुत्राः, अङ्गदं कपिसेनापतिम्, प्राद्रुद्रुवन् प्ररुरुधुः । वन्त इत्यर्थः । आवृतवन्त इति यावत् ।

च्य०–वालिसूनुः प्राणान् अहार्षीत् । रावणिभिः अङ्गदः प्राद्रावि॥७९॥

ततो नील-हनूमन्तौ रावणीनववेष्टताम् ।
अकारिष्टां गिरींस् तुङ्गानरौत्सीत् त्रिशिराः शरैः ॥ ८०

**अन्वय**—ततः नीलहनूमन्तौ रावणीन् अववेष्टताम्, तुङ्गान् गि
रिष्टाम् । त्रिशिराः शरैः अरौत्सीत् ।

**हिन्दी**—तब नील और हनुमान्ने रावणके पुत्रोंको घेर लिया
बड़े पर्वतोंको फेंकने लगे । त्रिशिराने बाणोंसे उन्हें रोका ।

**व्याख्या**—ततः तदनन्तरम्, नीलहनुमन्तौ कपिसेनापती, राव
पुत्रान्, अववेष्टताम् अविवेष्टताम् (आच्छादितवन्तौ)। तुङ्गान् दीघ
अचलान्, अकारिष्टाम् अक्षैप्ताम् । त्रिशिराः रावणपुत्रः, शरैः बाणैः
अरौत्सीत् अरुधत् ।

**तिङन्तः**—वेष्टेर्ण्यन्ताच्चङ् । ‘विभाषा वेष्टि चेष्टचोः ७।४।९६
सात्वम् । कॄ विक्षेपे । तौदादिकाल्लुङ् ।

**वाच्यपरिवर्तनम्**—नीलहनुमद्भ्यां रावणयोऽवेष्टिषत, गिरयोऽ
त्रिशिरसा ते अरुत्सत ॥ ८० ॥

परिघेणाऽवधिष्टाऽथ रणे देवान्तको बली ।
मुष्टिनाऽददरत् तस्य मूर्धानं मारुताऽऽत्मजः ॥ ८

**अन्वयः**—अथ बली देवान्तकः रणे परिघेण अवधिष्ट । मारुता
मूर्द्धानम् मुष्टिना अददरत् ।

**हिन्दी**—तदनन्तर बली देवान्तकने संग्राममें गदासे मारा ।
मुक्केसे मारकर उसके शिरको फोड़ डाला ( जिससे वह मर गया )

**व्याख्या**—अथ ततः, बली बलवान्, देवान्तको रावणिः, रणे यु
गदया, अवधिष्ट हतवान् । मारुतात्मजः हनुमान्, तस्य देवान्तकस्य
शिरः, मुष्टिना बद्धपाणिना, अददरत् दारितवान् ( ततो मृतः सः )

**तिङन्तः**—हन धातोः अविवक्षितकर्मत्वात् ‘आङो यमहनः १।
तङ् । ‘आत्मनेपदेष्वन्यतरस्याम् २।४।४४’ इति पाक्षिको वधादेशः । दृ
इति ण्यन्ताच्चङ् । ‘अत्स्मृदृ० ७।४।९५’ इत्यम् ।

**वाच्य०**—बलिना अघानि । मारुतात्मजेन मूर्द्धा अदारि ॥ ८१

अदीदिपत् ततो वीर्यं, नीलं चाऽपीपिडच् छरैः ।
युद्धोन्मत्तस्, तु नीलेन गिरिणाऽनायि संक्षयम् ॥ ८२ ॥

**अन्वयः**—ततः युद्धोन्मत्तः वीर्यम् अदीदिपत्, नीलं च शरैः आ
नीलेन तु गिरिणा संक्षयम् अनायि ।

न्दी—तब ( देवान्तकके मर जाने पर ) युद्धोन्मत्तने अपना पराक्रम
शि, नीलको बाणोंद्वारा पीड़ित किया। नीलने पर्वत द्वारा उसे मार
ा।

ाख्या—ततो देवान्तकवधानन्तरम्, युद्धोन्मत्तः रावाणिरक्षार्थं नियुक्तो
वीर्यं स्वपराक्रमं, अदीदिपत् प्राचीकशत्। नीलं सेनापतिम्, शरैः
अपीपिडत् पीडितवान्। नीलेन तन्नाम्ना सेनाध्यक्षेण, गिरिणाऽद्रिणा,
वधम्, अनायि नीतः।

ङन्तः—अदीदिपत् 'भ्राजभास० ७।४।३' इति ह्रस्वपक्षे रूपम्। तदभावे
त्। अपीपिडदिति तथैव। पक्षे अपिपीडत्। 'प्रधाने नीह्रकृष्वहाम्'
ानकर्मणि युद्धोन्मत्ते लुङ् अनायीति।

च्यपरिवर्तनम्—युद्धोन्मत्तेन वीर्यम् अदीपि। नीलः अपीडि। नीलः तं
ऽनीत्।। ८२।।

अबभ्राजत् ततः शक्तिं त्रिशिराः पवनाऽऽत्मजे।
हनूमता क्षतास् तस्य रणेऽमृषत वाजिनः।। ८३।।

न्वयः—ततः त्रिशिराः पवनात्मजे शक्तिम् अबभ्राजत्। हनुमता क्षताः
जिनो रणेऽमृषत।

न्दी—इसके बाद त्रिशिराने हनुमान्जी पर शक्ति फेंकी। हनुमान्के
त-विक्षत होकर उसके घोड़े रणमें ही मर गये।

ाख्या—ततः युद्धोन्मत्तमरणानन्तरम्, त्रिशिराः रावणिः, पवनात्मजे
ा, शक्तिं प्रहरणम्, अबभ्राजत् अदीदिपत्। हनुमता वायुपुत्रेण, क्षताः
ः, तस्य त्रिशिरसः, वाजिनः अश्वाः, रणे युद्धे, अमृषत मृताः।

ङन्तः—'भ्राज० ७।४।३' इति ह्रस्वभावपक्षे रूपम्। मृङ् प्राणत्यागे तुदादिः।

च्यपरिवर्तनम्—त्रिशिरसा शक्तिरभ्राजि। वाजिभिरमारि।। ८३।।

अस्रसच् चाऽऽहतो मूर्ध्नि, खड्गं चाऽजीहरद् द्विषा।
प्राणानौज्झीच् च खड्गेन छिन्नस् तेनैव मूर्धभिः।। ८४।।

न्वयः—( त्रिशिराः ) मूर्ध्नि ( हनुमता ) आहतः अस्रसत् ( रथात् ),
खड्गं च अजीहरत्, तेनैव खड्गेन छिन्नैः मूर्धभिः प्राणान् औज्झीत् च।

हिन्दी—हनुमान्के द्वारा शिरपर आघात होनेके कारण त्रिशिरा रथसे
ाड़ा और शत्रुद्वारा अपनी तलवार अपहरण करवादी। और उसी तल-
अपने शिरके कट जाने से उसने प्राण भी छोड़ दिये।

**व्याख्या**—त्रिशिराः रावणिः, मूर्ध्नि शिरसि, हनुमता वायुसुते ताडितः सन्, रथात् स्यन्दनात्, अस्रसत् अध्वसत्। द्विषा हनुमत असिम्, अजीहरत् हारितवान्। तेनैव हारितेन, खड्गेन असिना, छि मूर्धभिः मस्तकैः, प्राणान् असून्, औज्झीत् अत्याक्षीत्।

**तिङन्तः**—स्रंसु ध्वंसु अधःपतने ( भ्वा०द्युतादिः )। अस्रसत्–द्यु अङ्, 'अनिदितां०६।४।२४' इति न–लोपः। 'हृक्रोरन्यतरस्याम् १।४ वा कर्मत्वं कर्तुः। अजीहरत् हृञो ण्यन्ताल्लुङ्। उज्झ उत्सर्गे (तु०उदात्

**वाच्य०**—आहतेनास्रंसि, खड्गोऽहारि, प्राणा औज्झिषत ॥ ८४

सम्प्रति युग्मेनातिकायं वर्णयति—

मत्तेनाऽमारि संप्राप्य शरभाऽस्तां महा-गदाम्।
सहस्र-हरिणाऽक्रीडीदतिकायस् ततो रणे ॥ ८५ ॥
रथेनाऽविव्यथच् चाऽरीन्, व्यचारीच् च निरङ्कुशः।
विभीषणेन सोऽख्यायि राघवस्य महा-रथः ॥ ८६

**अन्वयः**—शरभास्तां महागदां सम्प्राप्य मत्तेन अमारि। ततः रणे सहस्रहरिणा रथेन अक्रीडीत्, अरीन् च अविव्यथत्, निरङ्कुशः व सः महारथः विभीषणेन राघवस्य अख्यायि।

**हिन्दी**—शरभ कपिसेनापति की फेंकी गदाके प्रहारको पाकर म गया। इसके पश्चात् अतिकाय हजार घोड़े वाले रथसे रणमें खेलने शत्रुओंको व्यथित करने लगा तथा निरङ्कुश हो घूमने लगा। उस के विषयमें विभीषणने रामचन्द्र को बताया।

**व्याख्या**—शरभेन सेनापतिना, अस्तां क्षिप्तां, महागदां तन्ना सम्प्राप्य आसाद्य, मत्तेन राजकुमाररक्षकेण, अमारि मरणं प्रापि। न्तरम्, अतिकायः राजकुमारः, रणे युधि, सहस्रहरिणा सहस्रहयेन, रथेन अक्रीडीत् व्यहार्षीत्। असीन् रिपून्, अविव्यथत् अपीपिडत्। निरङ्कुशः व्यचारीत् अभ्रमीत्। स महारथः महारथीति, विभीषणेन रावणभ्रा वस्य रामस्य, अख्यायि कथितः। ( राघवस्येति सम्बन्धे षष्ठी )।

**तिङन्तः**—अमारि इति भावे मृङः लुङ्। अचारीत् रान्ता वृद्धिः उ यीति कर्मणि लुङ्।

**समासः**—शरभेन अस्ता शरभास्ता, ताम्। सहस्रं हरयो यत्र हरिः रथः। निर् नास्ति अङ्कुशो यस्य सः। महान् रथो यस्य सः।

च्यपरिवर्तनम्—मत्तोऽमृत, अतिकायेनाक्रीडि, अरयोऽव्यथिषत, निरङ्-
य्यचारि। विभीषणः तं महारथम् आख्यत् ॥ ८५-८६ ॥

**अतस्तम्भदयं वज्रं, स्वयम्भुवमतूतुषत् ।**
**अशिक्षिष्ट महाऽस्त्राणि, रणेऽरक्षीच्च राक्षसान् ॥ ८७ ॥**

न्वयः—विभीषणोऽग्रेऽप्याख्याति—अयं वज्रम् अतस्तम्भत्, स्वयम्भुवम्
त्, महास्त्राणि अशिक्षिष्ट, रणे राक्षसान् अरक्षीत् ।

न्दी—विभीषणने आगे भी कहा—इसने ( अतिकायने ) वज्रको भी
ा था, ( तपस्यासे ) ब्रह्माजीको सन्तुष्ट किया है। बड़े-बड़े अस्त्रोंको
सीखा है तथा रणमें राक्षसोंकी रक्षा की है।

ाख्या—अग्रेऽपि तथैव विभीषणो वक्ति—अयम् अतिकायः, वज्रम् इन्द्रा-
अतस्तम्भत् स्तम्भितवान् । स्वयम्भुवम् ब्रह्माणम्, अतूतुषत् उग्रेण तपसा
वान् । महाऽस्त्राणि दिव्यास्त्राणि, अशिक्षिष्ट शिक्षितवान् । रणे संग्रामे,
न् क्षपाटान्, अरक्षीत् अगोप्सीत् ।

ङन्तः—स्तम्भु स्कम्भु प्रतिष्टम्भे ( क्र्या० स्वादिगी सौत्री धातू उदा-
त्तौ, तत्र ण्यन्तस्य स्तम्भे रूपम् )। शिक्ष् विद्योपादाने ( उदात्तानुदात्तेत्
)। 'नेटी'ति हलन्तवृद्धिनिषेधः—अरक्षीत् ।

ाच्यपरिवर्तनम्—अनेन वज्रमस्तम्भि, ब्रह्माऽतोषि, महास्त्राणि
क्षत, राक्षसा अरक्षिषत ॥ ८७ ॥

**अध्यगीष्टाऽर्थ-शास्त्राणि, यमस्याऽह्नोष्ट विक्रमम् ।**
**देवाऽऽहवेष्वदीपिष्ट नाऽजनिष्टाऽस्य साध्वसम् ॥ ८८ ॥**

न्वयः—अर्थशास्त्राणि अध्यगीष्ट, यमस्य विक्रमम् अह्नोष्ट, देवाहवेषु
ष्ट, अस्य साध्वसम् न अजनिष्ट ।

हिन्दी—इसने अर्थशास्त्र पढ़े हैं, यमराजके विक्रमको व्यर्थ किया है,
ओंके साथ युद्धमें सुशोभित हुआ है। इसको भय तो पैदा ही नहीं हुआ।

याख्या—अयम् अतिकायः, अर्थशास्त्राणि पराभिसन्धानार्थानि, अध्यगीष्ट
। यमस्य कृतान्तस्य, विक्रमं सामर्थ्यम्, अह्नोष्ट अपानैषीत् । देवाहवेषु
ामेषु, अदीपिष्ट अद्युतत् । अस्यातिकायस्य, साध्वसं भयं, न नहि, अज-
द्धि उत्पन्नम् ।

तङन्तः—अधिपूर्वस्येङः 'विभाषा० २।४।५०' इति इङो गाङादेशः। ह्नुङ्
ने(अदादिः ङिदनुदात्तः)। 'दीपजन०३।१।६१' इति चिणोऽभावपक्षे रूपम्।

**वाच्यपरिवर्तनम्**—अनेनार्थशास्त्राण्यध्यायिषत, विक्रमोऽह्ना
साध्वसेनाजनि ॥ ८८ ॥

एष रावणिरापादि वानराणां भयङ्करः ।
आह्वताऽथ स काकुत्स्थं धनुश् चाऽपुस्फुरद् गुरु ॥ ८९

**अन्वयः**—वानराणां भयङ्करः एष रावणिः आपादि ( सम
इत्यन्तम् विभीषणवाक्यम्) । अथ स काकुत्स्थम् आह्वत, गुरु धनुश्च

**हिन्दी**—वानरोंके लिये भयङ्कर यह अतिकाय समीप आ
तक विभीषणका वाक्य है)। इसके बाद इसने रामचन्द्रको ललकारा
धनुषको खींचा ।

**व्याख्या**—वानराणां कपीनां, भयङ्करः त्रासकारी, एषः
आपादि अन्तिकम् आगतः (इत्यन्तम् विभीषणवचः) । अथ अनन्तर
कायः, काकुत्स्थं रामम्, आह्वत आहूतवान् । गुरु दीर्घं, धनुः शरा
स्फुरत् स्फारितवान् ।

**तिङन्तः**—अपादि **'चिण् ते पदः** ३।१।६०' इति चिण् । आह्वत
३।१।५४'इत्यङ्। अपुस्फुरत्–**'चिस्फुरोर्णौ**६।१।५४'इत्यात्वाभावपक्षे

**वाच्यपरिवर्तनम्**—भयङ्करेण रावणिना आपादि । तेन काकुत्स
गुरु धनुः अस्फारि, अस्फोरि वा ॥ ८९ ॥

सौमित्रिः सर्प-वत् सिंहमार्दिदत् तं महाऽऽहवे ।
तौ प्रावीवृततां जेतुं शर-जालान्यनेकशः ॥ ९० ॥

**अन्वयः**—सौमित्रिः महाहवे तं सिंहं सर्पवत् आर्दिदत् । तौ जे
शरजालानि प्रावृतताम् ।

**हिन्दी**—लक्ष्मणने संग्राममें सिंहको सर्पके समान उसे पी
उन दोनों ने परस्पर जीतनेके लिये अनेक बार बाणोंके जाल बि

**व्याख्या**—सौमित्रिः लक्ष्मणः, महाहवे घोरयुद्धे, तम् आतिक
शार्दूलं,सर्पवत् भुजङ्गवत्, आर्दिदत् हिंसितवान् । तौ लक्ष्मणातिकाय
प्राप्तुमनेकशो बहुवारं, शरजालानि बाणवर्षाम्, प्रावीवृतताम्, प्राव

**तिङन्तः**—अर्द हिंसायाम् इति चौरादिकाच्चङा दि–मात्रस्य
वृतेर्ण्यन्तस्य लुङि **'उर्ऋत्** ७।४।७' इत्यरोऽपवादः ऋत् । पक्षेऽरि
स्वविधायकमेव सूत्रम् इररारामपवादत्वात् ।

**वाच्य०**—सौमित्रिणा स आर्दि. ताभ्यां शरजालानि प्रावर्ति

**अच्छैत्तां स महाऽऽत्मानौ, चिरमश्रमतां न च ।**
**तथा तावास्यतां बाणानतानिष्टां तमो यथा ॥ ९१ ॥**

वयः—महात्मानौ परस्परस्य शरजालानि अच्छैत्ताम्, चिरं न अश्रमतौ तथा बाणान् आस्यताम् यथा तमोऽतानिष्टाम् ।

न्दी——उन महात्माओंने परस्पर शरजालोंको काट डाला, देर तक थके । उन्होंने ऐसे बाणोंको फेंका मानो अन्धकार फैला दिया ।

ख्या—महात्मानौ महाप्राणौ, तौ लक्ष्मणातिकायौ, परस्परस्य अन्योन्यस्य, ानि बाणसमूहान्, अच्छैत्ताम् छिन्नवन्तौ । चिरं बहुकालं युध्यमानावपि, अश्रमताम् श्रान्तावभूताम् । तौ लक्ष्मणातिकायौ, तथा तेन प्रका- णान् शरान्, आस्यताम् क्षिप्तवन्तौ, यथा येन प्रकारेण, तमोऽन्धकारम्, टाम् अतनिष्टाम् ।

ङन्तः—अच्छैत्ताम्—अङभावपक्षे सिचो लोपः । श्रमु श्रान्तौ, पुषादित्वादङ्। म्—अङि अस्यतेस्थुक्। 'अतो हलादेः०७।२।७' इति वा वृद्धिः—अतानिष्टाम्। च्यपरिवर्तनम्—ताभ्याम् शरजालानि अच्छित्सत, नाश्रामि । तथाऽसिषत यथाऽतानि तमः ॥ ९१ ॥

**सौर्याऽऽग्नेये व्यकारिष्टामस्त्रे राक्षस-लक्ष्मणौ ।**
**ते चोपागमतां नाशं समासाद्य परस्परम् ॥ ९२ ॥**

न्वयः——राक्षस-लक्ष्मणौ सौर्याग्नेये अस्त्रे व्यकारिष्टाम् । ते परस्परं द्य नाशम् उपागमताम् ।

न्दी——अतिकाय और लक्ष्मणने सौर्य तथा आग्नेय अस्त्रोंको फेंका । वे ापसमें टकराकर नष्ट हो गये ।

ाख्या——राक्षसलक्ष्मणौ अतिकायसौमित्री, सौर्याग्नेये आदित्यानले, अस्त्रे व्यकारिष्टाम् विक्षिप्तवन्तौ । ते उभे अपि अस्त्रे, परस्परम् अन्योऽ- समासाद्य प्राप्य, नाशं लोपम्, उपागमताम् आस्ताम् ।

ङन्तः——कॄ विक्षेपे ( तुदादिरुदात्तोदात्तेत् ) । अगमताम् लृदित्वादङ् । च्यपरिवर्तनम्——राक्षसलक्ष्मणाभ्यां अस्त्रे व्यकारिषाताम्, ताभ्यां नाश मि ॥ ९२ ॥

**अबिभ्रजत् ततः शस्त्रमैषीकं राक्षसो रणे ।**
**तदप्यध्वसदासाद्य माहेन्द्रं लक्ष्मणेरितम् ॥ ९३ ॥**

न्वयः——ततः राक्षसः रणे ऐषीकम् शस्त्रम् अबिभ्रजत्, तदपि लक्ष्मणेरितम् म आसाद्य अध्वसत् ।

**हिन्दी**—तब राक्षसने रणमें ऐषीक शस्त्रका प्रयोग किया। व द्वारा प्रयुक्त माहेन्द्र शस्त्रको पाकर नष्ट हो गया।

**व्याख्या**—ततः तदनन्तरम्, राक्षसोऽतिकाय, एषीकम् ऐषीक प्रहरणम्, अबिभ्रजत् अदिदीपत्। तद् अपि तन्क्षिप्तम् शस्त्रं, सौमित्रिनुन्नम्, माहेन्द्रम् शाक्रम् शस्त्रम्, आसाद्य प्राप्य, अध्वसत्

**तिङन्तः**—टुभ्राजृ दीप्तौ इति ण्यन्ताच्चङि अबिभ्रजत्। ७।४।३' इत्युपधाह्रस्वः। अध्वसत्–ध्वंसु धातोः द्युतादित्वादङ् न

**वाच्यपरिवर्तनम्**—राक्षसेन शस्त्रम् अभ्राजि, तेनाध्वंसि॥ ९

ततः सौमित्रिरस्मार्षीददेविष्ट च दुर्-जयम्।
ब्रह्मास्त्रं, तेन मूर्धानमदध्वंसन् नर-द्विषः॥ ९४॥

**अन्वयः**—ततः सौमित्रिः दुर्जयं ब्रह्मास्त्रम् अस्मार्षीत्, तच्च तेन नरद्विषः मूर्द्धानम् अदध्वंसत्।

**हिन्दी**—तब लक्ष्मणने दुर्जय ब्रह्मास्त्रका स्मरण किया, वह प्र उससे राक्षसके मस्तकको लक्ष्मणने काट डाला।

**व्याख्या**—ततः तदनन्तरम्, सौमित्रिः लक्ष्मणः, दुर्जयं दुर्लङ्घ्य ब्रह्मदैवतमस्त्रम्, अस्मार्षीत् स्मृतवान्। तत् अस्त्रम्, अदेविष्ट अ ब्रह्मास्त्रेण, नरद्विषः नृशत्रोः, मूर्धानम् शिरः, अदध्वंसत् अपीपतत्

**तिङन्तः**—देवृ, तेवृ देवने (भ्वा॰ उदात्तानुदात्तेतौ)। धा त्वादत्र द्योतनम् अर्थः। ध्वंसेर्ण्यन्ताच्चङ्।

**वाच्य॰**—सौमित्रिणा अस्मारि ब्रह्मास्त्रम्, तेनादेवि। मूर्द्धा अ

ततोऽक्रन्दीद् दशग्रीवस् तमाशिश्वसदिन्द्रजित्।
निरयासीच् च संक्रुद्धः, प्रार्चिचच् च स्वयम्भुवम्॥ ९

**अन्वयः**—ततः दशग्रीवः अक्रन्दीत्। तम् इन्द्रजित् आशिश्वस निरयासीत्, स्वयम्भुवम् प्रार्चिचत् च।

**हिन्दी**—तब रावण रोने लगा। उसे मेघनादने आश्वासन दिय होकर बाहर निकला और (रणार्थं) ब्रह्माजीकी खूब पूजा की।

**व्याख्या**—ततः अतिकायमरणानन्तरम्, दशग्रीवः रावणः, अक्र इन्द्रजित् मेघनादः, तम् रावणम्, आशिश्वसत् आश्वासितवान्। सं विष्टः सन्, निरयासीत् निरगात् गृहादित्यर्थः। स्वयम्भुवम् ब्रह्माण प्रपूजितवान्।

**तिङन्तः**—आ श्वसेर्ण्यन्ताच्चङ्। नि पूर्वस्य या धातोरादन्तात् सगिटौ। र्चं पूजायाम् इति चौरादिकस्यार्चेः चङ्, चि-मात्रस्य द्वे भवतः।

**वाच्यपरिवर्तनम्**—दशग्रीवेणाक्रन्दि। इन्द्रजिता स आश्वासि। संक्रुद्धेन रयायि। स्वयम्भूः प्रार्चि ॥ ९५ ॥

**अहौषीत् कृष्णवर्त्मानं समयष्टाऽस्त्र-मण्डलम्।**
**सोऽलब्ध ब्रह्मणः शस्त्रं स्यन्दनं च जयाऽऽवहम् ॥ ९६ ॥**

**अन्वयः**—सः कृष्णवर्त्मानम् अहौषीत्, अस्त्रमण्डलम् समयष्ट। ब्रह्मणः स्त्रम् जयावहम् स्यन्दनं च अलब्ध।

**हिन्दी**—उसने अग्निदेवको हव्यसे प्रसन्न किया एवम् अस्त्रमण्डलकी पूजा- ी। (तब) ब्रह्मास्त्र तथा जयशील रथको प्राप्त किया।

**व्याख्या**—सः इन्द्रजित्, कृष्णवर्त्मानम् अग्निम्, अहौषीत् हुतवान् (हव्येन तर्पि- वान्)। अस्त्रमण्डलम् आयुधग्रामम्, समयष्ट पूजितवान्। ब्रह्मणः शस्त्रम् ब्रह्मास्त्र- ामकम् शस्त्रम्, जयावहम् विजयप्रदम्, स्यन्दनं रथम्, च, अलब्ध लब्धवान्।

**वाच्यपरिवर्तनम्**—तेन कृष्णवर्त्मा अहावि, अस्त्रमण्डलं समयाजि। ब्रह्मा- त्रं स्यन्दनः च अलम्भि ॥ ९६ ॥

**तमध्यासिष्ट दीप्राऽग्रममोदिष्ट च रावणिः।**
**छन्न-रूपस् ततोऽकर्तीद् देहान् रावणविद्विषाम् ॥ ९७ ॥**

**अन्वयः**—रावणिः दीप्राग्रं तं स्यन्दनम् अध्यासिष्ट, अमोदिष्ट च। ततः न्नरूपः रावणविद्विषां देहान् अकर्तीत्।

**हिन्दी**—मेघनाद तो उज्ज्वल अग्रभागवाले उस रथपर चढ़ा और खुश आ। वह छिप कर रावणके शत्रुओंके देहोंको काटने लगा।

**व्याख्या**—रावणिः मेघनादः, दीप्राग्रम् उपरिरत्नपूरितम्, तं ब्रह्मदत्तं, थं स्यन्दनं, अध्यासिष्ट अध्यष्ठात्, अमोदिष्ट अमुदत् च। छन्नरूपः अदृश्यः न्, रावणविद्विषाम् दशास्यारीणां, देहान् कायान्, अकर्तीत् छिन्नवान्। ावणि-विद्विषाम् इति पाठे देवान्तकादि-विद्विषाम् इति ज्ञेयम्।

**तिङन्तः**—'अधिशीङ्० १।४।४६' इति कर्मत्वम्। कृती छेदने (तु० ुचादिः सेट्)।

**वाच्यपरिवर्तनम्**—रावणिनाऽध्यासि स दीप्राग्रः, अमोदि च। छन्नरूपेण हाः अकर्तिषत ॥ ९७ ॥

**सप्त-षष्टिं प्लवङ्गानां कोटीर् बाणैरसूषुपत् ।**
**निशाऽन्ते रावणिः क्रुद्धो राघवौ च व्यमूमुहत् ॥ ९८**

**अन्वयः**—क्रुद्धः रावणिः निशान्ते प्लवङ्गानां सप्तषष्टिं असूषुपत्, राघवौ च अमूमुहत् ।

**हिन्दी**—कुपित हुए मेघनादने रात्रिके अन्त होते होते ६७ सं वानरोंको मारकर सुला दिया और राम लक्ष्मणको भी मूर्च्छित

**व्याख्या**—क्रुद्धः कुपितः, रावणिर्मेघनादः, निशान्ते शेषरा कोटीः तावत्संख्याकाः प्लवङ्गानां वानराणाम् कोटीः, असूषुपत् व्य स्वापितवान् । राघवौ रामलक्ष्मणौ च, अमूमुहत् अमुमूर्छत् ।

**तिङन्तः**—'स्वापेश्चङि ६।१।१८' इति सम्प्रसारणम् । ण्यन्ता अमूमुहत् ।

**वाच्य०**—रावणिना कोटयः अस्वापिषत । राघवावमोहिषाता

**अपिस्फवत् स्व-सामर्थ्यमगूहीत् सायकैर् दिशः ।**
**अघोरीच् च महा-घोरं, गत्वा प्रैषीच् च रावणम् ॥ ९९**

**अन्वयः**—स स्वसामर्थ्यम् अपिस्फवत्, सायकैः दिशः अगूहीत्, अघोरीत्, गत्वा च रावणं प्रैषीत् ।

**हिन्दी**—उसने अपने सामर्थ्यको बढ़ाया, बाणोंसे दिशाओंको बड़ा भयानक शब्द किया और जाकर ( अपनी करामात दिखा रावणको भेजा ।

**व्याख्या**—रावणिः मेघनादः, स्वसामर्थ्यं निजपराक्रमम् ( ई हम् इति ), अपिस्फवत् अवर्द्धत । सायकैः बाणैः, दिशः काष्ठाः, दितवान् (अच्छदत्) । महाघोरम् अतिक्रूरम्, अघोरीत् अशब्दीत् । प्राप्य च, रावणं स्वपितरम्, प्रैषीत् प्रेषितवान् (गच्छ पश्य मे परा

**तिङन्तः**—स्फायी, ओप्यायी वृद्धौ (भ्वा० उदात्तानुदात्तेतौ) । 'स्फायो वः ७।३।४१' इति वादेशः । गुहू संवरणे । 'ऊदुपधाया गोह इत्यूत्वम्—अगूहीत् । घुर शब्दे ( तु० उदात्तोदात्तेत् ) ।

**वाच्यपरिवर्तनम्**—तेन अस्फायि सामर्थ्यम्, दिशोऽगूहिषत । अ रावणः तेन प्रैषि ॥ ९९ ॥

युग्मेन विभीषणकृत्यं वक्ति—

**विभीषणस् ततोऽबोधि स-स्फुरौ राम-लक्ष्मणौ ।**
**अपारीत् स गृहीतोल्को हत-शेषान् प्लवङ्गमान् ॥ १०**

**'मा शोचिष्ट, रघु-व्याघ्रौ नाऽमृषातामिति ब्रुवन् ।**
**अवाबुद्ध स नीलादीन् निहतान् कपि-यूथपान् ॥ १०१ ॥**

चयः—ततो विभीषणः रामलक्ष्मणौ सस्फुरौ अवोधि । गृहीतोल्कः सः प्लवङ्गमान् 'मा शोचिष्ट रघुव्याघ्रौ न अमृषाताम्' इति ब्रुवन् प्रीणितवान् । स नीलादीन् कवियूथपान् निहतान् अवाबुद्ध ।

ो—इसके बाद विभीषणने रामलक्ष्मणको चेतना प्राप्त होते हुए देखा । ल ले-मरनेसे बचे वानरोंको 'शोक मत करो राम-लक्ष्मण मरे नहीं हैं' हुए प्रसन्न किया। उन्होंने नील प्रभृति सेनापतियोंको मरा हुआ जाना।

ा—ततः तदनन्तरम्, विभीषणः भाविलङ्केशः, रामलक्ष्मणौ उभौ, चेतनौ, अबोधि अज्ञासीत् । गृहीतोल्कः आदत्तप्रकाशः, सः विभीषणः, मृतावशिष्टान्, प्लवङ्गमान् वानरान्, 'मा शोचिष्ट मा सदत, रघु- मलक्ष्मणौ, न नहि अमृषाताम् मृतौ' इति ब्रुवन्, अपारीत् प्रीणित- विभीषणः, नीलादीन् नील-प्रभृतीन्, कपियूथपान् वानरसेनापतीन्, ृतान्, अवाबुद्ध अज्ञासीत् ।

तः—पृ पालनपूरणयोः (जु० क्र्या० चु० उदात्तोदात्तेत्) । धातूना- ा प्रीणनमर्थः । अबोधि, अबुद्ध इति 'दीप० ३।२।६१' इति णिच्- दाहरणम् ।

परिवर्तनम्—विभीषणेन अबोधि, प्लवङ्गमा अपारिषत । ब्रुवता कपयः निहता अबोधिषत ॥ १००–१०१ ॥

**तत्रेषज् जाम्बवान् प्राणीदुदमीलीच् च लोचने ।**
**पौलस्त्यं चाऽगदीत् कच्चिदजीवीन् मारुताऽऽत्मजः ॥ १०२ ॥**

ः—तत्र जाम्बवान् ईषत् प्राणीत्, लोचने उदमीलीत् च । 'मारुता- ावीत् कच्चित्' इति पौलस्त्यं च अगदीत् ।

—वहाँ पर जाम्बवान्ने भी थोड़ी साँस ली, नेत्र भी खोले । जीते हैं क्या ? ऐसा विभीषणसे पूछा ।

ख्या—तत्र सर्वेषु मूर्च्छितेषु, जाम्बवान् वृद्धो मन्त्री, ईषत् मनाक्, प्राणीत् ,लोचने नेत्रे,उदमीलीत् उदजीघटत् च। "मारुतात्मजः हनुमान्,अजीवीत् कच्चित् (इति प्रश्ने ननु)" इति पौलस्त्यं विभीषणं च, अगदीत् अगादीत्।

ङन्तः—अन प्राणने ( अ० उदात्तोदात्तेत् ) । 'अनितेः ८।४।१९' इति । मील, क्ष्मील निमीलने ( तु० उदात्तोदात्तेत् ) । 'अतो हलादेः ७।२।७' पाक्षिकी अवृद्धिः अगदीत ।

**वाच्यपरिवर्तनम्**—जाम्बवता प्राणि, लोचने अमीलिषाता
जेन अजीवि । अगादि पौलस्त्यः ॥ १०२ ॥

तस्य क्षेमे महा-राज ! नाऽमृष्मह्यखिला वयम्,
पौलस्त्योऽशिश्रवत् तं च जीवन्तं पवनाऽऽत्मजम् ॥

**अन्वयः**—हे महाराज ! तस्य क्षेमे अखिला वयम् न अमृ
तं च जीवन्तं पवनात्मजम् अशिश्रवत् ।

**हिन्दी**——हे महाराज ! उनके जीते जी सभी हमलो
विभीषणने उनसे ( जाम्बवान्से ) उन्हें जीता बताया ।

**व्याख्या**—( जाम्बवान् विभीषणं वक्ति ) हे महाराज !
तस्य हनूमतः, क्षेमे जीवति, अखिलाः सर्वे, वयं वानराः, न
मृताः, जीवाम एव । पौलस्त्यः विभीषणः, तं जाम्बवन्तं, पवना
जीवन्तं प्राणवन्तम्, अशिश्रवत् श्रावितवान् ।

**तिङन्तः**—अमृष्महि । 'आशंसायां भूतवच्च ३।३।१
शृणोतेर्ण्यन्तात् चङ् । 'स्रवति-शृणोति० ७।४।८१' इति इत्व

**वाच्यपरिवर्तनम्**—न अस्माभिरमारि । पौलस्त्येन स ज
त्मजम् अश्रावि, तं जीवन् पवन् पवनात्मजो वा ॥ १०३ ॥

अग्रे युग्मेन हनुमन्तं हिमवत्पृष्ठे प्रेषणमाख्याति—

आयिष्ट मारुतिस् तत्र, तौ चाऽप्यहृषतां ततः ।
प्राहैष्टां हिमवत्-पृष्ठे सर्वौषधि-गिरिं ततः ॥ १०
तौ हनूमन्तमानेतुमोषधीं मृत-जीविनीम् ।
सन्धान-करणीं चाऽन्यां वि-शल्य-करणीं तथा ॥

**अन्वयः**—तत्र मारुतिः आयिष्ट । ततः तौ अपि च अहृ
(हृष्टौ) तौ हनुमन्तम् मृतसञ्जीविनीम् सन्धानकरणीम् तथा वि
अन्यां च ओषधीम् आनेतुम् हिमवत्पृष्ठे सर्वौषधिगिरिम् प्राहैष्टा

**हिन्दी**—वहाँ हनुमान्जी आये । तब वे दोनों भी खुश हुए ।
उन दोनोंने हनूमान्जीको मृतसञ्जीविनी, सन्धानकरणी, विश
दूसरी भी ओषधियोंको लानेके लिये हिमालयके पृष्ठपर सर्वौषधि
पर्वतपर भेजा ।

**व्याख्या**—तत्र स्थाने, मारुतिः हनुमान्, आयिष्ट आगमत् ।
रम्, तौ विभीषण-जाम्बवन्तौ, च अपि, अहृषताम् प्रासदताम् । त
उभौ, हनूमन्तं मारुतिम्, मृतसञ्जीविनीं या मृतमपि जीवयति त

क्षतस्य सन्धानं करोति, विशल्यकरणीम् या विशल्यं करोति प्र,
ओषधीं लताविशेषम्, आनेतुम् आवोढुम्, हिमवत्पृष्ठे हिमालया-
सर्वौषधिगिरिम् तन्नामपर्वतखण्डम्, प्राहैष्टाम् प्रैषिष्टाम् ।

:—हृष तुष्टौ दि० पुषादिः ( उदात्तोदात्तेत् ) । हि गतौ ( स्वा०
त्तेत् ) ।

—सर्वा ओषधयो यत्र स सर्वौषधिः, स चासौ गिरिः—इति
कर्मधारयः । मृतजीविनीप्रभृतिषु सर्वत्रैव षष्ठीतत्पुरुषः ।

वर्तनम्—मारुतिना आयि, ताभ्यामहर्षि च । सर्वौषधिगिरिः
ान् ताभ्याम् ॥ १०४-१०५ ॥

दपाति नभस् तेन, स च प्रापि महा-गिरिः ।
तस्मिन्प्राज्वालिषू रात्रौ महौषध्यः सहस्र-शः ॥ १०६ ॥

न नभः प्रोदपाति, स महागिरिः प्रापि । यस्मिन् सहस्रशः
प्राज्वालिषुः ।

मान् आकाश पर उछले । उस महागिरि पर पहुँच गये, जहाँ
यां रात्रिमें चमक रही थीं ।

—तेन हनूमता, नभः व्योम, प्रोदपाति उदडायि । सः प्रसिद्धः,
र्वौषधिगिरिः, प्रापि प्राप्तोऽभूत् । यस्मिन् गिरौ, सहस्रशः असंख्या-
: दिव्यौषधयः, प्राज्वालिषुः अद्युतन् ।

—'अतो ल्रान्तस्य ७।२।२' इति वृद्धिः 'नेटी' त्यस्यापवादिका ।

वर्तनम्—स नभः उदपतत्, महागिरिम् प्रापत् तम् । महौषधीभिः
१०६ ॥

रचायि यदा भेदो नौषधीनां हनू-मता ।
र्व एव समाहारि तदा शैलः सहौषधिः ॥ १०७ ॥

—हनूमता यदा ओषधीनां भेदो न निरचायि, तदा सहौषधिः सर्व
ाहारि ।

—जब हनुमान् ओषधियोंके भेदका निर्णय न कर सके, तब
साथ सारा पर्वत ही उठा लाए ।

ा—यदा यदानीं, हनूमता मारुतिना, ओषधीनाम् एकरूपतया
, भेदः पार्थक्यं, न नहि, निरचायि निरणायि । तदा तदानीं, दिव्यौ-
:, सर्वः सम्पूर्णः, शैलः गिरिरेव, निश्चयेन समाहारि उदवाहि ।

**तिङन्तः**—निपूर्वस्य चिञ् धातोः कर्मणि लुङ्। समा
तादृगेव।

**वाच्यपरिवर्तनम्**—हनूमान् भेदम् न निचैषीत्, सहौषधि
समाहार्षीत्॥ १०७॥

**प्राणिषुर् निहताः केचित् केचित् तु प्रोदमीलिषुः।**
**तमोऽन्ये हासिसुर् योधा व्यजृम्भिषत चाऽपरे।**

**अन्वयः**—(शैलाहरणात्)-(महौषधिप्रयोगेण) निहताः के
केचित् प्रोदमीलिषुः। अन्ये योधाः तमः अहासिषुः, अपरे च व्य

**हिन्दी**—औषधके प्रयोगसे मरे हुए कुछ तो जी उठे, कुछों
कुछोंकी मूर्छा टूटी तथा अन्य लोगोंने अङ्गड़ाई ली।

**व्याख्या**—(शैलाहरणात्) (औषधप्रयोगेण) निहताः मृ
प्राणिषुः अश्वसिषुः। केचित् कियन्तः, प्रोदमीलिषुः प्रोन्मी
उद्घाटितवन्त इत्यर्थः। अन्येऽपरे, योधाः सैनिकाः, तमः मूछ
अत्यक्षुः। अपरे इतरे, व्यजृम्भिषत जृम्भिकां कृतवन्तः।

**तिङन्तः**—ओहाक् त्यागे (जु० उदात्तेदनुदात्तः)। आ
जभि, जृभि गात्र-विनामे (भ्वा० उदात्तानुदात्तेत्)।

**वाच्यपरिवर्तनम्**—निहतैः कैश्चित् प्राणि, कैश्चित् अश्व
योधैस्तमोऽहायि। अपरैर्व्यजृम्भि॥ १०८॥

**अजिघ्रपंस् तथैवाऽन्यानोषधीरालिपंस् तथा**
**एवं तेऽचेतिषुः सर्वे, वीर्यं चाऽधिषताऽधिक**

**अन्वयः**—तथैव अन्यान् ओषधीः अजिघ्रपन्, तथा अ
सर्वे अचेतिषुः, अधिकं वीर्यम् अधिषत च।

**हिन्दी**—यों ही दूसरोंको ओषधि सुँघाइ गई और कुछको ले
तरह सभी चैतन्यमें आ गये तथा पहलेसे अधिक पराक्रमी हो

**व्याख्या**—तथैव तद्वद् एव, अन्यान् अपरान् कपीन्, ओषधी
अजिघ्रपन् घ्रापयन्ति स्म। तथा आलिपन् लिप्तवन्तः। एवम् इत्थम्
अचेतिषुः लब्धसंज्ञा अभूवन्। अधिकं महत्तरं, वीर्यं पराक्रमम्, अधि

**तिङन्तः**—घ्रा गन्धोपादने (तु० अनुदात्तोदात्तेत्)। तस्य ण्यन्त
चङि 'जिघ्रतेर्वा ७।३।५२' इतीकारो वोपधायाः। आलिपन्-'लि
इत्यङ्। चिती संज्ञाने 'स्थाघ्वोरिच्च १।२।१७'। अभ्यवहरणार्थे अन

वाच्यपरिवर्तनम्—अन्ये ओषधीः अघ्रापिषत । अलेपित । एवं सर्वैरचेति,
वीर्यम् अघायि ॥ १०९ ॥

अजिह्लदत् स काकुत्स्थौ, शेषांश् चाऽजीजिवत् कपीन् ।
हनूमानथ ते लङ्कामग्निना ऽदीदिपन् द्रुतम् ॥ ११० ॥

न्वयः—स हनूमान् काकुत्स्थौ अजिह्लदत् । अन्यान् कपीन् अजीजिवत् ।
हनूमदादयः द्रुतं लङ्काम् अग्निना अदीदिपन् ।

न्दी—हनुमान्ने रामलक्ष्मणको खुश किया । दूसरे वानरों को जिलाया ।
द उन सभीने जल्दी लङ्कामें आग लगा दी ।

ख्या—सः सर्वोपकर्ता, हनूमान् मारुतिः, काकुत्स्थौ रामलक्ष्मणौ,
त ह्लादितवान् । अन्यान् अपरान्, कपीन् वानरान्, अजीविवत् जीवि-
अथ अनन्तरम्, ते हनूमदादयः, द्रुतम् शीघ्रम्, लङ्कां काञ्चनीं पुरीम्,
नादीदिपन् दीपितवन्तः ।

—ह्लादी सुखे च ( भ्वा० उदात्तोऽनुदात्तेत् )। ण्यन्ताच्चङ् ।
इति ह्रस्वपक्षे अदीदिपन् । पक्षान्तरे अदिदीपन् इति ।

म्—हनुमता तेन काकुत्स्थौ अह्लादिषाताम् । कपयोऽन्येऽ-
ङ्काऽदीपि ॥ ११० ॥

मनात्सीत् ततः सैन्यममार्जीद् भल्ल-तोमरम् ।
अमार्क्षीच् चाऽसिपत्राऽऽदीनबभासत् परश्वधान् ॥ १११ ॥

यः—ततः सैन्यं राक्षससेना समनात्सीत्, भल्लतोमरम् अमार्जीत् ।
न् अमार्क्षीत्, परश्वधान् अबभासत् ।

—बाद राक्षससेना तैयार हुई । भाले तोमर प्रभृति हथियार माँजने
तलवार आदि शस्त्रोंको शुद्ध करने लगी । परशुओंको चमकाने लगी ।

ाख्या—ततः लङ्कादाहानन्तरम्, सैन्यं राक्षससेना, समनात्सीत् सम-
भल्लतोमरम् शस्त्रादि, अमार्जीत् अमार्क्षीत् । असिप[illegible]ीन् शस्त्राणि,
त् मृष्टवत् । परश्वधान् परश्वादीनि शस्त्राणि, अबभासत् अदीदिपत् ।

ङन्तः—णह् बन्धने 'नहो धः ८।२।३४' इति हो धत्वे सन्धिः, हलन्त-
मृजूष् शुद्धौ आदादिकस्यानुदात्तोदात्तेतो 'मृजेर्वृद्धिः ७।२।११४' इति
ऊदित्वाद्वेट् । 'भ्राजभास० ७।४।३' इति ह्रस्वाभावपक्षेऽबभासत् ।

च्यपरिवर्तनम्—सैन्येन समनाहि, भल्लतोमरममार्जि । असिपत्रादयोऽ-
त, परश्वधाः अभासिषत च ॥ १११ ॥

कुम्भकर्ण-सुतौ तत्र समनद्धां महा-बली।
निकुम्भश् चैव कुम्भश् च, प्रापतां तौ प्लवङ्गमान्

अन्वयः—तत्र निकुम्भः कुम्भश्चेति महाबली कुम्भकर्णसुतौ तौ प्लवङ्गमान् च प्रापताम् ।

हिन्दी—वहां पर ( राक्षससेनामें ) निकुम्भ ओर कुम्भ बली कुम्भकर्णके लड़के सज धजकर तैयार हुए और वानरोंके

व्याख्या—तत्र राक्षससेनायां, निकुम्भः कुम्भश्चेति नामा अतिबलिनौ, कुम्भकर्णसुतौ वीरपुत्रौ, समनद्धाम् समनत्साताम् ङ्गमान् कपीन्, प्रापताम् प्राप्तौ ।

तिङन्तः—णह धातुर्णोपदेशोऽनुदात्तः स्वरितेच्च । तस्य आत्मनेपदे अनत्साताम् । प्रापतामिति लृदित्वादङ् ।

वाच्य०—महाबलाभ्यां सुताभ्यां समनाहि । प्लवङ्गमास्ता

अगोपिष्टां पुरीं लङ्कामगौप्तां रक्षसां बलम् ।
अत्याक्तामायुधाऽनीकमनैष्टां च क्षयं द्विषः ॥

अन्वयः—(तौ) लङ्कां पुरीम् अगोपिष्टाम्, रक्षसां बलम् धानीकम् अत्याक्ताम्, द्विषः क्षयम् अनैष्टाम् ।

हिन्दी—उन्होंने ( दोनोंने ) लङ्कापुरीको बचा लिया, राक्षस की, आयुधोंके समूहोंको ( शत्रुओंपर ) छोड़ा और शत्रुओंका क्षय

व्याख्या—( तौ कुम्भ-निकुम्भौ ), लङ्कां पुरीं काञ्चनीं नग ष्टाम् अगोपायिष्टाम् । रक्षसां जातूनां, बलं सैन्यम्, अगौप्ताम् आयुधानीकम् प्रहरणसङ्घम्, अत्याक्ताम् असाष्टाम् ( शत्रुसैन्ये ) क्षयम् नाशम्, अनैष्टाम् अनेषाताम् ।

तिङन्तः—गुपू रक्षणे (भ्वा० उदात्तोदात्तेत्)। 'गुपूधूपविच्छि आयाभावपक्षे 'आयादय० ३।१।३१' इति जनिते इटश्चोदित्व रूपाणि । त्यज त्यागे (भ्वा० अनुदात्तः स्वरितेत्)। णीञ् प्रापणे

वाच्यपरिवर्तनम्—ताभ्यां लङ्का पुरी अगोपि, बलम् च कमत्याजि, क्षयोऽमायि ॥ ११३ ॥

अकोकूयिष्ट तत् सैन्यं, प्रपलायिष्ट चाऽऽकुलम् ।
अच्युतच् च क्षतं रक्तं, हतं चाऽभ्यशयिष्ट गाम् ॥

अन्वयः—तत् कपि-सैन्यम् अकोकूयिष्ट, आकुलम् पलायिष्ट । अच्युतत् (अन्तर्भाविण्यन्तप्रयोगोऽयम् अक्षारयदित्यर्थः), हतं गाम्

न्दी— वह कपिसेना बार-बार चिल्लाती रही। पश्चात् व्याकुल होकर यी। क्षत होकर खून बहा रही थी तथा मर कर धराशायी हो गई।

ख्या—तत् पूर्वकथितं, कपीनां वानराणां, सैन्यम् अनीकम्, अकोकूष्ट न पुनः पुनः अकोष्ट। आकुलं व्यग्रं सत् पलायिष्ट अपाक्रमीत्। क्षतं , रक्तं रुधिरम्, अच्युतत् अक्षरत्। अन्तर्भावितण्यन्तप्रयोगः।

न्तः—कुङ् शब्दे (भ्वादिधातोर्यङन्त-प्रयोगः)। 'न कवतेर्यङि ति चुत्व-निषेधः।

—तेन सैन्येन अकोकूयि,आकुलेन पलायि,क्षतेन रक्तमच्योति॥११४॥

अङ्गदेनाऽहसातां तौ युध्यकम्पन-कम्पनौ।
स्यार्दीद् वालिनः पुत्रं प्रजङ्घोऽपि स-मत्सरः॥ ११५॥

न्वयः—युधि अकम्पनकम्पनौ अङ्गदेन अहसाताम्। समत्सरः प्रजङ्घः ः पुत्रम् अभ्यार्दीत्।

११—संग्राममें अकम्पन तथा कम्पन नामके दोनों राक्षस अङ्गदके द्वारा गये। क्रुद्ध प्रजङ्घने भी अङ्गद पर प्रहार किया।

ख्या—युधि संग्रामे, अकम्पन-कम्पनौ इति नामानौ राक्षसौ, अङ्गदेन ण, अहसाताम् अघानिषाताम्। (ततः) समत्सरः क्रुद्धः, प्रजङ्घो नाम बालिनः पुत्रमङ्गदम् अपि, अभ्यार्दीत् प्राहार्षीत्।

न्तः—हन्तेः कर्मणि लुङ्। 'स्यसिच्० ३।३।६२ इति चिणोऽभावपक्षे रूपम्। ०२।४।४३' इति वधादेशाभावेऽपि। अर्द हिंसायाम् इति भ्वादेः सेटो रूपम्।

च्य०—तौ अङ्गदोऽवधीत्। प्रजङ्घेन समत्सरेण पुत्रः अभ्यार्दि॥ ११५॥

तस्याऽप्यबेभिदिष्टाऽसौ मूर्धानं मुष्टिनाऽङ्गदः।
अहार्षीच् च शिरः क्षिप्रं यूपाक्षस्य निराकुलः॥ ११६॥

न्वयः—असौ अङ्गदः तस्यापि मूर्द्धानं मुष्टिना अबेभिदिष्ट। निराकुलो पिः क्षिप्रं यूपाक्षस्य शिरः अहार्षीत्।

दी—उस अङ्गदने उसके (प्रजङ्घके) मस्तकको मुक्केसे बिलकुल फोड़ ौर निराकुल बन्दरने फौरन यूपाक्षके शिरको तोड़ दिया।

ख्या—असौ प्रसिद्धोऽङ्गदः, तस्य प्रजङ्घस्य अपि, मूर्द्धानं मस्तकम्, बद्धकरेण, अबेभिदिष्ट अतिशयेन पुनः पुनः अभैत्सीत्। निराकुलो नाम क्षिपं द्रुतं, यूपाक्षस्य तन्नाम्नो रक्षसः, शिरः मूर्द्धानम्, अहार्षीत्।

तिङन्तः–भिदेर्यङन्तस्य लुङि 'अतो लोपः ६।४।४८' इत्यलो ६।४।४९' इति यलोपे च रूपम् ।

**वाच्य०**—अमुनाङ्गदेन मूर्द्धाऽबेभिदि । निराकुलेन शिरोऽह्रा

शरीरं लोहिताक्षस्य न्यभाङ्क्षीद् द्विविदस् तदा ।
क्रुद्धः कुम्भस् ततोऽभैत्सीन् मैन्दं स-द्विविदं शरैः ।

**अन्वयः**—तदा द्विविदो वानरो लोहिताक्षस्य रक्षसः शरीरं ततः क्रुद्धः रक्षः कुम्भः सद्विविदं मैन्दं वानरं शरैः अभैत्सीत् ।

**हिन्दी**—तब द्विविद नामके वानरने लोहिताक्ष राक्ष डाला। तब क्रुद्ध होकर राक्षस कुम्भने द्विविद सहित मैन्द

**व्याख्या**–तदा तदानीं, द्विविदो नाम कपिः, लोहि देह, न्यभाङ्क्षीत् चूर्णितवान् । ततस्तदनन्तरम्, क्रुद्धः स कर्णसुतः, सद्विविदं द्विविदसहितं, मैन्दं वानरम्, शरैः बा

**तिङन्तः**—भञ्जो आमर्दने ( रु० अनुदात्तोदात्तेत् इत्यस्याङोऽभावे रूपम् ।

**वाच्य०**—द्विविदेन शरीरमभञ्जि । कुम्भेन क्रुद्धेन मैन्दोऽभि

युग्मेनाङ्गदकुम्भकृत्यमाख्याति—

आघूर्णिष्टां क्षतौ, क्ष्मां च तावाशिश्रियतामुभौ ।
मातुलौ विह्वलौ दृष्ट्वा कुम्भं बालि-सुतो नगैः ॥ ११
प्रौर्णावीच्, छर-वर्षेण तानपोहीन् निशा-चरः ।
वानराननैजिहद् रामस् तूर्णं रक्षितुमङ्गदम् ॥

**अन्वयः**—क्षतौ तौ उभौ आघूर्णिष्टाम्, क्ष्माम् आशिश्रयतां च मातुलौ विह्वलौ दृष्ट्वा कुम्भं नगैः प्रौर्णावीत् । निशाचरः तान् श हीत् । रामः अङ्गदं रक्षितुम् तूर्णं वानरान् ऐजिहत् ।

**हिन्दी**—घायल होकर वे दोनों चक्कर खाकर पृथ्वीपर गिर अङ्गदने मामाओंको विह्वल देखकर कुम्भको पर्वतोंसे ढँक दिया । बाणोंकी वर्षा करके उन पर्वतोंको हटा दिया । तब रामने अ लिये जल्द वानरोंको भेजा ।

**व्याख्या**—क्षतौ प्रहृतौ, तौ उभौ, आघूर्णिष्टाम् चक्रवद् भ्रान्त भूमिम्, अशिश्रियताम् आश्रितौ, पतितावित्यर्थः । बालिसुतोऽङ्ग ताराभ्रातृत्वात् मातुर्भ्रातरौ, विह्वलौ उद्विग्नौ, दृष्ट्वा वीक्ष्य, कुम्भं

र्णावीत् प्रौर्णुवीत् । निशाचरः कुम्भः, शरवर्षैः बाणवृष्टिभिः, तान् पौहीत् निरस्तवान् । (ततः) रामः राघवः, अङ्गदं बालिसुतं, रक्षितुं तूर्णमभ्यर्णं, वानरान् कपीन्, ऐजिहत् व्यापारीत् ।

त्तः—श्रिञ् सेवायाम् भौवादिकस्य 'णिश्रिद्रुस्रु० ३।१।४८' इति चङ् । र्गोः १।२।३' इति कित्त्वाभावपक्षे वृद्धिः। ऐजिहदिति ण्यन्तादीहसेश्चङ् ।

्रपरिवर्तनम्—क्षताभ्यामघूर्णि,क्ष्माश्नायि । बालिसुतेन कुम्भः प्रौर्णाचरेण ते औहिषत । रामेण वानरा ऐहिषत ॥ ११८–११९ ॥

स्त सुग्रीवो भ्रातृव्यं शत्रु-संकटात् ।

भङ्गदेनाऽह कौम्भकर्णिं च क्रुद्धः प्राणैरतित्यजत् ॥ १२० ॥

भ्यार्दीव्

: द्रुतं शत्रुसंकटात् भ्रातृव्यम् अत्रास्त । क्रुद्धः मुष्टिना

—युधि अक तित्यजत् ।

: पुत्रम् अ शीघ्र ही शत्रुके सङ्कटसे भतीजेको बचा लिया । क्रुद्ध

—संग्राममें र कुम्भकर्णके पुत्रके प्राण छोड़वा दिये ।

गये । क्रुद्ध ावः कपिसेनापतिः, द्रुतं शीघ्रं, शत्रुसंकटात् रिपुजविपत्तेः, भ्रातृजम्, अत्रास्त अरक्षीत् । क्रुद्धः सन्, मुष्टिना करबद्धपाणिप्रहाभकर्णिम् कुम्भं, प्राणैः असुभिः, अतित्यजत् त्याजितवान् ।

त्तः—त्रैङ् पालन ( भ्वा० अनुदात्तोङित् ) । त्यजेर्ण्यन्ताच्चङ् सन्वत् ।

य०—सुग्रीवेण भ्रातृव्योऽत्रायि । क्रुद्धेन कौम्भकर्णिः अत्याजि ॥१२०॥

निकुम्भो वानरेन्द्रस्य प्राहैषीत् परिघं ततः ।
हनूमांश् चाऽऽपतन्तं तमभाङ्क्षीद् भोगि-भीषणम् ॥ १२१ ॥

यः—ततः निकुम्भः वानरेन्द्रस्य परिघं प्राहैषीत् । हनूमान् आपतणभीषणं तम् अभाङ्क्षीत् ।

ी—बाद निकुम्भने सुग्रीवपर परिघ अस्त्र फेंका । हनूमान्ने बीचमें हुए सर्पके समान भीषण उस अस्त्रको तोड़ डाला ।

ख्या—ततः तदनन्तरम्, निकुम्भः कुम्भभ्राता, वानरेन्द्रस्य सुग्रीवस्य, रिघप्रहरणं, प्राहैषीत् प्रैरिरत् । हनूमान् मारुतिः, आपतन्तम् आणोगिभीषणं सर्पवद् भयानकं, तं प्रहारम्, अभाङ्क्षीत् आमर्दितवान् । नरेन्द्रस्येति सम्बन्धे षष्ठी ) ।

**तिङन्तः**—हि गतौ सौवादिकस्य प्रोपसर्गस्य वृद्धिः। भ
रौधादिकस्य रूपम् ।

**वाच्यपरिवर्तनम्**—निकुम्भेन परिघः प्राहायि । हनूमता
आपतन् अभञ्जि ॥ १२१ ॥

**प्रौर्णुवीत् तेजसाऽरातिमरासीच् च भयंकरम्।**
**ग्रीवां चाऽस्य तथाऽक्राक्षीदजिजीवद् यथा न तम्।**

**अन्वयः**—मारुतिः अरातिम् तेजसा प्रौर्णुवीत्, भयङ्करम्
अस्य ग्रीवाम् तथा अक्राक्षीत् यथा तम् न अजिजीवत् ।

**हिन्दी**—हनूमान्ने तेजसे शत्रुको ढक दिया और भयङ्कर
उसकी गर्दनको ऐसा खींचा कि वह मर ही गया । उसे जीता

**व्याख्या**—मारुतिः हनूमान्, अरातिम् शत्रुम्, तेजसा महस
अभिभूतवान् । भयङ्करं घोरम्, अरासीत् अगर्जीत् । अस्य शत्रोः
तथा तद्वत्, अक्राक्षीत् आकृष्टवान्, यथा यद्वत्, तं शत्रुं, न नहि
जीवन्तं त्यक्तवान्, अमीमरत् इत्यर्थः ।

**तिङन्तः**—'**ऊर्णोतेर्विभाषा** ७।३।९०' इति ङित्वाद् न वृद्धिः
**चर्दुपधस्यान्यतरस्याम्** ६।१।५९' इत्यम् । ततो वृद्धिः—अक्राक्ष
**भास०** ७।४।३' इति ह्रस्वाभावपक्षेऽजिजीवत् ।

**वाच्य०**—अरातिः प्रौर्णावि, अरासि, अकर्षि, अजीवि ॥ १

**समगत कपि-सैन्यं सम्मदेनाऽतिमात्रं,**
**विटप-हरिण-नाथः सिद्धिमौहिष्ट नित्याम् ।**
**नृ-पति-मतिररंस्त प्राप्त-कामेव हर्षात्,**
**रजनि-चर-पतीनां सन्ततोऽतायि शोकः ॥**

**इति भट्टिकाव्ये तिङ्-काण्डे लुङ्-विलसितो नाम पञ्चदशः स**

**अन्वयः**—कपिसैन्यं सम्मदेन अतिमात्रं समगत, विटपहरि
सिद्धिम् औहिष्ट । नृपति-मतिः हर्षात् प्राप्तकामा इव अरंस्त
पतीतां सन्ततः शोकः अतायि ।

**हिन्दी**—सुग्रीवकी सेना आनन्दसे मस्त हो गयी । सु
पा गये । रामचन्द्रकी बुद्धि मानो सीता की प्राप्ति के समान
करने लगी । राक्षसराजका शोक निरन्तर अत्यधिक बढ़ गया ।

**व्याख्या**—कपि-सैन्यं सुग्रीवानीकम्, सम्मदेन हर्षातिरेकेण, स

विटपहरिणनाथः प्लवङ्गमस्वामी, नित्यां परमां, सिद्धि सफलताम् भाविनीम्, ाहिष्ट तर्कितवान् । नृपतिमतिः रामबुद्धिः, प्राप्तकामा सम्पन्नेच्छा, इव मन्ये, र्षात् आनन्दात्, अरंस्त रमते स्म । रजनिचरपतीनां मेघनादादीनां, शोकः न्तापः, सन्ततः अविच्छिन्नः, विस्तृतो वा, अतायि ऐधिष्ट ।

तिङन्तः—'समो गम्यृच्छिभ्याम् १।३।२९' इति तङ् । 'वा गमः १।२।१३' सिचः कित्वे 'अनुदात्तो० ६।४।३७' इति मलोपः । 'ह्रस्वादङ्गात् ८।२।२७' सिचो लोपः समगत । 'दीप० ३।१।६१' इतिं चिण् कर्तरि—अतायि ।

ाच्यपरिवर्तनम्—सैन्येन समगामि, नाथेन सिद्धिरोहि, मत्या अरामि । तायि ॥ १२३ ॥

इति श्रीलुङ्विलसिते राक्षसेन्द्रप्रधानसेनाध्यक्षविनाशो नाम
पञ्चदशः सर्गः समाप्तः ॥ १५ ॥

# अथ षोडशः सर्गः

## ( उपक्रमः )

सर्गेऽस्मिन् तिङन्तकाण्डीयं लृड्विलसितमस्ति। यच्चातीव
भ्वादिगणस्थ-लट्लकारीयप्रत्यये स्य-विकरणयोगेन प्रत्ययनिर्मा
'स्यतासी लृलुटोः ३।१।३३' इति।

| | परस्मैपदे ( क ) | | | आत्मनेपदे | |
|---|---|---|---|---|---|
| प्र. | स्यति | स्यतः | [1]स्यन्ति | स्यते | स्ये |
| म. | स्यसि | स्यथः | स्यथ | स्यसे | स्येथे |
| उ. | [2]स्यामि | स्यावः | स्यामः | स्ये | स्यावहे |

एषु एव प्रत्ययेषु इडनिड्भेदेनैव रूपनिर्माणम्। अनिट्
मावश्यकम् इति पूर्वमुक्तम्। अत्र प्रत्यये ऋदन्तधातूनां हन्धातो
७।२।७०' इति इट् ज्ञेयः। कृत-चृत-च्छृद-तृद-नृतोऽपि पाक्षिक
'सेऽसिचि कृतचृतच्छृदतृदनृतः ७।२।५७' इति। गम् धातोश्च 'ग
७।२।५८' इतीट् ज्ञेयः। सेड्धातूनां सामान्यसूत्रम्–'आर्द्धधा
७।२।३५'। स्नुक्रमोस्तु विशेषसूत्रम्–'स्नुक्रमोरनात्मनेपदनिमि
सेटो ग्रहेस्तु 'ग्रहोऽलिटि दीर्घः ७।२।३७' इति दीर्घः। 'वृतो वा
ॠत् इति छेदः) वृङ्वृञोः ॠदन्तानां तु दीर्घो ज्ञेयः। 'ऋतश्च
४३' इति वेड् भवति। 'लिङसिचोरात्मनेपदेषु ७।२।४२' तथैव
स्वरतिसूतिसूयतिधूञूदितो वा ७।२।४४' इत्यपि। स्वृ-शब्दोपतापयोः षूङ्
अदादिदिवादिस्थयोरुभयोः धूञ्धातोः ऊदितां च पाक्षिक इट्।'
(रध्-नश्-तृप्-दृप्-द्रुह्-मुह्-स्निह्,स्नुह्) अष्टानां च पाक्षिक इट् ज्ञे

---

[1] ( क )—'अतो गुणे ६।१।९७' इति पररूपम्। ( ख )—'टित
३।४।७९' इति सर्वत्र एत्वम्। 'थासः से ३।४।८०' इति से भावः। ( ग )
७।२।८१' इति इत्वे गुणः। ( घ )—'अतो दीर्घो यञि ७।३।१०१' इति
क्रियार्थक्रियोपपदादन्यः शेषः। तत्र शेषे भविष्यति चात् तस्मिन्नपि भवि
त्यर्थः। अन्यत्र सर्गे लृट् प्रयोगो यथा—

[2] २२–२३। २–४० शत्रन्त–प्रयोगः। ३–१२ शानजन्तप्रयोग
शानजन्तः, २९, ४५, ६०। ६–५, ५६, ८२, १३५, १४१, १४२।
९३। ८–११, ५८, ६७–६८, ८९–९१, १२१–१२२, १२९।

र्भ्यः ७।२।५९’ ‘तासि च क्लृपः ७।२।६०’ इत्येषामपि पञ्चानां पाक्षिक इट् तावानेवानुगमो लृङ्विलसिते। रूपनिर्माणप्रकारश्च–सेटो भू धातोः ‘लृट् च ३।३।१३’ इति लृटि अनुबन्धनिवृत्तौ, ‘लस्य ३।४।७७’ ‘तिप्तस्झि० ।७८’ इति तिबादौ विकरणयोगे, अङ्गसंज्ञायाम्, इटि, गुणे, अवादेशे, ये–भविष्यति इत्यादि पदसिद्धिप्रकारः। अन्यस्मिन्नर्थेऽपि लृड् भवतीति तत्रैवोक्तः स्यात्। ‘अभिज्ञावचने लृट् ३।२।११२’ ‘क्षिप्रवचने लृट् ३। इत्यादि। क्रमेणैवोदाहरणानि कियन्ति—करिष्यति, हनिष्यति, कर्ति- ति, गमिष्यति, स्नविष्यति–स्नोष्यति, ग्रहीष्यति, वरीष्यते–वरि- ष्यति–वरिष्यति, तरीष्यति–तरिष्यति, स्वरिष्यति। ‘विप्रतिषेधे परं र ४।२’ इति नित्यमिट्। सविष्यति–सोष्यति, रधिष्यति–रत्स्यति, कल्प्स्यति। अन्येषामनिटां तु ‘एकाच उपदेशेऽनुदात्तात् ७।२।१०’ इति । सृज विसर्गे इति धातोः ‘सृजिदृशोर्झल्यमकिति ६।१।५८’ इति मि स्रक्ष्यति–सर्क्ष्यति। गुणं बाधित्वा प्रत्ययोऽयम् भवति।

रावणविलापोऽष्टाविंशतिं यावत्। तत ऊनत्रिंशत्तश्चतुस्त्रिंशावधि ४) रावणोत्साहगानम्। ततः ३५ पञ्चत्रिंशत्तः सर्गान्तम् (३५–४२) र्मेघनादस्य स्वात्मप्रशंसेति सर्गवृत्तम्।

## ( सर्गारम्भः )

ततः प्ररुदितो राजा रक्षसां हत-बान्धवः।
‘किं करिष्यामि राज्येन, सीतया किं करिष्यते’ ॥ १ ॥

**अन्वयः**—ततः हतबान्धवः ‘रक्षसां राजा’ राज्येन किं करिष्यामि, सीतया करिष्यते ? इत्यादि’ प्ररुदितः ( ‘रोदितुम्’ आरब्धवान् )।

**हिन्दी**—प्रधान सेनाध्यक्षोंके ‘मारे’ जानेपर राक्षसोंका राजा ‘राज्यसे या करूँगा ? सीता से क्या होगा ? इत्यादि’ विलाप करने लगा।

**व्याख्या**—ततः प्रधानसेनाध्यक्षनिधनानन्तरम्, हतबान्धवः विनष्टबन्धुः; ां जातूनां, राजा स्वामी, राज्येन अधिकृतप्रदेशेन, किं करिष्यामि किं जनं साधयिष्यामि ? सीतया रामभार्यया, किं करिष्यते अत्र स्थितया न ः मे प्रयोजनमिति, प्ररुदितः रोदितुं प्रारब्धवान्।

**समासः**—हताः बान्धवाः यस्य असौ इति बहुव्रीहिः। ‘निष्ठा २।२।३६’ पूर्वनिपातः।

**कृदन्तः**––'आदिकर्मणि क्तः कर्तरि च ३।४।७१' इति क्तः ।
वादि० १।२।२१' इति पाक्षिककित्वाद् गुणाभावः ।

**वाच्यपरिवर्तनम्**–हतबान्धवेन राज्ञा प्ररुदितम् । किं करि
सीता किं करिष्यति? चिण्वद्भावस्य पाक्षिकत्वात् 'करिष्यते' कर्म
पद्ये ज्ञेयः । 'हृक्रोरन्यतरस्याम् १।४।५३' इति सीताया न कर्मत्वम्

**शिक्षा**––गुणवदगुणवद्वा कुर्वता कार्यमादौ परिणतिरवधार्या यत्न
अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विप

अतिकाये हते वीरे प्रोत्सहिष्ये न. जीवितुम् ।
ह्रेपयिष्यति कः शत्रून्, केन जायिष्यते यमः ।।

**अन्वयः**—वीरे अतिकाये हते जीवितुं न प्रोत्सहिष्ये । कः
यिष्यति ? केन यमः जायिष्यते ?

**हिन्दी**—वीर अतिकायके मारे जाने पर मैं जीना नहीं चा
शत्रुओंको लज्जित करेगा ? कौन यमको भी जीतेगा ?

**व्याख्या**–वीरे शूरे, अतिकाये मत्पुत्रे, हते हिंसिते, जीवितुं प्राण
न नहि, प्रोत्सहिष्ये समर्थो भविष्यामि । किमन्यत् कर्तुम् ? कः शत्रून्
रणात् पलायितान् कृत्वा ? केन यमः कृतान्तोऽपि, जायिष्यते जितो

**तिङन्तः**–जेः कर्मणि लृट् । 'स्यसिच्० ६।४।६२' इति चिण

**वाच्य०**–मया प्रोत्सहिष्यते । केन शत्रवो ह्रेपयिष्यन्ते ? कः

अतिकायाद् विना पाशं को वा छेत्स्यति वारुणम् ।
रावणं मंस्यते को वा, स्वयम्भूः कस्य तोक्ष्यति ।। ३ ।।

**अन्वयः**––अतिकायाद् विना वारुणं वा पाशं कः छेत्स्यति ? को
मंस्यते ? स्वयंभूः कस्य तोक्ष्यति ।

**हिन्दी**—अतिकायके बिना वरुणदेवके अस्त्रको कौन काटेगा ?
कौन मानेगा ? ब्रह्मा किस पर सन्तुष्ट होंगे ?

**व्याख्या**—अतिकायात् मत्पुत्रात्, विना ऋते, वारुणं वरुणदे
पाशम् अस्त्रम्, कोऽन्यः, छेत्स्यति कर्त्स्यति ? को वाऽन्यः, रावणं
पूजयिष्यति ? स्वयम्भूः ब्रह्मा, कस्यान्यस्य, तोक्ष्यति प्रीतिमुत्पाद

**तिङन्तः**—तोक्ष्यति–'झलां जश् झशि ८।४।५३' इति डस्याप
कः सि ८।२।४१' इति कः ।

**वाच्यपरिवर्तनम्**—वारुणः पाशः केन छेत्स्यते ? स्वयम्भुवा तो

श्लाघिष्ये केन, को बन्धून् नेष्यत्युन्नतिमुन्नतः ।
कः प्रेष्यति पितॄन् काले, कृत्वा कत्थिष्यते न कः ॥ ४ ॥

**अन्वयः**—केन श्लाघिष्येऽहम्, उन्नतः कः बन्धून् उन्नतिम् नेष्यति ? कः पितॄन् प्रेष्यति ? कः कृत्वा न कत्थिष्यते ?

**हिन्दी**—किसके बल पर मैं बहादुरी दिखाऊँगा ? कौन स्वयं उन्नत रहकर ोंको उन्नत करेगा ? कौन समय पर ( श्राद्धतर्पणद्वारा ) ? पितरोंको तृप्त कौन करके भी डींग नहीं हांकेगा ?

**ख्या**—केन अहं श्लाघिष्ये–ममेदृशः पुत्रोऽस्तीत्यादि । उन्नतः स्वयम् कोऽन्यः, बन्धून् स्वानुगान्, उन्नतिम् अभ्युदयं, नेष्यति वक्ष्यति । कः वेलायाम्, दर्शपूर्णिमादौ, पितॄन् पूर्वजान्, प्रेष्यति तर्पयिष्यति श्राद्ध- । कः, कृत्वा जनोपकारं विधाय, न-नहि, कत्थिष्यते 'अहमेवंविधः' लाघिष्यते ।

**परिवर्तनम्**—मया श्लाघिष्यते । उन्नतेन उन्नतिः नायिष्यते बन्धून् । यिष्यन्ते । केन कत्थिष्यते ॥ ४ ॥

उद्यंस्यति हरिर् वज्रं, विचरिष्यति निर्-भयः ।
भोक्ष्यते यज्ञ-भागांश् च शूर-मानं च वक्ष्यति ॥ ५ ॥

**अन्वयः**—हरिः वज्रम् उद्यंस्यति, निर्भयः संग्रामे विचरिष्यति, भागान् भोक्ष्यते, शूरमानं वक्ष्यति ।

**हिन्दी**—( अब ) इन्द्र वज्र उठावेगा, निर्भय ( रणमें ) विचरेगा, यज्ञ- ोंको भोगेगा एवं वीरोंका मान पायेगा ।

**व्याख्या**—( सम्प्रति ) हरिः इन्द्रः, स्वकीयं वज्रम्, उद्यंस्यति उत्तोल- ति, निर्भयः निशङ्कः, विचरिष्यति (युधि) विहरिष्यति, यज्ञभागान् यागां- , भोक्ष्यते अत्स्यति, शूरमानं वीरसन्मानं, वक्ष्यति प्राप्स्यति ।

**तिङन्तः**—'भुजोऽनवने१।३।६६' इति तङ् । वहेः 'होढः ८।२।३१' इति ढत्वे कः ।

**वाच्यपरिवर्तनम्**—हरिणा वज्रम् उद्यंस्यते, निर्भयेन विचरिष्यते, यज्ञ- गाः भोक्ष्यन्ते, शूरमानो वक्ष्यते ॥ ५ ॥

रविस् तप्स्यति निः-शङ्कं, वास्यत्यनियतं मरुत् ।
निर्वर्त्स्यंत्यृतु-संघातः, स्वेच्छयेन्दुरुदेष्यति ॥ ६ ॥

**अन्वयः**—रविः निःशङ्कं तप्स्यति, मरुत् अनियत वास्यति, ऋतु-सङ्घातः र्त्स्यंति, इन्दुः स्वेच्छया उदेष्यति ।

**हिन्दी**—सूर्य निर्भय तपेगा। वायु अनियमित बहेगा। ऋतु साथ ही नहीं होंगे। चन्द्रमा अपनी इच्छासे उगेगा।

**व्याख्या**—रविः सूर्यः, निःशङ्कं निर्भयं, तप्स्यति द्योतिष्यते अनियतं स्वच्छन्दः, वास्यति एष्यति। ऋतुसंघातः ऋतुसमुच्च निवृत्तो भविष्यति। सर्वदैव षड् ऋतवः न स्थास्यन्ति। इन्दुः स्वच्छन्दतः, उदेष्यति उद्गमिष्यति। क्रमं त्यक्त्वा सर्वदा पूर्णमण्डले

**तिङन्तः**—'वृद्भ्यः स्यसनोः १।३।९२' इति पाक्षिकम्पद वृद्भ्यश्चतुर्भ्यः ७।२।५९' इतीण्निषेधः।

**वाच्यपरिवर्तनम्**—निःशङ्केन रविणा तप्स्यते। मरुता वा। ऋतुसंघातेन निर्वर्तिष्यते। इन्दुनोदेष्यते वा॥ ६॥

**तीव्रं स्यन्दिष्यते मेघैरुग्रं वर्तिष्यते यमः।**
**अतिकायस्य मरणे किं करिष्यन्ति नाऽन्यथा॥**

**अन्वयः**—मेघैः तीव्रं स्यन्दिष्यते। यमः उग्रं वर्तिष्यते। अति इन्द्रादयः किम् अन्यथा न करिष्यन्ति? (सर्वम् यथेच्छं करिष्य

**हिन्दी**—मेघ खूब बरसेंगे। यम खुले आम संहार करेगा। ( अतिकायके मर जाने पर क्या उलटा नहीं कर डालेंगे?

**व्याख्या**—मेघैः पर्जन्यैः, तीव्रं घोरं, स्यन्दिष्यते प्रस्रोष्यते वा। यमः कृतान्तः, उग्रं, वर्तिष्यते व्यवहरिष्यति। अतिकायस्य म निधने, किम् अन्यथा विपर्ययं, न नहि, करिष्यन्ति संविधास्यन्ति 'किं भविष्यन्ति नान्यथा' इति पाठान्तरेऽपि सर्वमेतद्भविष्यतीति क

**वाच्यपरिवर्तनम्**—मेघाः स्यन्त्स्यन्ति। यम उग्रं वर्त्स्यति करिष्यते कारिष्यते वा॥ ७॥

**उन्मीलिष्यति चक्षुर् मे वृथा, यद् विनयाऽऽगतम्**
**आज्ञा-लाभोन्मुखं नम्रं न द्रक्ष्यति नरान्तकम्**

**अन्वयः**—इह मे चक्षुः वृथा उन्मीलिष्यति, यद् विनयागत भोन्मुखं नम्रं नरान्तकं न द्रक्ष्यति।

**हिन्दी**—मेरी आँख व्यर्थ ही खुलेगी जो विनयसे आये पानेको उत्सुक नम्र नरान्तकको नहीं देखेगी।

**व्याख्या**—इह अत्र, मे मम, चक्षुः नेत्रं, वृथा मुधा, उन्मीलिष्यति

विनयागतम् शालीनताप्राप्तम्, आज्ञालाभोन्मुखम् आदेशप्रापणपरवशं, नम्र नशीलं, नरान्तकं पुत्रं, न नहि, द्रक्ष्यति ईक्षिष्यते ।

**वाच्य०**—चक्षुषोन्मीलिष्यते । येन विनयागतः न दर्शिष्यते नरान्तकः ॥८॥

धिङ् मां, त्रि-शिरसा नाऽहं सन्दर्शिष्येऽद्य यत् पुनः ।
घानिष्यन्ते द्विषः केन तस्मिन् पञ्चत्वमागते ॥ ९ ॥

**अन्वयः**—मां धिक्, यत् अद्य पुनः त्रिशिरसा अहं न संदर्शिष्ये । पञ्चत्व- ते तस्मिन् केन द्विषः घानिष्यन्ते ?

**हिन्दी**—मुझे धिक्कार है कि मैं त्रिशिरा द्वारा आज पुनः नहीं देखा ा । त्रिशिराके मर जाने पर शत्रु किसके द्वारा मारे जायेंगे ?

**ख्या**—मां रावणं, धिक् धिक्कारः । यत् यस्मात्, अद्याधुना, पुनर्भूयो- वणः, त्रिशिरसा सूनुना, न नहि, सन्दर्शिष्ये । पञ्चत्वमागते निधनत्व- तस्मिन् त्रिशिरसि, केनान्येन, द्विषः शत्रवः, घानिष्यन्ते हनिष्यन्ते ?

**वाच्यपरिवर्तनम्**—त्रिशिरा द्रक्ष्यति माम् । कः द्विषो हनिष्यति ? ॥ ९ ॥

शत्रुभिर् निहते मत्ते द्रक्ष्येऽहं संयुगे सुखम् ।
युद्धोन्मत्ताद् विना शत्रून् समास्कन्त्स्यति को रणे ॥ १० ॥

**अन्वयः**—मत्ते शत्रुभिर्निहतेऽहं संयुगे सुखं द्रक्ष्ये (तैः) । युद्धोन्मत्तात् विना रणे शत्रून् समास्कन्त्स्यति ?

**हिन्दी**—मत्तके शत्रुओं द्वारा मार डाले जाने पर मैं रणमें अनादरसे देखा ऊँगा । युद्धोन्मत्तके बिना कौन रणमें शत्रुओं पर टूट पड़ेगा ?

**व्याख्या**—मत्ते पुत्ररक्षके, शत्रुभिररिभिर्निहते ध्वंसिते, अहं रावणः, सुखं :शङ्कं, द्रक्ष्ये ( शत्रुभिः ) दर्शिष्ये । युद्धोन्मत्तात्पुत्ररक्षकात्, विना रहितः, ाऽन्यः, रणे युधि, शत्रूनरीन्, समास्कन्त्स्यति अभियास्यति ? न कोऽपीत्यर्थः ।

**तिङन्तः**–द्रक्ष्ये इति दृशः 'स्यसिच्० ६।४।७२' चिणोऽभावपक्षे रूपम् । ृजिदृशोर्झल्यमकिति ६।१।५८' इत्यम् । स्कन्दिर् गतिशोषणयोः ( अनुदात्तो- ात्तेद् भ्वादिः ) ।

**वाच्यपरिवर्तनम्**—द्रक्ष्यन्ति माम् । केन शत्रवः समास्कन्त्स्यन्ते ॥ १० ॥

आह्वास्यते वि-शङ्को मां योत्स्यमानः शतक्रतुः ।
प्रकल्प्स्यति च तस्याऽर्थो निकुम्भे दुर्-हणे हते ॥ ११ ॥

**अन्वयः**—योत्स्यमानः शतक्रतुः निःशङ्कः सन् माम् आह्वास्यते । दुर्हणे निकुम्भे हते तस्य अर्थः प्रकल्प्स्यति ।

**हिन्दी**—युद्ध करनेवाला इन्द्र निंःशङ्क होकर मुझे ललकारेगा निकुम्भके मर जाने पर उसका मतलब सिद्ध होगा।

**व्याख्या**—योत्स्यमानः युद्धं करिष्यन्, शतक्रतुरिन्द्रः, निःशङ्क सन्, माम् रावणं, आह्वास्यते आकारयिष्यति। दुर्हणे दुर्विना कौम्भकर्णौ, हते मृते, तस्येन्द्रस्य, अर्थः प्रयोजनं, प्रकल्प्स्यति सेत्स्य

**तिङन्तः**—'स्पर्धायामाङः १।३।३१' इति तङ्। 'लुटि च ङा इति तङ्। 'तासि च क्लृपः ७।२।६०' इति नेट्। प

**वाच्यपरिवर्तनम्**—शतक्रतुनाहमाह्वायिष्ये। अर्थेन प्रकल्पि

कल्पिष्यते हरेः प्रीतिर्, लङ्का चोपहनिष्यते
देवान्तक ! त्वया त्यक्तो रिपोर् यास्यामि वश्यताम्

**अन्वयः**—हरेः प्रीतिः कल्पिष्यते, लङ्का च शत्रुभिरुपहनिष्यते न्तक ! त्वया त्यक्तोहं रिपोः वश्यतां यास्यामि।

**हिन्दी**—(कुम्भकी मृत्यु सुनकर) इन्द्रको प्रसन्नता होर्ग शत्रुगण विलोप करेंगे। अरे देवान्तक ! तुझसे परित्यक्त मैं शत्रुके जाऊँगा।

**व्याख्या**—हरेः इन्द्रस्य, प्रीतिः प्रसादः, कल्पिष्यते भविष्यति। स्वर्णपुरी, शत्रुभिः अरिभिः, उपहनिष्यते विलोप्स्यते। अरे देवान्त महावीरेण, त्यक्तो हीनोऽहं रावणः, रिपोः शत्रोः, वश्यताम् अधीनतां, प्राप्स्यामि।

**तिङन्तः**—'लुटि च क्लृपः १।३।९३' इत्यस्य पाक्षिकत्वादिह त रतिसूति० ७।२।४४' इतीट्। हनेः कर्मणि लृट्। चिण्वद्भावाभावे 'ऋ ८।२।७०' इतीट्।

**वाच्यपरिवर्तनम्**—प्रीत्या कल्पिष्यते। लङ्कामुपहनिष्यन्ति ( त्यक्तेन (मया) वश्यता यास्यते यायिष्यते वा ॥ १२ ॥

मरिष्यामि, विजेष्ये वा, हताश् चेत् तनया मम।
हनिष्यामि रिपूंस् तूर्णं, न जीविष्यामि दुःखितः ॥ १३ ॥

**अन्वयः**—मम तनया हताश्चेत् तदाऽहं मरिष्यामि वा विजेष्ये। तूर्णं हनिष्यामि, दुःखितो न जीविष्यामि।

**हिन्दी**—मेरे बच्चे जब मार डाले गये तब मैं मरूँगा या विजयी फौरन शत्रुओंको मारूँगा। दुःखी होकर नहीं जीऊँगा।

**व्याख्या**—चेत् यदि, मम रावणस्यापि, तनयाः आत्मजाः, हताः हिंसिता-
दाहं, मरिष्यामि प्राणान् त्यक्ष्यामि, विजेष्ये वा शत्रूनिति शेषः। तूर्णं शीघ्रं,
पून् शत्रून्, हनिष्यामि संहरिष्ये। दुःखितः क्लेशितः, न नहि, जीविष्यामि
न् घारयिष्यायि।

:—'म्रियतेर्लुङ्-लिङोश्च १।३।६१' इति नियमान्न तङ्। 'विप-
१।३।१९' इति तङ्।

—मया मारिष्यते मरिष्यते वा, विजयिष्यन्ते विजेष्यन्ते वा शत्रवः।
ते। रिपवो घानिष्यन्ते हनिष्यन्ते वा। दुःखितेन न जीविष्यते।

**स्मेष्यन्ते मुनयो, देवाः कथयिष्यन्ति चाऽनिशम्।**
**दश-ग्रीवस्य दुर्-नीतेर् विनष्टं रक्षसां कुलम् ॥ १४ ॥**

:—दशग्रीवस्य दुर्नीतेः रक्षसां कुलं विनष्टम् इति मुनयः स्मेष्यन्ते।
कथयिष्यन्ति।

—रावणकी दुर्नीतिसे राक्षसोंका कुल नष्ट हुआ—इस पर मुनिलोग
वणण सदा कहेंगे।

या—दशग्रीवस्य रावणस्य, दुर्नीतेः दुर्नयात्, रक्षसां जातूनां, कुलं
विनष्टम् ध्वस्तः। इति एवं, मुनयो विवेकिनः, स्मेष्यन्ते हसिष्यन्ति।
ाः सुराः, अनिशं निरन्तरं, कथयिष्यन्ति वदिष्यन्ति।

**वाच्य०**—मुनिभिः स्मायिष्यते स्मेष्यते वा। देवैः कथयिष्यते ॥ १४ ॥

**केन सम्भावितं तात-कुम्भकर्णस्य राघवः।**
**रणे कर्त्स्यति गात्राणि मर्माणि च वितर्त्स्यति ॥ १५ ॥**

**अन्वयः**—हे तात! कुम्भकर्णस्य गात्राणि राघवः रणे कर्त्स्यति, मर्माणि
वितर्त्स्यति इति केन सम्भावितम्।

**हिन्दी**—हे तात! राम कुम्भकर्णके अङ्गोंको काट डालेगा, मर्मभेद कर
गा। यह किसने सम्भावना की थी?

**व्याख्या**—हे तात! इति मृतस्य पितुः सम्बोधनम्। अथवा तातः चासौ
म्भकर्णः तातकुम्भकर्णः तस्येति कुम्भकर्णविशेषणं वा। गात्राणि अङ्गानि,
घवः रामः, कर्त्स्यति छेत्स्यति। मर्माणि जीवितानि, वितर्त्स्यति वितर्दिष्यति।
ति एवं, केन बहुज्ञेन, सम्भावि तर्कितम् आसीत्?

**तिङन्तः**—कृती छेदने, उतृदिर् हिंसानादरयोः—इति क्रमशः तौदादिक-
ौधादिकयोः 'सेऽसिचि कृतचृतच्छृदतृदनृतः ७।२।५७' इति वेट्।

**वाच्य०**—राघवेण गात्राणि कर्त्स्यन्ते कर्त्तिष्यन्ते वा, तर्त्स्यन्ते।

**पतिष्यति क्षितौ भानुः पृथिवी तोलयिष्यते।**
**नभस्वान् भङ्क्ष्यते व्योम मुष्टिभिस् ताडयिष्यते ॥**
**इन्दोः स्यन्दिष्यते वह्निः, समुच्छोक्ष्यति साग**
**जलं धक्ष्यति तिग्मांशोः स्यन्त्स्यन्ति तमसां चयाः**
**कुम्भकर्णो रणे पुंसा क्रुद्धः परिभविष्यते।**
**संभावितानि नैतानि कदाचित् केनचिज् जने**

**अन्वयः**—१८ अष्टादशपद्यान्तं सम्भावनान्वयः। भानुः क्षि
पृथिवी तोलयिष्यते। नभस्वान् काष्ठवत् भङ्क्ष्यते। व्योम मुष्टिभि
इन्दोः वह्निः स्यन्दिष्यते। सागरः समुच्छोक्ष्यति। जलं धक्ष्यति
तमसां चयाः स्यन्त्स्यन्ति। क्रुद्धः कुम्भकर्णः रणे पुंसा परिभविष्
जने जनलोके केनचित् न सम्भावितानि।

**हिन्दी**—सूर्य पृथ्वी पर गिरेगा, पृथिवी ऊपर फेंक दी जायगी
समान तोड़ दिया जायगा। आकाश मुक्केसे मारा जायगा।
बरसेगी। समुद्र सूख जायगा। जल जलावेगा। सूर्यसे अन्धकार-सम
क्रुद्ध हुआ कुम्भकर्ण रणमें पुरुषसे पराजित हो जायगा। इन बातोंकी
जनलोकमें किसीने कभी भी नहीं की है।

**व्याख्या**—इमानि सर्वाण्येव पद्यानि स्पष्टार्थानि। अतोऽन्वयेनैव
नीति व्याख्याने त्यक्तानि।

**तिङन्तः**—तुल उन्माने ( चुरादिः )। इतस्त्रिभ्यः कर्मणि लृट्। स
तङि इट्। धक्ष्यति–हस्य ढत्वे **'एकाचो बशो०** ८।२।३७' इति भष्भाव
न्त्स्यन्ति परस्मैपदविकल्पे इट् प्रतिषेधः।

**वाच्यपरिवर्तनम्**—भानुना पतिष्यते (आत्मनेपदे कर्मणि लृट्)।
सागरेण, चयैः, इति तृतीयान्ते शब्दे क्रियासु आत्मनेपदंविशेषः॥ १

**कुम्भकर्णे हते लङ्कामारोक्ष्यन्ति प्लवङ्गमाः।**
**दङ्क्ष्यन्ति राक्षसान्, दृप्ता भङ्क्ष्यन्ति च ममाऽऽश्रमान् ॥ १**

**अन्वयः**—कुम्भकर्णे हते दृप्ताः प्लवङ्गमाः लङ्काम् आरोक्ष्यन्ति।
दंक्ष्यन्ति, ममाश्रमान् भक्ष्ङ्यन्ति।

**हिन्दी**—कुम्भकर्णके मारे जाने पर घमण्डी वानर लङ्कापर चढ़
राक्षसोंको दांतोंसे काटेगें। मेरे आश्रमोंको तोड़ देगें।

**व्याख्या**—कुम्भकर्णे मम भ्रातरि, हते हिंसिते, दृप्ताः उद्धताः, प्लवङ्गमाः :, लङ्काम् पुरीम्, आरोक्ष्यन्ति आक्रमिष्यन्ति। राक्षसान् क्षपाटान्, न्ति दशनैः छेत्स्यन्ति। ममाश्रमान् गृहान्, भङ्क्ष्यन्ति चूर्णयिष्यन्ति।

**वाच्यपरिवर्तनम्**—प्लवङ्गमैः लङ्का आरोक्ष्यते। अग्रे तृतीयान्त-प्रथमा- यामात्मनेपदमिति विशेषः ॥ २० ॥

**त्स्यन्ति बाल-वृद्धांश् च, नर्त्स्यन्ति च मुदा युताः।**
**न राक्षस-मुख्येन विना तान् को निरोत्स्यति ॥ २० ॥**

( ते प्लवङ्गमाः ) बालवृद्धान् चर्त्स्यन्ति, मुदा युता नर्त्स्यन्ति। तेन विना तान् को निरोत्स्यति ?

-वे बन्दर बालक तथा वृद्धोंको मार डालेंगे। आनन्दसे नाचेंगे। सके बिना उनको कौन रोकेगा ?

- बालवृद्धान् कुमारस्थविरान्, चर्त्स्यन्ति व्यापादयिष्यन्ति। मुदा न्विताः, नर्त्स्यन्ति नर्तिष्यन्ति। तेन प्रसिद्धेन, राक्षसमुख्येन रात्रि- गणना रहितः, तान् कपीन्, कोऽन्यः, निरोत्स्यति निवारयिष्यति।

तः—चृती हिंसाग्रन्थनयोः ( तु० उदात्तोदात्तोत् )। नृती गात्रविक्षेपे ० उदात्तोदात्तोत् )। 'सेऽसिचि० ७।२।५७' इति वेट्।

**वाच्यपरिवर्तनम्**—बालवृद्धाः चर्त्स्यन्ते चर्तिष्यन्ते वा। युतैर्नर्त्स्यते नर्तिष्यते केन ते निरोत्स्यन्ते ? ॥ २० ॥

**अमर्षो मे परः, सीतां राघवः कामयिष्यते।**
**च्युत-राज्यात् सुखं तस्मात् किं किलाऽसाववाप्स्यति ॥ २१ ॥**

**अन्वयः**—इह मे परः अमर्षः ( यत् ) राघवः सीतां कामयिष्यते। असौ राज्यात् तस्मात् किं सुखं किल अवाप्स्यति ?

**हिन्दी**—मुझे यह बड़ा भारी क्षोभ है कि राम सीता पा जायगा। वह री, जिसका राज्य छिन गया है, ऐसे रामसे क्या सुख पावेगी ?

**व्याख्या**—इह अस्मिन् विषये, मे मम, परः उत्कृष्टः, अमर्षः क्षोभः, (यद्) : रामः, सीतां स्वपत्नीं, कामयिष्यते प्राप्स्यति। असौ सीता, च्युतराज्यात् धिकारात्, तस्मात् रामात्, किं सुखं किल अवाप्स्यति आसादयिष्यति।

**तिङन्तः**—कामेस्तु 'अनवक्लृप्त्यमर्ष० ३।३।१४५' इति लृट्। अवाप्तेस्तु कलास्त्यर्थेषु लृट् ३।३।१४६'। इति लृट्।

**वाच्य०**—राघवेण सीता कामयिष्यते। अमुया किं सुखं किलावाप्स्यते?॥२१॥

मारयिष्यामि वैदेहीं, खादयिष्यामि राक्षसैः।
भूमौ वा निखनिष्यामि विध्वंसस्याऽस्य कारणम् ॥

**अन्वयः**—( क्रुद्धो वक्ति ) वैदेहीं मारयिष्यामि, राक्षसैः वा अस्य विध्वंसस्य कारणं ( ता ) भूमौ निखनिष्यामि।

**हिन्दी**—सीताको मारवा डालूंगा और राक्षसोंसे खवा डा इस विनाशकी मूलकारणभूत उसे पृथ्वीमें खोदकर गाड़ दूंगा।

**व्याख्या**—( सम्प्रति क्रुद्धो जल्पति ) वैदेहीं सीतां, मा यिष्यामि, राक्षसैः निशाचरैः, खादयिष्यामि भक्षयिष्यामि। प्रत्यक्षस्य विध्वंसस्य विनाशस्य, कारणं निदानं, ( तां ) ष्यामि निधास्यामि।

**तिङन्तः**—प्रत्यवसानार्थतया प्राप्ता कर्मसंज्ञा 'आदिख निषिध्यते।

**वाच्यपरिवर्तनम्**—मया वैदेही मारयिष्यते, राक्षसैः खादय सस्य कारणं निखनिष्यते ॥ २२ ॥

नाऽनुरोत्स्ये जगल्लक्ष्मीं, घटिष्ये जीवितुं न वा।
न रंस्ये विषयैः शून्ये भवने बान्धवैरहम् ॥ २

**अन्वयः** - जगल्लक्ष्मीं न अनुरोत्स्ये, न वा जीवितुं घटिष्ये शून्ये भवनेऽहम् विषयैः न रंस्ये।

**हिन्दी**—मैं दुनियांकी दौलतकी चाह छोड़ दूंगा, जीना चाहूँगा। बान्धवोंसे शून्य घरमें विषयोंके साथ रमण नहीं करूँगा।

**व्याख्या**—जगल्लक्ष्मीं विश्वसम्पत्ति, न नहि, अनुरोत्स्ये काम रुधि काम्ये )। बान्धवैः बन्धुभिः, शून्ये रहिते, भवने गृहे, विषयैः न नहि, रंस्ये क्रीडिष्यामि।

**वाच्य०**—जगल्लक्ष्मी मयानुरोत्स्यते, घटिष्यते। रंस्यते मया॥

मोदिष्ये कस्य सौख्येऽहं, को मे मोदिष्यते सुखे।
आदेयाः किंकृते भोगाः कुम्भकर्ण ! त्वया विना ॥ २४॥

**अन्वयः**—हे कुम्भकर्ण ! त्वया विना अहं कस्य सौख्ये मोदि मे सुखे मोदिष्यते ? किं कृते भोगा आदेयाः ?

**हिन्दी**—अहो कुम्भकर्ण ! तुम्हारे बिना मैं किसके सुखमें खुशी मेरे सुखमें और कौन खुशी होगा ? किसके लिये मैं भोगोंका संग्रह

**व्याख्या**—अये कुम्भकर्ण ! प्रियतम ! त्वया भवता, विना रहितोऽहं, कस्या-
स्य, सौख्ये सुखे, मोदिष्ये हृष्टो भविष्यामि। कोऽन्यः, मे मम, मुखे आनन्दे,
ोदिष्यते हृष्टो भविष्यति। किं कृते किमर्थं, भोगाः विषयाः भोगसाधनानि,
ादेयाः संग्राह्याः।

**वाच्य०**—मया मोदिष्यते। केन मोदिष्यते। भोगिष्यते। भोगान् आदास्येऽहम्।

याः सुहृत्सु विपन्नेषु मामुपैष्यन्ति संपदः।
ताः किं मन्यु-क्षताऽऽभोगा न विपत्सु विपत्तयः॥ २५॥

न्वयः—सुहृत्सु विपन्नेषुं सत्सु याः सम्पदो मामुपैष्यन्ति, मन्युक्षता-
ताः विपत्सु कि विपत्तयो न ( अपितु विपत्तय एवेति काकुः ) ?

न्दी—बन्धु-बान्धवोंके सुहृन्मित्रोंके मर जानेपर जो सम्पत्तियाँ मेरे पास
, वे शोकसे जिसका स्वाद विलुप्त हो जायगा, ऐसी होकर क्या वे विप-
पत्ति नहीं हो जायेंगी ? वे तो हमारे लिये क्षत-क्षारके समान बड़ी
ो जायेंगी।

**व्याख्या**—सुहृत्सु बन्धु-बान्धवेषु, विपन्नेषु विनष्टेषु, या आगताः, सम्पदः
पत्तय।, मां रावणम्, उपैष्यन्ति सम्प्राप्स्यन्ति। मन्युक्षताभोगाः शोकखण्डि-
वादाः, ताः सम्पत्तयः, विपत्सु विपत्तिषु विपत्तयः किं न? अपितु क्षते क्षारवत्
पद एवेति काकुः।

**कोश-समासौ**—'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः। मन्युना क्षतः आभोगो
साम् इति बहु०।

**वाच्य०**—सम्पद्भिरहमुपायिष्ये वा।.ताभिः विपत्तिभिः भूयते॥ २५॥

विनङ्क्ष्यति पुरी क्षिप्रं, तूर्णमेष्यन्ति वानराः।
अ-सन्धित्सोस् तवेत्येतद् विभीषण-सुभाषितम्॥ २६॥

**अन्वयः**—असन्धित्सोः तव पुरी क्षिप्रं विनङ्क्ष्यति। तूर्णं वानराः एष्यन्ति,
त एतत् विभीषण-सुभाषितम् अभूत्।

**हिन्दी**—तुम रामके साथ सन्धि न करोगे तो लङ्कापुरी जल्दी नष्ट हो
यगी। वानर शीघ्र यहाँ पहुँच जायँगें—यह विभीषणका कथन ठीक था।

**व्याख्या**—(रामेण) असन्धित्सोः सन्धि कर्तुम् अनिच्छतः, तव रावणस्य,
ी लङ्का, क्षिप्रं द्रुतं, विनङ्क्ष्यति ध्वंसिष्यते। वानराः राम-सेनास्थिताः
यः, एष्यन्ति आगमिष्यन्ति। इति इत्थम्, एतत् मत्प्रत्यक्षम्, विभीषण-
ाषितं मद्भ्रातृसूक्तिरभूत्। न श्रुतं मयेति पश्चात्तापः।

**तिङन्तः**—'मस्जिनशोर्झलि ७।१।६०' इति नुम्। उभयत्रापि लृट् ३।३।१३३' इति लृट्।

**शिक्षा**—एवमेव मदोन्मत्ताः समये नीतिज्ञानामुपदेशं न पश्चात्स्वौद्धत्यफलं भुञ्जन्तो विलपन्ति। अतः स्वमनसि अनारो हितैषिप्रोक्तं कर्तव्यमेवेति शिक्षा।

**वाच्यपरिवर्तनम्**—पुर्या विनक्ष्यते। वानरैरेष्यते आयिष्यते व षण-सुभाषितेनाभावि ॥ २६ ॥

सम्प्रति समुद्भूतसद्बुद्धिर्दशाननो मन्त्रकालोक्तं विभीषणस र्थयन् तद्विरुद्धमपि प्रहस्तवाक्यं तदनुकूलमेव साधयति। तथाहि

**'अर्थेन संभृता राज्ञा न भाषिष्यामहे वयम्।**
**संयोत्स्यामह'—इत्येतत् प्रहस्तेन च भाषितम्॥ २**

**अन्वयः**—प्रहस्तेन च इत्येतत् विभीषणसुभाषितमेव भाषित राज्ञा (युद्धार्थमेव) अर्थेन सम्भृता (अतो) वयं न भाषिष्यामहे संयो सन्धानं कर्तुं यदुचितम् तत्तु विभीषणादयः नीतिज्ञा एव कथयिष्यन्ति। तात्पर्यम् इति इत्थं रावणो विभीषणसुभाषितेन प्रहस्तवाक्यं समन्व

**हिन्दी**—इस समय जब बुद्धि ठीक हो गयी है तब रावण प्रहस् का यथार्थ अर्थ विभीषणके अनुकूल कर रहा है। जैसे प्रहस्तने भी विभीषणके सुभाषितको ही—कहा था कि हम लोग तो युद्धके लिये द्वारा धनसे पालित पोषित होते हैं। अतः हमलोग कुछ नहीं कहेंगे युद्ध करेंगे। सन्धि करना यदि उचित है, उसे तो विभीषण प्रभृति लोग ही कहेंगे। यही प्रहस्तका भी तात्पर्य था। यहाँ रावण विभीष षितके साथ प्रहस्तके वाक्यका समन्वय करता है।

**व्याख्या**—अन्वये एव सम्यक् पदार्थो विवृत इति नास्ति व्याख्या-एवं किन्तु मन्त्रकालीना स्थितिर्मनाक् प्रस्तूयते। द्वादशे सर्गे रावणेन—'शक्ते १२–१४' इत्यादि पद्यैर्मन्त्रप्रस्तावे समुत्क्षिप्ते—'अखण्ड्यमानम्' १७ इ प्रहस्तादय उत्तरितवन्तः। ततो विभीषणः 'युद्धाय राज्ञा २२' इत्यादि राजनीतिर्विवृता या दर्शनीयाऽद्युनिकैर्नीतिविमुखैः। ततस्तदीयां नीति माल्यवान् 'एकः पदातिः० ५६' इत्यादिना रावणमुद्बोधयामास। त कर्णोऽपि स्वोचितभाषया 'क्रिया० ६२' इत्यादिना विभीषणोक्तमेव स पुनर्विभीषणम्' निमित्तशून्यैः'० ६९' इत्यादिना हितमुपदिशन्तं राव

ति०' ७७ इत्यादिनावमत्य मदान्धः पादप्रहारं तस्य शिरसि चकार ।
ी लङ्काणोपनबुद्धचा रामं सन्धातुमगमद् 'सुखं महाराज०' ८२ इत्याद्य-
। इति मन्त्रसारो द्वादशसर्गगः सर्वैर्मननीय इति सङ्केतो मम ।

च्यपरिवर्तनम्—प्रहस्तोऽभाषिष्ट । इत्येतावत् ॥ २७ ॥

प्रति स्वाभिप्रायमेव तदानीन्तनमाख्याति रावणः—

**मानुषो नाम पत्काषी राजानं पुरुषाऽशिनाम् ।**
**योधयिष्यति संग्रामे दिव्याऽस्त्र-रथ-दुर्जयम् ॥ २८ ॥**

वयः—पत्काषी मानुषो नाम 'अकिञ्चित्करः' पुरुषाशिनां राजानम्
यदुर्जयम् सन्तं संग्रामे योधयिष्यति इत्याश्चर्यम् ? असम्भवमिदम् इति
तद्धि अहम् तदानीं चिन्तितवान् । अतः विभीषणे पादप्रहारं दत्त-
ादि दुर्नयं चिन्तयन् पश्चात्तपति सः ।

—क्या पैरसे चलने वाला मनुष्य नामका अकिञ्चित्कर प्राणी पुरुषों-
ने वालोंके राजा दिव्य अस्त्र-शस्त्र तथा रथ वाले होनेके कारण
ुझसे संग्राममे लड़ सकेगा ? कदापि नहीं । यह असम्भव है । यही मैंने
मय सोचकर विभीषणको लात मारी थी । ऐसा रावण पश्चात्ताप
ा है ।

ाख्या—अत्रापि अन्वयेनैव स्पष्टार्थतेति नास्ति प्रयोजनं व्याख्यायाः ।

मासः—अस्त्राणि च रथाश्चेति अस्त्ररथम् । दिव्यं च तत् अस्त्ररथम्
त्ररथम्, तेन दुर्जयः दिव्यास्त्ररथदुर्जयः । अथवा दिव्यम् अस्त्ररथम् यस्य
ास्त्ररथः, स चासौ दुर्जयश्चेति तम् ।

ङन्तः—युधेर्ण्यन्तात् लृट् । 'शेषे लृडयदौ ३।३।१५१' इति लृट् । पादौ
त णिनौ 'हिमकाषिहतिषु च ६।३।५४' इति पदादेशः ।

च्यपरिवर्तनम्—पत्काषिणा मानुषेण राजा योधायिष्यते ॥ २८ ॥

वं बहुधा विलप्य जातामर्षः पुनराह—

**सन्नत्स्याम्यथवा योद्धुं, न क्रोक्ष्ये सत्त्व-हीनवत् ।**
**अद्य तर्प्स्यन्ति मांसाऽदा, भूः पास्यत्यरि-शोणितम् ॥ २९ ॥**

न्वयः—अथवा योद्धुं सन्नत्स्यामि । सत्त्वहीनवत् न क्रोक्ष्ये । अद्य
ः तर्प्स्यन्ति । भूः अरिशोणितं पास्यति ।

न्दी—अथवा युद्धके लिये मैं कवच पहनूंगा । निर्बलके समान चिल्लाऊँगा
मांस खानेवाले जानवर तृप्त होंगे । पृथ्वी शत्रुओंका रक्त पान करेगी ।

ाख्या—अथवा पक्षान्तरे, योद्धुं युद्धं कर्तुम्, सन्नत्स्यामि सन्नाहं करिष्ये ।

सत्त्वहीनवत् निर्बलवत्, न नहि, क्रोष्ये रोदिष्ये । मांसादाः मांसभ अद्याधुना, तर्प्स्यन्ति तृप्ता भविष्यन्ति । भूः क्षितिः, अरिशोणित पास्यति घास्यति ।

**तिङन्तः**—कुङ् शब्दे (अ० अनुदात्तङित्) । 'किंवृत्तेर्लिङ्लृटौ इति लृट् । 'लृट् शेषे च ३।३।१३' ।

**वाच्यपरिवर्तनम्**—मया सन्नत्स्यते, क्रोष्यते काविष्यते वा तर्प्स्यते । भुवा शोणितं पास्यते ॥ २९ ॥

आकर्क्ष्यामि यशः, शत्रूनपनेष्यामि कर्मणा ।
अनुभाविष्यते शोको मैथिल्याऽद्य पति-क्षयात् ॥ ३०

**अन्वयः**—( सर्वयोधानां ) यशः आकर्क्ष्यामि । कर्मणा शत्रून् अद्य मैथिल्या पतिक्षयात् शोकः अनुभाविष्यते ।

**हिन्दी**—मैं सभी योद्धाओंका यश खींच लूगा । अपने पराक्र दूर भगाऊँगा । आज सीता पतिके मर जानेसे शोकका अनुभव क

**व्याख्या**–(सर्वयोधानां) यशः कीर्त्तिम्, आकर्क्ष्यामि आहरिष्या स्वपराक्रमेण, शत्रून् अरीन्, अपनेष्यामि दूरीकरिष्यामि । अद्य अधु जानक्या, पतिक्षयात् भर्तृ-विनाशात्, शोको विषादः, अनुभाविष्यते

**वाच्यपरिवर्तनम्**—मया यशः आकर्क्ष्यते । शत्रवोऽपनेष्यन्ते वा । मैथिली शोकमनुभविष्यति ॥ ३० ॥

मन्तूयिष्यति यक्षेन्द्रो, वल्गूयिष्यति नो यमः ।
ग्लास्यन्त्य-पति-पुत्राश् च वने वानर-योषितः ॥ ३१

**अन्वयः**—यक्षेन्द्रः मन्तूयिष्यति । यमो न वल्गूयिष्यति । वा अपतिपुत्राः सत्यः ग्लास्यन्ति ।

**हिन्दी**—कुबेर रामको विपन्न पाकर दुःखी होगा । यम भी रहेगा । वानरोंकी स्त्रियां पति-पुत्रसे हीन होकर ग्लानि पावेंगी ।

**व्याख्या**—यक्षेन्द्रः कुबेरः ( दाशरथिं विपन्नं श्रुत्वा ), मन्तूयिष्य भविष्यति । यमो यमुनाभ्राता, न नहि, वल्गूयिष्यति प्रसन्नो वानरयोषितः कपिभार्याः, अपतिपुत्राः भर्तृ-सुत-विहीनाः, ग्लास्यन्ति म

**तिङन्तः**—मन्तु-वल्गु-शब्दाभ्यां 'कण्ड्वादिभ्यो यक् ३।१।२७' तदन्ताद् धातोर्लृट् ।

**वाच्यपरिवर्तनम्**—यक्षेन्द्रेण मन्तूयिष्यते । यमेन न वल्गूयिष्यते । ग्लास्यते, ग्लायिष्यते वा ॥ ३१ ॥

**सुखं स्वप्स्यन्ति रक्षांसि, भ्रमिष्यन्ति च निर्भयम् ।**
**न विक्रोक्ष्यन्ति राक्षस्यो, नरांश् चाऽत्स्यन्ति हर्षिताः ॥ ३२ ॥**

**अन्वयः**—रक्षांसि सुखं स्वप्स्यन्ति, निर्भयं भ्रमिष्यन्ति । राक्षस्यो न क्रोक्ष्यन्ति, हर्षिताः सत्यो नरान् अत्स्यन्ति ।

**हिन्दी**—राक्षस सुखसे सोयेंगे, निर्भय होकर घूमेंगे । राक्षसियां रोयेंगी ीं, किन्तु खुश होकर मनुष्योंको खायेंगी ।

**व्याख्या**—रक्षांसि जातूनि, सुखं निर्विघ्नं, स्वप्स्यन्ति शयिष्यन्ते । निर्भयं शङ्कं, भ्रमिष्यन्ति विहरिष्यन्ति । राक्षस्यो राक्षसस्त्रियः, न नहि, क्रोक्ष्यन्ति दिष्यन्ति । हर्षिताः आनन्दिताः, नरान् मानवान्, अत्स्यन्ति खादिष्यन्ति ।

**तिङन्तः**—ञिष्वप् शये ( अ० रुदादिः अनुदात्तोदात्तेत् ) । क्रुश आह्वाने दने च ( भ्वा० अनुदात्तोदात्तेत् ) ।

**वाच्यपरिवर्तनम्**—रक्षोभिः स्वप्स्यते, भ्रमिष्यते । राक्षसीभिर्न क्रोक्ष्यते, षिताभिर्नरा अत्स्यन्ते ॥ ३२ ॥

युग्मेन रावणस्वप्नमनोरथमाख्याति—

**प्राङ् मुहूर्तात् प्रभातेऽहं भविष्यामि ध्रुवं सुखी ।**
**आगामिनि, ततः काले यो द्वितीयः क्षणोऽपरः ॥ ३३ ॥**
**तत्र जेतुं गमिष्यामि त्रिदशेन्द्रं सहाऽमरम् ।**
**ततः परेण भूयोऽपि लङ्कामेष्याम्यमत्सरः ॥ ३४ ॥**

**अन्वयः**—योऽयम् आगामी प्रभातकालः मुहूर्तद्वयसम्मितः तस्मिन् आगा- नि प्रभाते यो द्वितीयो मुहूर्तः तस्मात् प्राक् प्रथमे मुहूर्ते अहं रावणः ध्रुवम- यं सुखी भविष्यामि, तदानीं हतशत्रुत्वात् ततः प्रभातात् आगामी यः कालः ग- द्वयसम्मितः तस्मिन् अगामिनि काले यो द्वितीयः तस्मात् यदपरः पूर्वः तत्र ामरम् अमरैः सहितं त्रिदशेन्द्रं जेतुं गमिष्यामि । ततः परेणेति यस्मिन् गामिनि काले शक्रं जेतुं गमिष्यामि, तत्र द्वितीयो यः क्षणः, ततः परेण उप- ष्टात्, तं शक्रं जित्वा, भूयोऽपि अमत्सरः लङ्काम् एष्यामि ।

**हिन्दी**—जो आगामी दो मुहूर्तका सबेरा है उसमें द्वितीय मुहूर्तसे पहले ले क्षणमें मैं सुखी अवश्य हो जाऊँगा। उस समय तक मेरे शत्रु मर गये रहेंगे। त प्रभातके बाद आगामी जो काल दो क्षणका होगा उसमें–द्वितीय क्षणके वाले क्षणमें–देवोंके साथ रहने वाले इन्द्रपर चढ़ाई कर दूंगा। उसके बाद

जिस आगामी कालमें इन्द्रको जीतने जाऊँगा, उससे जो द्विती
उसके बाद इन्द्रको जीतकर निर्द्वन्द्व होकर मैं लङ्का लौट आऊँगा।

**व्याख्या**—अत्रापि अन्वयेनैव स्पष्टार्थतेति व्याख्या त्यक्ता।

**तिङन्तः**—पूर्वत्र 'कालविभागे चानहोरात्राणाम् ३।३।१३७' इत्य
उत्तरत्र परस्मिन् 'विभाषा ३।३।१३९' इति वा लृट्।

**वाच्यपरिवर्तनम्**–सुखिना भाविष्यते भविष्यते वा। त्रिदशेन्द्रो
अमत्सरेण लङ्कैष्यते ( मया ) आयिष्यते वा ॥ ३३–३४ ॥

**तमेवं-वादिनं मूढमिन्द्रजित् समुपागतः।**
**'युयुत्सिष्येऽहमित्येवं वदन्' रिपु-भयंकरः ॥ ३५ ॥**

**अन्वयः**—एवं (स्वप्नराज्यं कुर्वन्तम्) अनर्गलवादिन [illegible] मूढं मूर्
पन्नं वा लङ्केशम् अहं युयुत्सिष्ये इत्येवं वदन्, रिपुभयङ्करः शत्रुतापकः,
मेघनादः, उपागतः समीपमायातः।

**हिन्दी**—इस प्रकार बढ़-बढ़ाने वाले मनोमोदक खाने वाले मूढ़
पास 'मैं लड़ना चाहूँगा' ऐसा कहता हुआ शत्रुओंके लिये भयङ्कर
पहुँचा।

**व्याख्या**—अत्राऽप्यन्वये पूर्ववत् स्पष्टार्थतेति व्याख्या त्यज्यते।
वाच्यपरिवर्तनयोरपि न वैशिष्ट्यम् ॥ ३५ ॥

**नाऽभिज्ञा ते महाराज! जेष्यावः शक्र-पालितम्।**
**दृप्त-देवगणाऽऽकीर्णमावां सह सुराऽऽलयम् ॥ ३६ ॥**

**अन्वयः**—हे महाराज! ते अभिज्ञा न, आवां सह दृप्तदेवगणाकीर्णं
पालितम् सुरालयम् जेष्यावः।

**हिन्दी**—अये महाराज! आपको याद नही है। हम दोनोने
घमण्डी देवताओंसे भरे इन्द्रसे पालित देवलोकको जीत लिया था।

**व्याख्या**—हे महाराज! लङ्केश! ते तव, अभिज्ञा स्मृतिर्नास्ति?
द्वौ पितापुत्रौ, सह सार्द्धम्, दृप्तदेवगणाकीर्णम् उद्धतामरसङ्घजुष्टम्, शक्र
तम् इन्द्रसुरक्षितम्, सुरालयम् अमरावतीं नगरीं, जेष्यावः जितवन्तौ।

**तिङन्तः**—भूताऽनद्यतने इति अनुवर्तमाने 'अभिज्ञावचने लृट् ३।२।
इति लृट्।

**वाच्यपरिवर्तनम्**—नाभिज्ञया भूयते? आवाभ्यां सुरालयो जेष्यते (
षणे द्वे तद्वत् ) ॥ ३६ ॥

**नाऽभिज्ञा ते, स-यक्षेन्द्रं भङ्क्ष्यावो यद् यमं बलात् ।**
**रत्नानि चाऽऽहरिष्यावः प्राप्स्यावश् च पुरीमिमाम् ॥ ३७ ॥**

**अन्वयः**—( सा ) ते अभिज्ञा न, यद् (आवाम्) बलात् सयक्षेन्द्रं यमं भङ्क्ष्यावः, रत्नानि च आहरिष्यावः, इमां पुरीं च प्राप्स्यावः ।

**हिन्दी**—महाराज ! क्या आपको याद नहीं है कि हम दोनोंने जबर्दस्ती कुबेर सहित यमराज को भग्न कर दिया था और उनके रत्नोंको भी लूट लिया था तथा इस नगरीको आ गये थे ?

**व्याख्या**—हे महाराज ! ( सा ) ते तव, अभिज्ञा स्मृतिः, न नास्ति, यत् आवाम्, बलात् हठात्, स-यक्षेन्द्रं कुबेरसहितं, यमं कृतान्तं, भङ्क्ष्यावः भग्नवन्तौ । रत्नानि च हीरकमौक्तिकादीनि, आहरिष्यावः ग्रहीष्यावः । इमां स्वीयां, पुरीं लङ्कां, प्राप्स्यावः उपस्थास्यावः ।

**तिङन्तः**—'**विभाषा साकाङ्क्षे** ३।२।११४' इति लृट् । लक्ष्य-लक्षणयोः सम्बन्धे प्रयोक्तुराकाङ्क्षा । तत्र भञ्जनं लक्षणे, रत्नाहरणं नगर्यागमनं च लक्ष्ये ।

**वाच्यपरिवर्तनम्**—अभिज्ञया भूयते । आवाभ्यां स यक्षेन्द्रो यमो भङ्क्ष्यते । रत्नानि आहरिष्यन्ते । इयं पुरी प्राप्यते ॥ ३७ ॥

**एष पेक्ष्याम्यरीन् भूयो, न शोचिष्यसि रावण ।**
**जगद् द्रक्ष्यसि नी-राममवगाहिष्यसे दिशः ॥ ३८ ॥**
**सह-भृत्यः सुराऽऽवासे भयं भूयो विधास्यसि ।**
**प्रणंस्यत्यद्य देवेन्द्रस् त्वां वक्ष्यति स सन्नतिम् ॥ ३९ ॥**
**भेष्यते मुनिभिस् त्वत्तस् त्वमधिष्ठास्यसि द्विषः ।**
**ज्ञास्येऽहमद्य संग्रामे समस्तैः शूर-मानिभिः ॥ ४० ॥**
**ज्ञायिष्यन्ते मया चाऽद्य वीरं-मन्या द्विषद्-गणाः ।**
**गूहिष्यामि क्षितिं कृत्तैरद्य गात्रैर् वनौकसाम् ॥ ४१ ॥**

इतः सर्गान्तं मेघनादनिनादो बहुधा प्रसरतीति सहैवान्वयः सर्वेषां चतुर्णाम् पद्यानाम्—

**अन्वयः**—एषोऽहम् अरीन् भूयः पेक्ष्यामि । हे रावण ! त्वं न शोचिष्यसि । जगद् नीरामं द्रक्ष्यसि, दिशः अवगाहिष्ये, सहभृत्यः भूयः सुरावासे भयं विधास्यसि, अद्य देवेन्द्रः त्वां प्रणंस्यति, 'त्वदीयोऽहम्' इति नमः निवेदयिष्यति । सः सन्नतिं वक्ष्यति भणिष्यति । त्वत्तः मुनिभिः भेष्यते । त्वम् द्विषः अधिष्ठास्यसि ।

अद्य समस्तैः शूरमानिभिः संग्रामे अहं ज्ञास्ये। अद्य मया वीरम्मन्या द्वि ज्ञायिष्यन्ते। अद्याहं वनौकसां कृत्तैः गात्रैः क्षितिम् गूहिष्यामि।

**हिन्दी**—फिर मैं इन शत्रुओंको पीस डालता हूँ, जिससे पिताजी आ शोक नहीं करेंगे। संसारको रामसे शून्य देखेंगे। सभी दिशाओंमें विहार नौकरों चाकरोंके साथ अमरपुरीमें पुनः आतङ्क फैला देंगे। आज आपके सामने नत होगा और खूब झुककर प्रणतिपूर्वक बोलें आपसे भयभीत होंगे। आप शत्रुओं प रोब गांठियेगा। आज मुझे पहचानेंगे। उन वीराभिमानी शत्रुओंको मैं जंगलियोंके काटे हुए अङ्गोंसे पृथ्वीको ढक दूंगा।

**व्याख्या**—स्पष्टार्थततति व्याख्या त्यज्यते, तिङपि तद्वत्।

**वाच्यपरिवर्तनम्**—अरयः पेक्ष्यन्ते। त्वया शोचिष्यते। नीरा द्रक्ष्यते वा। दिशो गाहिष्यन्ते। सभृत्यैर्भयं विधायिष्यते विधास्य त्वं प्रणंस्यसे, तेन सन्नतिः वक्ष्यते। मुनयो भेष्यन्ति। त्वया द्विषो ऽधिष्ठास्यन्ते वा। शूरमानिनो मां ज्ञास्यन्ति। अहं वीरम्मन्य ज्ञास्यामि। मया क्षितिर्गूहिष्यते ॥ ३८-४१ ॥

इन्द्रजित् स्ववक्तव्यमेव साधयति—

**आरोक्ष्यामि युगान्त-वारिद-घटा-संघट्ट-घोर-ध्वनि**
**निर्यास्यन् रथमुच्छ्रित-ध्वज-धनुः-खड्ग-प्रभा-भासुरम्।**
**श्रोष्यस्यद्य विकीर्ण-वृक्ण-विमुख-व्यापन्न-शत्रौ रणे**
**तृप्तांश् छोणित-शोण-भीषणमुखान् क्रव्याऽशिनः क्रोशतः ॥**

**॥ इति भट्टिकाव्ये तिङन्त-काण्डे लङ्विलसितो नाम षोडशः सर्गः ॥**

**अन्वयः**—नगरात् निर्यास्यन् अहम् युगान्तवारिदघटासंघट्टघोर उच्छ्रितध्वजधनुःखड्गप्रभाभासुरं रथम् आरोक्ष्यामि। अद्य त्वम् विकीर्ण विमुख-व्यापन्न-शत्रौ रणे शोणित-शोण-भीषण-मुखान् तृप्तान् क्रोशतः क्रव्या श्रोष्यसि।

**हिन्दी**—नगरसे निकलकर मैं प्रलयकालके मेघसमूहकी रगड़से गम्भीर ध्वनिके समान ध्वनिवाले तथा फहराती ध्वजा, धनु एवं तलवा चमकसे शोभायमान रथपर चढ़ूंगा। आज आप छितराये, काटेगये, हुए, मारे गये हों शत्रु जिसमें, ऐसे संग्राममें लोहूसे लाल हो गये हैं मुख जिनके, ऐसे खूंखार गर्जते हुए मांसाहारी जानवरोंको सुनेंगे।

**व्याख्या**–नगरात् पुरतः, निर्गच्छन् निर्यान्, अहम् युगान्त०–ध्वनिम् प्रलय-
यसङ्घसंघर्षणगम्भीरशब्दम्, उच्छ्रित०–भासुरम् घूतपताकशरासनासिकान्ति-
प्ति,रथं स्यन्दनम्,आरोक्ष्यामि अधिष्ठास्यामि । अद्य, त्वम् मे पिता,विकीर्ण०–
त्रौ व्यत्यस्तच्छिन्न-पलायमान-विपन्न-रिपौ, रणे संग्रामे, शोणित०–मुखान्
क-रक्त-भयानकास्यान्, तृप्तान् सुहितान्, क्रोशतो रसतः, क्रव्याशिनो मांसा-
न्, श्रोष्यसि आकर्णयिष्यसि ।

**समासः**––युगान्ते वारिदानां घटाः, तासां संघट्टः, तस्येव घीरो ध्वनिर्यस्य
:, तम् । उच्छ्रितं च तत् ध्वजधनुः खड्गम्, तस्य प्रभाभिर्भासुरम् । ध्वजाश्च
नूंषि च खड्गाश्चेति द्वद्वे सेनाङ्गत्वादेकत्वं नपुंसकत्वम् । विकीर्णाः वृक्णाः
मुखाः व्यापन्नाः शत्रवो यस्मिन् सः तस्मिन् ( रणशब्द उभयलिङ्गः ) ।
ोणितेन शोणानि भीषणानि मुखानि येषां ते तान् । नात्र तिङि वैशिष्ट्यम् ।

**वाच्यपरिवर्तनम्**––मया रथ आरोक्ष्यते ( विशेषणे तद्वत् ), क्रव्याशिनः
ोष्यन्ते श्राविष्यन्ते वा ( विशेषणानि तद्वत् ) ।

**शिक्षा**—'गर्जति शरदि न वर्षति, वर्षति वर्षासु निःस्वनो मेघः ।
नीचो वदति न कुरुते, न वदति सुजनः करोत्येव ॥
इति शिक्षयति सर्गः ॥ ४२ ॥

इति श्रीभट्टिमहाकाव्ये तिङन्तकाण्डे लृङ्विलसिते रावणविलापान्ते
मेघनादसन्नाहो नाम षोडशोऽध्यायः ।

ज्ञा

हि

शोक नहीं

## सप्तदशः सर्गः

### ( उपक्रमः )

अत्र रों चाक सर्गे तिङन्तकाण्डे [1]लङ् विलसितं चलति । लकारोऽय
लकारेषु के सामन्लेट् लङ् लोट् विधिलिङ्क्ष द्वितीयो गण्यते । परन्
विषय-वामी भयमर्गन-सौविध्येन प्रथममुपात्तवान् । ततो लङ्-विलसितम्
सितम्; लझे पहेड विलसितमिति १९-सप्तदशसर्गतो २० विश-९
चतुर्णामपि ले काटे काराणामविच्छिन्नं निरूपणं कृतवान् । तत्र लिङ्
सर्गे नामसाम्यात् स्पष्ट अर्थप्रत्यय-साम्यकल्पाच्च विधि-लिङाशीर्लिङ
धातुकार्द्धधातुकयोर्निरूपणं कृतवानिति तत्र द्रष्टव्यम् ।

अत्र सार्वधातुकलकारेषु
भेदोऽपि मनाक् गणभेदादेव भवति चतुर्वपि गणभेदेन विकरणभेदो
चुरादिप्रक्रिया-धातूनामेकविधाः प्रत्ययाः । न्त-विकरणक-स्वा
जुहोत्यादि-स्वादि-रुधादि-तनादि-क्रयादीनां षण्णा विकर
एवं गणभेदेन द्विधा लकार-भेदप्रत्ययास्तु तत्तल्लकारीय-
स्वप्र

तत्रेह लङ् लकारस्य प्रत्यया निर्दिश्यन्ते । लङ्-लकारे धा
भवति । अजादेस्तु आडागमस्ततो पदनिर्माण-प्रक्रिया चलति ।

लङ्लकारस्य अदन्त-विकरण-प्रत्ययाः ।

| | **परस्मैपदे** | | | **आत्मनेप** | |
|---|---|---|---|---|---|
| | एकवचन | द्विवचन | बहुवचन | एकवचन | द्विव |
| प्र० | त् | ताम् | अन् | प्र० त | इताम् |
| म० | स् | तम् | त | म० थाः | इथा |
| उ० | अम | व | म | उ० इ | वहि |

---

[1] अन्यत्र सर्गेषु लङ्निर्देशो यथा—१-५ । २-४३, ५५ । ३-४
३४, ३६, ५१ । ४-२९, ३२, ४१ । ५-५. २६, ३६, ३९, ४
६, ८, ३९-४१, ५०, ७१, ८६, ८७, ८९, ९७, १०४, ४९, ५५, ५७
४६ । ७-२४, २३-२५, २८-२९, ३३, ३५, ५१, ५९, ८-८, १७, २२,
८, २६, २७, ३०, ३२, ३४-३५, ४०-४४, ५३, २, ७९-८०, १०३,
९९, १०३-४, ७, १७, २६-२७, ३० । ६, ५९-६४, ६८-७२,

एषु एव प्रत्ययेषु विकरणभेदेन पदभेदो निर्मीयते। सर्वत्रैवोत्तमपुरुषे 'अतो दीर्घो यञि ७।३।१०१' इति व-म-वहि-महिषु अदन्तविकरणत्वादङ्गस्य दीर्घो जायते। अन् अन्त इत्यत्र 'अतो गुणे ६।१।९७' इति पररूपं स्यात् दीर्घाभावादत्वात्।

## लङ् लकारे विभिन्न-विकरणक-गण-प्रत्ययाः

| परस्मैपदे | | | आत्मनेपदे | | | |
|---|---|---|---|---|---|---|
| वचन | द्विवचन | बहुवचन | | एकवचन | द्विवचन | बहुवचन |
| | ताम् | अन् | प्र० | त | आताम् | अत |
| | तम् | त | म० | थाः | आथाम् | ध्वम् |
| म् | व | म | उ० | इ | वहि | महि |

गणविकरणज्ञानं चतुर्ष्वपि सार्व-धातुक-लकारेष्वावश्यकमिति इहैव निर्दिश्यते। गणम् धातुभ्यः १—भ्वादौ 'कर्त्तरि शप् ३।१।६८'। २—'अदिप्रभृतिभ्यः शपः ।७३' (लुक्)। ३—'जुहोत्यादिभ्यः श्लुः' २।४।७५'। ४—'दिवादिभ्यः श्यन्' ६९' ५—'स्वादिभ्यः श्नुः ३।१।७३'। ६—'तुदादिभ्यः शः ३।१।७७'। ७—धादिभ्यः श्नम् ३।१।७८'। ८—तनादिकृञ्भ्य उः ३।१।७९'। ९—क्र्यादिभ्यः ३।१।८१'। १०—सत्या० चुरादिभ्यो णिच् ३।१।२५'। चुरादिषु च णिजन्तेभ्यः 'कर्त्तरि शप् ३।१।६८' इत्येतान्येव विकरणानि तत्तद्गणस्थ-धातुषु प्रयोज्यानि।

अदादि-जुहोत्यादि-स्वादि-रुधादि-तनादि-क्र्यादिषु षट्सु इमे प्रत्ययाः। तत्र विकरण-भेदेन पद भेदो ज्ञेयः। जुहोत्यादौ प्रथमपुरुष-बहुवचनस्य 'अत्' इत्यस्य स्थाने उः भवति। तत्र धातोः गुणोऽपि 'जुसि च ७।३।८३' इत्यनेन जायते। अदादौ आदन्त-धातूनामपि 'झेर्जुस् ३।४।१०' 'लङः शाकटायनस्यैव १११'इत्यनेन भवति वा। ततः 'आतो लोप इटि च ६।४।६४' इति आलोपः। अत्र वं म वहि महिषु 'अतो दीर्घो यञि ७।३।१०१' न प्रवर्त्तते, अदन्त-विकरणाभावात्। लङि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः ६।४।७१' इत्यडागमोऽजादीनाम् तु 'आडजादीनाम् ६।४।७२' इति आडागमश्च धातोरादौ ज्ञेयः। इत्यलम्।

## उदाहरणानि—१७।१ भट्टिपद्ये

(१) आङः शासु इच्छायाम्(अदादिरनुदात्तेदुदात्तः)। आशास्त आशासाताम् आशासत। आशास्थाः आशासाथाम् आशाध्वम्। आशासि आशास्वहि आ-

शास्महि। अत्र 'शास इदङ्हलोः ६।४।३४' इति इत्वं न, परस्मैपदे तद्विधा 'शासिवसिघसीनां च ८।३।६०' इति षत्वं च परस्मैपदे। अशात् अशि अशासुः। अशात् अशाः।

(२) ष्णा शौचे (अदादिरनुदात्त उदात्तेत्)। अस्नात्, अस्नाताम्, अ (अस्नान्)। अस्नाः, अस्नातम्, अस्नात। अस्नाम्, अस्नाव, अस्नाम। शाकटायनस्यैव ३।४।१११' इति वा झेर्जुस् विशेषः।

(३) हु धातोर्ण्यन्तस्य अहावयत्, अहावयताम्, अहावयन् इत्यादि। ब्रूञ् धातोरपि ण्यन्तस्य वचादेशेऽवाचयदित्यादि। डुकृञ् करणे (तनादिः उ दात्त-ञित्)। अकरोत्, अकुरुताम् अकुर्वन्। अकरोः, अकुरुतम्, अकुरुत। अ रवम्, अकुर्व, अकुर्म। इति (परस्मैपदे)।

(आत्मनेपदे रूपम्) अकुरुत, अकुर्वाताम्, अकुर्वत। अकुरुथाः, अकुर्वा अकुरुध्वम्। अकुर्वि, अकुर्वहि, अकुर्महि।

एवं हि सर्वत्र गणभेदेन विकरण-भेदं प्रयुञ्जन् विशेष-कार्याणि च कुर्व आत्मनेपदे परस्मैपदे चतुर्णामेकविधानाम् षण्णां चैकविधा नाम् ले द्विधा भिन्नान् प्रत्ययान् गृह्णन् लङ्-पदानि निर्माहि इति सत गनुगमः

द्वितीये भट्टिपद्ये चुरादिः पूज धातुः पूजार्थकः अपूजयन् इति पद्ये। गुहू रणे(भ्वादिः उदात्तः स्वरितेत्)। अगूहत अगूहेताम् अगूहन्त इत्यादि। 'ऊदुप गोहः ६।४।८९' इति ऊत्व-विशेषः। वृधु चुरादिः। दिश उपदेशे (तु० अनु त्तोदात्तेत्) सार्वधातुके तुदादौ। 'सार्वधातुकमपित् १।२।४' इति शविक स्यापित्सार्वधातुकतया ङित्वम्। प्रादिशत् प्रादिशताम् प्रादिशन्। इत्यादि। तत्र एवं विकरणभेदेन गणधातूनां पदानि स्वयं निर्मेयाणि सगणं सेड धातुनिर्देशेन सह। सूत्रोल्लेख एव टीकायां स्यान्नान्यदित्यवधानीयम्।

## (सर्गारम्भः)

आशासत ततः शान्तिमस्नुरग्नीनहावयन्।
विप्रानवाचयन् योधाः, प्राकुर्वन् मङ्गलानि च॥ १॥

अन्वयः—ततः योधाः शान्तिम् अशासत, अस्नुः। अग्नीन् अहाव विप्रान् अवाचयन्, मङ्गलानि च प्राकुर्वन्।

**हिन्दी**—इसके बाद सैनिकोने शान्तिकी इच्छा की, स्नान किया, अ हवन कराया, विप्रोंसे स्वस्ति वाचन कराया तथा मङ्गलकृत्य किया।

**व्याख्या**—तत इन्द्रजित्प्रतिज्ञानन्तरम्, योधाः तत्सैनिकाः, शान्तिम् शान्तिपाठम्, आशासत अकामयन्त । अस्नुः स्नानमकुर्वन् । अग्नीन् वह्नीन्, अहावयन् हवनेन अतर्पयन् । विप्रान् ब्राह्मणान्, अवाचयन् स्वस्तिवाचनम् अकारयन् । (स्वयम्) मङ्गलानि माङ्गलिककार्याणि, प्रांकुर्वन् प्रादधुः ।

**तिङन्तः**—पूर्वोदाहरणे द्रष्टव्यम् ।

**वाच्यपरिवर्तनम्**—इतः वाच्यपरिवर्तनं स्वयं छात्रैः कार्यम् । प्रारम्भात् षोडशसर्गान्तम् मया दर्शितम् । यदि एतावतापि तैरिदं कर्तुं न शिक्षितं चेत् पठनं तेषां व्यर्थम् । यथा—योधैः शान्तिः आशिष्यत । अस्नायत । अग्नयोऽहाव्यन्त । विप्रा अवाच्यन्त । मङ्गलानि प्राक्रियन्त । इत्येवं स्वयमग्रेऽध्यायिभिः वाच्यपरिवर्तनं कार्यम् । मया तु इतो निरुध्यते ।। १ ।।

**अपूजयन् कुल-ज्येष्ठानुपागूहन्त बालकान् ।**
**स्त्रीः समावर्धयन् साऽस्त्राः, कार्याणि प्रादिशंस् तथा ।। २ ।।**

**अन्वयः**—कुलज्येष्ठान् अपूजयन्, बालकान् अगूहन्त । सास्राः स्त्रीः समावर्द्धयन्, तथा कार्याणि प्रादिशन् ।

**हिन्दी**—खानदानके बड़े वृद्धोंकी पूजा की । बालकोंको गोदमें बैठाया । रोती स्त्रियोंको बढ़ावा दिया तथा गृह कार्योंको सम्हाले रहनेको आदेश दिया ।

**व्याख्या**—कुलज्येष्ठान् वंशवृद्धान्, अपूजयन् समार्चयन् । बालकान् सन्तानान्,अगूहन्त अङ्कमासादयन्त । सास्राः युद्धे गतानां भगवानेव रक्षक इति रुदितवतीः, स्त्रीः भार्याः, समावर्द्धयन्त जित्वा आगता वयं पुरस्कृताः स्याम इत्यादि वाक्यैः प्रोत्साहितवन्तः । तथा अन्यच्च, कार्याणि गृहकृत्यानि, समादिशन् निर्दिष्टवन्तः ।

**तिङन्तः**—पूर्वत्रैवोदाहरणे गतः ।। २ ।।

**आच्छादयन्, व्यलिम्पंश् च, प्राश्नन्नथ सुराऽऽमिषम् ।**
**प्रापिबन् मधु-माध्वीकं भक्ष्यांश चाऽऽदन् यथेप्सितान् ।। ३ ।।**

**अन्वयः**—आच्छादयन् (कवचादीन्),व्यलिम्पन् (सुगन्धिपुष्परसादीन्), सुरामिषम् प्राश्नन्, मधुमाध्वीकम् प्रापिबन्, यथेप्सितान् भक्ष्यान् च आदन् ।

**हिन्दी**—सैनिकोंने कवच आदि पहने, इत्र-फुलेल लगाये, मांस-मदिराका उपयोग किया, आसवोंका खूब पान किया तथा यथेच्छ भोजन किया ।

**व्याख्या**—(योधाः कवचादीन्) आच्छादयन् पिनद्धवन्तः । (पुष्परसादीनि सुगन्धिद्रव्याणि) व्यलिम्पन् समालिप्तवन्तः । सुरामिषम् मद्यमांसम्, प्राश्नन्

अभ्यवाहरन् । मधुमाध्वीकम् मृदु आसवम्, प्रापिबन् सुष्ठु पीत तान् मनोऽभिलषितान्, भक्ष्यान् श्रीखण्डपायसादीन्, आदन् अ

तिङन्तः—आङ्पूर्वकः छद अपवारणे ( चुरादिः ) । लिप मुचादिः)। 'शे मुचादीनाम्' ७।१।५९' इति नुम् विशेषः । अश भो 'श्नाभ्यस्तयोरातः ६।४।११२' इति आलोपविशेषः । पा पाने ( दात्तेत्)। पिबादेशो विशेषः 'पाघ्राध्मा० ७।३।७८' इत्यनेन । अद दात्तोदात्तेत्) । 'अदः सर्वेषाम्७।२।१००' इति अपृक्तस्य अडागमं

न्यश्यन् शस्त्राण्यभीष्टानि, समनह्यंश् च वर्मभिः ।
अध्यासत सु-यानानि, द्विषद्भ्यस् चाऽशपंस् तथा ॥

अन्वयः—अभीष्टानि शस्त्राणि न्यश्यन्, वर्मभिः समनह्यन् अध्यासत, तथा द्विषद्भ्यः अशपन् ।

हिन्दी—सैनिकोंने अभीष्ट शस्त्रोंको तेज किया, अपनेको क अच्छी सवारियोंपर चढ़े तथा शत्रुओंको शाप दिया ।

व्याख्या—( योधाः ) अभीष्टानि यथेप्सितानि, शस्त्रा नश्यन् तेजितवन्तः । वर्मभिः सन्नाहैः, समनह्यन् सन्नद्धाः अभूवन् शोभनवाहनानि, अध्यासत अध्यारोहन् । तथा अन्यच्च, द्विषद्भ्य अशपन् आक्रुष्टवन्तः, पापाः क्व यास्यथेत्यादि ।

तिङन्तः—शो तनूकरणे (दि० अनुदात्तोदात्तेत्) । 'ओतः श्यनि ओलोपो विशेषः । णह बन्धने (दि० अनुदात्तः स्वरितेत्) । आस उपवे अनुदात्तेदुदात्तः) । शप आक्रोशे (भ्वा० स्वरितेत्) अनुदात्तः ॥ ४ ॥

अपूजयंश् चतुर्-वक्त्रं, विप्रानार्चंस् तथाऽस्तुवन् ।
समालिम्पत शक्राऽरिर् यानं चाऽभ्यलषद् वरम् ॥ ५ ॥

अन्वयः—चतुर्वक्त्रम् अपूजयन् तथा विप्रान् आर्चन्, अस्तुवन् च। समालिम्पत ( तान् ), वरं यानं च अभ्यलषत् ।

हिन्दी—सैनिकोंने ब्रह्माजीकी पूजा की, ब्राह्मणोंका भी पूजा किया । उनकी प्रशंसा की । इन्द्रजित् ( मेघनाद ) ने उनको बढ़ावा और अच्छी सवारी ( अपने लिये ) चाही ।

व्याख्या-(योधाः) चतुर्वक्त्रं ब्रह्माणम्, अपूजयन् पूजितवन्तः । विप्रान् णान्, आर्चन् अपूजयन्,अस्तुवन् प्राशंसन् । शक्रारिः इन्द्रजित्, समालिम्प र्द्धयत्, तान् स्वसैनिकान् । वरम् उत्कृष्टं, यानं वाहनम्, अभ्यलषत् अभ्यल

न्तः—अर्च गतौ याचने च ( भ्वा० उदात्तोदात्तेत् ) । ष्टुञ् स्तुतौ गत्तो ञित् ) । लष अभिलाषे (भ्वा० उदात्तोदात्तेत्) । 'वा भ्राश० ति वा श्यन् ।। ५ ।।

। ामु वर्म रत्नाऽऽढ्यमबध्नात् खड्गमुज्ज्वलम् ।
ध्यास्त स्यन्दनं घोरं, प्रावर्तत ततः पुरः ।। ६ ।।

—शक्रारिः रत्नाढ्यं वर्म आमुञ्चत्, उज्ज्वलं खड्गम् अबध्नात् । म् अध्यास्त, ततः पुरः प्रावर्तत ।

—मेघनादने रत्न जड़ित कवच लगाया, चमकती तलवार बाँधी, पर चढ़ा तब आगे आगे चला ।

ा:—शक्रारिः इन्द्रजित्, रत्नाढ्यं रत्नप्रत्युप्तं, वर्म कवचम्, आमुञ्चत् यत् ज्ज्वलम् उत्कृष्टं, खड्गम् असिम्, अबध्नात् कक्षस्थमकरोत् । रं, स्यन्दनं रथम्, अध्यास्त आरोहत् । ततः पश्चात्, पुरः सैन्याग्रे, प्राद्योतत ।

ङन्तः—बन्ध ( क्र्या० अनुदात्तोदात्तेत् ) ।। ६ ।।

आघ्नन् भे महास्वानाः, कम्बूंश् चाऽध्यधमञ् शुभान् ।
अताडयन् मृदङ्गांश् च, पेराश् चाऽपूरयन् कलाः ।। ७ ।।

अन्वयः—महास्वानाः भेरीः आघ्नन्, ( सैनिकाः ) शुभान् कम्बून् च अधमन् । मृदङ्गान् अताडयन्, कलाः पेराः च अपूरयन् ।

हिन्दी—सैनिकोंने बड़े शब्द करने वाले नगारे बजाये, शुभसूचक शंख फूंके । मृदङ्ग बजाये तथा मनोहर पेरा नामके बाजाओंको वायुद्वारा बजाया ।

व्याख्या—( सैनिकाः ) महास्वाना घोरध्वनीः, भेरीः दुन्दुभीन्, आघ्नन् ताडितवन्तः । शुमान् शुभदान्, कम्बून् शङ्खान्, अधमन् शब्दितवन्तः । मृदङ्गान् मुरजान्, अताडयन् ताडितवन्तः । कलाः मृदुशब्दाः, पेराः वाद्यविशेषाः च, अपूरयन् पूरितवन्तः ।

तिङन्तः—ध्मा शब्दाग्निसंयोगयोः ( भ्वा० अनुदात्तोदात्तेत् ) । 'पाघ्रा० ७।३।७८' इति धमादेशः ।। ७ ।।

अस्तुवन् बन्दिनः, शब्दानन्योन्यं चोदभावयन् ।
अनदन् सिंहनादांश् च, प्राद्रेकत हय-द्विपम् ।। ८ ।।

अन्वयः—बन्दिनः अस्तुवन्, अन्योऽन्यं शब्दान् च उदभावयन् (सैनिकाः) । सिंहनादान् अनदन्, हयद्विपम् प्राद्रेकत ।

**हिन्दी**—बन्दियोंने ( सैनिकोंकी ) प्रशंसा की, सैनिकोंने परस्पर अपनी बड़ाई की और सिंहके समान गर्जनाएं कीं। हाथी-घोड़ोंने भी हिनहिनाना तथा चीत्कारना किया।

**व्याख्या**—बन्दिनः स्तुतिपाठकाः, अस्तुवन् प्राशंसन्। (सैनिकाः) अन्योऽन्यम् परस्परम्,शब्दान् साङ्ग्रामिककृत्यसूचकनामानि, उदभावयन् उदघाटयन्। सिंहनादान् शार्दूलशब्दान्, अनदन् शब्दितवन्तः। हयद्विपम् अश्वगजम्, प्राद्रेकत शब्दितवत्। क्रमेण हया अह्लेषन्त, गजाः चिदकुर्वन्।

**तिङन्तः**—णद अव्यक्ते शब्दे (भ्वा० उदात्त उदात्तेत्)। द्रेकृ शब्दोत्साहयोः ( भ्वा० अनुदात्तेदुदात्तः )।

**समासः**–अन्यस्य अन्यस्य इति अन्योऽन्यम्। पूर्वपदस्थविभक्तेः सु-भावः। हयाश्च द्विपाश्चेति हयद्विपम्। 'विभाषा० २।४।१२' इति पशुद्वन्द्वस्य विभाषैकवद्भावः ॥ ८ ॥

**अ-निमित्तान्यथाऽपश्यन्नस्फुटद् रवि-मण्डलम्।**
**औक्षन् शोणितमम्भोदा, वायवोऽवान् सु-दुःसहाः ॥ ९ ॥**

**अन्वयः**—अथ (सैनिकाः) अनिमित्तानि अपश्यन्। रविमण्डलम् अस्फुटत्, अम्भोदाः शोणितम् औक्षन्, वायवः सुदुःसहाः अवान्।

**हिन्दी**—सैनिकोंने अपशकुन देखा। जैसे—रविमण्डल फट गया, मेघ खून बरसाने लगे, वायुदेव असह्यरूपसे बहने लगे।

**व्याख्या**—अथ गमनानन्तरम्, (सैनिकाः) अनिमित्तानि कुशकुनानि ( अत्र निन्दायां नञ् ), अपश्यन् निरैक्षन्त। रविमण्डलम् सूर्यचक्रम्, अस्फुटत् स्फुटितमदृश्यत। अम्भोदाः मेघाः, शोणितं रुधिरम्, औक्षन् असिञ्चन्। वायवः वाताः, सुदुःसहाः क्रूराः, अवान् वान्ति स्म।

**तिङन्तः**—दृशिर् प्रेक्षणे ( भ्वा० उदात्तेदनुदात्तः )। पश्यादेशः। स्फुट विकसने ( तु० उदात्तोदात्तेत् )। उक्ष सेचने ( भ्वा० उदात्तोदात्तेत् ) ॥ ९ ॥

**आर्च्छन् वामं मृगाः कृष्णाः, शस्त्राणां व्यस्मरन् भटाः।**
**रक्तं न्यष्ठीवदक्लाम्यदखिद्यद् वाजि-कुञ्जरम् ॥ १० ॥**

**अन्वयः**—कृष्णाः मृगाः वामम् आर्च्छन्, भटाः शस्त्राणां व्यस्मरन्। वाजिकुञ्जरम् रक्तम् न्यष्ठीवत्, अक्लाम्यत्, अखिद्यत् च।

**हिन्दी**—कृष्णसार मृग दाहिनेसे बाईं ओर गये। सैनिक शस्त्र लेना ही भूल गये। हाथी-घोड़े खून फेंकने लगे, थकसे गये एवं खिन्न मालूम पड़ने लगे।

**व्याख्या**—कृष्णाः मृगाः कृष्णसाराः हरिणाः, वामम् दक्षिणभागात् वामभागम्, आर्च्छन् आयन । भटाः सैनिकाः, शस्त्राणां प्रहरणानाम्, व्यस्मयन् । वाजिकुञ्जरं हयगजम्, रक्तं शोणितम्, न्यष्ठीवत् ष्ठीविरस्वत्, तथा अक्लाम्यत् अखिद्यत् । क्लान्तं खिन्नं च (परिश्रमाभावेऽपि) अभवत् इत्येव अनिमित्तानि इत्यर्थः ।

**तिङन्तः**—ऋ गतौ ( भ्वा० अनुदात्तोदात्तेत् ) । **'पाघ्रा० ७।३।७८'** इति ऋच्छादेशः । ऋच्छ गतौ इत्यस्यैव वा रूपम् । ष्ठिवु निरसने । **'सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधो वाच्यः ६।१।६४'** इति सत्वाभावः । ष्ठिवु-क्लमु-चमां शिति दीर्घश्च । क्लमु परितापे, खिद दैन्ये (दिवादी) । शस्त्राणामित्यत्र **'अधीगर्थदयेशां कर्मणि २।३।५२'** इति षष्ठी विभक्तिः ।। १० ।।

**न तानगणयन् सर्वानास्कन्दंश् च रिपून् द्विषः ।**
**अच्छिन्दन्नसिभिस् तीक्ष्णैरभिन्दंस् तोमरैस् तथा ।। ११ ।।**

**अन्वयः**—द्विषः तान् सर्वान् न अगणयन्, रिपून् च आस्कन्दन् । तीक्ष्णैः असिभिः अच्छिन्दन, तथा तोमरैः अभिन्दन् ।

**हिन्दी**—मनुष्योंके शत्रु राक्षसोंने उन अशकुनोंकी कुछ परवाह नहीं की । वे शत्रुओं पर टूट पड़े, तीखी तलवारोंसे काटने लगे और भालोंसे भेदने लगे ।

**व्याख्या**—द्विषः नरा[illegible]ं शत्रवः राक्षसाः, तान् सर्वान् अशकुनान्, न नहि, अगणयन् अचिन्तयन् । रिपून् अरीन् ( वानरान् इत्यर्थः ), आस्कन्दन् अभ्ययुञ्जन् । तीक्ष्णैः तेजितैः, असिभिः खड्गैः, अछिन्दन् अखण्डयन् । तोमरैः भल्लैश्च, अभिन्दन् व्यदारयन् ।

**तिङन्तः**—स्कन्दिर् गतिशोषणयोः ( भ्वा० अनुदात्तोदात्तेत् ) । छिदिर् द्वैधीकारे, भिदिर् विदारे ( रुधादी अनुदात्तस्वरितेतौ ) ।। ११ ।।

**न्यकृन्तंश् चक्र-धाराभिरतुदन् शक्तिभिर् दृढम् ।**
**भल्लैरविध्यन्नुग्राग्रैरतृंहंस् तोमरैरलम् ।। १२ ।।**

**अन्वयः**—( राक्षसाः ) चक्रधाराभिः न्यकृन्तन्, शक्तिभिः दृढम् अतुदन् । भल्लैः अविध्यन्, उग्राग्रैः तोमरैरलम् अतृंहन् ।

**हिन्दी**—राक्षसचक्रों की धाराओंसे काटने लगे (यहाँ कर्ताकी जगह राक्षस, कर्मकी जगह वानर हैं ), शक्तियोंसे व्यथित करने लगे । भालोंसे बेधने लगे और नोकीले तोमरोंसे जान निकालने लगे ।

**व्याख्या**—(राक्षसाः) चक्रधाराभिः वानरान् कपीन्, न्यकृन्तन् अच्छिन्दन् । शक्तिभिः तन्नामशस्त्रैः, दृढम् अत्यर्थम्, अतुदन् अव्यथयन् । भल्लैः शल्यैः, अवि-

घ्यन् अताडयन् । तोमरैः त्रिशूलैः, अलम् पर्याप्तम्, अतृंहन् अघ्नन् ( तिलोकप्रसिद्धो भल्लः, त्रिशूलः सद्यः प्राणहरस्तोमर इति भेदः )।

**तिङन्तः**—व्यध ताड़ने ( दिवादिरनुदात्तोदात्तेत् )। ‘ग्रहिज्या० ६। इति सम्प्रसारणम् ॥ १२ ॥

आस्यन् प्लवङ्गमा वृक्षानधुन्वन् भू-धरैर् भृशम् ।
अहिंसन् मुष्टिभिः क्रोधाददशन् दशनैरपि ॥ १३ ॥

**अन्वयः**—(वानरावसरोऽधुना) प्लवङ्गमाः वृक्षान् आस्यन्, भूधरैः अधुन्वन् (राक्षसान् इति शेषः)। मुष्टिभिः अहिंसन्, क्रोधाद् दशनैः अपि अद

**हिन्दी**—वानरोंने वृक्षोंको फेंका, पर्वतोंसे राक्षसोंको खूब धून दि मुक्कोंसे मारडाला तथा क्रोधसे दाँतोंसे भी काट लिया ।

**व्याख्या**—प्लवङ्गमाः वानराः, वृक्षान् द्रुमान्, आस्यन् अक्षिपन् । पर्वतैः, अधुन्वन् । ‘अधूर्वन्’ इति पाठेऽपि स एवार्थः । राक्षसान् इति मुष्टिभिः बद्धकरैः, पाणिभिः हस्तैः, अहिंसन् अघ्नन् । क्रोधात् कोपात्, दन्तैः, अदशन् अखादन् ।

**तिङन्तः**—धूर्व हिंसायाम (भ्वा० उदात्तोदात्तेत्)। दंश दंशने (भ्वा० दात्तोदात्तेत् )। ‘दंशसञ्जस्वञ्जां शपि ६।४।२५’ इति नस्य लोपः ॥ १३

प्रादुन्वन् जानुभिस् तूर्णमतुदंस् तल-कूर्परैः ।
प्राहिण्वन्नरि-मुक्तानि शस्त्राणि विविधानि च ॥ १४ ॥

**अन्वयः**—प्लवङ्गमाः जानुभिः प्रादुन्वन्, तलकूर्परैः अतुदन् । अरिमु क्तानि विविधानि शस्त्राणि प्राहिण्वन् ( तेषामेव पार्श्वे ) ।

**हिन्दी**—वानरोंने राक्षसोंको घुटनोंसे दबोच दिया, तलहत्थी और केहु नियोंसे भी व्यथित किया । शत्रुओंके द्वारा छोड़े गये शस्त्रोंको उन्हींके पास लौटा दिया ।

**व्याख्या**—प्लवङ्गमाः वानराः, जानुभिः उरुपर्वभिः, प्रादुन्वन् व्यथाप्रि तवन्तः । तलकूर्परैः हस्ततलैः, प्रकोष्ठैः च, अतुदन् अव्यथयन् । अरिमुक्तानि शत्रुत्यक्तानि, विविधानि अनेकरूपाणि, शस्त्राणि प्रहरणानि, प्राहिण्वन् ता- मेव पार्श्वे प्रैषयन्, प्रावर्तयन् इत्यर्थः ।

**कोषः**—द्वितीयसर्गे त्रिंशत्तमश्लोकेऽयं कोशः ( २।३० )।

**तिङन्तः**—टुदु उपतापे ( स्वा० उदात्तेदनुदात्तः ) । ( हि गतावपि तद्वत् )। ‘हिनुमीना ८।४।१५’ इति णत्वम् ॥ १४ ॥

**अतृणेट् शक्र-जिच् शत्रूनभ्राम्यच् च समन्ततः ।**
**अध्वनच् च महा-घोरं, न च कंचन नाऽदुनोत् ॥ १५ ॥**

**अन्वयः**—शक्रजित् शत्रून् अतृणेट्, समन्ततः अभ्राम्यत्, महाघोरम् अध्वनत् । कञ्चन न अदुनोत् इति न । सर्वानेव अदुनोदित्यर्थः ।

**हिन्दी**—मेघनादने शत्रुओंको मार डाला, चारों तरफ घूमता रहा । भयङ्कर चिल्लाता था, किसीको भी दुःख देनेसे बाज न आया। सभीको दुःख दिया ।

**व्याख्या**—शक्रजित् रावणिः, शत्रून् अरीन्, अतृणेट् अहन् । समन्ततः सर्वतः, अभ्राम्यत् रणे निःशङ्को व्यहरत् । महाघोरम् अतिक्रूरम्, अध्वनत् शब्दायते स्म । कञ्चन कञ्चिदपि, न नहि, अदुनोत् उपतापितवान् इति न, न् एव अदुनोत् अव्यथयत् इत्यर्थः ।

**तिङन्तः**— अतृणेट् 'तृणह इम् ७।३।९२' इति इम् विशेषः । धातुस्तु रौधा-षः । इति बहुधाऽभिहितः । श्नम् मित्वात् तृह् इत्यस्य मध्ये भवति । तृनह् + =णत्वे तृणह् ति, इमि तृणेह् ति, 'होढः'=तृणेढ् ति, '**झषस्तथोर्धोऽधः** ८।२। ४०' इति तृणेढ् + धि, ष्टुत्वे ढलोपे तृणेढि । 'इतश्च ३।४।१००' इतीकारलोपे अडागमे अतृणेढ्, जश्त्वचर्त्वे अतृणेट् अतृणेड् ॥ १५ ॥

**नाऽजानन् सन्दधानं तं, धनुर् नैक्षन्त बिभ्रतम् ।**
**नेषूनचेतन्नस्यन्तं हतांस् तेनाऽविदुर् द्विषः ॥ १६ ॥**

**अन्वयः**—द्विषः ( शत्रवो वानराः ) सन्दधानं तं न अजानन्, धनुः बिभ्रतं न ऐक्षन्त, इषून् अस्यन्तं न अचेतन् । तेन हतान् एव आत्मनोऽविदुः ।

**हिन्दी**—शत्रु वानरोंने उसे शर चढाते, धनुष लेते, बाण छोड़ते नहीं देखा । केवल उससे मारे गये ही अपनेको जाना ( इतना हस्तलाघव उसका था ) ।

**व्याख्या**—द्विषः शत्रवो वानराः, सन्दधानं सन्दधतं, तम् इन्द्रजितं, न नहि, अजानन् अविदुः । धनुः शरासनं, बिभ्रतं गृह्णन्तं, न नहि, ऐक्षन्त अपश्यन् । इषून् बाणान्, अस्यन्तं क्षिपन्तम्, न नहि, अचेतन् अध्यगच्छन् । तेन इन्द्रजिता, हतान् हिंसितान् एव, आत्मनः, अविदुः अचेतन् ।

**तिङन्तः**—चिती संज्ञाने ( भ्वा० उदात्तोदात्तेत् ) । विद ज्ञाने अ० उदात्तोदात्तेत् । '**सिजभ्यस्तविदिभ्यश्च** ३।४।१०९' इति झेर्जुस् ॥ १६ ॥

**अशृण्वन्नन्यतः शब्दं, प्रपलायन्त चाऽन्यतः ।**
**आक्रन्दमन्यतोऽकुर्वंस् तेनाऽहन्यन्त चाऽन्यतः ॥ १७ ॥**

**अन्वयः**--( इन्द्रजित्प्रतिपक्षिणः ) अन्यतः शब्दम् अशृण्वन्, अन्यतः प्रपलायन्त, अन्यतः आक्रन्दम् अकुर्वन्, अन्यतः तेन अहन्यन्त ।

**हिन्दी**—मेघनादके शत्रुओंने किसी जगह शब्द सुना, दूसरी जगह भागे। किसी जगह चिल्लाहट थी तो दूसरी जगह मारे गये ( ऐसा ही उसने रण में तूफान मचा रखा था )।

**व्याख्या**--( मेघनाद-प्रतिपक्षिणः वानराः ) अन्यतः एकत्र, शब्दं ध्वनिम्, अशृण्वन् आकर्णयन् । अन्यतः अन्यत्र, प्रपलायन्त प्रपलायिताः। अन्यतः अन्यत्र, आक्रन्दम् रोदनम्,अकुर्वन् व्यदधुः। अन्यतः अन्यत्र,तेन मेघनादेन,अहन्यन्त हताः।

**तद्धितः**--अन्य शब्दात् '**आद्यादिभ्य उपसंख्यानम्** ५।४।४४' इति वर्तिकबलात्सर्वत्र तसिः ।

**तिङन्तः**—हन धातोः कर्मणि लङ् । वानराः इति उक्तं कर्म। अन्यत्र कर्तरि प्रयोगः । धातवः परिचिताः ।। १७ ।।

**प्रालोठन्त व्यभिद्यन्त परितो रक्तमस्रवन् ।**
**पर्यश्राम्यन्नतृष्यंश् च क्षतास् तेनाऽम्रियन्त च ।। १८ ।।**

**अन्वयः**--तेन ( इन्द्रजिता ) क्षताः ( कियन्तो वानराः ) प्रालोठन्त, व्यभिद्यन्त । परितः रक्तम् अस्रवन्, पर्यश्राम्यन्, अतृष्यन् अम्रियन्त च ।

**हिन्दी**—उस मेघनादसे मारे गये बन्दर कुछ तो पृथ्वीपर लोटपोट करने लगे। कुछ अन्यत्र ढोकर ले जाये गये। कुछ सभी अङ्गोंसे खून बहा रहे थे। कुछ श्रान्त ( म्लान ) हो गये, कुछ प्यासे थे और कुछ तो मर ही गये।

**व्याख्या**--तेन इन्द्रजिता रावणिना, हताः हिंसिताः, कियन्तः वानराः, प्रालोठन्त भुवि प्रहारोद्विग्ना घूर्णन्ति स्म । कियन्तो वानराः, व्यभिद्यन्त मृतकयानेनान्यत्र नीयन्ते स्म । केचन तु, परितः सर्वतोऽङ्गेभ्यो रक्तं रुधिरम्, अस्रवन् अस्रावयन् ( अन्तर्भावितण्यन्तप्रयोगोऽयम् ) । अन्ये पर्यश्राम्यन् श्रान्ताः जाताः । अपरेऽतृष्यन् तृषिता अभूवन् । कियन्तोऽम्रियन्त त्यक्तप्राणा अभवन्।

**तिङन्तः**--लुठ लोठने ( भ्वा० अनुदात्तेदुदात्तः )। श्रमु तपसि खेदे च, ञितृषा पिपासायां ( दिवादी उदात्तावुदात्तेतौ ) ।। १८ ।।

**सौमित्रिराकुलस् तस्मिन् ब्रह्माऽस्त्रं सर्व-रक्षसाम् ।**
**निधनायाऽऽजुहूषत् तं व्यष्टभ्नाद् रघु-नन्दनः ।। १९ ।।**

**अन्वयः**--आकुलः सौमित्रिः सर्वरक्षसां निधनाय तस्मिन् ब्रह्मास्त्रम् आजुहूषत् । रघुनन्दनः तं व्यष्टभ्नात् ।

**हिन्दी**—घबड़ाए हुए लक्ष्मणने सभी राक्षसोंके नाशके लिये उसपर ब्रह्मास्त्री छोड़ना चाहा, पर रामचन्द्रने उन्हें रोक दिया।

**व्याख्या**—आकुलः व्यग्रः, सौमित्रिः लक्ष्मणः, सर्वरक्षसां सकलजातुधानानां, निधनाय विनाशाय, तस्मिन् रावणौ, ब्रह्मास्त्र तन्नाम प्रहरणम्, आजुहूषत् आह्वातुम् ऐच्छत्। रघुनन्दनः रामः, तं लक्ष्मणं, व्यष्टभ्नात् न्यरुणत्। विभीषणस्यापि राक्षसान्तर्गतत्वान्न स्यान्नाश इति निवारणे हेतुः।

**तिङन्तः**—आह्वेञ् धातोः '**धातोः कर्मणः** ३।१।७' इति सनि, द्वित्वात् प्राक् '**अभ्यस्तस्य च** ६।१।३३' इति सम्प्रसारणे, '**अज्झनगमां र न** ६।४।१६' इति दीर्घविशेषः। '**स्तम्भु–स्तुम्भु०** ३।१।८२' इति पाक्षिके श्ना प्रत्यये, '**स्तन्भेः** ८।३।६७' इति षत्वम्–व्यष्टभ्नात् इति ॥ १९ ॥

**ततो माया-मयीं सीतां घ्नन् खड्गेन वियद्-गतः।**
**अदृश्यतेन्द्रजिद् वाक्यमवदत् तं मरुत्-सुतः ॥ २० ॥**

**अन्वयः**—ततः इन्द्रजित् वियद्गतः मायामयीं सीतां खड्गेन घ्नन् अदृश्यत। मरुत्सुतः तं वाक्यम् अवदत्।

**हिन्दी**—बाद मेघनाद आकाशमें जाकर मायाकी सीताको तलवारसे दो टूक कर देता हुआ देखा गया। उससे हनुमान्ने कहा।

**व्याख्या**—ततः तदनन्तरम्, इन्द्रजित् मेघनादः, वियद्गतः आकाशचरः, मायामयीम् मायानिर्मितां, सीतां जानकीं, खड्गेन असिना, घ्नन् व्यापादयन्, अदृश्यत अवालोक्यत। मरुत्सुतः हनुमान्, तं रावणि, वाक्यं वचनीयम्, अवदत् अभाषत।

**'माऽपराध्नोदियं किंचिदभ्रश्यत् पत्युरन्तिकात्।**
**सीतां राक्षस ! मा स्मैनां निगृह्लाः पाप ! दुःखिताम्' ॥ २१ ॥**

**अन्वयः**—अरे राक्षस ! सीता पत्युः अन्तिकात् अभ्रश्यत्। इयं किञ्चिद् मा अपराध्नोत्। अरे पाप ! दुःखिताम् एनां मा स्म निगृह्लाः।

**हिन्दी**—अरे राक्षस ! सीता पतिसे बिछुड़ी हुई है। इसने तुम्हारा कुछ नहीं बिगाड़ा है। इसे मत मारो।

**व्याख्या**—अरे राक्षस क्षपाट ! सीता जानकी, पत्युः रामस्य, अन्तिकात् पार्श्वात्, अपाह्रियत। इयं सीता, किञ्चत् किमपि, तव इन्द्रजितः:, मा नहि, अपराध्नोत् अपराधम् अकरोत्। एनाम् सीतां, मा स्म निगृह्लाः मा वधीः।

**तिङन्तः**—राध, साध संसिद्धौ (अनुदात्तोदात्तेतौ स्वादी)। '**स्मोत्तरे लङ् च** ३।३।१७६' इति वर्तमाने '**न माङ्योगे** ६।४।७४' इत्यण्निषेधः ॥ २१ ॥

**पीडा-करम-मित्राणां कर्तव्यमिति शक्रजित् ।**
**अब्रवीत् खड्ग-कृष्टश् च तस्या मूर्धानमच्छिनत् ॥ २२ ॥**

**अन्वयः**——'अमित्राणां पीडाकरं कर्तव्यम्' इति शक्रजित् अब्रवीत् । खड्ग-कृष्टश्च तस्या मूर्धानम् अच्छिदत् ।

**हिन्दी**——शत्रुओंको जिससे दुःख हो, वह काम करना चाहिये–यह मेघनादने कहा और तलवार खींचकर उसका सिर काट दिया ।

**व्याख्या**——अमित्राणां शत्रूणां, पीडाकरं दुःखदं, कर्तव्यं कार्यम्, इति इत्थम्, शक्रजित् मेघनादः, अब्रवीत् अवदत् । खड्गकृष्टः असिप्रहृतः, तस्याः सीतायाः, मूर्द्धानं शिरः, अच्छिनत् अकृन्तत् ।

**समासः**—कृष्टः खड्गः येन स खड्गकृष्टः । 'निष्ठा २।२।३६' इत्यस्यापवादकम् वार्तिकं 'प्रहणार्थेभ्यः परे निष्ठासप्तम्यौ' इत्यनेन परनिपातात् खड्गकृष्टः ॥२२॥

**यत्-कृतेऽरीन् व्यगृह्णीम, समुद्रमतराम च ।**
**सा हतेति वदन् राममुपातिष्ठन् मरुत्-सुतः ॥ २३ ॥**

**अन्वयः**—यत्कृते अरीन् व्यगृह्णीम, समुद्रम् अतराम च, सा हता इति वदन् मरुत्सुतः रामम् उपातिष्ठत ।

**हिन्दी**—जिसके लिये हम लोगोंने शत्रुओंसे विग्रह किया है और समुद्र पार किया है, 'वह तो मार डाली गयी' । यह कहते हुए हनुमान् रामचन्द्रके पास पहुँचे ।

**व्याख्या**—यत्–कृते यन्निमित्तं, वयं हनुमदादयः, अरीन् शत्रून्, व्यगृह्णीम व्यरुन्ध्म, समुद्रम् सागरम्, अतराम अप्लवामहि । सा सीता, हता मेघनादेनासिना च्छिन्ना, इति एवं, वदन् कथयन्, मरुत्सुतः हनुमान्, रामं राघवम् उपातिष्ठत् उपाढौकत ।

**तिङन्तः**—उपपूर्वकस्य स्था धातोः देवपूजाद्यर्थे तङ भवति, न तु उपस्थितिमात्रे इति न तङ् । 'पाघ्रा० ७।३।६८' इति तिष्ठादेशः ॥ २३ ॥

**ततः प्रामुह्यतां वीरौ राघवावरुतां तथा ।**
**उष्णं च प्राणितां दीर्घमुच्चैर् व्याक्रोशतां तथा ॥ २४ ॥**

**अन्वयः**—ततः वीरौ राघवौ प्रामुह्यताम् तथा अरुतां च । उष्णं दीर्घं च प्राणताम् तथा उच्चैः व्याक्रोशताम् ।

**हिन्दी**— उसके बाद वीर राम-लक्ष्मण मूर्छित हो गये । होश होने पर रोने कलपने लगे । गरम (दीर्घं) लम्बी साँस लेने लगे । ऊँचे स्वरसे चिल्लाने भी लगे।

**व्याख्या**--ततः हनुमत्कथनानन्तरम्, वीरौ शूरौ, राघवौ रामलक्ष्मणौ, प्रामुह्यताम् मोहं गतौ। तथा मोहव्यपगमे, अरुतां क्रन्दितवन्तौ। उष्णं तप्तं, दीर्घम् उच्चैः, प्राणिताम् अश्वसिताम्। तथा तद्वत्, उच्चैः तारस्वरेण, व्याक्रोशताम् हा सीते इत्यादि व्याहरताम्।

**तिङन्तः**—रु शब्दे ( अ० उदात्तेदनुदात्तः )। अन प्राणने ( उदात्तोदात्तेत् ) '**रुदादिभ्यः सार्वधातुके** ७।२।७६' इतीट् ॥ २४ ॥

**तावभाषत पौलस्त्यो 'मा स्म प्ररुदितं युवाम्'।**
**ध्रुवं स मोहयित्वाऽस्मान् पापोऽगच्छन्निकुम्भिलाम् ॥ २५ ॥**

**अन्वयः**—पौलस्त्यः तौ अभाषत 'युवां मा स्म प्ररुदितम्'। स पापः ध्रुवम् अस्मान् मोहयित्वा निकुम्भिलाम् ( अग्निगृहम् ) अगच्छत्।

**हिन्दी**–विभीषणने उन दोनोंसे कहा–'आप रोदन न करें'। निश्चय ही वह पापी मायासे ( झूठी मायाकी सीताको काटकर ) हमलोगोंको मोहित कर अग्निगृहको गया है।

**व्याख्या**—पौलस्त्यो विभीषणः, तौ रामलक्ष्मणौ, अभाषत अकथयत्, 'युवां मा स्म प्ररुदितम्' 'भवन्तौ मा स्म प्ररुदिताम्'। ध्रुवम् निश्चितं,पापः दुष्टः, स मेघनादः, अस्मान् सर्वान्, मोहयित्वा (मायानिर्मितां सीताम् खड्गेन च्छित्वा) मुग्धान् कृत्वा, निकुम्भिलाम् अग्निगृहम्, अगच्छत् ऐत्।

**तिङन्तः**--मुह वैचित्त्ये (दि० उदात्तोदात्तेत्)। तस्य ण्यन्तस्य क्त्वा। '**गतिबुद्धि०** १।४।५२' अणि कर्तुः कर्मत्वम्। प्ररुदितम् इति '**स्मोत्तरे लङ् च** ३।२।१७६' इति लङ्, माङ्–योगे अडभावः। निकुम्भिलेति राक्षसानामग्निहोत्रशाला।

**मा स्म तिष्ठत, तत्र-स्थो वध्योऽसाव-हुताऽनलः।**
**अस्त्रे ब्रह्म-शिरस्युग्रे स्यन्दने चाऽनुपार्जिते ॥ २६ ॥**

**अन्वयः**—'मा स्म तिष्ठत'। तत्र-स्थः असौ अहुतानलः ब्रह्मशिरसि उग्रे अस्त्रे स्यन्दने च अनुपार्जिते ( एव ) वध्यः।

**हिन्दी**—( देखिये ) आप लोग यहां न रुकिये। वह गया हुआ जब तक हवन न कर लेता और ब्रह्म–शिरस् नामका उग्र अस्त्र और रथ नहीं प्राप्त कर लेता तव तक ही वध्य है ( बाद नहीं )।

**व्याख्या** - ( अत्र ) मा स्म तिष्ठत न विलम्बध्वं, शीघ्रं गच्छत। तत्रस्थः निकुम्भिलास्थितः,असौ मेघनादः,अहुतानलः अकृताग्निहोत्रः,ब्रह्मशिरसिनाम्नि,

उग्रे दीप्रे, अस्त्रे प्रहरणे, स्यन्दने रथे च, अनुपार्जिते अलब्धे एव, वध्यः हन्तव्यः। नान्यथा पश्चात् न कथमपीत्यर्थः।

**तिङन्तः**–तिष्ठत इति '**स्मोत्तरे लङ् च ३।३।१७६**' इति लङि '**न माङ्योगे ६।४।७४**' अडभावः। '**शकि लिङ् च ३।३।१७२**' इति चकारात् '**कृत्याश्च ३।३।१७१**' इति यति (**लिङ स्थानिकत्वात्**) '**हनो वध लिङि २।४।४२**' इति वधादेशः।

**ब्रह्माऽदधाद् वधं तस्य तस्मिन् कर्मण्यसंस्थिते ।**
**प्रायच्छदाज्ञां सौमित्रेर् यूथपानां च राघवः ॥ २७ ॥**

**अन्वयः**–(यतः) ब्रह्मा तस्मिन् कर्मणि असंस्थिते तस्य वधम् अदधात्। (ततः) राघवः सौमित्रे यूथपानां च आज्ञां प्रायच्छत्।

**हिन्दी**–(क्योंकि) ब्रह्माजीने उस कर्मके समाप्त होनेसे पहले ही उसके मरनेका नियम रखा है (जब वह उस कार्यको समाप्त कर लेगा तब तो अवध्य हो जायगा)। (तब) रामने लक्ष्मणजीको तथा सेनापतियोंको आज्ञा प्रदान की।

**व्याख्या**––(यतः) ब्रह्मा स्वयम्भूः, तस्मिन् अग्निहवनात्मके, कर्मणि कृत्ये, असंस्थिने असमाप्ते (एव), तस्य मेघनादस्य, वधम् निधनम्, अदधात् निरधारयत्। ततो विभीषणोक्तेरनन्तरम्, राघवः रामः, सौमित्रेः लक्ष्मणस्य, यूथपानां सेनापतीनां, च, आज्ञाम् आदेशम् (तत्र गन्तुं), प्रायच्छत् प्रत्तवान्।

**तिङन्तः**—दाण् दाने (भ्वा० अनुदात्तोदात्तेत्) '**पाघ्रा० ७।३।७८**' इति यच्छादेशः। डुधाञ् धारणपोषणयोः (अनुदात्तो ञित् जुहोत्यादिः)। अत्र श्लौ द्वित्वादि कार्यविशेषः ॥ २७ ॥

**तां प्रत्यैच्छन् सु-संप्रीतास् ततस् ते स-विभीषणाः ।**
**निकुम्भिलां समभ्यायन्, न्यरुध्यन्त च राक्षसैः ॥ २८ ॥**
**दिक्पालैः कदनं तत्र सेने प्राकुरुतां महत् ।**
**ऐतां रक्षांसि निर्जित्य द्रुतं पौलस्त्य-लक्ष्मणौ ॥ २९ ॥**

**अन्वयः**—ततः सुसंप्रीताः सविभीषणाः ते ताम् (आज्ञाम्) प्रत्यैच्छन्। निकुम्भिलां समभ्यायन्। दिक्पालैः राक्षसैः न्यरुध्यन्त च। तत्र सेने महत् कदनं प्राकुरुताम्। पौलस्त्यलक्ष्मणौ रक्षांसि निर्जित्य द्रुतम् ऐताम्।

**हिन्दी**––तब खूब खुश होकर विभीषणके साथ वे सभी उनकी उस आज्ञाको शिरोधार्य कर निकुम्भिला पर गये। दिक्पाल राक्षसोंने उन्हें रोका। वहाँ

पर दोनों तरफ सेनाओंने छूटकर मारकाट किया। विभीषण और लक्ष्मण राक्षसोंको जीतकर फौरन वहाँ पहुँच गये।

**व्याख्या**––ततः रामाज्ञाप्राप्त्यनन्तरम्, सुप्रीताः परमप्रसन्नाः, सविभीषणाः विभीषणसहिताः, ते सेनापतयः, ताम् आज्ञाम्, प्रत्यैच्छन् प्रतीष्टवन्तः। निकुम्भिलाम् अग्निशालाम्, समभ्यायन् अगच्छन्। दिक्पालैः तत्रत्यरक्षकैः राक्षसैः, (ते) न्यरुध्यन्त निवारिताः। तत्र निरोधे सति निकुम्भिलोद्देशे, सेने उभे अपि, महत् घोरं, कदनं विनाशं, प्राकुरुताम् व्यधत्ताम्। पौलस्त्यलक्ष्मणौ विभीषणसौमित्री, रक्षांसि क्षपाटान्, निर्जित्य पराकृत्य, द्रुतम् शीघ्रम्, ऐताम् अगच्छताम् मेघनादपार्श्वे।

**तिङन्तः**––इण् गतौ (अ० अनुदात्तोदात्तेत्)। आडागमे वृद्धिरैताम्। इषु इच्छायाम् (तु० उदात्तोदात्तेत्)। '**इषुगमियमां** छः ७।३।७७' इति छः।

**तत्रेन्द्रजितमैक्षेतां कृत-धिष्ण्यं समाहितम्।**
**सोऽजुहोत् कृष्णवर्त्मानमामनन् मन्त्रमुत्तमम्॥ ३०॥**

**अन्वयः**—तत्र तौ कृतधिष्ण्यं समाहितम् इन्द्रजितम् ऐक्षेताम्। स उत्तमं मन्त्रम् आमनन् कृष्णवर्त्मानम् अजुहोत्।

**हिन्दी**–वहाँ उन दोनोंने आसन जमाए, बड़े भावसे बैठे हुए इन्द्रजितको देखा। वह उत्तम मन्त्रोच्चारण करता हुआ अग्निहोत्र कर रहा था।

**व्याख्या**–तत्र निकुम्भिलायां, तौ लक्ष्मणविभीषणौ, कृतधिष्ण्यं गृहीतस्थानम्, समाहितम् सावधानम्, इन्द्रजितं मेघनादम्, ऐक्षेताम् अपश्यताम्। स रावणिः, उत्तमम् उत्कृष्टं, मन्त्रम् वैदिकं वाक्यम्, आमनन् आवर्तयन्, कृष्णवर्त्मानम् अग्निम्, अजुहोत् अतर्पयत्।

**तिङन्तः**––म्ना अभ्यासे (भ्वा० अनुदात्तोदात्तेत्)। '**पाघ्रा०** ७।३।७८' मनादेशः।

**कोशः**—'धिष्ण्यं स्थाने गृहे भेऽग्नौ' (इत्यमरः)। समासः—कृतं धिष्ण्यं स्थानम् येनेति बहुव्रीहिः॥ ३०॥

**अध्यायच् छक्रजिद् ब्रह्म, समाधेरचलन् न च।**
**तमाह्वयत सौमित्रिरगर्जच् च भयंकरम्॥ ३१॥**

**अन्वयः**—शक्रजित् ब्रह्म अध्यायत, समाधेः न अचलत्। सौमित्रिः तम् आह्वयत, भयङ्करम् अगर्जत् च।

**हिन्दी**––मेघनादने ब्रह्मका ध्यान लगाथा था। वह एकाग्रतासे विचलित नहीं हुआ। लक्ष्मणने उसे ललकारा और भयानक गर्जना करने लगे।

**व्याख्या**—शक्रजित् मेघनादः, ब्रह्म परमात्मानम्, अध्यायत् अचिन्तयत्। समाधेः समावेशात्,न नहि, अचलत् विचलितः अभवत् । सौमित्रः लक्ष्मणः,तम् मेघनादम्, आह्वयत् अश्लाघत, भयङ्करं घोरम्, अगर्जत् अशब्दायत च ।

**तिङन्तः**—ध्यै चिन्तायाम् (भ्वा० उदात्तेदनुदात्तः) । ह्वेञ् बहुधा गतः। गर्जोऽपि ॥ ३१ ॥

इतः सार्धपद्यत्रयस्य समानोऽन्वयः—

**अकुप्यदिन्द्रजित् तत्र, पितृव्यं चाऽगदद् वचः ।**
**'त्वमत्राऽजायथा, देह इहाऽपुष्यत् सुराऽमिषैः ॥ ३२ ॥**
**इहाऽजीव, इहैव त्वं क्रूरमारभथाः कथम् ।**
**नाऽपश्यः पाणिमार्द्रं त्वं बन्धु-त्वं नाऽप्यपैक्षथाः ॥ ३३ ॥**
**अ-धर्मान् नाऽत्रसः पाप ! लोक-वादान् न चाऽबिभेः ।**
**धर्म-दूषण ! नूनं त्वं ना ऽजाना, नाऽश्रृणोरिदम् ॥ ३४ ॥**
**निराकृत्य यथा बन्धून् लघु-त्वं यात्य-संशयम्' ।**

**अन्वयः**—तत्र इन्द्रजित् अकुप्यत्, पितृव्यं च वचः अगदत् 'त्वम् अत्र अजायथाः, इह सुरामिषैः देहः (ते) अपुष्यत्, इह अजीवः, इह एव त्वं कथं क्रूरम् आरभथाः, त्वम् आर्द्रम् पाणिम् न अपश्यः, त्वम् बन्धुत्वम् न अपैक्षत। अरे पाप ! अधर्मात् न अत्रपः, लोकवादात् न अबिभेः । अरे धर्मदूषण ! नूनं त्वम् न अजानाः, न इदम् अश्रृणोः ? यथा बन्धूनू निराकृत्य असशयं लघुत्वं याति ।

**हिन्दी**—वहाँ पर मेघनाद क्रुद्ध हुआ और चाचासे बात कहने लगा-'तुम यहाँ ही पैदा हुए, तुम्हारी देह यहाँ ही मांस-मदिरासे पुष्ट हुई, यहाँ जीवन निबाहा, यहाँ ही तुमने कैसी कुटिलता आरम्भ कर दी ? भोजनका भी हाथ सूखने नहीं पाया,एकगोत्रमें होनेकी अपेक्षा नहीं की । अरे पापी! अधर्मसे तुम्हें लज्जा न आयी, लोकापवादसे भी तुम नहीं डरे। अरे धर्मको दूषित करनेवाले! अवश्य तुम यह नहीं जानते और तुमने न तो सुना है कि बन्धुओं का अनादर करके लोग तुच्छ हो जाते हैं' ।

**व्याख्या**—तत्रेन्द्रजिन्मेघनादोऽकुप्यत् अक्रुध्यत् । पितृव्यं विभीषणं,वचः वाक्यम्, अवदत् व्याहरत् । त्वम् विभीषणः, अत्र राक्षसकुलेऽजायथाः जन्मालभथाः । इहैव रक्षःकुले एव सुरामिषैर्मद्यमांसैः,देहः कायस्तेऽपुष्यत् पुष्टोऽभवत्। अत्रैवाजीवः प्राणीः । इहैव अत्रैव, कथं क्रूरं कुटिलं कर्मारभथाः प्रारब्धवानसि।

भुक्त्वा भोजनं कृत्वा, पाणिः करः, आर्द्रो भवति, तमपि, न नहि, अपश्यः दृष्टवान्। शुष्क नाकरोः। बन्धुत्वम् एकगोत्रत्वम् अपि, न नहि, अपेक्षथाः ऐच्छः किमिति धिक् त्वाम्। अरे पाप कृतघ्न! अधर्मात् कृतघ्नतायाः, न नहि, त्रपोऽजिह्रेः। लोकवादात् जनापवादान्नाबिभेर्न भीतवान्। अरे धर्मदूषण सुकृतघातिन्! नूनं निश्चितं, त्वं विभीषणः, नाजानाः न अबुध्यथाः। इदम् एतत्, नाश्रृणोः न श्रुतवान्। यथा यत्, बन्धून् वंश्यान्, निराकृत्य अनादृत्य, असंशयं निःसन्देहम्, लघुत्वं तुच्छतां, याति प्राप्नोति।

**तिङन्तः**—त्रसी उद्वेगे (दि० उदात्तोदात्तेत्)। 'वा भ्राश० ३।१।७०' इति पाक्षिकः शप्। ज्ञा अवबोधने (क्र्या० अनुदात्तोदात्तेत्)। 'ज्ञाजनोर्जा ७।३।७९' जादेशः। 'श्रुवः शृ च ३।१।७४' इति श्रुवः शृ श्नुविकरणश्च ॥ ३२–३४ ॥

सम्प्रतिसार्धत्रय-पद्यैर्विभीषणस्तमुत्तरयति—

पितृव्येण ततो वाक्यमभ्यधीयत शक्रजित् ॥ ३५ ॥
'मिथ्या मा स्म व्यतिक्रामो, मच्छीलं मा न बुध्यथाः।
सत्य सम्भवं वंशे पापानां रक्षसामहम् ॥ ३६ ॥
न त्वजायत मे शीलं तादृग्, यादृक्, पितुस् तव।
क्षयाऽऽवहेषु दोषेषु वार्यमाणो मयाऽऽरमत् ॥ ३७ ॥
दश-ग्रीवोऽहमेतस्मादत्यजं, न तु विद्विषन्।
पर-स्वान्यार्जयन्, नारीरन्यदीयाः परामृशत्' ॥ ३८ ॥

**अन्वयः**—ततः पितृव्येण शक्रजित् वाक्यम् अभ्यधीयत–'त्वं मिथ्या मास्म व्यतिक्रामः, मच्छील मा न बुध्यथाः। सत्यम् अहम् पापानां रक्षसां वंशे समभवम्, न तु मे शील तादृग् अजायत, यादृक् तव पितुः शीलम्। दशग्रीवः स मया वार्यमाणोऽपि क्षयावहेषु दोषेषु आरमत्, परस्वानि आर्जयत्, अन्यदीया नारीः परामृशत्। एतस्मात् तम् अहम् अत्यजम्, न तु विद्विषन् इति जानीहि'।

**हिन्दी**—तब चाचा भी मेघनादसे वाक्य बोला कि 'झूठे झूठ मेरे सिर पर मत चढ़। तू मेरा शील स्वभाव नहीं जानता यह बात तो नहीं है। यह सत्य है कि मैं पापी राक्षसवंशमें जन्मा पर मेरा शील स्वभाव तुम्हारे पितासे बिलकुल विभिन्न है। वह दशग्रीव हैं। दसों इन्द्रियोंसे छूटकर भोग करते हैं। मुझसे रोके जानेपर भी विनाशकारी दोषोंमें रत रहते हैं। दूसरेके धनको लूटते हैं। दूसरोंकी नारियोंका उपभोग करते हैं। इसी कारण मैंने उनको छोड़ा है, द्वेषसे नहीं।'

**व्याख्या**—ततः स्ववाक्यावसाने, शक्रजित् मेघनादः, पितृव्येण विभीषणेन, वाक्यम् वचोऽभिधीयत उक्तोऽभूत्—'मिथ्या अतथ्यं, मा स्म व्यतिक्रामः वृथा न परिभूर्माम् । मच्छीलं मम स्वभावं, मा न बुध्यथाः मा न जानाः, अवश्यम् अजानाः । अहं विभीषणः, सत्यं तथ्यं, पापानां धर्मद्वेषिणां, रक्षसां क्षपाटानां, वंशेऽन्वये, समभवम् अजाये, परन्तु, मे मम, शीलं स्वभावः, तादृक् तादृशं, न अजायत, न अभवत् । यादृक् यादृशं, तव पितुर्दशाननस्यास्ति । स हि दशग्रीवो दशेन्द्रियभोक्ता, मया वार्य्यमाणो निरुध्यमानोऽपि,क्षयावहेषु नाशकारिषु,दोषेषु दूषणेषु, आरभत् रतोऽभवत् । परस्वानि अन्यधनानि, आर्जयत् अपाहरत्। अन्यदीयाः परकीयाः, नारीः भार्याः, परामृशत् परामृष्टवान् । एतस्मात् कारणात् अहं तम् अत्यजम्, न तु विद्विषन् विद्वेषं कुर्वन् इति ।

**तिङन्तः**—डुधाञ् जुहोत्यादिस्थस्य कर्मणि लङि '**घुमास्था०** ६।४।६६ इतीत्वम् अधीयत । '**क्रमः परस्मैपदेषु** ७।३।७६' इति दीर्घः—अतिक्रामः । '**व्याङ्परिभ्यो रमः** १।३।८३' इति परस्मैपदम् । **द्विषोऽमित्रे** ३।२।१३१' इति शतृप्रत्ययः । अर्ज प्रतियत्ने इति चौरादिकस्य रूपम् आर्जयत् ।। ३५-३८ ।।

पुनःसार्धपद्येनाख्याति—

**'व्यजिघृक्षत् सुरान् नित्यं, प्रामाद्यद् गुणिनां हिते ।**
**आशङ्कत सुहृद्-बन्धून-वृद्धान् बह्वमन्यत ।। ३९ ।।**
**दोषैररमतैभिस् ते पिताऽत्यज्यत यैर् मया' ।**

**अन्वयः**—स नित्य सुरान् व्यजिघृक्षत्, गुणिनां हिते प्रामाद्यत्, सुहृद् बन्धून् आशङ्कत, अवृद्धान् बहु अमन्यत । ते पिता एभिः दोषैः अरमत, यैः मया अत्यज्यत ।

**हिन्दी**—वह नित्य ही देवताओंके साथ विग्रह चाहते थे, गुणियोंके हितमें उपेक्षा रखते थे । मित्र बन्धुओंकी ही शङ्का करते थे, मूर्खोंकी ही इज्जत करते थे । इन्हीं दोषोंसे उनका प्रेम था, जिनके कारण मैंने उन्हें छोड़ा है' ।

**व्याख्या**—स दशग्रीवः, सुरान् देवान्, नित्यं शश्वत्, व्यजिघृक्षत् विग्रहीतुमैच्छत् । गुणिनां विदुषां, हिते कार्ये, प्रामाद्यत प्रमादमकरोत् । सुहृद्-बन्धून् मित्रवान्धवान्, आशङ्कत सन्दिग्धवान् । अवृद्धान् मूर्खान् प्रहस्तादीन्, बहु अत्यर्थम्,अमन्यत आदृतवान्। एभिः एतादृशैः,दोषैः दूषणैः,ते तव,पिता जनकः, अरमत अक्रीडत् । यैः दोषैः,मया विभीषणेन,असौ रावणः, अत्यज्यत त्यक्तोऽभवत इति।

**तिङन्तः**—ग्रहेः सन्नन्तात् जिघृक्ष धातोर्लङ् । मदी हर्षे (दि० उदात्तोदात्तेत्)।

'**शमाम**० ७।३।७४' इति दीर्घः । मनु अवबोधने (दि० अनुदात्तोऽनुदात्तेत्) । त्यजेः कर्मणि लङ ।। ३९ ।।

इदानीमिन्द्रजित्कृत्यमाख्याति--

**ततोऽरुष्यदनर्दच् च, द्वि-विंशतिभिरेव च ।। ४० ।।**
**शरैरताडयद् बन्धुं, पञ्च-विंशतिभिर् नृपम् ।**
**रावणिस् तस्य सौमित्रिरमथ्नाच् चतुरो हयान् ।। ४१ ।।**

**अन्वयः**—ततः रावणिः अरुष्यत् अनर्दत् च । द्विविंशतिभिः शरैः बन्धुम् एव अताडयत्, पञ्चविंशतिभिः नृपम् च अताडयत् (इत्युभयान्वयी तडधातुः) । सौमित्रिः तस्य चतुरः हयान् ( बाणैः ) अमथ्नात् ।

**हिन्दी**—विभीषणद्वारा पिताके दोषोंको सुनकर मेघनाद क्रुद्ध हो गया, गरजने लगा । उसने ४० बाणोंसे चाचाको ही ताडित किया, १००सौ बाणोंसे राजा लक्ष्मणको ताड़ित किया । लक्ष्मणने भी उसके चारों घोड़ोंको बाणोंसे मार गिराया ।

**व्याख्या**—ततः पितुर्दोषश्रवणानन्तरम्, रावणिर्मेघनादः, अरुष्यत् अकुप्यत्, अनर्दत् अगर्जत् च । द्विविंशतिभिः चत्वारिंशता, शरैः बाणैः, बन्धुं पितृव्यम्, एव हि, अताडयत् ताडितवान् । पञ्चविंशतिभिः शतसंख्यैः, बाणैः शरैः, नृपं लक्ष्मणम्, अताडयत् अविध्यत् । सौमित्रिः लक्ष्मणः, ( बाणैः ) तस्य मेघनादस्य, चतुरः चतुःसंख्यान्, हयान् वाजिनः, अमथ्नात् व्यनाशयत् ।

**तिङन्तः**—रुष रुष्टौ ( दि० उदात्तेदुदात्तः ) । मन्थ विलोडने ( क्र्या० उदात्तोदात्तेत् ) ।

**समासः**--द्वे विंशती येषां ते द्विविंशतयः । पञ्च विंशतयः येषां ते पञ्चविंशतयः, तैः इति बहुव्रीहिणा साध्याः । अत एव न द्वेरात्वम् नाप्येकत्वमुभयत्र । विग्रहे द्वित्व-बहुत्वे संख्यावाचित्वाज्ज्ञेये ।। ४०-४१ ।।

**सारथिं चाऽलुनाद् बाणैरभनक् स्यन्दनं तथा ।**
**सौमित्रिमकिरद् बाणैः परितो रावणिस् ततः ।। ४२ ।।**

**अन्वयः**—सौमित्रिः बाणैः ( तस्य ) सारथिम् अलुनात्, तथा स्यन्दनम् अभनक् । ततः रावणिः सौमित्रिम् परितः बाणैः अकिरत् ।

**हिन्दी**—लक्ष्मणने बाणोंसे ( उसके ) सारथीको काट डाला, रथको तोड़ दिया । तब मेघनादने लक्ष्मणके चारों ओर बाणोंकी वर्षा कर दी ।

**व्याख्या**—सौमित्रिः लक्ष्मणः, बाणैः शरैः, (तस्य) सारथिम् सूतम्, अलुनात

अच्छिनत् । तथा तद्वत्, स्यन्दनं रथम्, अभनक् अमृद्नात् । ततः तदनन्तरम्, रावणिः मेघनादः, सौमित्रि लक्ष्मणम्, परितः सर्वतः, बाणैरिषुभिः, अकिरत् आच्छादयत् ।

**तिङन्तः**—भञ्जो आमर्दने ( रुधादिरनुदात्तोदात्तेत् ) । लूञ् छेदने ( क्र्यादिः ) । **'प्वादीनां ह्रस्वः ७।३।८०'** इति ह्रस्वः ॥ ४२ ॥

**तावस्फावयतां शक्तीर् बाणांश् चाऽकिरतां मुहुः ।**
**वारुणं लक्ष्मणोऽक्षिप्यदक्षिपद् रौद्रमिन्द्रजित् ॥ ४३ ॥**

**अन्वयः**—तौ शक्तिम् अस्फावयताम्, मुहुः बाणान् च अकिरताम् । लक्ष्मणः वारुणम् अस्त्रम् अक्षिप्यत् । इन्द्रजित् रौद्रम् शस्त्रम् अक्षिपत् ।

**हिन्दी**—दोनोंने अपनी अपनी शक्ति बढ़ाई और बाणोंकी वर्षा कर दी। लक्ष्मणने वारुणास्त्र छोड़ा तो मेघनादने रौद्रास्त्र छोड़ा ।

**व्याख्या**—तौ उभौ,शक्तिम् स्व-स्व-सामर्थ्यम्, अस्फावयताम् अवर्द्धयताम्। मुहुः असकृत्, बाणान् शरान्, अकिरताम् अवर्षताम् । लक्ष्मणः रामानुजः, वारुणं वरुणदेवताकम् अस्त्रम्, अक्षिप्यत् प्रैरयत् । इन्द्रजित् मेघनादः, रौद्रं रुद्रदेवताकं, अस्त्रम् प्रहरणम्, अक्षिपत् अमुञ्चत् ।

**तिङन्तः**—स्फायी ओप्यायी वृद्धौ इति भौवादिकस्य ण्यन्तस्य **'स्फायो वः० ७।३।४१'** इति वादेशः । क्षिप प्रेरणे दिवादि-तुदाद्योरुभयोः क्रमाद्रूपे ( अनुदात्तोदात्तेतौ ) ॥ ४३ ॥

**ते परस्परमासाद्य शस्त्रे नाशमगच्छताम् ।**
**आसुरं राक्षसः शस्त्रं ततो घोरं व्यसर्जयत् ॥ ४४ ॥**

**अन्वयः**—ते शस्त्रे परस्परम् आसाद्य नाशम् अगच्छताम् । ततः राक्षसः घोरम् आसुरं शस्त्रं व्यसर्जयत् ।

**हिन्दी**—वे दोनों शस्त्र परस्पर एक दूसरेसे मिलकर ( टकराकर ) नष्ट हो गये । तब राक्षसने भयानक आसुरास्त्रका प्रयोग किया ।

**व्याख्या**—ते उभे, शस्त्रे प्रहरणे, परस्परम् अन्योन्यम्, आसाद्य संहत्य, नाशं ध्वंसम्, अगच्छताम् ऐताम् । ततः तन्नाशानन्तरम्, राक्षसो मेघनादः, घोरं भयानकम्, आसुरम् असुरस्वामिकं, शस्त्र प्रहरणम्, व्यसर्जयत् ।

**तिङन्तः**—सृज विसर्गे इत्यस्य ण्यन्ते व्युपसर्गवशात्क्षेपणमर्थः ॥ ४४ ॥

**तस्मान् निरपतद् भूरि शिला-शूलेष्टि-मुद्गरम् ।**
**माहेश्वरेण सौमित्रिरस्तभ्नात् तत् सुदुर्जयम् ॥ ४५ ॥**

**अन्वयः**—तस्माद् भूरि शिलाशूलेष्टिमुद्गरम् निरपतत्। सौमित्रिः माहेश्वरेण अस्त्रेण सुदुर्जयं तत् अस्तभ्नात्।

**हिन्दी**—उस आसुरास्त्रसे बहुत सी शिलायें तथा शूल, इष्टि, मुद्गर आदि वरसने लगे। लक्ष्मणने माहेश्वरास्त्रसे उस दुर्जय शस्त्रको बाँध दिया।

**व्याख्या**—तस्मात् आसुरास्त्रात्, भूरि बहुशः, शिलाशूलेष्टिमुद्गरम् निरपतत्। उपलक्षणमिदम्। अनेकानि प्रहरणानि अच्योतन्। सौमित्रिः लक्ष्मणः, तत् सुदुर्जयम्, दुर्धर्षम् आसुरास्त्रम्, माहेश्वरास्त्रेण रुद्रास्त्रेण, अस्तभ्नात् न्यवारयत्।

**तिङन्तः**—स्तम्भु स्तुभु इति निवारणार्थकौ सौत्रौ धातू उदात्तोदात्तेतौ, श्ना-श्नुप्रत्ययभाजौ। अत्र रूपम्॥ ४५॥

**ततो रौद्र-समायुक्तं माहेन्द्रं लक्ष्मणोऽस्मरत्।**
**तेनाऽऽगम्यत घोरेण शिरश् चाऽह्रियत द्विषः॥ ४६॥**

**अन्वयः**—ततः लक्ष्मणः रौद्रसभायुक्तं माहेन्द्रम् अस्त्रम् अस्मरत्। घोरेण तेन आगम्यत, द्विषः शिरः च आह्रियत।

**हिन्दी**—बाद लक्ष्मणने रौद्रास्त्रके साथही रहने वाले माहेन्द्रास्त्रका स्मरण किया। यह भयङ्कर अस्त्र आपहुँचा और शत्रुके शिरको काट दिया।

**व्याख्या**—ततः आसुरास्त्रविघातानन्तरम्, लक्ष्मणः सौमित्रिः, रौद्रसमायुक्तं रौद्रास्त्रोपेतं, माहेन्द्रम् महेन्द्रदैवतम्, अस्त्रम् प्रहरणम्, अस्मरत् अध्यायत्। घोरेण तेनास्त्रेण, आगम्यत आगच्छतम्। द्विषः शत्रोः, शिरः मस्तकम्, आह्रियत आच्छिद्यत।

**तिङन्तः**–गमेः आगमार्थेऽकर्मकत्वात् भावे लङ् आगम्यतेति। '**गत्यर्थाकर्मक०** ३।४।७२' इत्यनेन चकाराद् यथाप्राप्तेः वा भावे लङ्॥ ४६॥

**अतुष्यन्नमराः सर्वे, प्राहृष्यन् कपि-यूथपाः।**
**पर्यष्वजत सौमित्रिं, मूर्ध्न्यजिघ्रच् च राघवः॥ ४७॥**

**अन्वयः**—सर्वे अमराः अतुष्यन्, कपियूथपाः प्राहृष्यन्। पश्चात्तत्रागतः राघवः सौमित्रिं पर्यष्वजत, मूर्ध्नि अजिघ्रत् च।

**हिन्दी**—सभी देव सन्तुष्ट हो गये, कपि-सेनानी बड़े खुश हुए। रामने भी वहां आकर लक्ष्मणका आलिङ्गन किया, उनका शिर सूंघा (बड़ों द्वारा छोटोंके शिर सूंघनेकी भारतीय प्रथा है)। जिसका यह तात्पर्य है कि आमलकी, दधि प्रभृति पौष्टिक सात्त्विक औषधियोंसे आर्य लोग सर्वदा स्वच्छ रहते थे।

**व्याख्या**–सर्वेऽमरा देवाः, अतुष्यन् अप्रीयन्त। कपियूथपाः हरिसेनाध्यक्षाः,

प्राहृष्यन् आनन्दन् । प्रवृत्तं युद्धं श्रुत्वा, तत्र समागतः, राघवः रामः, सौमित्रि स्वभ्रातरं, पर्यष्वजत अश्लिष्यत । मूर्ध्नि शिरसि, अजिघ्रत् आघ्रातवान् ।

**तिङन्तः**—पर्यष्वजत–स्वञ्ज परिष्वङ्गे ( भ्वा० उदात्तानुदात्तेत् ) '**दंशसञ्ज**०६।४।२५' इति नलोपे, '**परिनिविभ्यः** ८।३।७०' इत्यनेन '**प्राक् सितादड्व्यवायेऽपि** ८।३।६३' इति वचनात् षत्वम् ॥ ४७ ॥

**अरोदीद् राक्षसाऽनीकमरोदन् नृ-भुजां पतिः ।**
**मैथिल्यै चाऽशपद्धन्तुं तां प्राक्रमत चाऽऽतुरः ॥ ४८ ॥**

**अन्वयः**— राक्षसानीकम् अरोदीत्, नृभुजां पतिः अरोदत् । मैथिल्यै च अशपत्, आतुरः तां हन्तुम् प्राक्रमत ।

**हिन्दी**—राक्षसी सेना रोने लगी, राक्षसोंका राजा रोने लगा । सीताको गाली-गुप्ता देने लगा तथा शोकसे व्याकुल होकर उसकी जान मारने चला ।

**व्याख्या**--राक्षसानीकम् रात्रिञ्चरसेना, अरोदीत् व्यलपत् । नृभुजां रक्षसां, पतिः स्वामी, अरोदत् रुदितवान् । मैथिल्यै सीतायै, अशपत् आक्रोशत् । आतुरः शोकोद्विग्नः, तां हन्तुम् हिंसितुम्, प्राक्रमत प्रारब्धवान् ।

**तिङन्तः**–अरोदीत्–'**रुदश्च पञ्चभ्यः** ७।३।९८' इतीट् । '**अड् गार्ग्यगालवयोः** ७।३।९९' इति अडागमेऽरोदत् । '**प्रोपाभ्यां** १।३।४२' इति तङ् प्राक्रमत ॥४८॥

**अ-युक्तमिदमित्यन्ये तमाप्ताः प्रत्यवारयन् ।**
**न्यरुन्धंश् चाऽस्य पन्थानं बन्धुता शुचमारुणत् ॥ ४९ ॥**

**अन्वयः**–अन्ये आप्ताः अयुक्तम् इदम् इति तम् प्रत्यवारयन्, अस्य पन्थानम् च अरुन्धन् । बन्धुता शुचम आरुणत् ।

**हिन्दी**—दूसरे श्रेष्ठ लोगोंने यह अनुचित काम है, ऐसा मत करो, यह कह कर उसे रोका । न मानने पर उसके मार्गको ही बन्द कर दिया ।

**व्याख्या**—अन्येऽपरे,आप्ताः श्रेष्ठाः, अयुक्तम् अनुचितम्, इदं स्त्रीघातकर्मेति कथयन्तः, तं रावणम्, प्रत्यवारयन् न्यरुन्धन् । ( अस्वीकृतौ ) अस्य दुष्टस्य, पन्थानम् सीताहननमार्गमेवारुन्धन् । केनाप्युपायेन तमसमर्थमकुर्वन् । बन्धुता सर्वे बन्धवः ( बन्धुसमूह इति यावत् ), ( तस्य ) शुचम्, आरुणत् रुद्धवती ।

**तिङन्तः**—वृञ् वरणे चौरादिको धातुः प्रत्युपसर्गपूर्वः । अरुणदिति रुध् धातोर्लङि '**हल्ङ्याब्** ६।१।६८' लोपे जश्त्व-चर्त्वम् ॥ ४९ ॥

**आस्फायताऽस्य वीरत्वममर्षश् चाऽप्यतायत ।**
**रावणस्य ततः सैन्यं समस्तमयुयुत्सयत् ॥ ५० ॥**

**अन्वयः**—अस्य रावणस्य ( निरुद्धशोकस्येत्यर्थः ) वीरत्वम् अस्फायत, अमर्षश्च अतायत । ततः स समस्तं सैन्यम् अयुयुत्सयत् ।

**हिन्दी**—शोक निरुद्ध हो जाने पर इसकी वीरता बढ़ी, क्रोध भी बढ़ा । तब इसने सभी युद्धैषी सैनिकोंको युद्धमें झोंक दिया ।

**व्याख्या**—( निरुद्धशुचो रावणस्य ) वीरत्वं शौर्यम्, अस्फायत अवर्द्धत । अमर्षः क्रोधः च, अतायत ऐधत । ततोऽयं रावणः, समस्तं सर्वं, सैन्यम् बलम्, अयुयुत्सयत् युयुत्समानं प्रयोजितवान् ।

**तिङन्तः**—युध सम्प्रहारे दि० अनुदात्तोऽनुदात्तेत् । तस्य सन्नन्ताण्णौ युयुत्सि–धातोर्लङि अयुयुत्सयत् ॥ ५० ॥

**अग्नीनवरिवस्यंश् च तेऽनमस्यंश् च शङ्करम् ।**
**द्विजानप्रीणयन् शान्त्यै यातुधाना भवद्-भियः ॥ ५१ ॥**

**अन्वयः**—भवद्भियः ते यातुधानाः अग्नीन् हवनेन अवरिवस्यन् । शङ्करम् पूजया अनमस्यन् । शान्त्यै द्विजान् अप्रीणयन् ।

**हिन्दी**—भयभीत होकर उन राक्षस लोगोंने हवनद्वारा अग्निदेवकी पूजा की । पूजनद्वारा शङ्करजीको नमस्कार किया तथा शान्तिके लिये ब्राह्मणोंको प्रसन्न किया ।

**व्याख्या**–भवद्भियः समुत्पन्नभयाः, ते यातुधानाः राक्षसाः, हवनेन इज्ययाग्नीन् अनलान्, अवरिवस्यन् आर्चन् । पूजया अर्चनेन, शङ्करम् शिवम्, अनमस्यन् प्राणमन् । शान्त्यै शान्त्यर्थं, द्विजान् ब्राह्मणान्, अप्रीणयन् अतुष्यन् ।

**तिङन्तः**—'**नमोवरिवश्चित्रङः क्यच् ३।१।१९**' इत्युभयत्र पूजार्थे क्यच् । ततो वरिवस्य-नमस्य-धातुभ्यां लङ् । प्रींञ् धातोर्णौ '**धूञ्प्रीञोर्नुग्वक्तव्यः ७।३।३७**' इति वार्तिकेन नुक् । णत्वं च अप्रीणयत् ॥ ५१ ॥

**परितः पर्यवाद् वायुराज्य-गन्धिर् मनो-रमः ।**
**अश्रूयत स-पुण्याहः स्वस्ति-घोषः समुच्चरन् ॥ ५२ ॥**

**अन्वयः**—मनोरमः आज्यगन्धिः वायुः परितः पर्यवात् । सपुण्याहः समुच्चरन् स्वस्तिशब्दघोषः अश्रूयत ।

**हिन्दी**—मनोहर घी की सुगन्धि वाले वायुदेव बहने लगे । पुण्याहवाचनके मन्त्रोंके उच्चारणके साथ स्वस्तिवाचनकी शब्दध्वनि सुनायी पड़ने लगी ।

**व्याख्या**—(अग्निहवनात्) मनोरमः चेतोहरः, आज्यगन्धिः घृतसुगन्धभृद्, वायुः मरुत्, पर्यवात् वाति स्म । सपुण्याहः पुण्याहवाचनमन्त्रसहितः, स्वस्तिघोषः स्वस्तिवाचनशब्दः, समुच्चरन् उच्चार्यमाणः, अश्रूयत आकर्ण्यत ।

प्राहृष्यन् आनन्दन् । प्रवृत्तं युद्धं श्रुत्वा, तत्र समागतः, राघवः रामः, सौमित्रि स्वभ्रातरं, पर्यष्वजत अश्लिष्यत । मूर्ध्नि शिरसि, अजिघ्रत् आघ्रातवान् ।

**तिङन्तः**—पर्यष्वजत–स्वञ्ज परिष्वङ्गे ( भ्वा० उदात्तानुदात्तेत ) '**दंशसञ्ज०६।४।२५**' इति नलोपे, '**परिनिविभ्यः ८।३।७०**' इत्यनेन '**प्राक् सितादड्व्यवायेऽपि ८।३।६३**' इति वचनात् षत्वम् ॥ ४७ ॥

**अरोदीद् राक्षसाऽनीकमरोदन् नृ-भुजां पतिः ।**
**मैथिल्यै चाऽशपद्धन्तुं तां प्राक्रमत चाऽऽतुरः ॥ ४८ ॥**

**अन्वयः**— राक्षसानीकम् अरोदीत्, नृभुजां पतिः अरोदत् । मैथिल्यै च अशपत्, आतुरः तां हन्तुम् प्राक्रमत ।

**हिन्दी**—राक्षसी सेना रोने लगी, राक्षसोंका राजा रोने लगा । सीताको गाली-गुप्ता देने लगा तथा शोकसे व्याकुल होकर उसकी जान मारने चला ।

**व्याख्या**—राक्षसानीकम् रात्रिञ्चरसेना, अरोदीत् व्यलपत् । नृभुजां रक्षसां, पतिः स्वामी, अरोदत् रुदितवान् । मैथिल्यै सीतायै, अशपत् आक्रोशत् । आतुरः शोकोद्विग्नः, तां हन्तुम् हिंसितुम्, प्राक्रमत प्रारब्धवान् ।

**तिङन्तः**–अरोदीत्–'**रुदश्च पञ्चभ्यः** ७।३।९८' इतीट्। '**अड् गार्ग्यगालवयोः** ७।३।९९' इति अडागमेऽरोदत् । '**प्रोपाभ्यां** १।३।४२' इति तङ् प्राक्रमत ॥४८॥

**अ-युक्तमिदमित्यन्ये तमाप्ताः प्रत्यवारयन् ।**
**न्यरुन्धंश् चाऽस्य पन्थानं बन्धुता शुचमारुणत् ॥ ४९ ॥**

**अन्वयः**–अन्ये आप्ताः अयुक्तम् इदम् इति तम् प्रत्यवारयन्, अस्य पन्थानम् च अरुन्धन् । बन्धुता शुचम आरुणत् ।

**हिन्दी**—दूसरे श्रेष्ठ लोगोंने यह अनुचित काम है, ऐसा मत करो, यह कह कर उसे रोका । न मानने पर उसके मार्गको ही बन्द कर दिया ।

**व्याख्या**—अन्येऽपरे,आप्ताः श्रेष्ठाः, अयुक्तम् अनुचितम्, इदं स्त्रीघातकर्मेति कथयन्तः, तं रावणम्, प्रत्यवारयन् न्यरुन्धन् । ( अस्वीकृतौ ) अस्य दुष्टस्य, पन्थानम् सीताहननमार्गमेवारुन्धन्। केनाप्युपायेन तमसमर्थमकुर्वन्। बन्धुता सर्वे बन्धवः ( बन्धुसमूह इति यावत् ), ( तस्य ) शुचम्, आरुणत् रुद्धवती ।

**तिङन्तः**—वृञ् वरणे चौरादिको धातुः प्रत्युपसर्गपूर्वः । अरुणदिति रुध् धातोर्लङि 'हल्ङ्याब् ६।१।६८' लोपे जश्त्व-चर्त्वम् ॥ ४९ ॥

**आस्फायताऽस्य वीरत्वममर्षश् चाऽप्यतायत ।**
**रावणस्य ततः सैन्यं समस्तमयुयुत्सयत् ॥ ५० ॥**

**अन्वयः**—अस्य रावणस्य ( निरुद्धशोकस्येत्यर्थः ) वीरत्वम् अस्फायत, अमर्षश्च अतायत। ततः स समस्तं सैन्यम् अयुयुत्सयत्।

**हिन्दी**—शोक निरुद्ध हो जाने पर इसकी वीरता बढ़ी, क्रोध भी बढ़ा। तब इसने सभी युद्धैषी सैनिकोंको युद्धमें झोंक दिया।

**व्याख्या**—( निरुद्धशुचो रावणस्य ) वीरत्वं शौर्यम्, अस्फायत अवर्द्धत। अमर्षः क्रोधः च, अतायत ऐधत। ततोऽयं रावणः, समस्तं सर्वं, सैन्यम् बलम्, अयुयुत्सयत् युयुत्समानं प्रयोजितवान्।

**तिङन्तः**--युध सम्प्रहारे दि० अनुदात्तोऽनुदात्तेत्। तस्य सन्नन्ताण्णौ युयुत्सि-धातोर्लङि अयुयुत्सयत्॥ ५०॥

**अग्नीनवरिवस्यंश् च तेऽनमस्यंश् च शङ्करम्।**
**द्विजानप्रीणयन् शान्त्यै यातुधाना भवद्-भियः॥ ५१॥**

**अन्वयः**—भवद्भियः ते यातुधानाः अग्नीन् हवनेन अवरिवस्यन्। शङ्करम् पूजया अनमस्यन्। शान्त्यै द्विजान् अप्रीणयन्।

**हिन्दी**—भयभीत होकर उन राक्षस लोगोंने हवनद्वारा अग्निदेवकी पूजा की। पूजनद्वारा शङ्करजीको नमस्कार किया तथा शान्तिके लिये ब्राह्मणोंको प्रसन्न किया।

**व्याख्या**–भवद्भियः समुत्पन्नभयाः, ते यातुधानाः राक्षसाः, हवनेन इज्ययाग्नीन् अनलान्, अवरिवस्यन् आर्चन्। पूजया अर्चनेन, शङ्करम् शिवम्, अनमस्यन् प्राणमन्। शान्त्यै शान्त्यर्थं, द्विजान् ब्राह्मणान्, अप्रीणयन् अतुष्यन्।

**तिङन्तः**—'नमोवरिवश्चित्रङः क्यच् ३।१।१९' इत्युभयत्र पूजार्थे क्यच्। ततो वरिवस्य-नमस्य-धातुभ्यां लङ्। प्रीञ् धातोर्णौ 'धूञ्प्रीञोर्नुग्वक्तव्यः ७।३।३७' इति वार्तिकेन नुक्। णत्वं च अप्रीणयत्॥ ५१॥

**परितः पर्यवाद् वायुराज्य-गन्धिर् मनो-रमः।**
**अश्रूयत स-पुण्याहः स्वस्ति-घोषः समुच्चरन्॥ ५२॥**

**अन्वयः**—मनोरमः आज्यगन्धिः वायुः परितः पर्यवात्। सपुण्याहः समुच्चरन् स्वस्तिशब्दघोषः अश्रूयत।

**हिन्दी**—मनोहर घी की सुगन्धि वाले वायुदेव बहने लगे। पुण्याहवाचनके मन्त्रोंके उच्चारणके साथ स्वस्तिवाचनकी शब्दध्वनि सुनायी पड़ने लगी।

**व्याख्या**—(अग्निहवनात्) मनोरमः चेतोहरः, आज्यगन्धिः घृतसुगन्धभृद्, वायुः मरुत्, पर्यवात् वाति स्म। सपुण्याहः पुण्याहवाचनमन्त्रसहितः, स्वस्तिघोषः स्वस्तिवाचनशब्दः, समुच्चरन् उच्चार्यमाणः, अश्रूयत आकर्ण्यत।

**समासः**—आज्यस्येव गन्धो यस्येति बहुव्रीहौ **'उपमानाच्च** ५।४।१३७' इतीत्वम् । पुण्याहेन सहितः सपुण्याहः । **'तेन सहेतितुल्ययोगे** २।२।२८' इति समासे **'वोपसर्जनस्य** ६।३।८२' इति सहस्य सादेशः ॥ ५२ ॥

**योद्धारोऽबिभरुः शान्त्यै साऽक्षतं वारि मूर्धभिः ।**
**रत्नानि चाऽददुर् गाश् च, समवाञ्छन्नथाऽऽशिषः ॥ ५३ ॥**

**अन्वयः**—योद्धारः शान्त्यै साक्षतं वारि (जलपूर्णं कलशमित्यर्थः) मूर्धभिः अबिभरुः । रत्नानि गाश्च ( ब्राह्मणेभ्यः ) अददुः । अथ ( तेभ्यः ) आशिषः समवाञ्छन् ।

**हिन्दी**—योद्धाओंने शान्तिके लिये अक्षतसे पूर्ण पात्र कलशके मुखपर रखकर जलपूर्ण कलश शिरपर धरा । रत्न एवं गायें ब्राह्मणोंको दीं, तत्पश्चात् उनसे आशीर्वादकी कामनायें कीं ।

**व्याख्या**—योद्धारः सैनिकाः, शान्त्यै शान्त्यर्थं, साक्षतं अक्षतपूर्णपात्रपिनद्धमुखं, वारि कलशं, शिरसि मस्तके, अबिभरुः अदधुः । रत्नानि सुवर्णादीनि, गाश्च धेनूश्च, (ब्राह्मणेभ्यः) अददुः दत्तवन्तः । अथानन्तरम्, (तेभ्यः) आशिषः आशीर्वादान्, समवाञ्छन् अकाङ्क्षन् ।

**तिङन्तः**–भृञ् भरणे इति जुहोत्यादिस्थस्य **'भृञामित्** ७।४।७६' इतीत्वम्, **'सिजभ्यस्त०** ३।४।१०९' इति झेर्जुस्। वाछि इच्छायाम् (भ्वा० उदात्तोदात्तेत्)।

**अदिहंश् चन्दनैः शुभ्रैर्, विचित्रं समवस्त्रयन् ।**
**अधारयन् स्रजः, कान्ता, वर्म चाऽन्ये ऽदधुर् द्रुतम् ॥ ५४ ॥**

**अन्वयः**—शुभ्रैः चन्दनैः अदिहन् ( गात्राणीति शेषः ) । विचित्रं समवस्त्रयन् । कान्ताः स्रजः अधारयन् । अन्ये च द्रुतं वर्म अदधुः ।

**हिन्दी**—सफेद चन्दन लगाया एवं शरीरमें विचित्र वस्त्र पहने । सुन्दर मालाएँ पहनीं और अन्य लोगोने फौरन कवच पहने ।

**व्याख्या**—शुभ्रैः स्वच्छैः, चन्दनैः विलेपनैः, गात्राणि अङ्गानि, अदिहन् अलिम्पन् । विचित्रं शोभनम्, समवस्त्रयन् वस्त्रैः आच्छादयन् । कान्ताः शुभ्राः, स्रजः मालाः, अधारयन् धारितवन्तः । अन्येऽपरे, द्रुतम् आशु, वर्म कवचम्, अदधुः अधारयन् ।

**तिङन्तः**–समवस्त्रयन्–**'मुण्डमिश्र०** २।१।२१' इत्याच्छादने णिच्। दिह उपचये (अ० अनुदात्तः स्वरितेत्)। धृञ् धारणे ण्यन्तो भ्वादिः सर्वदा णतः ॥५४॥

**समक्ष्णुवत शस्त्राणि, प्रामृजन् खड्ग-संहतीः ।**
**गजाऽऽदीनि समारोहन्, प्रातिष्ठन्ताऽथ सत्वराः ॥ ५५ ॥**

**अन्वयः**—शस्त्राणि समक्ष्णुवत, खड्ग-संहतीः प्रामृजन् । गजादीनि यानानि समारोहन् । अथ सत्वराः प्रातिष्ठन्त ।

**हिन्दी**–शस्त्रोंको चोखा किया, तलवारोंके थोकोंको मांजा । हाथी-घोड़े आदि यानों पर चढ़े और जल्दीसे प्रस्थान किया ।

**व्याख्या**—ते योद्धारः, शस्त्राणि प्रहरणानि, समक्ष्णुवत तेजिष्ठानि अकुर्वन् । खड्गसंहतीः असिसमूहान्, प्रामृजन् अशोधयन् । गजादीनि द्विपादीनि,यानानि आरोहणानि, समारोहन् आरूढवन्तः । अथानन्तरम्, आरूढास्ते योद्धारः, सत्वराः त्वरावन्तः, प्रातिष्ठन्त प्रस्थिताः ।

**तिङन्तः**—क्ष्णु तेजने ( अ० उदात्तोदात्तेत् ) । **'समक्ष्णुवः** १।३।६५' इति तङ् । **'समवप्रविभ्यः स्थः** १।३।२२' इति तङ् ॥ ५५ ॥

**अपूरयन् नभः शब्दो बल-संवर्त-संभवः ।**
**अपूर्यन्त च दिग्-भागास् तुमुलैस् तूर्य-निस्वनैः ॥ ५६ ॥**

**अन्वयः**—बलसंवर्तसंभवः शब्दः नभः अपूरयत् । तुमुलैः तूर्य्यनिस्वनैः दिग्भागाः अपूर्यन्त ।

**हिन्दी**—सेनाके संघर्षसे उत्पन्न शब्दने आकाशको पूर्ण कर दिया । बाजों से उत्कट दिग्विभाग गूँज उठे ।

**व्याख्या**—बलसंवर्तसम्भवः सैन्यसंघट्टोत्पन्नः, शब्दः ध्वनिः, नभो व्योम, अपूरयत् पूरितवान् । तुमुलैः महद्भिः, तूर्यनिस्वनैः वाद्यशब्दैः, दिग्भागाः ककुप्प्रदेशाः, अपूर्यन्त समभ्रियन्त ।

**तिङन्तः**—**'नौ गदनदपठस्वनः** ३।३।६४' इति पाक्षिकः अप्, निस्वनैः ।

**समासः**–बलानां संवर्तः, तेन सम्भवो यस्य । तत्पुरुषगर्भो बहुव्रीहिः ॥५६॥

**आसीद् द्वारेषु संघट्टो रथाऽश्व-द्विप-रक्षसाम् ।**
**सुमहाननिमित्तैश् च समभूयत भीषणैः ॥ ५७ ॥**

**अन्वयः**—द्वारेषु ( लङ्कायाः) रथाश्वद्विपरक्षसां सुमहान् संघट्टः आसीत् । भीषणैः अनिमित्तैः समभूयत ।

**हिन्दी**—लङ्का नगरीके दरवाजों पर रथ घोड़े हाथी और राक्षसोंका बड़ा जमघट लगा रहा । भयानक बड़े-बड़े अपशकुन होने लगे ।

**व्याख्या**—द्वारेषु निर्गमनमार्गेषु (लङ्कानगर्या इत्यर्थः), रथाश्वद्विपरक्षसाम् स्यन्दनहयगजयातूनां, सुमहान् अतिघः,संघट्टः सम्मर्दः, आसीत् अभवत् । भीषणैः भयानकैः, ( महद्भिः भयंकरैः ), अनिमित्तैः दुःशकुनैः, समभूयत सम्भूतम् ।

**तिङन्तः**—आसीदिति—अस् भुवि इत्यादादिकस्य लङ्। 'अस्तिसिचोऽपृक्ते ७।३।९६' इतीट् ॥ ५८ ॥

**कपयोऽबिभयुस् तस्मिन्नाभञ्जंश् च महा-द्रुमान् ।**
**प्रोदखायन् गिरींस् तूर्णमगृह्णंश् च महा-शिलाः ॥ ५८ ॥**

**अन्वयः**—तस्मिन् दुर्निमित्ते कपयः अबिभयुः। महाद्रुमान् अभञ्जन्। गिरीन् प्रोदखायन्। तूर्णम् महाशिलाः च अगृह्णन्।

**हिन्दी**—उस कुशकुनमें कपि भी डर गये। उन्होंने बड़े-बड़े पेड़ तोड़ दिये, पर्वतोंको उखाड़ दिया, फौरन बड़ी बड़ी शिलायें ले लीं।

**व्याख्या**-तस्मिन्ननिमित्ते जाते, कपयो हरयोऽपि, अबिभयुः भीता अभवन्। महाद्रुमान् बृहद्वृक्षान्, अभञ्जन् भङ्क्त्वाऽगृह्णन्। गिरीन् पर्वतान्,प्रोदखायन् उदखनन्। तूर्णं द्रुतं, महाशिलाः दीर्घप्रस्तराणि, अगृह्णन् गृहीतवन्तः।

**तिङन्तः**—खँ उत्खनने ( भ्वा० अनुदात्तोदात्तेत् ) ॥ ५८ ॥

**ततः समभवद् युद्धं प्राहरन् कपि-राक्षसाः ।**
**अन्योन्येनाऽभ्यभूयन्त, विमर्दमसहन्त च ॥ ५९ ॥**

**अन्वयः**—ततः युद्धं समभवत्। कपि-राक्षसाः प्राहरन्। अन्योऽन्येन अभ्यभूयन्त। विमर्दं च असहन्त।

**हिन्दी**—तब युद्ध छिड़ गया। कपि और राक्षस प्रहार करने लगे। एक दूसरेसे परास्त होने लगे। परस्पर प्रहारोंको सहने लगे।

**व्याख्या**—ततः सान्निध्ये समुपस्थिते, युद्धं शस्त्रप्रहारकृत्यं,समभवत् प्रावर्तत। कपिराक्षसा वानरक्षपाटाः, प्राहरन् प्रहर्तुं प्रवृत्ताः। अन्योऽन्येन परस्परेण,अभ्यभूयन्त पराजीयन्त। विमर्दं परस्परप्रहारम्, असहन्त सोढुमर्हा आसन् ॥ ५९ ॥

**प्रावर्धत रजो भौमं, तद् व्याश्नुत दिशो दश ।**
**पराऽऽत्मीय-विवेकं च प्रामुष्णात् कपि-रक्षसाम् ॥ ६० ॥**

**अन्वयः**—भौमं रजः प्रावर्द्धत। तद् दश दिशो व्याश्नुत। कपिरक्षसाम् परात्मीयविवेकं च प्रामुष्णात्।

**हिन्दी**—पृथ्वीकी धूल बढ़कर उड़ने लगीं, दशों दिशाओंमें फैलने लगी। उसने वानरों तथा राक्षसों दोनोंके अपने पराए भेदभावको भुला दिया।

**व्याख्या**—भौमं पार्थिवं, रजः धूलिः, प्रावर्धत समैधत। दशापि दिशः काष्ठाः, व्याश्नुत व्याप्तमभूत्। कपिरक्षसां हरि-यातुधानानां, परात्मीयविवेकम् अन्यस्वकीयविचारं, प्रामुष्णात् व्यलोपयत्।

**तिङन्तः**—अशूङ् व्याप्तौ ( स्वा० ङिदुदात्तः )। मुष स्तेये ( क्र्यादिरुदात्तेत् ।। ६० ।।

**ततोऽद्विषुर् निरालोके स्वेभ्योऽन्येभ्यश् च राक्षसाः ।**
**अद्विषन् वानराश् चैव वानरेभ्योऽपि निर्दयाः ।। ६१ ।।**

**अन्वयः**—ततो राक्षसाः निरालोके ( समरे ) स्वेभ्योऽन्येभ्यश्च अद्विषुः । वानराः चैव वानरेभ्यः अपि ( किमुतान्येभ्यः ) निर्दयाः अद्विषन् ।

**हिन्दी**—इसके बाद राक्षस अन्धकारमय संग्राममें अपने एवं परायोंसे द्वेष करने लगे । बन्दर भी वानरोंसे तथा राक्षसोंसे निर्दय होकर द्वेष करने लगे ।

**व्याख्या**—ततः तदनन्तरम्, निरालोके प्रकाशशून्ये ( समरे ), राक्षसाः क्षपाटाः, स्वेभ्यो निजेभ्यः, अन्येभ्यो वानरेभ्यः च, अद्विषुः अक्रुध्यन् । वानराः कपयोऽपि, वानरेभ्यः कपिभ्यः, अपि शब्दात् राक्षसेभ्यः, निर्दयाः निष्कृपाः, अद्विषन् अद्रुह्यन् ।

**तिङन्तः**—द्विष अप्रीतौ (अ० स्वरितेदनुदात्तः)। 'द्विषश्च ३।४।१२' इति झेर्जुस् पाक्षिकः । 'क्रुधद्रुहेर्ष्या० १।४।३७' इति सम्प्रदानतया चतुर्थी ।। ६१ ।।

**अघुरंस् ते महा-घोरमश्च्योतन्नथ शोणितम् ।**
**समपद्यत रक्तेन समन्तात् तेन कर्दमः ।। ६२ ।।**

**अन्वयः**—अथ ते महाघोरम् अघुरन्, शोणितम् अश्च्योतन् । तेन रक्तेन समन्तात् कर्दमः समपद्यत ।

**हिन्दी**—बाद वे दोनों पक्षके युद्धमें काम आये सैनिक बड़ा भयावह शब्द करने लगे । देहसे खून बहाने लगे, उस खूनसे सर्वत्र कीचड़ हो गयी ।

**व्याख्या**—अथानन्तरम्, हतास्ते उभयसैनिकाः, घोरं भयावहम्, अघुरन् शब्दितवन्तः । शोणितम् रक्तम् ( क्षतगात्रेभ्यः ), अश्च्योतन् अक्षरन् (अन्तर्भावितण्यर्थः) । तेन गलितेन, रक्तेन शोणितेन, समन्तात् सर्वतः, कर्दमः पङ्कः, समपद्यत समजायत ।

**तिङन्तः**—घुर भीमार्थशब्दयोः ( तु० उदात्तोदात्तेत् )। श्च्युतिर् क्षरणे ( भ्वा० उदात्तोदात्तेत् ) ।। ६२ ।।

**गम्भीराः प्रावहन् नद्यः, समजायन्त च ह्रदाः ।**
**वृद्धं च तद् रजोऽशाम्यत्, समवेद्यन्त च द्विषः ।। ६३ ।।**

**अन्वयः**—गम्भीरा नद्यः प्रावहन्, ह्रदाः समजायन्त । वृद्धं तद् रजः अशाम्यत्, द्विषः समवेद्यन्त ।

**हिन्दी**—(खून की) गम्भीर नदियां बह चलीं, तालाब बन गये। बढ़ी हुई धूल शान्त हो गयी, परस्पर शत्रु दीख पड़ने लगे।

**व्याख्या**—(तेन प्रवहता रक्तेन) गम्भीरा अगाधाः, नद्यः सरितः, प्रावहन् प्रावर्तन्त। ह्रदा महातटाकाः, समजायन्त समपद्यन्त। वृद्धं प्रसृतं, तत् अन्धकारकरं, रजः पांसुः, अशाम्यत्। द्विषः शत्रवः, समवेद्यन्त अज्ञायन्त। अतिशयोक्तिरलङ्कारः।

**तिङन्तः**–विद चेतनाख्याननिवासेषु इति चौरादिकस्य कर्मणि लङ् ॥६३॥

**ततोऽचित्रीयताऽस्त्रौघैर् धनुश् चाऽधूनयन् महत्।**
**रामः, समीहितं तस्य नाऽचेतन् स्वे न चाऽपरे ॥ ६४ ॥**

**अन्वयः**—ततः अस्त्रौघैः अचित्रीयत, रामः महत् धनुः अधूनयत्। तस्य समीहितं न स्वे न च अपरे अचेतन्।

**हिन्दी**—तब शस्त्रसमूह चित्र-विचित्र ढंगसे चलने लगे। राम बड़े धनुष धूनने लगे। उनकी इच्छाको अपने पराये कोई नहीं जान सके।

**व्याख्या**–ततः अन्धकारशान्तौ, अस्त्रौघैः प्रहरणसंघैः, अचित्रीयत आश्चर्यितम्। रामः राघवः, महत् बृहत्, धनुः शरासनम्, अधूनयत् निरन्तरम् अक्षिपत। तस्य रामस्य, समीहितम् चेष्टितम्, न, स्वे निजाः, न, अपरे अरयः, अचेतन् अजानन्।

**तिङन्तः**–'**नमो वरिवश्चित्रङः क्यच् ३।१।१९**' इति चित्रङ् आश्चर्ये इत्याश्चर्येऽर्थे क्यङ्। ङित्वात्तङ्। '**प्रीञ्धूञोर्नुक् ७।३।३७**' इति वार्तिकेन नुक्॥६४॥

**छिन्नानैक्षन्त भिन्नांश् च समन्ताद्-राम-सायकैः।**
**क्रुष्टं हाहेति चाऽश्रृण्वन् न च रामं न्यरूपयन ॥ ६५ ॥**

**अन्वयः**—कपिसैनिकाः रामसायकैः छिन्नान् भिन्नान् राक्षसान् समन्तात् ऐक्षन्त। हा हा इति क्रुष्टं च अश्रृण्वन्, रामं न न्यरूपयन्।

**हिन्दी**—कपि-सैनिकोंने रामके बाणोंसे छिन्न-भिन्न किये गये राक्षसोंको सर्वत्र देखा। उनकी हाय-हाय चिल्लाहट भी सुनी। परंच रामचन्द्रको उन्होंने नहीं देखा।

**व्याख्या**—कपिसैनिकाः योधाः, रामसायकैः राघवबाणैः, छिन्नान् द्वैधीकृतान्, भिन्नान् विदीर्णान्, समन्तात् सर्वतः, ऐक्षन्त अपश्यन्। (तेषां) हा हा इति क्रुष्टं क्रन्दितं च, अश्रृण्वन् अक्षैषुः। रामं राघवं, न, न्यरूपयन् अपश्यन्।

**तिङन्तः**—रूप व्याक्रियायाम् इति चौरादिकस्य कर्तरि लङ् न्यरूपयन्निति ॥ ६५ ॥

अभिनच् छत्रु-संघातान् अक्षुणद् वाजि-कुञ्जरम् ।
अपिनट् च रथाऽनीकं, न चाऽज्ञायत संचरन् । ६६ ॥

अन्वयः--( रामः ) शत्रुसंघातान् अभिनत्, वाजिकुञ्जरम् अक्षुणत् । रथानीकम् अपिनट्, संचरन् न अज्ञायत ।

हिन्दी—रामने शत्रु-समूहको भेद डाला । हाथी घोड़ोंको भुन डाला । रथ-समूहोंको पीस डाला । पर स्वयं रणमें घूमते हुए वे किसीसे भी नहीं जाने गये ।

व्याख्या–(रामः)शत्रु-संघान् अरिसमूहान्,अभिनत् द्वैधान् अकरोत् । वाजि-कुञ्जरम् हयगजम्,अक्षुणत् समचूर्णयत् । रथानीकम् स्यन्दनसंघम्, अपिनट् पिष्टवान् । (परन्तु स्वयं) सञ्चरन् विचरन् रणे पर्यटन्, न नहि, अज्ञायत अबुध्यत ।

तिङन्तः--क्षुदिर् संप्रेषणे, पिष्लृ सञ्चूर्णने ( रौधादिकौ, तत्राद्यः स्वरितेदनुदात्तः, द्वितीय उदात्तेदनुदात्तः ) ॥ ६६ ॥

दश दन्ति-सहस्राणि रथिनां च महाऽऽत्मनाम् ।
चतुर्दश सहस्राणि साऽऽरोहाणां च वाजिनाम् ॥ ६७ ॥
लक्षे च द्वे पदातीनां राघवेण् धनुर्-भृता ।
अनीयन्ताऽष्टमे भागे दिवसस्य परिक्षयम् ॥ ६८ ॥

अन्वयः--धनुर्भृता राघवेण दिवसस्य अष्टमे भागे दश दन्ति-सहस्राणि, महात्मनां रथिनां सारोहाणां च वाजिनां चतुर्दश सहस्राणि, पदातीनां च द्वे लक्षे परिक्षयम् अनीयन्त ।

हिन्दी--धनुर्धारी रामने आधे पहरमें दस हजार हाथियोंका एवं महात्मा महारथियोंकी तथा सवार-सहित घोड़ोंकी चौदह हजार संख्याका और दो लाख पैदल सेनाका संहार कर डाला ।

व्याख्या—धनुर्भृता धनुर्धारिणा, राघवेण रामेण, दिवसस्य वासरस्य, अष्टमे भागे अर्धप्रहरे, दश दन्तिसहस्राणि पंक्तिसंख्यकानि गजसहस्राणि, महात्मनां महावीराणां, रथिनां रथारोहिणां, तथा सारोहाणाम् आरोहिसहितानां, वाजिनामश्वानां च, चतुर्दशसंख्यानि सहस्राणि, पदातीनां पत्तीनां, द्वे लक्षे लक्षद्वयं, परिक्षयम् विनाशम्, अनीयन्त नीतानि ।

तिङन्तः—नी धातोः कर्मणि लकारे 'प्रधाने नीहृकृष्वहाम्' इति प्रधानकर्मणां सहस्रादीनां बहुत्वाद् बहुत्वमेव साधु । क्वचिद् अनीयत इति प्रामादिकः पाठः । अथवा एतत्सर्वमित्यध्याहृत्य समञ्जसनीयम् ॥ ६७–६८ ॥

**यम-लोकमिवाऽग्रथ्नाद्, रुद्राऽऽक्रीडमिवाऽकरोत् ।**
**शैलैरिवाऽचिनोद् भूमिं बृहद्भी राक्षसैर् हतैः ॥ ६९ ॥**

**अन्वयः**—रामः हतैः बृहद्भिः राक्षसैः तत्र यमलोकम् इव अग्रथ्नात्। रुद्राक्रीडम् इव अकरोत्, भूमिं शैलैः इव अचिनोत् ।

**हिन्दी**—रामने मारे गये बड़े-बड़े राक्षसों द्वारा वहाँ मानो यमपुरी तैयार करा दी । अथवा शिवका क्रीडास्थल मानों बना दिया । पर्वतोंसे रणभूमिको मानों ढक दिया ।

**व्याख्या**—रामो हतैर्हिंसितैर्बृहद्भिर्महद्भिः,. राक्षसैः रक्षोभिः, यम-लोकं यम-नगरम्, इव मन्ये, अग्रथ्नात् समदृभ्नात्। रुद्राक्रीडम् शिवलीलास्थलम्, इव मन्ये, अकरोत् व्यदधात् । भूमि रणस्थलं, शैलैः पर्वतैरिव मन्ये, अचिनोत् अच्छादयत् । उत्प्रेक्षालङ्कारः ।

**तिङन्तः**—श्रन्थ, ग्रन्थ सन्दर्भे ( क्र्यादी उदात्तोदात्तेतौ ) ॥ ६९ ॥

**अस्तुवन् देव-गन्धर्वा, व्यस्मयन्त प्लवङ्गमाः ।**
**कपीन्द्रेऽतन्यत प्रीतिः, पौलस्त्योऽमन्यताऽद्भुतम् ॥ ७० ॥**

**अन्वयः**—देवगन्धर्वाः (रामम्) अस्तुवन् । प्लवङ्गमाः व्यस्मयन्त । कपीन्द्रे प्रीतिः अतन्यत । पौलस्त्यः अद्भुतम् अमन्यत ।

**हिन्दी**—देवता और गन्धर्वगण रामकी स्तुति करने लगे । वानर विस्मित हुए । सुग्रीवमें बहुत ही स्वयं प्रसन्नता बढ़ी । विभीषण आश्चर्यचकित थे ।

**व्याख्या**—देवगन्धर्वाः सुरयक्षाः, अस्तुवन् राममिति पारिशेष्यात् । प्लवङ्गमाः कपयः,व्यस्मयन्त विस्मिता अभवन्। कपीन्द्रे सुग्रीवे, प्रीतिः प्रेमा, अतन्यत स्वयमैधत । पौलस्त्यो विभीषणोऽद्भुतम् आश्चर्यम्, अमन्यत अजानात् ।

**तिङन्तः**—विपूर्वकः स्मिङ् विस्मये (भ्वा० ङिदनुदात्तः) । अतन्यतेति कर्मकर्तरि लङ् । सुग्रीवः प्रीतिमतनोत् इति स्वयं प्रीतिरतन्यतेत्यर्थः ॥ ७० ॥

**राक्षस्यः प्रारुदन्नुच्चैः प्राजुगुप्सन्त रावणम् ।**
**अमुह्यद् बाल-वृद्धं च, समरौदितरो जनः ॥ ७१ ॥**

**अन्वयः**—राक्षस्य उच्चैः प्रारुदन्, रावणं प्राजुगुप्सन्त च । बालवृद्धम् अमुह्यत् । इतरः जनः समरौत् ।

**हिन्दी**—राक्षसियाँ उच्चस्वरसे चिल्ला-चिल्लाकर रोने लगीं और रावणकी निन्दा करने लगीं । बालक तथा वृद्ध लोग मूर्छित हो गये । इनसे अतिरिक्त बचे लोग ( रावणको ) शाप देने लगे ।

**व्याख्या**— राक्षस्यः रात्रिचर्यः, उच्चैः तारस्वरेण, प्रारुदन् रुदितवत्यः। रावणं लङ्केशं, प्राजुगुप्सन्त अनिन्दन् च। बालवृद्धम् कुमारस्थविरम्, अमुह्यत् अमूर्च्छत्। इतरः अवशिष्टः,जनः राक्षसः, समरौत् आक्रोशत्, रावणमिति शेषः।

**तिङन्तः**—'गुप्तिज्किद्भ्यः सन् ३।१।५' इति गुपेर्निन्दायां सनि द्वित्वादिना रूपम्। रु शब्दे 'उतो वृद्धिर्लुकि हलि ७।३।८९' इति वृद्धिः ॥ ७१ ॥

**सर्वतश् चाऽभयं प्राप्नोन् नैच्छन् नृभ्यस् तु रावणः।**
**फलं तस्येदमभ्यायाद् दुरुक्तस्येति चाऽब्रुवन् ॥ ७२ ॥**

**अन्वयः**—इतराक्रोशमाह—रावणः सर्वतोऽभयं प्राप्नोत् (ब्रह्मणः वरग्रहणवेलायाम्), नृभ्यस्तु अभयं नैच्छत्। तस्य दुरुक्तस्य इदं फलम् अभ्यायात् (इत्थमितरे) अब्रुवन्।

**हिन्दी**—अन्य लोगोंका आक्रोश कवि कह रहे हैं कि (ब्रह्माजीसे वरग्रहणके समय) रावणने सभी प्राणियोंसे तो अभय मांगा किन्तु मनुष्योंको तुच्छ जानकर उनसे नहीं चाहा। उसी दुर्विचारका यह फल है, यों अन्य लोगोंने उसे शापा।

**व्याख्या**—इतरेषां शापमाख्याति (ब्रह्मणो वरग्रहणकाले)। रावणः दशास्यः, सर्वतः सर्वप्राणिभ्यः, अभयं निर्भीति, प्राप्नोत् अध्यगच्छत्, नृभ्यो मानवेभ्यस्तु तुच्छत्वात्,अभयं,नैच्छत् नाकामयत। तस्यैव दुरुक्तस्य दुष्टव्याहारस्य,इदं प्रत्यक्षं, फलं परिणामः, अभ्यायात् उपातिष्ठत् (इत्याक्रोशम्)अब्रुवन् व्याहरन् इतरे।

**ततो ऽधावन् महा-घोरं रथमास्थाय रावणः।**
**अक्ष्मायत मही गृध्राः समारार्यन्त भीषणाः ॥ ७३ ॥**

**अन्वयः**—ततः रावणः महाघोरं रथम् आस्थाय अधावत्। मही अक्ष्मायत। भीषणाः गृध्राः समारार्य्यन्त।

**हिन्दी**—इसके बाद रावण भयङ्कर रथपर चढ़कर दौड़ा। पृथ्वी कांप उठी। भयानक गिद्ध मडराने लगे।

**व्याख्या**—ततः तदनन्तरम्, रावणो दशास्यः, महाघोरम् अतिभयानकं, रथं स्यन्दनम्, आस्थाय आरुह्य, अधावत् अगच्छत् (युद्धस्थलम्)। धावतस्तस्य, मही पृथ्वी, अक्ष्मायत अकम्पत। भीषणा घोराः, गृध्राः दाक्षाय्याः, समारार्यन्त अत्यर्थं समावर्तन्त।

**तिङन्तः**—क्ष्मायी विधूनने (भ्वा० अनुदात्तेदुदात्तः)। 'सूचिसूत्रिमूत्र्यटचर्त्यशूर्णोतिभ्यो यङ् ३।१।२२' इति वार्तिकबलात् यङ्। 'यङि च ७।४।३०' इति गुणः समारार्यन्त ॥ ७३ ॥

**मेघाः स-विद्युतोऽवर्षंश् चेल-क्नोपं च शोणितम् ।**
**अवान् भीमा नभस्वन्तः, प्रारुवन्नशिवाः शिवाः ॥ ७४ ॥**

**अन्वयः**—सविद्युतः मेघाः चेलक्नोपं शोणितम् अवर्षन् । भीमाः नभस्वन्तः अवान्, अशिवाः शिवाः प्रारुवन् ।

**हिन्दी**—बिजुलीके साथ मेघ कपड़ा भीग जाने योग्य खून बरसाने लगे। भयानक वायुदेव बहने लगे, अशुभ सियारिनें फेंकरने लगीं ।

**व्याख्या**—सविद्युतः सतडितः, मेघाः अभ्राः, चेलक्नोपं वस्त्रार्द्रीभावावधि, शोणितं रक्तम्, अवर्षन् असिञ्चन् । भीमाः घोराः, नभस्वन्तः वायवोऽवान् । अशिवाः अमङ्गलाः, शिवाः फेरवः, अरुवन् अकुवन् ।

**तिङन्तः**—चेलं क्नोयते यावदिति ण्यन्तात् क्नूयी शब्दे इत्यतः '**अर्तिह्री०** ७।३।३६' इति पुकि, यलोपे गुणे च '**चेले क्नोपेः** ३।४।३३' णमुल् । '**लङः शाकटायनस्यैव** ३।४।१११' इति जुसोऽभावे रूपमवान् ॥ ७४ ॥

**आटाट्यताऽवमत्याऽसौ दुर्निमित्तानि, संयुगे ।**
**अधुनोद् धनुरस्त्रौघैः प्रौर्णोनूयत विद्विषः ॥ ७५ ॥**

**अन्वयः**—असौ दुर्निमित्तानि अवमत्य संयुगे आटाट्यत । धनुः अधुनोत् । अस्त्रौघैः विद्विषः प्रौर्णोनूयत ।

**हिन्दी**—रावण उन अपशकुनोंकी उपेक्षा कर रणमें विचरण करने लगा। धनुष धूनने लगा । शस्त्रसमूहोंसे शत्रुओंको ढक दिया ।

**व्याख्या**—असौ रावणः, दुर्निमित्तानि तान्यवमत्य समुपेक्ष्य, संयुगे रणे, आटाट्यत अजङ्गम्यत । धनुः शरासनम्, अधुनोत् अकम्पयत् । अस्त्रौघैः प्रहरणसङ्घैः, विद्विषः शत्रून्, प्रौर्णोनूयत भृशमच्छादयत् ।

**तिङन्तः**—अट, पट गतौ ( भ्वा० उदात्तेतावुदात्तौ ) । ऊर्णुञ् आच्छादने (अ० उदात्तञित्)। '**सूचिसूत्रि०** ३।१।३२' इति पूर्ववार्तिकेन यङ् उभयत्र। '**अजादेर्द्वितीयस्य** ६।१।२' '**नन्द्राः संयोगादयः**६।१।३' इति नुमात्रस्य द्वित्वे '**गुणो यङ्लुकोः**७।४।८२' इति गुणे '**अकृत्सार्व०** ७।४।२५' इति दीर्घः प्रौर्णोनूयत॥७५॥

युग्मेन सुग्रीवकृत्यं वक्ति—

**व्यनाशयंस् ततः शत्रून् सुग्रीवाऽस्ता महीभृतः ।**
**ततो व्यरसदग्लायदध्यशेत मही-तलम् ॥ ७६ ॥**
**अश्च्योतद् रुधिरं, तोयमलसच् चाऽतिविह्वलम् ।**
**अशीयत नृ-मांसादां बलं सुग्रीव-बाधितम् ॥ ७७ ॥**

**अन्वयः**—ततः सुग्रीवास्ताः महीभृतः शत्रून् व्यनाशयन् । ततः सुग्रीव-बाधितम् नृमांसादां बलं व्यरसद्, अग्लायद्, महीतलम् अध्यशेत । रुधिरम् अश्च्योतत्, अतिविह्वलं सत् तोयम् अलषत्, अशीयत च ।

**हिन्दी**—बाद सुग्रीवद्वारा फेंके गये पर्वतोंने शत्रुओंका नाश कर डाला । सुग्रीव द्वारा बाधित राक्षसोंके सैनिक चिल्लाने लगे तथा ग्लानि करने लगे । पृथ्वीपर पड़ गये, खून उगलने लगे, अत्यन्त उद्विग्न होकर जलके प्यासे हो गये । अन्तमें अवसन्न हो गये एवं मर गये ।

**व्याख्या**—ततो रावणयुद्धे, सुग्रीवास्ताः कपीन्द्रप्रेरिताः, महीभृतः पर्वताः, शत्रूनरीन्, व्यनाशयन् अध्वंसयन् । ततः अनन्तरम्, सुग्रीव-बाधितम् कपीन्द्र-विद्धम्, नरमांसादां रक्षसां, बलं सैन्यम्, व्यरसत् अग्लायत् । आक्रन्दत् अम्लायत् । महीतलम् धरापृष्ठम्, अध्यशेत अध्यतिषुप्तवत् । रुधिरं रक्तम्, अश्च्योतत् अस्रवत् । अतिविह्वलं क्लान्तं सत्, तोयं जलम्, अलषत् ऐच्छत् । ( अवसाने ) अशीयत अवसादमैत् । मृतमिति यावत् ।

**तिङन्तः**—'शीङः सार्वधातुके गुणः ७।४।२१' इति ङित्यपि गुणः । 'वा भ्राश० ३।१।७०' इति पाक्षिकश्यनोऽभावे शप्—अलषत् । 'शदेः शितः १।३।६०' इति तङि 'पाघ्रा० ७।३।७८' इति शीयादेशः । मांसादाम्—'अदोऽनन्ने ३।२।६८' इतिविट् ॥ ७६-७७ ॥

विरूपाक्षस् ततोऽक्रीडत् संग्रामे मत्त-हस्तिना ।
मुष्टिनाऽदालयत् तस्य मूर्धानं वानराऽधिपः ॥ ७८ ॥

**अन्वयः**—ततो विरूपाक्षः संग्रामे मत्तहस्तिना (कपिसैन्यं मर्दयन्) अक्रीडत् । वानराधिपः तस्य मूर्द्धानम् मुष्टिना अदालयत् ।

**हिन्दी**—तब विरूपाक्ष नामका राक्षस संग्राममें मतवाले हाथियों द्वारा कपि-सैन्यको कुचलते घूमने लगा । कपीन्द्रने उसके मस्तकको मुक्केसे दो टुकड़े कर रख दिया । अर्थात् वह मर गया ।

**व्याख्या**—ततः विरूपाक्षो नाम राक्षसः, संग्रामे रणे, मत्तहस्तिना क्षीबगजेन, (कपिसैन्यं मर्दयन्) अक्रीडत् व्यहरत् । वानराधिपः कपीशः, तस्य रक्षसः, मूर्द्धानं शिरः, मुष्टिना बद्धकरेण पाणिना, अदालयत् द्विधा अच्छिनत् । स मृत इत्यर्थः ।

**तिङन्तः**—दल विदारणे । चौरादिको धातुः । इति स्वार्थे णिच् ॥७८॥

अचूर्णयच् च यूपाक्षं शिलया तदनन्तरम् ।
संक्रुद्धो मुष्टिनाऽतुभ्नादङ्गदोऽलं महोदरम् ॥ ७९ ॥

**अन्वयः**—तदनन्तरम् यूपाक्षं राक्षसं शिलयाऽचूर्णयत् । अलं संक्रुद्धः अङ्गदः मुष्टिना महोदरं राक्षसम् अतुभ्नात् ।

**हिन्दी**—उसके बाद यूपाक्ष नामके राक्षसको भी पर्वतके चट्टानसे चूर्ण कर दिया । अत्यन्त क्रुद्ध हो अङ्गदने महोदर नामके राक्षसको मुक्केसे ही मार डाला ।

**व्याख्या**—तदनन्तरं तत्पश्चात्, यूपाक्षं राक्षसं, शिलया पर्वतखण्डेन, अचूर्णयत् अक्षुणत् । अलं भृशं, संक्रुद्धः सङ्कुपितः, अङ्गदो युवराजः, मुष्टिना करबद्धेन पाणिना, महोदरं राक्षसम्, अतुभ्नात् अहिंसत् ।

**तिङन्तः**—'सत्यापपाश ३।१।२५' चूर्णशब्दाण्णिच्—अचूर्णयत् । णभ, तुभ हिंसायाम् ( क्र्या० उदात्तोदात्तेतौ ) ॥ ७९ ॥

**ततोऽकुष्णाद् दशग्रीवः क्रुद्धः प्राणान् वनौकसाम् ।**
**अगोपायच्च रक्षांसि दिशश् चाऽरीनभाजयत् ॥ ८० ॥**

**अन्वयः**—ततो दशग्रीवः क्रुद्धः सन् वनौकसां प्राणान् अकुष्णात् । रक्षांसि अगोपायत्, अरीन् च दिशः अभाजयत् ।

**हिन्दी**—तब रावण क्रुद्ध होकर वानरोंके प्राण निकालने लगा । राक्षसोंको बचा लिया और शत्रुओंको इधर-उधर भगा दिया ।

**व्याख्या**—ततोऽङ्गद-प्रहारानन्तरं,(स्वप्रहारावसरे) दशग्रीवो रावणः,क्रुद्धः कुपितः सन्, वनौकसां वानराणां, प्राणान् असून्, अकुष्णात् अपाहरत् । रक्षांसि राक्षसान्,अगोपायत् अगोपत् । अरीन् रिपून्, दिशः काष्ठाः,अभाजयत् प्राहिणोत् ।

**तिङन्तः**—कुष निष्कर्षे (क्र्या० उदात्तोदात्तेत्) । गुपू रक्षणे (भ्वा० उदात्तोदात्तेत्) । 'गुपूधूप० ३।१।२८' इत्यायः ॥ ८० ॥

**आलोकयत् स काकुत्स्थमघृष्णोद्, घोरमध्वनत् ।**
**धनुरभ्रमयद् भीममभीषयत विद्विषः ॥ ८१ ॥**

**अन्वयः**—स काकुत्स्थम् आलोकयत्, अघृष्णोत्, घोरम् अध्वनत् । भीमं धनुः अभ्रमयत्, विद्विषः अभीषयत ।

**हिन्दी**—उसने रामचन्द्रको देखा, अपनी ढिठाई दिखायी तथा भयङ्कर शब्द किया । धनुष घुमाने लगा एवं शत्रुओंको डरा दिया ।

**व्याख्या**—स रावणः, काकुत्स्थं रामम्, आलोकयत् अपश्यत् । अघृष्णोत् स्वधाष्टर्यमभ्यनयत् । घोरं भयङ्करम्, अध्वनत् अशब्दायत । धनुः शरासनम्, अभ्रमयत् भ्रमितवान् । विद्विषो रिपून्, अभीषयत अत्रासयत् ।

**तिङन्तः**—ञिधृषा प्रागल्भ्ये (स्वा० उदात्तोदात्तेत्) । अभ्रमयत् 'मितां ह्रस्वः

६।४।९२' इति ह्रस्वः । अभीषयत–'भीस्म्योर्हेतुभये १।३।६८' इति तङ्। 'भयो हेतुभये षुक् ७।३।४०' इति षुक् ॥ ८१ ॥

**आस्कन्दल् लक्ष्मणं बाणैरत्यक्रामच् च तं द्रुतम् ।**
**राममभ्यद्रवज् जिष्णुरस्कुनाच् चेषु-वृष्टिभिः ॥ ८२ ॥**

**अन्वयः**—जिष्णुः बाणैः लक्ष्मणम् आस्कन्दत्, तं च द्रुतम् अत्यक्रामत् । ( ततः ) रामम् अभ्यद्रवत्, इषुवृष्टिभिः च अस्कुनात् ।

**हिन्दी**—विजयी रावणने लक्ष्मणको बाणोंसे व्यथित किया तथा उन्हें शीघ्र ही परास्त कर दिया। तब रामपर टूट पड़ा और उनको बाण-वृष्टिसे ढक दिया।

**व्याख्या**—जिष्णुः जयनशीलः रावणः, बाणैः शरैः, लक्ष्मणम् रामानुजं, अस्कन्दत् अबाधत । तं लक्ष्मणं, द्रुतं शीघ्रम्, अक्रामत् क्रान्तवान् च। ततःपश्चात्, रामम्, अद्रवत् अभ्यगच्छत् । इषुवृष्टिभिः बाणवर्षाभिः, अस्कुनात् आवृणोत् ।

**तिङन्तः**—स्कन्दिर् गतिशोषणयोः (भ्वा० उदात्तोदात्तेत्)। स्कुञ् आवरणे (स्वा० अनुदात्तञित्)। 'स्तम्भु-स्तुम्भु० ३।१।८२' इति पाक्षिकः श्ना; ॥८२॥

**अपौहद् बाण-वर्षं तद् भल्लैः रामो निराकुलः ।**
**प्रत्यस्कुनोद् दशग्रीवं शरैराशीविषोपमैः ॥ ८३ ॥**

**अन्वयः**—निराकुलः रामः भल्लैः तद् बाणवर्षम् अपौहत् । आशीविषोपमैः शरैः दशग्रीवम् प्रत्यस्कुनोत् ।

**हिन्दी**—धैर्यशाली रामने भालों द्वारा उस बाणवृष्टिको दूर कर दिया और सर्पसदृश बाणोंसे रावणको ढक दिया ।

**व्याख्या**—निराकुलः अव्यग्रः, रामः दशरथसुतः, तद् रावणकृतं, बाणवर्षं शरवर्षणम्, भल्लैः प्रासैः, अपौहत् अपाहरत् । आशीविषोपमैः सर्पसदृशैः, बाणैः शरैः, दशग्रीवम् रावणं, प्रत्यस्कुनोत् आच्छादयत् ।

**तिङन्तः**—ऊह वितर्के ( भ्वा० उदात्तोऽनुदात्तेत् )। 'उपसर्गादस्यत्यूह्योर्वा १।३।३०' इति वार्तिकेन पाक्षिकस्तिप् । पाक्षिकः श्नुः प्रत्यस्कुनोत् ॥ ८३ ॥

**मण्डलान्याटतां चित्रमच्छिन्तां शस्त्र-संहतीः ।**
**जगद् व्यस्मापयेतां तौ, न च वीरावसीदताम् ॥ ८४ ॥**

**अन्वयः**—तौ वीरौ चित्रं मण्डलानि आटताम्, शस्त्रसंहतीः अच्छिन्ताम् । जगत् व्यस्मापयेताम, न च असीदताम् ।

**हिन्दी**—उन दोनों वीरोंने तरह-तरह के पैतरे दिये । शस्त्र समूहोंको काट डाला । जगत् को विस्मित कर दिया, पर स्वयं थके नहीं ।

**व्याख्या**—तौ शूरौ, वीरौ रामरावणौ, चित्रं विचित्रं, मण्डलानि परिवेषणानि, आटताम् अभ्राम्यताम्। शस्त्रसंहतीः प्रहरणसंघान्, अच्छिन्ताम् छिन्नवन्तौ। जगत् संसारं, व्यस्मापयेताम् व्यामोहयेताम्। न च स्वयम्, असीदताम् अवसन्नौ।

**तिङन्तः**—'**नित्यं स्मयतेः** ६।१।५७' इत्यात्वे पुक्। '**पाघ्रा०** ८।१।७८' इति सदेः सीदादेशः। धातुर्बहुधा गतः षद्लृ विशरणगत्यवसादनेषु (तु० अनुदात्तोदात्तेत्)।

**व्योम प्राचिनुतां बाणैः, क्ष्मामक्ष्मापयतां गतैः।**
**अभिन्तां तूर्णमन्योऽन्यं शिक्षाश् चाऽतनुतां मुहुः॥ ८५॥**

**अन्वयः**—बाणैः व्योम प्राचिनुताम्। गतैः क्ष्माम् अक्ष्मापयताम्। तूर्णम् अन्योन्यम् अभिन्ताम्। मुहुः शिक्षाश्च धनुषि अतनुताम्।

**हिन्दी**—दोनों वीरोंने बाणोंसे आकाशको ढक दिया। अपनी गतिके द्वारा पृथ्वीको कँपा दिया। एक-दूसरेको वेध डाला। फौरन धनुष पर शिक्षा ( चढाव उतार की शिक्षा ) दिखाने लगे।

**व्याख्या**—उभौ तौ, बाणैः शरैः, व्योम गगनं, प्राचिनुताम् आच्छादयताम्। गतैः स्वपरिभ्रमणैः, क्ष्मां धराम्, अक्ष्मापयताम् अकम्पयताम्। तूर्णम् त्वरितम्, अन्योऽन्यम् परस्परम्, अभिन्ताम् व्यदारयताम्। मुहुः असकृत्, शिक्षाः वैशिष्ट्यं, धनुषि शरासने, अतनुताम्। कथ शरसन्धानं द्रुतं कृत्वा बाणमोक्षं कुर्वन्तिस्म इति दृष्ट्वा जनाश्चकिता अभवन्।

**तिङन्तः**—भिदिर् विदारणे (रुधादिः स्वरितेदनुदात्तः)। '**श्नसोरल्लोपः** ६।४।१११' इति श्नोः आल्लोपः—अभिन्ताम्॥ ८५॥

**समधत्ताऽऽसुरं शस्त्रं राक्षसः क्रूर-विक्रमः।**
**तदक्षरन् महासर्पान् व्याघ्र-सिंहांश् च भीषणान्॥ ८६॥**

**अन्वयः**—क्रूरविक्रमः राक्षसः आसुरं शस्त्रं समधत्त। तत् ( शस्त्रम् ) महासर्पान् भीषणान् व्याघ्रसिंहान् च अक्षरत्।

**हिन्दी**—क्रूर, निर्दयी एवं पराक्रमी राक्षसने आसुरास्त्रको धनुषपर चढ़ाया। वह ( अस्त्र ) बड़े-बड़े सर्प तथा भयानक बाघ-सिंहों को उगलने लगा।

**व्याख्या**—क्रूरविक्रमः घोरपराक्रमः, राक्षसः रावणः, आसुरं असुरदेवताकं, शस्त्रं प्रहरणं, समाधत्त धनुषि आरोपयत्। तत् आसुरास्त्रं, महासर्पान् दीर्घोरगान्, भीषणान् भयानकान्, व्याघ्रसिंहान् सिंहादीन्, अक्षरत् अमुञ्चत्।

**तिङन्तः**—धाञः श्लौ द्वित्वादौ जाते '**श्नाभ्यस्तयोरातः** ६।४।११२' इत्याल्लोपे '**दधस्तथोश्च** ८।२।३८' इति भष्-भावः—समाधत्त। 'अधः' इति प्रतिषेधात् '**झषस्तथोर्धोऽधः** ८।२।४०' इत्यप्रवृत्तम्। न तस्य ध इत्यर्थः॥ ८६॥

**न्यषेधत् पावकाऽस्त्रेण रामस् तद् राक्षसस् ततः ।**
**अदीव्यद् रौद्रमत्युग्रं, मुसलाऽऽद्यगलत् ततः ॥ ८७ ॥**

**अन्वयः**—रामः तत् ( शस्त्रम् ) पावकास्त्रेण न्यषेधत् । ततः राक्षसः अत्युग्रं रौद्रमस्त्रम् अदीव्यत् । ततः मुशलादि अगलत् ।

**हिन्दी**–रामने उस आसुरास्त्रको पावकास्त्रसे व्यर्थ कर दिया । तब राक्षसने अत्यन्त भयानक रौद्रास्त्र चलाया, जिससे मूसलप्रभृति शस्त्र निकलने लगे ।

**व्याख्या**––रामः राघवः,तत् आसुरास्त्रं,पावकास्त्रेण आग्नेयास्त्रेण, न्यषेधत् न्यवारयत् । ततः तदनन्तरम्, राक्षसः रावणः, अत्युग्रं महोत्कटं, रौद्रं पाशुपतम् अस्त्रम्, अदीव्यत् अक्षिपत् । ततः तस्मादस्त्रात्, मुसलादि शस्त्रम्, अगलत् निरैत् ।

**तिङन्तः**—गत्यर्थो दिविरत्र । गल अदने (भ्वा० उदात्तोदात्तेत्) । धातूनामनेकार्थतयेह गतिरर्थः ॥ ८७ ॥

**गान्धर्वेण न्यविध्यत् तत् क्षितीन्द्रो, ऽथ नराऽशनः ।**
**सर्व-मर्मसु काकुत्स्थमौम्भत् तीक्ष्णैः शिलीमुखैः ॥ ८८ ॥**

**अन्वयः**––क्षितीन्द्रः तत् ( अस्त्रम् ) गान्धर्वेण न्यविध्यत् । अथ नराशनः तीक्ष्णैः शिलीमुखैः सर्व-मर्मसु काकुत्स्थम् औम्भत् ।

**हिन्दी**––रामने उस रौद्रास्त्रको गान्धर्वास्त्र द्वारा व्यर्थ कर दिया । बाद राक्षसने तीखे बाणोंसे सभी अङ्गोंमें रामको व्यथित कर दिया ।

**व्याख्या**–क्षितीन्द्रो रामः, तद् रौद्रास्त्रं, गान्धर्वास्त्रेण गन्धर्वदेवताकास्त्रेण, न्यविध्यत् अताडयत् । अथ अनन्तरं,नराशनः रावणः,तीक्ष्णैरुग्रैः, शिलीमुखैर्बाणैः, सर्वमर्मसु सकलमर्मगात्रेषु, काकुत्स्थं रामम्, औम्भत् अपूरयत् । अतुददित्यर्थः ।

**तिङन्तः**––उम्भ पूरणे (तु० उदात्तोदात्तेत्) । व्यधेः 'ग्रहिज्या० ६।१।१६' इति सम्प्रसारणे न्यविध्यत् इति ॥ ८८ ॥

**ततस् त्रिशिरसं तस्य प्रावृश्चल् लक्ष्मणो ध्वजम् ।**
**अमथ्नात् सारथिं चाऽऽशु, भूरिभिश् चाऽतुदच्छरैः ॥ ८९ ॥**

**अन्वयः**—ततः (अतिक्रान्तः) लक्ष्मणः तस्य त्रिशिरसं ध्वजम् प्रावृश्चत् । आशु सारथिम् अमथ्नात्, भूरिभिः शरैः अतुदत् ( तमिति शेषः ) ।

**हिन्दी**––तब (हटा दिये गये) लक्ष्मणने उसकी त्रिशूल वाली ध्वजाको काट दिया । फौरन सारथिको मार डाला तथा बहुतसे बाणोंसे उसे व्यथित कर दिया ।

**व्याख्या**—ततः तदनन्तरम्, ( रावणेन अतिक्रान्तः ) लक्ष्मणः सौमित्रिः,

तस्य रावणस्य, त्रिशिरसं त्रिशूलाग्रं, ध्वजं केतुम्, अवृश्चत् अच्छिनत्। आशु शीघ्रं, सारथिं सूतम्, अमथ्नात् अध्वंसयत्। भूरिभिः भूयोभिः, शरैः इषुभिः, अतुदत् अव्यथयत् ( तम् )।

तिङन्तः—ओव्रश्चू छेदने (तु० उदात्तोदात्तेत्)। मन्थ विलोडने ( क्र्या० उदात्तोदात्तेत् ॥ ८९ ॥

**अश्वान् विभीषणोऽतुभ्नात् स्यन्दनं चाऽक्षिणोद् द्रुतम्।**
**नाऽक्षुभ्नाद् राक्षसो, भ्रातुः शक्तिं चोदवहद् गुरुम् ॥ ९० ॥**

**अन्वयः**—विभीषणः अश्वान् अतुभ्नात्, द्रुतं स्यन्दनम् अक्षिणोत्। राक्षसः न अक्षुभ्नात्, भ्रातुः गुरुं शक्तिम् उदवहत्।

**हिन्दी**—विभीषणने घोड़ोंको मार डाला। फौरन रथको तोड़ दिया। राक्षस घबड़ाया नहीं और उसने भाईपर भारी शक्ति फेंकी।

**व्याख्या**—विभीषणो रावणभ्राता, अश्वान् हयान्, अतुभ्नात् अहन्। द्रुतं शीघ्रं, स्यन्दनम् रथम्, अक्षिणोत् अकृन्तत्। राक्षसो रावणः, न नहि, अक्षुभ्नात् क्षुब्धोऽभवत्। भ्रातुः विभीषणोपरि, गुरु भीषणां शक्तिम्, उदवहत् न्यक्षिपत्।

तिङन्तः—क्षिणु हिंसायाम् (त० उदात्तोदात्तेत्)। क्षुभ सञ्चलने ( क्र्या० उदात्तोदात्तेत् ॥ ९० ॥

**तामापतन्तीं सौमित्रिस् त्रिधाऽकृन्तच्छिलीमुखैः।**
**अशब्दायन्त पश्यन्तस् ततः क्रुद्धो निशाचरः ॥ ९१ ॥**
**अष्ट-घण्टां महा-शक्तिमुदयच्छन् महत्तराम्।**
**रामानुजं तयाऽविध्यत्, स महीं व्यसुराश्रयत् ॥ ९२ ॥**

**अन्वयः**—सौमित्रिः आपतन्तीं तां शिलीमुखैः त्रिधा अकृन्तत्, पश्यन्तः अशब्दायन्त। ततः क्रुद्धो निशाचरः महत्तराम् अष्टघण्टां महाशक्तिम् उदयच्छत। तया रामानुजम् अविध्यत्। व्यसुः स महीम् आश्रयत्।

**हिन्दी**—आती हुई उस शक्तिको लक्ष्मणने बाणोंके द्वारा तीन टुकड़े कर दिये। देखनेवालोंने लक्ष्मणकी बहादुरीका बखान किया। तब क्रुद्ध होकर राक्षसने बहुत बड़ी अष्टघण्टा नामकी महाशक्तिको लक्ष्मणपर फेंका। उसके लगने पर मूर्च्छित होकर वह पृथ्वी पर गिर पड़े।

**व्याख्या**—आपतन्तीं स्वोपरि ढौकमानां, तां शक्तिं, सौमित्रिर्लक्ष्मणः, शिलीमुखैः बाणैः, त्रिधा त्रिप्रकारम्, अकृन्तत् अच्छिनत्। पश्यन्तो जनाः, 'साधु लक्ष्मण साधु' इत्यादि अशब्दायन्त शब्दितवन्तः। ततः क्रुद्धः कुपितः, निशाचरः राक्षसः, महत्तरां बृहत्तराम्, अष्टघण्टां तदाख्यां, महाशक्तिम् बृहतीं शक्तिम्, उदयच्छत्

उदतोलयत् । तया शक्त्या, रामानुजं लक्ष्मणम्, अताडयत् अविध्यत् । तया शक्त्या, विद्धः क्षतः, स लक्ष्मणः, व्यसुः मूर्च्छितः सन्, महीं भूमिम्, आश्रयत् अपतत् ।

**तिङन्तः**—'शब्दवैर० ३।१।२७' इति क्यङ्–अशब्दायन्त । यम उपरमे ( भ्वा० अनुदात्तोदात्तेत )। 'इषुगमियमां छः ७।३।७७' इति छः–उदयच्छन् ।

राघवस्याऽभृशायन्त सायकास्, तैरुपद्रुतः ।
ततस् तूर्णं दशग्रीवो रण-क्ष्मां पर्यशेषयत् ॥ ९३ ॥

**अन्वयः**—ततः राघवस्य सायकाः अभृशायन्त । तैः उपद्रुतः दशग्रीवः तूर्णं रणक्ष्मां पर्यशेषयत् ।

**हिन्दी**—उसके बाद रामके बाण खूब बढ़कर धड़ाधड़ बरसने लगे । उनसे उत्पीडित होकर वह रणभूमि छोड़कर भाग गया ।

**व्याख्या**—ततस्तदनन्तरम्, राघवस्य रामस्य, सायकाः बाणाः, अभृशायन्त शीघ्रगतयोऽभूवन् । तैः बाणैरुपद्रुतः उत्पीडितः, दशग्रीवो रावणः, तूर्णं त्वरितं, रणक्ष्मां संग्रामभूमिं, पर्यशेषयत् अत्यजत् ।

**तिङन्तः**—शिष असर्वोपयोगे (चुरादिः) । णत्ययान्ता धातवः सर्वं एव सेट उभयपदिनो भवन्ति । ङित आत्मनेपदिनो यङादयः । सन्नन्तास्तु 'पूर्ववत्सनः १।३।६२' इति ज्ञापकात्परस्मैपदिनः आत्मनेपदिनश्च यथाप्राप्तम् ॥ ९३ ॥

स-स्फुरस्योदकर्षच् च सौमित्रेः शक्तिमग्र-जः ।
असिञ्चदोषधीस् ता याः समानीता हनूमता ॥ ९४ ॥

**अन्वयः**—अग्रजः सस्फुरस्य सौमित्रेः शक्तिम् उदकर्षत् । हनूमता या ( पूर्वम् ) आनीताः ताः ओषधीः असिञ्चत् ( व्रणे ) ।

**हिन्दी**—बड़े भाईने श्वास लेने वाले लक्ष्मणकी लगी शक्तिको निकाला और हनुमान् द्वारा लाई गयी जो ओषधियां थीं उनको व्रणपर सींचा ।

**व्याख्या**—अग्रजो ज्येष्ठभ्राता रामः,सस्फुरस्य श्वासशालिनस्तस्य सौमित्रेः लक्ष्मणस्य, शक्तिं रावणक्षिप्ताम्, उदकर्षत् उदधरत् । हनुमता मारुतिना, याः (पूर्वम्),आनीताः प्रापिताः,ओषधीः महाप्रभावाः, ताः, असिञ्चत् व्रणेऽपातयत् ।

उदजीवत् सुमित्रा-भूर् भ्राताऽऽश्लिष्यंत् तमायतम् ।
सम्यङ् मूर्ध्न्युपाशिङ्घदपृच्छच् च निरामयम् ॥ ९५ ॥

**अन्वयः**—(ततः) सुमित्राभूः उदजीवत् । भ्राता तम् आयतम् आश्लिष्यत् । सम्यक् मूर्ध्नि उपाशिङ्घत्, निरामयम् अपृच्छत् च ।

हिन्दी--उसके बाद लक्ष्मणजी जी उठे। बड़े भाईने बड़ी देरतक उनका आलिङ्गन किया। खूब शिर सूंघा, पीड़ा तो नहीं है? ऐसा पूछा।

व्याख्या–ततः तदनन्तरम्, सुमित्राभूः लक्ष्मणः, उदजीवत् प्राणीत्। भ्राता रामः, तं लक्ष्मणम्, आयतं दीर्घम्, आश्लिष्यत् आलिङ्गितवान्। सम्यक् साधु प्रकारेण, मूर्ध्नि शिरसि, उपाशिङ्घत् घ्रातवान्। निरामयं नीरोगताम्, अपृच्छत् पृष्टवान्।

तिङन्तः--शिघि आघ्राणे (भ्वा॰ उदात्तोदात्तेत्)। इदित्वान्नुमि शिङ्घ इति जायते ॥ ९५ ॥

ततः प्रोदसहन् सर्वे योद्धुमभ्यद्रवत् परान्।
अकृच्छ्रायत च प्राप्तो रथेनाऽन्येन रावणः ॥ ९६ ॥

अन्वयः–ततः सर्वे योद्धुं प्रोदसहन्। रावणः अन्येन रथेन प्राप्तः परान् अभ्यद्रवत् अकृच्छ्रायत च।

हिन्दी—उसके बाद सभी-युद्ध करनेके लिये उत्साहित हो गये। रावण भी दूसरे रथके द्वारा युद्धस्थलमें आकर शत्रुओंपर टूट पड़ा। पापकी चेष्टा करने लगा।

व्याख्या–ततः लक्ष्मणबोधानन्तरम्, सर्वे रामादयः, योद्धुं युद्धं कर्तुम्, प्रोदसहन् प्रोत्साहसम्पन्ना अभूवन्। रावणः लङ्केशः, अन्येन अपरेण, रथेन स्यन्दनेन, प्राप्तः युद्धस्थलमुपस्थितः, परान् शत्रून्, अभ्यद्रवत् प्रापतत्। अकृच्छायत च पापचेष्टामकरोत्।

तिङन्तः—षह मर्षणे चौरादिको धातुः। 'आधृषाद्वा' इति वचनात् णिचोऽभावः। पारस्मैपदिकः शप्, न तु भौवादिक आत्मनेपदित्वात्। कृच्छ्र शब्दात् पापचिकीर्षायाम् 'सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वाच्यम् ३।१।१४' इति क्यङ्। कण्वम् पापम्, तस्य चिकीर्षायाम् इत्यर्थः ॥ ९६ ॥

सम्प्रति रामरावणयुद्धमुपक्रममाण इन्द्रप्रहितरथार्पणमाख्याति—

'भूमि-ष्ठस्याऽसमं युद्धं रथ-स्थेनेति' मातलिः।
आहरद् रथमत्युग्रं स-शस्त्रं मघवाऽऽज्ञया ॥ ९७ ॥

अन्वयः—रथस्थेन भूमिष्ठस्य युद्धम् असमम् इति मातलिः मघवाज्ञया सशस्त्रम् अत्युग्रं रथम् (रामाय) आहरत्।

हिन्दी--रथपर बैठे हुए के साथ भूमिपर खड़े होनेवालेका युद्ध ठीक नहीं बैठता। इस कारण मातलिने इन्द्रकी आज्ञासे शस्त्रोंसे सजा-धजा अति उग्र उत्कट रथ रामके लिये ला दिया।

**व्याख्या**--रथस्थेन स्यन्दनोपविष्टेन सह, भूमिष्ठस्य भूतलस्थितस्य, युद्धं संग्रामः, असमम् विषमम्, इति हेतोः, मातलिः इन्द्रसारथिः, मघवाज्ञया इन्द्रादेशेन, सशस्त्रं शस्त्रसज्जम्, अत्युग्रं अत्युत्कटदीप्तिमन्तं, रथं स्यन्दनं, रामाय राघवाय,आहरत् उपानयत् ।

**कृदन्तः**—भूमौ तिष्ठतीति विग्रहे 'सुपि स्थः ३।२।४' इति के 'अम्बाम्ब० ८।३।९७ इति मूर्धन्यः ॥ ९७ ॥

**सोऽध्यष्ठीयत रामेण, शस्त्रं पाशुपतं ततः ।**
**निरास्यत दशाऽऽस्यस्, तच्छक्राऽस्त्रेणाजयन् नृपः ॥ ९८ ॥**

**अन्वयः**–रामेण सः अध्यष्ठीयत । ततः दशास्यः पाशुपतं शस्त्रं निरास्यत । नृपः शक्रास्त्रेण तद् अजयत् ।

**हिन्दी**—राम उसपर जा बैठे । तब रावणने उनपर पाशुपतास्त्र छोड़ा । रामने उसे शक्रास्त्रसे जीत लिया ।

**व्याख्या**--रामेण राघवेण, सः इन्द्रप्रहितो रथोऽध्यष्ठीयत अध्यास्तोऽभवत् । ततोऽध्यासनानन्तरम्, दशास्यो रावणः, पाशुपतास्त्रं पशुपतिदेवताकं, शस्त्र प्रहरणं, निरास्यत अत्यजत । नृपः रामः, तत् शस्त्रं, शक्रास्त्रेण इन्द्रदेवताकेन अस्त्रेण, अजयत् जितवान् ।

**तिङन्तः**—स्था धातोः अधि-पूर्वस्य सकर्मकतया कर्मणि लङि 'घुमास्था० ६।४।६६' इतीत्वम् । ततः 'प्राक् सितादड्व्यवायेऽपि ८।३।६३' 'उपसर्गात्०-६५' इति षः । 'उपसर्गादस्यत्यूह्योर्वा १।३।३०' इति तङ्–निरास्यत । पूर्वमपि गतमिदं वार्तिकमग्रेऽपि १०३ पद्ये ॥ ९८ ॥

**ततः शत-सहस्रेण रामः प्रौर्णोन् निशाचरम् ।**
**बाणानामक्षिणोद् धुर्यान् सारथिं चाऽदुनोद् द्रुतम् ॥ ९९ ॥**

**अन्वयः**—ततः रामः बाणानां शतसहस्रेण निशाचरम प्रौर्णोत् । धुर्यान् अक्षिणात् । द्रुतं सारथिं च अदुनोत् ।

**हिन्दी**—बाद रामने एक लाख बाणोंसे निशाचरको ढक दिया, घोड़ोंको मार डाला, फौरन सारथिको भी पीड़ित कर दिया ।

**व्याख्या**—रामः दशरथिः,बाणानामिषूणां, शतसहस्रेण लक्षेण, निशाचरम् रावणं, प्रौर्णोत् आच्छादयत् । धुर्यान् हयान्, अक्षिणोत अहन् । द्रुतं शीघ्रम्, सारथिं सूतं च, अदुनोत् उपातापयत् ।

**तिङन्तः**—'गुणोऽपृक्ते ७।३।९१' इति गुणः । क्षिणु हिंसायाम् ( तु०-उदात्तोदात्तेत् ) ॥ ९९ ॥

**अदृश्यन्ताऽनिमित्तानि, प्राह्वलत् क्षिति-मण्डलम् ।**
**रावणः प्राहिणोच्छूलं, शक्तिं चैन्द्रीं महीपतिः ॥ १०० ॥**

**अन्वयः**—अनिमित्तानि अदृश्यन्त, क्षितिमण्डलं प्राह्वलत् । रावणः शूलं प्राहिणोत् । महीपतिः ऐन्द्रीं शक्तिम् च प्राहिणोत्—इत्युभयत्रान्वयि पदम् ।

**हिन्दी**—अशकुन दिखाई पड़ने लगे । पृथ्वीमण्डल कांपने लगा । रावणने शूल चलाया तो रामने इन्द्र-सम्बन्धिनी शक्ति चलायी ।

**व्याख्या**—अनिमित्तानि अपशकुनानि, अदृश्यन्त अवालोक्यन्त, रावणेनेति शेषः । क्षितिमण्डलं धराचक्रम्, प्राह्वलत् अचलत् । रावणः लङ्केशः, शूलं प्रहरणम्, प्राहिणोत् प्राक्षिपत् । महीपतिः राजा रामः, ऐन्द्रीं शाक्रीं, शक्तिं तन्नामकमस्त्रं, प्राहिणोत् प्राक्षिपत् । अत्रैकैव क्रियोभयान्वयिनी ।

**तिङन्तः**—ह्वल चलने ( भ्वा० उदात्तोदात्तेत् ) । हि गतौ ( स्वा० अनुदात्तेत् ) ॥ १०० ॥

**ताभ्यामन्योन्यमासाद्य समवाप्यत संशमः ।**
**लक्षेण पत्रिणां वक्षः क्रुद्धो रामस्य राक्षसः ॥ १०१ ॥**
**अस्तृणादधिकं रामस् ततोऽदेवत सायकैः ।**
**अक्लाम्यद्रावणस्, तस्य सूतो रथमनाशयत् ॥ १०२ ॥**

**अन्वयः**—ताभ्याम् ( अस्त्राभ्याम् ) अन्योन्यम् आसाद्य संशमः समवाप्यत । ( ततः ) क्रुद्धः राक्षसः पत्रिणां लक्षेण रामस्य वक्षः अस्तृणात् । रामः ततः ( राक्षसात् ) अधिकम् सायकैः अदेवत । ( यैर्हि ) रावणः अक्लाम्यत् । तस्य सूत : रथम् अनाशयत् ।

**हिन्दी**—वे दोनों अस्त्र परस्पर मिलकर ( टकराकर ) नष्ट हो गये । तब रावणने क्रुद्ध होकर लाखों बाणोंसे रामकी छातीको ढक दिया । रामने भी उससे अधिक बाणोंसे क्रीड़ा की जिससे वह उत्पीड़ित हो गया । तब उसके सारथिने उस रथको रणभूमिसे हटा लिया ।

**व्याख्या**—ताभ्यां शूलैन्द्रशक्तिशस्त्राभ्याम्, अन्योन्यम् परस्परम्, आसाद्य प्राप्य, संशमः शान्तिः, समवाप्यत समध्यगम्यत । ततः पश्चात्, क्रुद्धः कुपितः, राक्षसो लङ्केशः, पत्रिणां बाणानां, लक्षेण लक्षसंख्यया, रामस्य राघवस्य, वक्षः उरः, अस्तृणात् आच्छादयत् । रामः राघवः, ततः तस्मात् रावणादपि, अधिकं भृशम्, सायकैर्बाणैरदेवत अक्रीडत् । यैर्हतो रावणोऽक्लाम्यत् । तस्य ग्लानस्य रावणस्य, सूतः सारथिः, रथं स्यन्दनम्, अनाशयत् रणाद् दूरमपासारयत् ।

**तिङन्तः**—स्तृञ् आच्छादने (क्र्या० उदात्तो ञित्)। तेवृ देवृ देवने (भ्वा० उदात्तोऽनुदात्तेत्॥ १०१-१०२॥

राक्षसोऽतर्जयत् सूतं पुनश् चाऽढौकयद् रथम्।
निरास्येतामुभौ बाणावुभौ धुर्यानविध्यताम्॥ १०३॥

**अन्वयः**—राक्षसः सूतम् अतर्जयत्, पुना रथम् अढौकयत् ( रणभूमिमिति शेषः )। उभौ वाणान् निरास्येताम्, उभौ धुर्यान् अविध्यताम्।

**हिन्दी**—राक्षसने सारथिको डाटा और रथको रणभूमि पर लिवा आया। बाद दोनोंने बाण छोड़े। दोनोंने घोड़ोंको व्यथित किया।

**व्याख्या**—राक्षसो रावणः, सूतम् सारथिम्, अतर्जयत् अभर्त्संयत्। पुनर्भूयः, रथं स्यन्दनं, रणभूमिम् अढौकयत् अवाहयत्। ततः उभौ रामरावणौ, वाणान् शरान्, निरास्येताम् अक्षिपताम्। धुर्यानश्वान्, अविध्यताम् अताडयताम्।

**तिङन्तः**—पूर्ववदस्यतेस्तङ्। विध्यतेः सम्प्रसारणम्। ढौकृ गतौ इति ण्यन्ताल्लङ्॥ १०३॥

उभावकृन्ततां केतूनव्यथेतामुभौ न तौ।
अदीप्येतामुभौ धृष्णू, प्रायुञ्जातां च नैपुणम्॥ १०४॥

**अन्वयः**—उभौ केतून् अकृन्तताम्। तावुभौ नाव्यथेताम्। धृष्णू उभौ अदीप्येताम्, नैपुणं च प्रायुञ्जाताम्।

**हिन्दी**—दोनोंने पताकाओंको काट डाला। वे दोनों व्यथित नहीं हुए। दृढ़तापूर्वक दोनों देदीप्यमान हुए तथा दोनोंने अपनी निपुणता दिखायी।

**व्याख्या**—उभौ रामरावणौ, केतून् ध्वजान्, अकृन्तताम् अच्छिन्ताम्। तौ पूर्वोक्तौ,उभौ रामरावणौ, नाव्यथेताम् नहि पीडितावभवताम्। धृष्णू दृढौ; उभौ द्वौ, अदीप्येताम् अद्योतेताम्। नैपुणं कौशलं, प्रायुञ्जाताम् प्रायुङ्क्ताम्॥ १०४॥

उभौ मायां व्यतायेतां, वीरौ नाऽश्राम्यतामुभौ।
मण्डलानि विचित्राणि क्षिप्रमाक्रामतामुभौ॥ १०५॥

**अन्वयः**—उभौ मायां व्यतायेताम्, उभौ वीरौ न अश्राम्यताम्। उभौ विचित्राणि मण्डलानि क्षिप्रम् आक्रामताम्।

**हिन्दी**—दोनोंने मायाका विस्तार किया, फिर भी दोनों वीर श्रान्त नहीं हुए, थके नहीं। दोनोंने विचित्र पैंतरेबाजी जल्दी जल्दी कर डाली।

**व्याख्या**—उभौ द्वौ, मायां कृत्रिमदृश्यं, व्यतायेतां व्यस्तारयताम् । उभौ द्वावपि, वीरौ शूरौ, न नहि, अश्राम्यताम् श्रान्तौ आस्ताम् । युध्यमानौ तौ, विचित्राणि अद्भुतानि, मण्डलानि परिवर्तनानि, क्षिप्रं त्वरितम्, आक्रामताम् अभ्राम्यताम् ।

तिङन्तः—तायृ सन्तानपालनयोः (भ्वा० उदात्तोऽनुदात्तेत्) । 'वा भ्राश० ३।१।७०' इति वा शप् । 'क्रमः परस्मैपदेषु ७।३।७६' दीर्घः, आक्रामताम् ॥ १०५ ॥

**न चोभावप्यलक्ष्येतां, यन्तारावाहतामुभौ ।**
**स्यन्दनौ समपृच्येतामुभयोर् दीप्त-वाजिनौ ॥ १०६ ॥**

**अन्वयः**—उभौ द्वौ अपि न अलक्ष्येताम्, उभौ यन्तारौ आहताम् । उभयोः दीप्तवाजिनौ स्यन्दनौ समपृच्येताम् ।

**हिन्दी**—दोनों ही दिखाई नहीं पड़ते थे, दोनोंने सारथियोंको व्यथित किया। दोनोंके सजे सजाये घोड़ेवाले रथ आ मिले ।

**व्याख्या**—उभौ अपि रामरावणौ, ( जनैः ) न अलक्ष्येताम् अज्ञायेताम् । उभौ द्वौ, यन्तारौ सूतौ ( कर्मणी ), आहताम् अताडयताम् । उभयोर्द्वयोरपि, दीप्तवाजिनौ सज्जितहयौ, स्यन्दनौ रथौ, समपृच्येताम् समसज्येताम् ।

तिङन्तः—आहतामिति आङ्योगेऽपि सकर्मकतया न तङ् । 'अनुदात्तोपदेश० ६।४।३७' इति नलोपः । पृची सम्पर्के ( रु० उदात्तोदात्तेत् ) । आद्यन्तयोः कर्मलङ्स्यां सम्पुटितो हनिः कर्तरि लङ्भाक् ॥ १०६ ॥

**ततो मायामयान् मूर्ध्नो राक्षसोऽप्रथयद्रणे ।**
**रामेणैकशतं तेषां प्रावृश्च्यत शिलीमुखैः ॥ १०७ ॥**

**अन्वयः**—ततः राक्षसः रणे मायामयान् मूर्ध्नः अप्रथयत् । रामेण तेषाम् एकशतम् शिलीमुखैः प्रावृश्च्यत ।

**हिन्दी**—तब राक्षसने संग्राममें मायासे कल्पित सिरोंको बहुत बढ़ाया । रामने भी उनमें एक सौ एक सिरोंको बाणोंसे काट डाला ।

**व्याख्या**—ततः तदनन्तरम्, राक्षसो रावणः, रणे युधि, मायामयान् कपटयुतान्, मूर्ध्नः शिरांसि, अप्रथयत् प्रादर्शयत् । रामेणापि राघवेणापि, तेषां मूर्ध्नाम्, एकशतम् एकाधिकशतम्, सायकैः शरैः, अवृश्च्यत अच्छिद्यत ।

तिङन्तः—प्रथ प्रख्याने, घटादित्वाण्णयन्ते ह्रस्वः—अप्रथयत् ॥ १०७ ॥

**समक्षुभ्नन्नुदन्वन्तः, प्राकम्पन्त महीभृतः ।**
**सन्त्रासमभिपः शक्रः, प्रैङ्खच्च, क्षुभिता क्षितिः ॥ १०८ ॥**

**अन्वयः**—उदन्वन्तः समक्षुभ्नन् । महीभृतः प्राकम्पन्त । शक्रः सन्त्रासम् अबिभः, प्रैङ्खत् च । क्षितिः क्षुभिता अभवत् ।

**हिन्दी**—सभी समुद्र क्षुब्ध हो गये । सभी पर्वत काँप उठे । इन्द्रको डर हो गया और वह भी काँप उठे । पृथ्वी घबड़ा गयी ।

**व्याख्या**—उदन्वन्तः समुद्राः, समक्षुभ्नन् समचलन् । महीभृतोऽचलाः, प्राकम्पन्त प्रघूता अभवन् । शक्रः इन्द्रः, सन्त्रासं प्रभयम्, अबिभः अभरत्, प्रैङ्खत् अक्षोभत च । क्षितिः धरा, क्षुभिता चलिताऽभूत् । अत्र सर्वत्र रावणस्य शिरसामनेकीभावेन सर्वेऽपीमे त्रस्ता अभवन् यद् एवमयं रामं सम्भ्रम्य पराजितं सम्भवतः कुर्य्यात् इत्यर्थः ।

**तिङन्तः**—क्षुभ सञ्चलने ( क्र्या० उदात्तोदात्तेत् ) । भृञः श्लौ 'भृञामित् ७।४।७६' इति इत्वम् । इखि धातुः उख उखि इत्यादौ धातुसमूहे पठितः ( भ्वा० उदात्तोदात्तेत् ) ॥ १०८ ॥

ततो मातलिना शस्त्रमस्मार्यत महीपतेः ।
वधाय रावणस्योग्रं स्वयम्भूर् यदकल्पयत् ॥ १०९ ॥

**अन्वयः**—ततः रावणस्य वधाय स्वयम्भूः यद् उग्रं शस्त्रम् अकल्पयत्, तत् महीपतेः मातलिना अस्मार्यत ।

**हिन्दी**—बादको ब्रह्माजीने रावणके वधके लिये जो उग्र शस्त्र बना रखा था उसे मातलिने रामचन्द्रको याद कराया ।

**व्याख्या**—ततस्तस्य रावणस्य लङ्केशस्य, वधाय नाशाय, स्वयम्भूः ब्रह्मा, यत् निर्दिष्टं, उग्रं घोरं, शस्त्रं प्रहरणम्, अकल्पयत् कल्पितवान् । तत् शस्त्रमद्भुतं, (मातलिना) महीपतेः रामस्य, अस्मार्यत स्मारितम् ।

**तिङन्तः**—कृपेर्णिचि गुणे 'कृपो रो लः ८।२।१८' इति लः । 'अधीगर्थ० २।३।७२' षष्ठी । 'अस्मार्यत महीपतिः' इति पाठे कर्मण उक्तिः ॥ १०९ ॥

सम्प्रति ब्रह्मास्त्रं विशिनष्टि द्वाभ्याम्—

नभस्वान् यस्य वाजेषु, फले तिग्मांशु-पावकौ ।
गुरुत्वं मेरु-सङ्काशं, देहः सूक्ष्मो वियन्मयः ॥ ११० ॥
राजितं गारुडैः पक्षैर् विश्वेषां धाम तेजसाम् ।
स्मृतं तद् रावणं भित्त्वा सुघोरं भुव्यशाययत् ॥ १११ ॥

**अन्वयः**—यस्य वाजेषु नभस्वान्, फले तिग्मांशुपावकौ, मेरुसङ्काशं गुरुत्वं (पाठान्तरे दृढत्वं), वियन्मयः सूक्ष्मो देहः, गारुडैः पक्षैः राजितं विश्वेषां तेजसां धाम आसीत् । रामेण स्मृतं सुघोरं तत् शस्त्रम् रावणं भित्त्वा भुवि अशाययत् ।

हिन्दी—जिसके पांखमें वायुदेव थे, ठोरमें ( मुखमें ) सूर्य और अग्नि थे, मेरुके सदृश जो भारी था, दृढ था, एवं आकाशके तुल्य जिसका सूक्ष्म शरीर था, गरुड़के पाँखों तुल्य जिसके पंख थे, सारे तेजोंका जो स्थान था—उस महाघोर ब्रह्मास्त्रने रामचन्द्रका स्मरण करते ही रावणको भेदकर पृथ्वीपर सुला दिया।

व्याख्या—यस्य शस्त्रस्य, वाजेषु पक्षेषु, नभस्वान् वायुदेवः। फले शल्ये मुखे इति यावत्; तिग्मांशुपावकौ सूर्यानलौ। मेरुसङ्काशं गुरुत्वं दृढत्वं वा सुरगिरिसदृशं गौरवं दाढर्यं वा। वियन्मयः व्योममयः, सूक्ष्मः अणुः, देहः कायः। गारुडैः तार्क्ष्यैः, पक्षैः पक्षतिभिः,राजितं शोभितम्, विश्वेषां सर्वेषां, तेजसामोजसां, धाम स्थानम्। तत् सुघोरम्,अत्युग्रं शस्त्रं, रामेण स्मृतं अधिगतं सत्, रावणं लङ्केशं, भित्त्वा विभिद्य, भुवि पृथिव्याम्, अशाययत् अस्वापयत् ॥ ११०–१११ ॥

**आबध्नन् कपि-वदनानि संप्रसादं,**
**प्राशंसत् सुर-समितिर् नृपं जिताऽरिम्।**
**अन्येषां विगत-परिप्लवा दिगन्ताः,**
**पौलस्त्योऽजुषत शुचं विपन्न-बन्धुः ॥ ११२ ॥**

**इति भट्टिकाव्ये तिङन्त-काण्डे लङ्-विलसितो नाम सप्तदशः सर्गः ॥**

अन्वयः—कपिवदनानि सम्प्रसादम् आबध्नन्। सुरसमितिः जितारिं नृपं प्राशंसत्। दिगन्ताः अन्येषां विगत-परिप्लवा अभवन्। विपन्नबन्धुः पौलस्त्यः शुचम् अजुषत।

हिन्दी—रावणके भूमिशायी हो जाने पर वानरोंके मुंह खिल उठे। देवसभा शत्रुको जीत लेने वाले रामकी प्रशंसा करने लगी। बन्धुके मर जानेपर विभीषण शोक करने लगा।

व्याख्या—( लङ्केशे धराशायिनि सति ) कपिवदनानि वानरमुखानि, सम्प्रसादं महामोदम्, आबध्नन् असेवन्त। सुरसमितिः देवसभा, जितारिं परास्तशत्रुं, नृपं रामं, प्राशंसत् अस्तौत्। दिगन्ताः दिग्भागाः, अन्येषामपरेषां जनानां, विगतपरिप्लवाः निरुपद्रवाः, अभवन् अजायन्त। विपन्नबन्धुर्मृतभ्रातृकः, पौलस्त्यो विभीषणः, शुचं शोकमजुषत अभजत्।

तिङन्तः—जुषी प्रीतिसेवनयोः ( तु० अनुदात्तेदुदात्तः ) ॥ ११२ ॥

इति श्रीमर्मविमर्शिकाविभूषिते भट्टिमहाकाव्ये लङ्विलसिते
तिङन्तकाण्डे रावणवधो नाम सप्तदशः सर्गः समाप्तः।

●

# अष्टादशः सर्गः

## ( उपक्रमः )

दशलकार-विलसिते तिङन्तकाण्डेऽस्मिन् सप्तदशे सर्गे सार्वधातुकलकारेषु लङ्‌उदाहरणानि दत्त्वेहाष्टादशे सर्गे लटो लकारस्य उदाहरणानि ददाति कविः। तत्र सर्वधातुभ्यः 'वर्तमाने लट् ३।२।१२३' इति वर्तमानकाले 'लः कर्मणि च भावे चाकर्मकेभ्यः ३।४।६९ इति सकर्मकेभ्यः कर्तरि कर्मणि च, अकर्मकेभ्यस्तु कर्तरि भावे च प्रत्ययाः इति नियमः। तत्रार्थ-भेदोऽपि क्वचिद् भवतीति। यथा 'लट् स्मे ३।२।११८' इत्यादिके, तत्रैव पद्ये वक्ष्यामः।

इह केवलम् प्रत्ययाः निर्दिश्यन्ते। तत्रात्मनेपदे 'टित आत्मनेपदानां टेरे ३।४।७९' इति सर्वत्र टेः एत्वे 'थासः से ३।४।८०' इति से-कृते, 'झोऽन्तः ७।१।३' इति झस्य अन्तादेशः। केवलम् परस्मैपदे जुहोत्यादौ 'अदभ्यस्तात् ७।१।४' इति इति झस्य अत् भवति। आत्मनेपदे तु सर्वत्रैव भ्वादि-दिवादि-तुदादि-चुरादि-व्यतिरिक्त-गणेषु 'आत्मनेपदेष्वनतः ७।१।५' इति झस्य अत् एव जायते।

अदन्त विकरणगणेषु ( भ्वादि-दिवादि-तुदादि-चुरादिषु ) सनादि-प्रक्रिया-धातुषु च अधस्तना एव प्रत्ययाः। तत्र 'अतो गुणे ६।१।९७' इत्यनेन 'अन्ति' 'ए' इत्युभयोः प्रत्यययोः पररूपम् भवति। परस्मैपदे उत्तमपुरुषे ( मि वः मः इत्यत्र आत्मनेपदे च 'वहे' 'महे' इत्युभयोः ) 'अतो दीर्घो यञि ७।३।१०' इत्यनेन दीर्घो भवति। इत्यलम्।

अदन्त-विकरणगणेषु 'आते' 'आथे' इत्युभयत्र 'अकृतव्यूहाः' इति परिभाषया 'आतो ङितः ७।२।८१' इत्यनेन आतः इय् इति कृते 'लोपो व्योर्वलि ६।१।६६' इति वलि य-लोपो जायते। तथाहि परिष्कृताः प्रत्यया अदन्त-विकरणका इमे लट् लकारे।

| | | परस्मैपदे— | | | आत्मनेपदे— | | |
|---|---|---|---|---|---|---|---|
| प्र० | पु० | ति | तः | अन्ति | ते | इते | अन्ते |
| मध्य० | पु० | सि | थः | थ | से | इथे | ध्वे |
| उ० | पु० | मि | वः | मः | ए | वहे | महे |

जुहोत्यादौ 'अन्ति' इत्यत्र 'अति' ज्ञेयः। स्वादि-तनाद्योस्तु आत्मनेपद-पर-

स्मैपदयोरुभयोरपि 'वहि' 'महि' व–म प्रत्यययोः 'लोपश्चास्यान्यतरस्याम् म्वोः ६।४।१०७' इति विकल्पेन असंयोगपूर्वस्य ओः लोपः। डुकृञ् धातोस्तु 'नित्यं करोतेः६।४।१०८' इति नित्यम् उलोपः। प्रथमपुरुषबहुवचने तु 'हुश्नुवोः सार्वधातुके ६।४।८७' इति यण्। संयुक्तधातूनान्तु 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६।४।७७'इति इयङुवङौ भवतः। षट्सु गणेषु उभयोः पदयोः प्रत्ययाः—

**परस्मैपदे—**

| | ए० व० | द्वि०व० | ब० व० |
|---|---|---|---|
| प्र० पु० | ति | तः | अन्ति |
| म० पु० | सि | थः | थ |
| उ० पु० | मि | वः | मः |

**आत्मनेपदे—**

| | ए० व० | द्वि०व० | ब० स० |
|---|---|---|---|
| प्र० पु० | ते | आते | अते |
| म० पु० | से | आथे | ध्वे |
| उ० पु० | ए | वहे | महे |

१—जुहोत्यादौ तु अन्तिस्थाने 'अति' भवति। विकरणानि तु सप्तदश-सर्गे लङ् लकारे द्रष्टव्यानि।

इत्थं हि प्रत्यययोगेन लट्–रूपाणि[1] ज्ञेयानि। प्रथमपद्ये यथा–'अशूङ् व्याप्तौ' (स्वादिः ङित् उदात्तः) व्युपसर्गयोगे–'व्यश्नुते' 'व्यश्नुवाते' 'व्यश्नुवते' (यणम् अपोद्य उवङ् कार्यम्) 'रुदिर् 'अश्रुविमोचने' (अदादिः उदात्तोदात्तेत्)। 'रुदादिभ्यः सार्वधातुके ७।२।७६' इति इट् कार्य-विशेषः। 'रोदिति' 'रुदितः' 'रुदन्ति' इत्यादि रूपाणि। 'क्ङिति च १।१।५' इति तसादिषट्सु गुणनिषेधः। अध्यायिनस्तिङन्तपदानि सर्वपुरुषेषु प्रथममेकवचनम्, ततो द्विवचनम्, ततो बहुवचनम् वदेयुर्लिखेयुश्चेदधिकं सौविध्यं स्यात्। यथा–व्यश्नुते। व्यश्नुषे। व्यश्नुवे॥ व्यश्नुवाते। व्यश्नुवाथे। व्यश्नुवहे॥ व्यश्नुवते। व्यश्नुध्वे। व्यश्नुमहे॥ रोदिति। रोदिषि। रोदिमि॥ रुदितः। रुदिथः। रुदिवः॥ रुदन्ति। रुदिथ। रुदिमः॥ इत्येव पाणिनि-पद्धतिः। अतः सुबन्तपदान्यपि सर्वैकवचनानि पूर्वं, तदनन्तरं सर्वाणि द्विवचनानि, बहुवचनानि च सर्वाणि। यथा—

---

१. लटोऽन्यसर्गेषु स्थितिः---१-६-८, १९-२२।२-३३-३५, ३८, ४१. ५०।३-१३, ५३।४-२१-२७, २९, ३९, ५-७९ (लुप्तो लट्) ११-१४, १६-२०, २२ (लुप्तः) २५, २७, (लुप्तः) ३४, ३७. ४४-४७, ५४-५६, ५९-६५ (लुप्तः) ६८-७१, ७४, ८०-८२, ८५-८९, ९८-९९ (लुप्तः) ६-१०-११, १३-१४, २४-२९ ३५-३९, ५१-५२, ५४-५६, ६४-६९, ७४, ८१-८५, ९३-९५, ९९-१०३, १०९, १११-१२६, १२९, १३४ (लुप्तः) १३६, ७-५-९, ११, १६-१७, २७, २९, ४६, ४९, ६३, ६६, ६८-६९, ७४-७६, ८४, ८६, ८८-९०, ९२, ९५-९६, ९९-१००।८-६, १२-१५, १७, १९-२१, ३१, ४४, ४८, ६४, ७६-७७, ८२-८३, १०४-१०६, ९-१२, १९-२०, २३-२४, २८।

एकवचनम्—शोकः, शोकम्, शोकेन, शोकाय, शोकात् ( द् ), शोकस्य, ोके, हे शोक ।

द्विवचनम्—शोकौ २, शोकाभ्याम् ३, शोकयोः २, हे शोकौ ।

बहुवचनम्—शोकाः, शोकान्, शोकैः, शोकेभ्यः २, शोकानाम्, शोकेषु, हे शोकाः ( इति क्रमः पाणिनेः ) ।

## ( सर्गारम्भः )

**व्यश्नुते स्म ततः शोको नाभि-सम्बन्ध-सम्भवः ।**
**विभीषणमसावुच्चै रोदिति स्म दशाऽऽननम् ॥ १ ॥**

**अन्वयः**—ततः नाभि-सम्बन्ध-सम्भवः शोकः विभीषणं व्यश्नुते स्म । असौ दशाननम् उच्चैः रोदिति स्म ।

**हिन्दी**—उसके बाद सहोदर सम्बन्धके कारण विभीषण पर शोक व्याप्त हो गया । वह दशाननके लिये उच्च स्वरसे रोने लगे ।

**व्याख्या**—ततो रावणवधानन्तरम्, नाभि-सम्बन्धसम्भवः समानोदरसम्पर्को-त्पन्नः, शोकः शुग्विकारजो विषादः, विभीषणं रावणभ्रातरं, व्यश्नुते व्याप्नोति स्म । असौ विभीषणः उच्चैस्तारस्वरेण, दशाननं रावणं, रोदिति विलपति स्म ।

**तिङन्तः**—'लट् स्मे ३।२।११८' इति उभयत्रापि भूताऽनद्यतनपरोक्षे लटि रूपम्—व्यश्नुते । रोदिति । इति तु स्वयं साध्यम् । अशूङ् धातुतो लटि, तत्स्थाने ते जाते, श्नुविकरणे, अनुबन्धलोपे, व्युपसर्गयोगे व्यश्नुते ॥ १ ॥

**भूमौ शेते दशग्रीवो महार्ह-शयनोचितः ।**
**नेक्षते विह्वलं मां च न मे वाचं प्रयच्छति ॥ २ ॥**

**अन्वयः**—महार्हशयनोचितः दशग्रीवः भूमौ शेते । विह्वलं मां नेक्षते, न च मे वाचं यच्छति ।

**हिन्दी**—बहुमूल्य शयन पर सोने वाले रावण पृथ्वीपर सो रहे हैं । विह्वल हुए मुझको नहीं देख रहे हैं, न मुझसे बोलते ही हैं ।

**व्याख्या**—महार्हशयनोचितः बहुमूल्यपर्यङ्कस्वापार्हः, दशग्रीवो लङ्केशः, भूमौ धरायां, शेते स्वपिति । विह्वलं विषण्णं, मां कनिष्ठभ्रातरं, नेक्षते न पश्यति । न नहि, च तथा, मे मह्यं, वाचं वचनं, यच्छति ददाति ।

**तिङन्तः**—दाण् दाने (भ्वा० अनुदात्तोदात्तेत्) । 'पाघ्रा० ७।३।७८' इति यच्छादेशः ॥ २ ॥

**विपाकोऽयं दश-ग्रीव ! संदृष्टोऽनागतो मया ।**
**त्वं तेनाऽभिहितः पथ्यं किं कोपं न नियच्छसि ॥ ३ ॥**

**अन्वयः**—हे दशग्रीव ! अनागतः अयं विपाकः मया संदृष्टः । तेन त्वं पथ्यम् अभिहितः । कोपं किं न नियच्छसि ?

**हिन्दी**—हे दशानन ! भविष्यमें होने वाले इस परिणामको मैंने खूब देखा था । इसीलिये मैंने 'सीता देनेका' हितकारी उपदेश किया था । तब आप क्रोध क्यों नहीं रोक सके ?

**व्याख्या**—हे दशग्रीव लङ्केश ! अनागतो भावी, अयम् एषः, हि, विपाकः परिणामः, मया विभीषणेन, संदृष्टः सम्यगुपलब्धः। तेन तस्मादेव कारणात्, 'सीतां मुञ्च' इति मया, पथ्यं भेषज, त्वम् भवान्, अभिहितः कथितोऽभूः। कोपं क्रोधं, किं कथं, न, नियच्छसि अपनयसि? नाहं दोषी भवानेवानुचितकारित्वाद्दोषार्ह इत्यर्थः।

**तिङन्तः**—यम उपरमे इति अपनयार्थस्य '**इषुगमियमां छः ७।३।७७**' इति छः ॥ ३ ॥

**भजन्ति विपदस् तूर्णमतिक्रामन्ति सम्पदः ।**
**तान्, मदान् नाऽवतिष्ठन्ते ये मते न्यायवादिनाम् ॥ ४ ॥**

**अन्वयः**—ये मदात् न्यायवादिनां मते नावतिष्ठन्ते, तान् तूर्णं विपदः भजन्ति, सम्पदः अतिक्रामन्ति ।

**हिन्दी**—जो घमण्डके कारण न्याय ( उचित ) करने वालोंकी रायमें नहीं ठहरते, उनको फौरन विपत्तियां घेर लेती हैं और सम्पत्तियां छोड़ जाती हैं।

**व्याख्या**—ये जनाः, मदात् गर्वात्, न्यायवादिनां समुचितोपदेष्टॄणां, मते सम्मतौ, नावतिष्ठन्ते नावधान ददति । तान् प्रमादिनः, तूर्णं द्रुतं, विपदः विपत्तयः, भजन्ति सेवन्ते । सम्पदः सम्पत्तयः, अतिक्रामन्ति त्यजन्ति ।

**तिङन्तः**—'**समवप्रविभ्यः स्थः १।३।२२**' इति तङ् । तिष्ठादेशश्च पूर्वसूत्रेण।

**अपथ्यमायतौ लोभादामनन्त्यनुजीविनः ।**
**प्रियं शृणोति यस् तेभ्यस् तमृच्छन्ति न सम्पदः ॥ ५ ॥**

**अन्वयः**—अनुजीविनः लोभात् आयतौ अपथ्यं ( तत्कालं ) प्रियम् आमनन्ति । यः ( भवादृशः ) तेभ्यः शृणोति तं सम्पदः न ऋच्छन्ति ।

**हिन्दी**—अधीनस्थ कर्मचारी तो लोभके कारण भविष्यमें अपथ्य और तत्काल प्रिय भी उपदेश कर देते हैं । मूर्खताके वशीभूत जो उन्हें सुनता है, उसे तो सम्पत्ति प्राप्त नहीं हो सकती ।

**व्याख्या**——अनुजीविनः आश्रिताः, अविवेकिनः प्रहस्तादितुल्याः, लोभात् तृष्णया, आयतौ उत्तरकाले, अपथ्यम् अनिष्टफलं, तत्कालं प्रियं चाटु, आमनन्ति उपदिशन्ति। तेभ्यः तत्सकाशात्, यः स्वामी, शृणोति अवधत्ते, तम् श्रोतारं, सम्पदः सम्पत्तयः, न ऋच्छन्ति नायान्ति।

**तिङन्तः** - ऋ गतिप्रापणयोः ( भ्वा० अनुदात्तोदात्तः )। पूर्वसूत्रेणैवच्छादेशः ॥ ५ ॥

**प्राज्ञास् तेजस्विनः सम्यक् पश्यन्ति च वदन्ति च।**
**तेऽवज्ञाता महाराज! क्लाम्यन्ति विरमन्ति च ॥ ६ ॥**

**अन्वयः**——हे महाराज! तेजस्विनः प्राज्ञाः सम्यक् पश्यन्ति, वदन्ति च (सम्यक्)। अवज्ञातास्ते क्लाम्यन्ति विरमन्ति च।

**हिन्दी**—हे महाराज! तेजस्वी बुद्धिमान् लोग ठीक ठीक देखते हैं और कहते भी ठीक हैं; पर तिरस्कृत होने पर वे दुःखी होते हैं और उपेक्षा कर देते हैं।

**व्याख्या**——हे महाराज प्रतापिन्! तेजस्विनो महौजसः, प्राज्ञाः बुद्धिमन्तः, सम्यक् साधु, पश्यन्ति शास्त्रचक्षुषा निरीक्षन्ते, च पुनः, वदन्ति उपदिशन्ति, सम्यक् तथ्यम्। (परन्तु) अवज्ञाताः तिरस्कृताः ते, क्लाम्यन्ति खिद्यन्ते, विरमन्ति विमुखाः च भवन्ति ॥ ६ ॥

**लेढि भेषज-वन् नित्यं यः पथ्यानि कटून्यपि।**
**तदर्थं सेवते चाऽऽप्तान् कदाचिन् न स सीदति ॥ ७ ॥**

**अन्वयः**——यः कटूनि अपि पथ्यानि भेषजवत् नित्यं लेढि, तदर्थम् आप्तान् सेवते। स कदाचित् न सीदति।

**हिन्दी**—जो कडुआ भी एवं हितकारी उपदेशको औषधके समान नित्य ही उपयोगमें लाता है और उसके लिये विश्वासपात्रोंकी सेवा करता है, वह कभी भी दुःख नहीं पाता है।

**व्याख्या**——यो नरः, कटूनि अप्रियाणि अपि, पथ्यानि हितकराणि, भेषजवत् औषधवत्, नित्यं प्रतिदिनं, लेढि आस्वादयति। तदर्थम् तत्कृते, आप्तान् श्रेष्ठान्, सेवते आश्रयति। स श्रोता, कदाचित् कदापि, न नहि, सीदति विनश्यति। सर्वदैव मोदत इत्यर्थः ॥ ७ ॥

**सर्वस्य जायते मानः स्व-हिताच् च प्रमाद्यति।**
**वृद्धौ भजसि चाऽपथ्यं नरो येन विनश्यति ॥ ८ ॥**

**अन्वयः**—वृद्धौ प्रायः सर्वस्य मानः जायते। स नरः स्वहितात् च प्रमाद्यति, अपथ्यं च भजते। येन स विनश्यति।

**हिन्दी**—अभ्युदयमें प्रायः सभी लोग मानी हो जाते हैं। अपने हितकारी से प्रमाद करने लगते हैं एवम् अपथ्य का सेवन करते हैं। जिससे वे मनुष्य नष्ट हो जाते हैं।

**व्याख्या**—वृद्धौ अभ्युदये, (प्रायः) सर्वस्य सकलस्य, मानो मिथ्याभिमानः, जायते उद्भवति। स नरः,स्वहितात् निजकल्याणात्, प्रमाद्यति प्रमादं करोति। अपथ्यम् अहितकरं, भजते सेवते। येन हेतुना, विनश्यति भ्रंशते ॥ ८ ॥

**द्वेष्टि प्रायो गुणेभ्यो यन् न च स्निह्यति कस्यचित्।**
**वैरायते महद्भिश् च शीयते वृद्धिमानपि ॥ ९ ॥**

**अन्वयः**—यत् ( वृद्धौ ) प्रायो गुणेभ्यो द्वेष्टि, न च कस्यचित् स्निह्यति, महद्भिश्च वैरायते। ( अतः ) वृद्धिमान् अपि शीयते।

**हिन्दी**—क्योंकि अभ्युदयमें प्रायः लोग गुणोंसे द्वेष करने लगते हैं, किसी-पर विश्वास नहीं करते, बड़ोंसे चिढ़ते हैं। इसीसे समृद्धिशाली लोग भी नष्ट हो जाते हैं ( मिथ्याभिमान बड़ी बुरी बला है )।

**व्याख्या**—यत् यस्मात् कारणात्, वृद्धौ अभ्युदये, प्रायो बाहुल्येन, (स्वामी) गुणेभ्यो वृद्धसेवित्वादिभ्यः, द्वेष्टि द्रुह्यति। कस्यचित् स्वहितेच्छोरपि, न नहि, स्निह्यति स्नेहं करोति। महद्भिः श्रेष्ठैः, वैरायते वैरं करोति। ( अतः ) वृद्धिमान् समृद्धिशाली अपि, शीयते विनश्यति।

**तिङन्तः**—'क्रुधद्रुह० १।४।३७' इति सम्प्रदानतया चतुर्थी। 'शब्दवैर० ३।१।१७' इति क्यङ्। 'शदेः शितः १।३।६०' इति तङि शीयादेशः पूर्वसूत्रेण।

**समाश्वसिमि केनाऽहं, कथं प्राणिमि दुर्-गतः।**
**लोक-त्रय-पतिर् भ्राता यस्य मे स्वपिति क्षितौ ॥ १० ॥**

**अन्वयः**—यस्य मे लोकत्रयपतिः भ्राता क्षितौ स्वपिति, सोऽहं तेन समाश्वसिमि, दुर्गतः सन् कथं प्राणिमि ?

**हिन्दी**—जिस विभीषणका मेरा भाई तीनों लोकोंका स्वामी होकर भी पृथ्वीपर सो रहा है। वही मैं कैसे धैर्य धरूँ ? दुःखी होकर कैसे जीवन धारण करूँ ?

**व्याख्या**—यस्य, मे मम विभीषणस्य, भ्राता सहोदरो रावणः, लोकत्रयपतिः त्रिलोकी स्वामी सन्नपि, क्षितौ पृथिव्यां, स्वपिति शेते, मृतः इत्यर्थः। सोऽहं, केन प्रकारेण, समाश्वसिमि शोकं त्यजामि। दुर्गतः दुखितः सन्, कथं केन प्रकारेण, प्राणिमि जीवामि।

**तिङन्तः**—'रुदादिभ्यः सार्वधातुके ७।२।७६' इत्युभयत्रापीट् ।। १० ।।

**अहो जागर्ति कृच्छ्रेषु दैवं, यद् बल-भिज्जितः ।**
**लुठ्यन्ति भूमौ क्लिद्यन्ति बान्धवा मे स्वपन्ति च ।। ११ ।।**

**अन्वयः**—अहो ! कृच्छ्रेषु दैवं जागर्ति । यत् मे भ्रातृव्यस्य भ्रातुर्वा बलभिज्जितो बान्धवाः भूमौ लुठ्यन्ति क्लिद्यन्ति स्वपन्ति च ।

**हिन्दी**–देखो ! दैव विपत्तिमें भी जागता रहता है । तभी तो मेरे भतीजेके या भाईके (जिसने इन्द्रको भी जीत लिया था) बान्धव सब पृथ्वीपर लुढ़क रहे हैं, छटपटाते हैं, कष्ट पा रहे हैं, तथा मरकर सो रहे हैं ।

**व्याख्या**–अहो इत्याश्चर्ये, कृच्छ्रेषु सङ्कटेषु, दैवं दुर्भाग्यं, जागर्ति उद्योतते । यत् यस्मात् कारणात्, इन्द्रजितः पराजितशक्रस्य, मे मम, भ्रातृजस्य भ्रातुर्वा, बान्धवाः बन्धवः कुटुम्बिनः, भूमौ धरायां, लुठ्यन्ति रुठ्यन्ति । क्लिद्यन्ति क्लिश्यन्ति । स्वपन्ति शेरते । मृता इति शेषः ।

**तिङन्तः**—जागृ निद्राक्षये ( अ० उदात्तोदात्तेत् ) । लुठ, रुठ लोठने ( दि० उदात्तोदात्तेत् ) ।। ११ ।।

**शिवाः कुष्णन्ति मांसानि, भूमिः पिबति शोणितम् ।**
**दशग्रीव-सनाभीनां समदन्त्यामिषं खगाः ।। १२ ।।**

**अन्वयः**—शिवाः दशग्रीव-सनाभीनां मांसानि कुष्णन्ति । भूमिः शोणितम् पिबति । खगाः आमिषम् अश्नन्ति ।

**हिन्दी**—सियारिनें रावणके बन्धुओंके मांसको नोच रही हैं । पृथ्वी खून पी रही है । पक्षी आमिष-खाद्य ( वसा-चर्बी आदि ) खा रहे हैं ।

**व्याख्या**–शिवाः फेरवः,दशग्रीव-सनाभीना रावणबन्धूनां,मांसानि क्रव्याणि, कुष्णन्ति आकृषन्ति । भूमिः पृथ्वी, शोणितं रक्तं, पिबति । खगाः पक्षिणः गृध्रादयः, आमिषम् शिवाविसृष्टं–वसाप्रभृति, समदन्ति भक्षयन्ति ।

**तिङन्तः**—कुष निष्कर्षे ( क्र्या० उदात्तोदात्तेत् ) । पा पाने ( भ्वा० अनुदात्तोदात्तः ) । पिबादेशः ।। १२ ।।

**येन पूत-क्रतोर् मूर्ध्नि स्थीयते स्म महाऽऽहवे ।**
**तस्याऽपीन्द्रजितो दैवाद् ध्वाङ्क्षैः शिरसि लीयते ।। १३ ।।**

**अन्वयः**—येन महाहवे पूतक्रतोः मूर्ध्नि स्थीयते स्म । तस्य इन्द्रजितोऽपि शिरसि दैवात् ध्वाङ्क्षैः लीयते ।

**हिन्दी**—जो बड़े-बड़े संग्रामोंमें इन्द्रके सिरपर बैठता था। अर्थात् उसको जीत लेता था। आज उसके भी सिर पर कौए बैठ रहे हैं।

**व्याख्या**—येन इन्द्रजिता, महाहवे बृहति संग्रामे, पूतक्रतोः शक्रस्य, मूर्ध्नि शिरसि, स्थीयते स्म येन स विजितो भवति स्मेत्यर्थः। तस्यैवेन्द्रजितो मेघनादस्य रावणस्य वा, शिरसि मूर्ध्नि, काकैः वायसैर्लीयते स्वच्छन्दमुपविश्यते मृतत्वात्। ( ध्वनिपूर्णं पद्यम् ) ॥ १३ ॥

**स्वर्भानुर् भास्करं ग्रस्तं निष्ठीवति कृताऽऽह्निकः।**
**अभ्युपैति पुनर् भूतिं राम-ग्रस्तो न कश्चन ॥ १४ ॥**

**अन्वयः**—स्वर्भानुः ग्रस्तं भास्करं कृताह्निकः सन् निष्ठीवति। रामग्रस्तः कश्चन पुनः विभूतिं न अभ्युपैति।

**हिन्दी**—राहु सूर्य को ग्रास करके पुनः मुखसे निकालकर बाहर कर देता है। किन्तु रामके द्वारा ग्रसा गया कोई भी पुनः अपनी विभूति नहीं पा सकता।

**व्याख्या**—स्वर्भानुः राहुः, ग्रस्तं निगीर्णं, भास्करं सूर्यं, कृताह्निकः कृताहारः, निष्ठीवति स्वमुखान्निरस्यति। रामग्रस्तः राघवाभिभूतः, पुनर्भूयः, विभूतिं सम्पत्तिं, कश्चन कोऽपि, न नहि, अभ्युपैति प्राप्नोति ॥ १४ ॥

**त्वमजानन्निदं राजन्नीडिषे स्म स्व-विक्रमम्।**
**दातुं नेच्छसि सीतां स्म, विषयाणां च नेशिषे ॥ १५ ॥**

**अन्वयः**—हे राजन् ! त्वम् इदम् अजानन् स्वविक्रमम् ईडिषे स्म। सीतां दातुं नेच्छसि स्म। विषयाणां च न ईशिषे स्म।

**हिन्दी**—हे राजन् ! आप इस स्थितिको न जानते हुए अपने पराक्रम की स्तुति करते रहे। सीताको देना नहीं चाहते थे। आपका विषयोंपर स्वामित्व नहीं था।

**व्याख्या**—हे राजन् लङ्केश ! त्वम् भवान्, इदं यथोचितम्, अजानन् अबुध्यमानः, स्वविक्रमं निजपराक्रमम्, ईडिषे स्म स्तौति स्म। सीतां जानकीं, दातुं परावर्तयितुं, न नहि, इच्छसि स्म अभिलषितवान्। विषयाणाम् इन्द्रियभोगाणां, न ईशिषे स्म, विषयान्न जितवानसीत्यर्थः। यदि त्वमीदृशो न स्यास्तर्हि नेयं दशा स्यादित्यर्थः।

**तिङन्तः**—'ईशः से ७।२।७७', 'ईड–जनोर्ध्वे च ७८' इत्येताभ्यामुभयत्रेट्। 'अधीगर्थ० २।३।५२' इति विषयाणामित्यत्र षष्ठी। सर्वत्रैव 'अपरोक्षे च ३।२।११९' लट् ॥ १५ ॥

**मन्त्रे जातु वदन्त्यज्ञास्, त्वं तानप्यनुमन्यसे ।**
**कथं नाम भवांस् तत्र नाऽवैति हितमात्मनः ।। १६ ।।**

**अन्वयः**—मन्त्रे अज्ञाः जातु वदन्ति ? त्वं तान् अपि अनुमन्यसे । भवान् कथं नाम तत्र आत्मनो हितं न अवैति ।

**हिन्दी**–भला मन्त्रणा करते समय मूर्ख भी बोल सकते हैं ? आप तो उनका भी अनुमोदन करते थे । आप ऐसी जगह पर अपना हित कैसे न देखते थे ?

**व्याख्या**––मन्त्रे राज्ञां परामर्शसमये, अज्ञाः राजनीतिज्ञानशून्याः, जातु कदाचित्, वदन्ति निजपरामर्शं ददति ? नैव ददतीति काकुः (गर्हितमेतत्)। त्वं तु, तान् अज्ञान्. अपि, अनुमन्यसे वदितुम् अवसरं ददासि । अतिगर्हितमेतत् । भवान् नीतिज्ञः श्रेष्ठः सन्नपि, कथं नाम इति सम्भावयामि, आत्मनः स्वस्य, हितम् अभीष्टं, न नहि, अवैति जानाति ।

**तिङन्तः**—'**गर्हायां लडपिजात्वोः** ३।३।१४२' इति अपि-जात्वोरुपपदयोः कालसामान्ये लट् । '**विभाषा कथमि लिङ् च** ३।३।१४३' इति कथं शब्दे उपपदे चाद् गर्हायो लट् । यथा तत्र भवान् पूज्यः तथैवात्र भवानपि इति पूज्येऽर्थे '**इतराभ्योऽपि दृश्यते** ५।३।१४' इति भवदादियोगे प्रथमान्तात् त्रल् ।। १६ ।।

**अ–पृष्टो नु ब्रवीति त्वां मन्त्रे मातामहो हितम् ।**
**न करोमीति पौलस्त्य ! तदा मोहात् त्वमुक्तवान् ।। १७ ।।**

**अन्वयः**—हे पौलस्त्य ! अपृष्टो मातामहो मन्त्रे त्वां हितं नु ब्रवीति । तदा मोहात् त्वम् 'न करोमि' इति उक्तवान् ( गर्हितमेतदपि )।

**हिन्दी**––हे पुलस्तवंशोत्पन्न रावण ! बिना पूछे ही नानाजी (माल्यवान्)-ने सलाह करते समय आपको हित उपदेश किया था । पूछनेपर उस समय आपने 'नहीं करूँगा' ऐसा उत्तर दिया था ( यह गर्हित काम था )।

**व्याख्या**— हे पौलस्य पुलस्तवंशोद्भव ! (किमस्मिन् काले युज्यते इति) मन्त्रे मन्त्रणासमये,अपृष्ट एव मातामहोऽस्माकं माल्यवान् महाराजनीतिज्ञः,हितं कल्याणकरं नु, ब्रवीति उक्तवान् । 'त्वं हितं मदुपदिष्टमकार्षीः' इति पृष्टः,तेन माल्यवता, तदा तस्मिन् काले,'न करोमि' इति, मोहात् अज्ञानात्,उक्तवान् । गर्हितमिदम् ।

**तिङन्तः**––अत्र नु-शब्दे न-शब्दे चोपपदे '**ननौ पृष्टप्रतिवचने** ३।२।१२०' इति भूतेऽर्थे '**नन्वोर्विभाषा** ३।२।१२१' इति विभाषा लट् ।। १७ ।।

**त्वं स्म वेत्थ महाराज ! यत् स्माऽऽह न विभीषणः ।**
**पुरा त्यजसि यत् क्रुद्धो मां निराकृत्य संसदि ।। १८ ।।**

**हिन्दी**—हे महाराज ! विभीषणः यत् आह स्म तत् त्वं न वेत्थ। यत् क्रुद्धः सन् मां संसदि निराकृत्य पुरा त्यजसि।

**अन्वयः**—हे महाराज ! विभीषणने जो कहा, उसे आपने समझा नहीं। क्योंकि क्रुद्ध होकर आपने सभामें अपमान ( लात मारकर ) कर मुझे निकाल दिया।

**व्याख्या**—हे महाराज लङ्केश ! विभीषणस्ते भ्राता, यत् हितम्, आह स्म ब्रवीति स्म, तत् वाक्यं, त्वम्, न नहि, वेत्थ जानासि स्म। यत् यस्मात् कारणात्, क्रुद्धः कुपितस्त्वं, मां विभीषणम्, संसदि सभायां, निराकृत्य पादप्रहारेण तिरस्कृत्य, पुरा पूर्वं, त्यजसि त्यक्तवान्।

**तिङन्तः**—आह वेत्थेत्यत्रोभयत्रापि **'अपरोक्षे च ३।२।११९'** इति लट्। तत्र **'विदो लटो वा ३।४।८३'** इति सिपस्थादेशः। **'ब्रुवः पञ्चानामादित आहो ब्रुवः ३।४।८४'** इति चाहादेशश्च। त्यजसीत्यत्र **'पुरि लुङ् चास्मे ३।२।१२२'** चाल्लट्।

**हविर् जक्षिति निःशङ्को मखेषु मघवानसौ।**
**प्रवाति स्वेच्छया वायुरुद्गच्छति च भास्करः ॥ १९ ॥**

**अन्वयः**—असौ मघवान् मखेषु निःशङ्कः हविः जक्षिति। वायुः स्वेच्छया प्रवाति। भास्करः च स्वेच्छया उद्गच्छति।

**हिन्दी**—( जो काँपता रहता था ) वही इन्द्र निःशङ्क होकर यज्ञोंमें हविष्यान्न खाता है। वायु स्वेच्छासे बहता है तथा सूर्य भी स्वेच्छासे उगता है।

**व्याख्या**—सदा त्वद्भयात्कम्पमानोऽसौ प्रसिद्धः, मघवान् इन्द्रः, मखेषु यागेषु, ( सम्प्रति ) निःशङ्कः निर्भयः, हविः हविष्यान्नम्, जक्षिति अत्ति। वायुः मरुत्, स्वेच्छया स्वच्छन्दतः, वाति गच्छति। भास्करः सूर्यः च, स्वेच्छयैव स्वातन्त्र्येण, उद्गच्छति उदितो भवति।

**तिङन्तः**—**'रुदादिभ्यः ७।२।७६'** इतीट्। **'मघवा बहुलम् ६।४।१२८'** इति त्रादेशः ॥ १९ ॥

**धनानामीशते यक्षा यमो दाम्यति राक्षसान्।**
**तनोति वरुणः पाशमिन्दुनोदीयतेऽधुना ॥ २० ॥**

**अन्वयः**—यक्षाः अधुना धनानाम् ईशते। यमोऽधुना राक्षसान् दाम्यति। वरुणोऽधुना पाशं तनोति। अधुना इन्दुना स्वभावेन उदीयते ( स तु सर्वदात्र लङ्कायाम् पूर्ण एवोदेति स्म )।

**हिन्दी**–यक्ष लोग अब धनके स्वामी बन बैठे हैं। यम अब राक्षसोंका दमन करने लगा है। वरुण अब पाश फैलाने लगा है। चन्द्रमा अब क्रमशः एक कला दो कला क्रमसे उगने लगा है (पहले तो पूर्ण कलासे ही प्रतिदिन उगता था)।

**व्याख्या**—यक्षाः इलविलादेवी-वंशीयाः, अधुना साम्प्रतम्, धनानां द्रव्याणाम्, ईशते समर्थाः स्वामिनः सन्ति। यमः कृतान्तोऽधुना, राक्षसान् यातुधानान्, दास्यति वशीकरोति। वरुणः प्रचेताः, पाशं स्वास्त्रं, तनोति विस्तारयति। इन्दुना शशिनाऽधुनोदीयते यथाक्रमं वृद्धिक्षयावनुभवताकाशे समीयते।

**तिङन्तः**—ईश ऐश्वर्ये (अ० उदात्तोऽनुदात्तेत्)। 'ईशः से ७।२।७७' इतीट्। पूर्वं १५ पद्येऽपि गतः। **'अधीगर्थदयेशां कर्मणि २।३।५२'** इति षष्ठी ॥ २० ॥

**शाम्यत्यृतु-समाहारस्, तपस्यन्ति वनौकसः।**
**नो नमस्यन्ति ते बन्धून्, वरिवस्यन्ति नाऽमराः ॥ २१ ॥**

**अन्वयः**—ऋतुसमाहारः शाम्यति। वनौकसः तपस्यन्ति। ते (तव) बन्धून् नो नमस्यन्ति। अमरा अपि ते बन्धून् न वरिवस्यन्ति।

**हिन्दी**—ऋतुओंका समाहार शान्त है अर्थात् सब ऋतु अब एक ही समय नहीं हो रहे हैं। तपस्वी लोग अब तपस्या करने लगे हैं। तुम्हारे बन्धुओंको नमस्कार नहीं करते है। देवता लोग भी तुम्हारे बन्धुओंको नहीं पूजा करते।

**व्याख्या**—(अधुना त्वयि उपरते) ऋतुसमाहारः ऋतूनां सम्भूयावस्थानम्, शाम्यति अपैति। एकस्मिन्नेव काले सर्वे ऋतवो न भवन्ति। रावणसमक्षे सर्वेऽपि षड् ऋतव एकदैव भवन्ति स्म। वनौकसस्तपस्विनः, तपस्यन्ति तपश्चरन्ति। ते तव, बन्धून् कुटुम्बान्, न नहि, नमस्यन्ति प्रणमन्ति। अमराः देवाः च, ते तव, बन्धून्, न नहि, वरिवस्यन्ति पूजयन्ति। पूर्वं तव समक्षे ऋषयो गोत्रजान्, नमन्ति स्म, देवाः पूजयन्ति स्म, तव बन्धूनित्यर्थः।

**तिङन्तः**—**'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः ३।१।१५'** 'तपसः परस्मैपदं च' इति क्यङ्। **'नमो वरिवश्चित्रङः क्यच् ३।१।१९'** इति क्यच् ॥ २१ ॥

**श्रीर् निष्कुष्यति लङ्कायां, विरज्यन्ति समृद्धयः।**
**न वेद तन्, न यस्याऽस्ति मृते त्वयि विपर्ययः ॥ २२ ॥**

**अन्वयः**—अधुना श्रीः लङ्कायां निष्कुष्यति। समृद्धयः विरज्यन्ति। अहं तत् न वेद, यस्य विपर्ययः त्वयि मृते नास्ति।

**हिन्दी**—आज लक्ष्मी लङ्कामें रूठकर बैठी है। समृद्धियोंको विराग हो गया

है। मैं ऐसी कोई वस्तु नहीं जानता, जो तुम्हारे मर जाने पर न बदल गयी हो। सभी उलटे चल रहे हैं।

**व्याख्या**–अद्यत्वे, श्रीः लक्ष्मीः, लङ्कायां हैम्यां पुर्यां, निष्कुष्यति निष्कुष्यते वा। स्वयमेव रुष्टा तिष्ठति। समृद्धयः सम्पत्तयः, विरज्यन्ति अपरक्ता जाताः सन्ति। अहं विभीषणः, तद् वस्तु, न नहि, वेद वेद्मि, यस्य वस्तुनः, विपर्ययः वैपरीत्यं, त्वयि रावणे, मृते पञ्चत्वमिते, नास्ति न विद्यते।

**तिङन्तः**–कुष रोषे, रञ्ज रागे इत्येतयोः कर्मकर्तरि '**कुषिरञ्जोः प्राचां श्यन् परस्मैपदं च** ३।१।९०' इति श्यनि उभयं साधु। विदो रूपं पूर्वमुक्तम् १८ पद्ये।

**शक्तिं संस्वजतेऽशक्रो, गोपायति हरिः श्रियम्।**
**देव-वन्द्यः प्रमोदन्ते, चित्रीयन्ते घनोदयाः॥ २३॥**

**अन्वयः**—शक्रः शक्तिं संस्वजते। हरिः श्रियं गोपायति। देववन्द्यः प्रमोदन्ते। घनोदयाः चित्रीयन्ते।

**हिन्दी**–इन्द्र अपनी शक्तिका प्रयोग करने लगा है। विष्णु अपनी लक्ष्मीकी रक्षा करने लगे हैं। बन्दी देवगण प्रसन्न हो गये हैं। मेघ चित्र-विचित्र दीखने लगे हैं।

**व्याख्या**—शक्र इन्द्रः, शक्तिं स्वप्रहरणं, संस्वजते गृह्णाति। हरिः विष्णुः, श्रियं लक्ष्मीं, गोपायति रक्षति। देववन्द्यः कारागारनिरुद्धा देवाः, प्रमोदन्ते हृष्यन्ति। घनोदयाः मेघोद्गमाः, चित्रीयन्ते नानारूपेणाद्भुतायन्ते।

**तिङन्तः**–'**दंशसञ्जस्वञ्जां शपि** ६।४।२५' इति नलोपः। '**गुपूधूपविच्छि०** ३।१।२८' इत्यायः प्रत्ययः॥ २३॥

देवस्वातन्त्र्यवर्णनेन निजशोकमुद्दीपयति विभीषणो विशेषेण त्रिभिः पद्यैः–

**बिभ्रत्यस्त्राणि साऽमर्षा रण-काम्यन्ति चाऽमराः।**
**चकासति च, मांसाऽदां तथा रन्ध्रेषु जाग्रति॥ २४॥**
**चञ्चूर्यन्तेऽभितो लङ्कामस्मांश् चाऽप्यतिशेरते।**
**भूमयन्ति स्वसामर्थ्यं, कीर्तिं नः क्नयन्ति च॥ २५॥**
**दिशो व्यश्नुवते दृप्तास् त्वत्-कृतां जहति स्थितिम्।**
**क्षोदयन्ति च नः क्षुद्रा हसन्ति त्वां विपद्-गतम्॥ २६॥**

**अन्वयः**—सामर्षा अमरा अस्त्राणि बिभ्रति, रणकाम्यन्ति, चकासति च। तथा मांसादां रन्ध्रेषु जाग्रति। लङ्कामभितः चञ्चूर्यन्ते। अस्मान् अपि अतिशेरते।

स्वसामर्थ्यं भूमयन्ति । नः कीर्तिं च कनयन्ति । दृप्ताः सन्तो दिशो व्यश्नुवते । त्वत्कृतां स्थितिं जहति । क्षुद्रास्ते नः क्षोदयन्ति, विपद्गतं त्वां हसन्ति च ।

**हिन्दी**—देवगण क्रुद्ध होकर अस्त्र धारण कर रहे हैं। युद्ध करना चाहते हैं। चमकने लगे हैं। राक्षसोंकी विपत्तिमें सजग हो रहे हैं। लङ्काके बाहर भीतर बुरी निगाह से घूम रहे हैं। हमलोगोंसे भी बढ़ते जा रहे हैं। अपने सामर्थ्यको बढ़ा रहे हैं। हम लोगोंकी कीर्तिको घटा रहे हैं। उद्धत होकर दिशाओंमें फैल रहे हैं। तुम्हारी बाँधी मर्यादाको तोड़ रहे हैं। स्वयं क्षुद्र, वे सब हमलोगोंको क्षुद्र बना रहे हैं। विपत्तिमें पड़े तुम्हारा उपहास कर रहे हैं।

**व्याख्या**—सामर्षाः सकोपाः, अमराः देवाः, अस्त्राणि प्रहरणानि, बिभ्रति धारयन्ति । रण-काम्यन्ति युयुत्सन्ते । चकासति दीप्यन्ते च । मांसादां रक्षसां, रन्ध्रेषु छिद्रेषु, जाग्रति समवदधति । लङ्काम् पुरीम्, अभितः बाह्यतः आभ्यन्तरतश्च, चञ्चूर्यन्ते गर्हितं चरन्ति । अस्मान् नः, अतिशेरते अतिक्रामन्ति । स्वसामर्थ्यं निजशक्तिं, भूमयन्ति वर्द्धयन्ति । नः अस्माकं, कीर्तिं यशः, कनयन्ति अल्पां कुर्वन्ति । दृप्ताः गर्विताः सन्तः, दिशः ककुभः, व्यश्नुवते व्याप्नुवन्ति । त्वत्कृतां त्वया स्थापितां, स्थितिं मर्य्यादां, जहति त्यजन्ति । क्षुद्राः तुच्छास्ते, नः अस्मानपि, क्षोदयन्ति क्षुद्रान् कुर्वन्ति । विपद्गतं विपन्नं, त्वां रावणं, हसन्ति उपहसन्ति ।

**तिङन्तः**—मांसानि अदन्ति इति मांसादः तेषाम् । **'अदोऽनन्ने ३।२।६८'** इति विट् । **'लुपसद० ३।१।२४'** इति भावगर्हायां यङ् । **'चरफलोश्च ७।४।८७'** इति नुकि **'उत्परस्यातः ८८'** इत्युत्वं च । बहूनां भाव इत्यर्थे **'पृथ्वादिभ्य इमनिच् ५।१।१२२'** इति इमनिचि **'बहोर्लोपो भू च बहोः ६।४।१५८'** इति भूमानं कुर्वन्तीत्यर्थे णिचि टिलोपे **'युवाल्पयोः कनन्यतरस्याम् ५।३।६४'** इति कनादेशश्च । **'स्थूलदूरक्षुद्रक्षिप्र० ६४।१५६'** इति णिजादिकार्यम् यथाप्राप्तं ज्ञेयम् ॥२४–२६॥

**शमं शमं नभस्वन्तः पुनन्ति परितो जगत् ।**
**उज्जिहीषे महाराज ! त्वं प्रशान्तो न किं पुनः ॥ २७ ॥**

**अन्वयः**—नभस्वन्तः शमं शमं परितः जगत् पुनन्ति । हे महाराज ! प्रशान्तः त्वं किं न पुनः उज्जिहीषे ?

**हिन्दी**—वायुदेव शान्त हो-हो करके फिर बह कर जगत्को पवित्र करते हैं। हे महाराज ! आप भी शान्त होकर पुनः क्यों नहीं उठते हैं ?

**व्याख्या**—नभस्वन्तः वायवः, शमं शमं शान्ता भवन्तः अपि, परितः सर्वतः,

जगत् संसारं, पुनन्ति पवित्रयन्ति। हे महाराज लङ्केश ! त्वमपि, प्रशान्तः मृतः सन्, किं कथं, न नहि, पुनः अनन्तरम्, उज्जिहीषे जीवसि।

**कृत्तिङन्तौ**—शमु उपरमे दैवादिकात् '**आभीक्ष्ण्ये णमुल् ३।४।२२**' इति णमुलि '**नोदात्तोपदेशस्य मान्तस्यानाचमेः ७।३।३४**' इति वृद्धेरभावः। ओहाङ् गतौ इति जुहोत्यादिस्थस्य '**भृञामित् ७।४।७६**' इतीत्वे '**ई हल्यघोः ६।४।११३**' इति धातोरीत्वम्॥ २७॥

**प्रोर्णोति शोकस् चित्तं मे, सत्त्वं संशाम्यतीव मे।**
**प्रमार्ष्टि दुःखमालोकं, मुञ्चाम्यूर्जं त्वया विना॥ २८॥**

**अन्वयः**—हे महाराज ! त्वया विना शोकः मे चित्तं प्रोर्णोति, मे सत्त्वं संशाम्यति इव। दुःखम् आलोकं प्रमार्ष्टि। अहम् ऊर्जं मुञ्चामि।

**हिन्दी**—हे महाराज ! आपके बिना शोक मेरे चित्तको ढक रहा है। मेरा ओज शान्त होता जाता है। दुःख मेरे ज्ञानको दूर कर रहा है। मैं अपने तेजको छोड़ता जा रहा हूँ।

**व्याख्या**—हे महाराज! त्वया रावणेन, विना रहितः, मे मम, शोको मन्युः, चित्तं मनः, प्रोर्णोति आच्छादयति। मे मम, सत्त्वम् ओजः, संशाम्यति अपगच्छति, इव मन्ये। दुःखं त्वद्विरहजं कष्टम्, आलोकं प्रज्ञानं, प्रमार्ष्टि अपाकरोति। अहम् विभीषणः, ऊर्जं बलम्, मुञ्चामि त्यजामि ?

**तिङन्तः**—मृजूष् शुद्धौ (अ० उदात्तोदात्तेत्)। '**मृजेर्वृद्धिः ७।२।११४**' इति वृद्धिः। '**ऊर्णोतेर्विभाषा ७।३।९०**' इति वृद्ध्यभावे रूपम्—प्रोर्णोति॥ २८॥

**केन संविद्रते नाऽन्यस् त्वत्तो बान्धव-वत्सलः।**
**विरौमि शून्ये, प्रोर्णौमि कथं मन्यु-समुद्भवम्॥ २९॥**

**अन्वयः**—हे महाराज ! त्वत्तः अन्यः बान्धववत्सलः न इति केन संविद्रते। अहम् शून्ये विरौमि। मन्यु-समुद्भवम् कथं प्रोर्णौमि ?

**हिन्दी**—हे महाराज ! तुम्हारे सिवाय बान्धवोंको प्रेम करनेवाला दूसरा नहीं है, यह कौन नहीं जानता है ? मैं तो शून्य में रो रहा हूँ। शोकके वेगको मैं कैसे रोकूँ ?

**व्याख्या**—हे महाराज ! त्वत्तोऽन्योऽपरः, बान्धववत्सलः बन्धुप्रेमकर्ता, न नास्तीति, के जनाः, न नहि, संविद्रते जानन्ति। अहं विभीषणः, शून्येऽरण्ये, विरौमि रोदिमि। अहम् मन्युसमुद्भवम् शोकोद्वेगम्, कथं केन प्रकारेण, प्रोर्णौमि आच्छादयामि।

**तिङन्तः**——‘**समो गम्यृ०** १।३।२९’ इति तङ् । ‘**वेत्तेर्विभाषा** ७।१।७’ इति रुट् । ‘**ऊर्णोतेर्विभाषा** ७।३।९०’ इति वा वृद्धिः ॥ २९ ॥

**रोदिम्यनाथमात्मानं बन्धुना रहितस् त्वया ।**
**प्रमाणं नोपकाराणामवगच्छामि यस्य ते ॥ ३० ॥**

**अन्वयः**—त्वया बन्धुना रहितोऽहम् अनाथम् आत्मानम् रोदिमि । यस्य ते उपकाराणां प्रमाणं नावगच्छामि ।

**हिन्दी**——हे महाराज ! आप ऐसे बन्धुसे विरहित होकर मैं अपनेको अनाथ जानकर रो रहा हूँ और आपके उपकारोंकी सीमा तो मैं देखता ही नहीं हूँ ।

**व्याख्या**–हे महाराज ! त्वया रावणेन, बन्धुना भ्रात्रा, रहितो वर्जितोऽहम्, अनाथम् अस्वामिकं, आत्मानं स्वम्, रोदिमि विलपामि । यस्य, ते तव, उपकाराणाम् साधुव्यवहाराणाम्, प्रमाणम् इयत्तां, नावगच्छामि न वेद्मि ॥३०॥

**नेदानीं शक्रयक्षेन्द्रौ बिभीतो, न दरिद्रितः ।**
**न गर्वं जहितो दृप्तौ न क्लिश्नीतो दशाऽऽनन ॥ ३१ ॥**

**अन्वयः**——हे दशानन ! इदानीं शक्रयक्षेन्द्रौ न बिभीतः, न दरिद्रितः । दृप्तौ गर्वं न जहितः, नापि क्लिश्नीतः ।

**हिन्दी**——हे दशानन ! इस समय इन्द्र और कुबेर न डरते हैं, न दरिद्र ही बने रहते हैं । उद्धत होकर घमण्ड भी नहीं छोड़ रहे हैं और न क्लेशित ही हो रहे हैं ।

**व्याख्या**–(अद्यत्वे) हे दशानन ! शक्रयक्षेन्द्रौ इन्द्रकुबेरौ, न नहि, बिभीतः त्रस्यतः । न नहि, दरिद्रितः अनुकम्प्यौ भवतः । दृप्तौ धृष्टौ, न नहि, गर्वं स्वाभिमानं, जहितः त्यजतः । नापि नैव, क्लिश्नीतः क्लेशमावहतः ( त्वयि मृते सुखं स्वपितः इत्यर्थः ) ।

**तिङन्तः**——‘**भियोऽन्यतरस्याम्** ६।४।११५’ इति इत्वाभावपक्षे रूपम् । ‘**इद् दरिद्रस्य** ६।४।११४’ इतीत्वम् । ‘**जहातेश्च** ६।४।११६’ इति पाक्षिकम् इत्वम् । क्लिश्नीतः इत्यत्र तु ‘**ई हल्यघोः** ६।४।११३’ इतीत्वम् ॥ ३१ ॥

**त्वयाऽपि नाम रहिताः कार्याणि तनुमो वयम् ।**
**कुर्मश् च जीविते बुद्धि, धिक् तृष्णां कृत-नाशिनीम् ॥ ३२ ॥**

**अन्वयः**——हे दशानन ! त्वया अपि रहिता नाम वयम् कार्याणि तनुमः, जीविते बुद्धि कुर्मः ? हा कृतनाशिनीं तृष्णां धिक् ?

**हिन्दी**——हे रावण ! आपके विना भी रहकर हमलोग कार्य कर रहे हैं । जीनेकी बुद्धि रखते हैं । इस कृतघ्न तृष्णाको धिक्कार है ।

**व्याख्या**—हे दशानन ! त्वया भवता, रहिता वर्जिता अपि, नाम प्रसिद्धौ, वयम् विभीषणादयः,कार्याणि कृत्यानि, तनुमोऽनुतिष्ठामः। जीविते प्राणने, बुद्धि र्मति, कुर्मः वरामः । हा ! कृतनाशिनीं कृतघ्नां, तृष्णां लोभं, धिक् गर्हितम् ।

**तिङन्तः**—'गर्हायां लडपि जात्वोः ३।३।१४२' इति गर्हेर्थे भविष्यति लट्।।३२।।

**तृणेह्मि देहमात्मीयं, त्वं वाचं न ददासि चेत् ।**
**द्राघयन्ति हि मे शोकं स्मर्यमाणा गुणास् तव ।। ३३ ।।**

**अन्वयः**—हे दशानन ! त्वं वाचं न ददासि चेत् आत्मीयं देहं तृणेह्मि । तव स्मर्यमाणाः गुणाः मे शोकं द्राघयन्ति हि ।

**हिन्दी**—हे रावण ! यदि तुम मेरा उत्तर नहीं देते हो तो मैं अपनी देह-को नष्ट कर डालता हूँ । तुम्हारे गुण ( स्मरणमें आकर ) याद आ-आकर मेरे शोकको बढ़ाते जाते हैं ।

**व्याख्या**--हे दशानन ! त्वं, वाचं न ददासि=प्रत्युत्तरं न यच्छसि चेत्, तदाऽहम्, आत्मीयं, देहं कायं, तृणेह्मि हिनस्मि । तव भवतः, स्मर्यमाणाः स्मृतिमुपगताः, गुणाः दाक्षिण्यादयः, मे मम, शोकं दैन्यं, द्राघयन्ति वर्द्धयन्ति ।

**तिङन्तः**--'तृणह इम् ७।३।९२' इति इम् । दीर्घशब्दाण्णौ '**प्रियस्थिर०** ६।४।१५७' इति द्राघादेशः द्राघयन्ति ।। ३३ ।।

**उन्मुच्य स्रजमात्मीयां मां स्रजयति कोऽहसन् ।**
**नेदयत्यासनं को मे, कर्हि मे वदति प्रियम् ।। ३४ ।।**

**अन्वयः**—हसन् कः आत्मीयां स्रजम् उन्मुच्य मां स्रजयति ? कः मे आसनम् नेदयति ? कर्हि मे कः प्रियं वदति ?

**हिन्दी**—हँसते हुए अपनी माला निकालकर कौन मुझे पहनावेगा ? कौन मेरे आसनको दूर से पार्श्वमें खींच लेगा ? कब कौन मुझे प्रिय बातें कहेगा ?

**व्याख्या**—हसन् स्मयमानः, कः अन्यः, आत्मीयां निजां, स्रजं पुष्पमालाम्, उन्मुच्य कण्ठात् अपनीय, मां विभीषणं, स्रजयति स्रग्विणं करोति । कोऽपरः, मे मम, आसनम् पीठम्, नेदयति दूरादाकृष्य स्वपार्श्वमानेष्यति । कर्हि कदा, मे मम, प्रियं श्लाघ्यं वाक्यं, कोऽपरः, त्वां विना, वदति निगदति ।

**तिङन्तः**--स्रग्विन् शब्दात् णाविष्ठवद्भावाद् '**विन्मतोर्लुक्** ५।३।६५' इति विनो लुकि '**प्रकृत्यैकाच्** ६।४।१६३' इति टिलोपाभावः । '**अन्तिकबाढयोः०** ५।३।६३' इति नेदादेशः । '**विभाषा कदाकर्ह्योः** ३।३।५' इति भविष्यति लट् कर्हियोगे ।। ३४ ।।

न गच्छामि पुरा लङ्कामायुर् यावद् दधाम्यहम् ।
कदा भवति मे प्रीतिस्, त्वां पश्यामि न चेदहम् ।। ३५ ।।

**अन्वयः**—अहं यावद् आयुर्दधामि लङ्कां पुरा न गच्छामि । त्वां चेत् अहं श्यामि कदा मे प्रीतिः भवति ।

**हिन्दी**—मैं जब तक जीऊँगा तबतक लङ्कामें नहीं जाऊँगा । यदि मैं ापको नहीं देखूँगा तो मुझे कहाँ कब प्रीति हो सकेगी ?

**व्याख्या**—अहं विभीषणः, यावत् कालम्, आयुः जीवनं, दधामि धारयिष्यामि, तावत्कालं लङ्कां हेमपुरीं, न नहि, पुरा गच्छामि गमिष्यामि । त्वां रावणं, चेद् यदि, अहं, न नहि, पश्यामि द्रक्ष्यामि, कदा कर्हि, मे मम, प्रीतिः प्रणयः, भवति भविष्यति ।

**तिङन्तः**–**'यावत्पुरानिपातयोर्लट्** ३।३।४' इति भविष्यति लट् । **'विभाषा कदाकर्ह्योः** ३।३।५' इति भविष्यति लट् ।। ३५ ।।

ऊर्ध्वं म्रिये मुहूर्ताद्धि विह्वलः क्षतबान्धवः ।
मन्त्रे स्म हितमाख्यामि, न करोमि तवाऽप्रियम् ।। ३६ ।।

**अन्वयः**—क्षतबान्धवः विह्वलः अहं मुहूर्तात् ऊर्ध्वं हि म्रिये । मन्त्रे हितम् आख्यामि स्म । पृष्टः तव अप्रिय न करोमि, ममाप्रियं मा कार्षीरिति ।

**हिन्दी**—बन्धुगण के मारे जाने पर विह्वल होता हुआ मैं एक मुहूर्त के बाद ही मर जाऊँगा । सलाह करते समय मैंने हितकारी उपदेश किया था । पूछनेपर मैंने कभी आपका अप्रिय नहीं किया है,अतः आप भी मेरा अप्रिय न करें।

**व्याख्या**–क्षतबान्धवः नष्टबन्धुः,विह्वलः गतधैर्यः,अहम् विभीषणः, मुहूर्तात् ऊर्ध्वम् उपरि, म्रिये मरिष्यामि । मन्त्रे मन्त्रविषये, हितं कल्याणम्, आख्यामि स्म कथयामि स्म । पृष्टः मम प्रियं किमिति, तव अप्रियं न करोमि नैव कृतवानस्मि।

**तिङन्तः**—'**लिङ् चोर्ध्वमौहूर्तिके** ३।३।९' इति लोडर्थलक्षणे भविष्यति लट् । '**अपरोक्षे च** ३।२।११९' इति लट् । '**नन्वोर्विभाषा** ३।२।१२१' इति पृष्टप्रतिवचने लट् ।। ३६ ।।

अन्तःपुरकृत्यं वर्णयन् विलपति सम्प्रति युग्मेन—

अन्तःपुराणि पौलस्त्यं पौराश् च भृश-दुःखिताः ।
संश्रुत्य स्माऽभिधावन्ति हतं रामेण संयुगे ।। ३७ ।।
मूर्धजान् स्म विलुञ्चन्ति क्रोशन्ति स्माऽतिविह्वलम् ।
अधीयन्त्युपकाराणां मुहर् भर्तुः प्रमन्यु च ।। ३८ ।।

**अन्वयः**—संयुगे रामेण हतं पौलस्त्यं संश्रुत्य अन्तःपुराणि पौराश्च भृशं दुःखिताः सन्तः धावन्ति स्म। मूर्धजान् विलुञ्चन्ति स्म। अतिविह्वलम् क्रोशन्ति स्म। प्रमन्यु यथा स्यात्तथा भर्तुरुपकाराणां मुहुः अधीयन्ति स्म।

**हिन्दी**—संग्राममें रामसे मारे गये रावणको सुनकर अन्तःपुरकी रानियाँ तथा पुरके लोग अत्यन्त दुःखित होकर दौड़ने लगे। रानियाँ केशोंको नोचने लगीं। अति विह्वल होकर जोर जोरसे रोने लगीं। अत्यन्त खिन्न होकर स्वामीके उपकारोंको बार बार याद करने लगीं।

**व्याख्या**–संयुगे रणे, रामेण राघवेण, हतं हिंसितं, पौलस्त्यं रावणं, संश्रुत्य आकर्ण्य, अन्तःपुराणि गृहयोषितः, पौराः नागरिका जनाश्च, भृशं दुःखिताः अतिसन्तप्ताः, अभिधावन्ति स्म अभिद्रवन्ति स्म। योषितस्तु स्त्रियस्तु, केशान् कचान्, विलुञ्चन्ति स्म अपनयन्ति स्म। अतिविह्वलम् अतिवैक्लव्यम्, क्रोशन्ति स्म उच्चैः रुदन्ति स्म। प्रमन्यु अतिदैन्यं यथा स्यात्तथा, भर्तुः स्वामिनः, उपकाराणाम् हितानां, मुहुरसकृत्, अधीयन्ति स्म स्मरन्ति स्म।

**तिङन्तः**—'अधीगर्थ० २।३।५२' इति कर्मणि षष्ठी। सृ धातोर्धावादेशः। धावु गतिशुद्ध्योर्वा॥ ३७–३८॥

रावणस्य नमन्ति स्म पौराः सास्रा रुदन्ति च।
भाषते स्म ततो रामो वचः पौलस्त्यमाकुलम्॥ ३९॥

**अन्वयः**—पौराः रावणस्य पादौ नमन्ति स्म, सास्रा रुदन्ति स्म च। ततः रामः आकुलं पौलस्त्यं ( विभीषणं ) वचो भाषते स्म।

**हिन्दी**—पुरके लोग रावणके पैर पर शिर झुकाते थे और आँसू भर-भर रोते थे। बाद रामने विभीषणसे बात कही।

**व्याख्या**–पौरा नागरिकाः जनाः, रावणस्य राक्षसेशस्य, पादौ चरणौ, नमन्ति स्म तत्सम्बन्धित्वात्। सास्राः साश्रुकण्ठाः, रुदन्ति स्म आक्रोशन्ति स्म। ततः रामो दाशरथिः, पौलस्त्यं विभीषणं, वचः वाचः, भाषते स्म व्याहरति स्म॥३९॥

रामवाक्यमनुवदति कविः—

'दातुः स्थातुर् द्विषां मूर्ध्नि यष्टुस् तर्पयितुः पितॄन्।
युद्धाऽभग्नाऽऽविपन्नस्य किं दशाऽऽस्यस्य शोचसि'॥ ४०॥

**अन्वयः**—अये विभीषण! दातुः ( अकिञ्चनेभ्यः ), द्विषां मूर्ध्नि स्थातुः, (देवान्) यष्टुः, पितॄन् तर्पयितुः, युद्धाऽभग्नाविपन्नस्य दशास्यस्यं किं शोचसि? नासौ शोच्यः।

**हिन्दी**—अये विभीषण ! जो बराबर अकिञ्चनोंको देता रहा है, सदा शत्रुओंके शिरपर ही जो बैठा रहा है, जो देवोंको यज्ञों द्वारा,पितरोंको श्राद्धादि-कृत्यों द्वारा तृप्त करता रहा हैं, संग्राममें जो कभी हारा नहीं है, न विपन्न ही हुआ हैं—ऐसे रावण के लिये तुम क्यों शोक कर रहे हो ?

**व्याख्या**—अये विभीषण ! दातुः दानशीलस्य सर्वेभ्योऽकिञ्चिनेभ्यः, द्विषामरीणां,मूर्ध्नि शिरसि, स्थातुः स्थितिशीलस्य,(देवान्) यष्टुः यजनशीलस्य, पितृन् पूर्ववंश्यान्, तर्पयितुः तर्पणशीलस्य, रणेऽपराजितस्याश्रान्तस्य,दशास्यस्य रावणस्य, किं कथं, शोचसि शोकं करोषि ? स शोच्यो नास्त्येव ।

**तिङन्तः**—सर्वत्र 'तृन् ३।१।१३५' इति तच्छीलाद्यर्थे तृन् । तृप तृप्तौ इति चौरादिको धातुः ।

**बोभवीति न सम्मोहो व्यसने स्म भवादृशाम् ।**
**किं न पश्यसि सर्वोऽयं जनस् त्वामवलम्बते ॥ ४१ ॥**

**अन्वयः**—भवादृशां व्यसने सम्मोहो न बोभवीति । सर्वोऽयं जनः त्वाम् अवलम्बते इति किं न पश्यसि ?

**हिन्दी**—आप जैसे लोगोंको संकट पड़ने पर भी मोह नहीं होना चाहिये । ये सभी लोग आपके ही ऊपर अवलम्बित हैं । यह क्यों नहीं देखते ?

**व्याख्या**—भवादृशां युष्मद्विधानां, व्यसने विपत्तौ अपि, सम्मोहोऽज्ञानं, न नहि, बोभवीति अत्यर्थं न भवति । किं कथं, न नहि, पश्यसि निरीक्षसे । अयं सर्वो जनः, त्वां भवन्तम्, अवलम्बते स्वामित्वेन आश्रयति ॥ ४१ ॥

**त्वमर्हसि भ्रातुरनन्तराणि कर्तुं, जनस्यास्य च शोक-भङ्गम् ।**
**धुर्ये विपन्ने त्वयि राज्य-भारो, मज्जत्यनूढः क्षणदा-चरेन्द्र ॥ ४२ ॥**

**इति भट्टिमहाकाव्यशास्त्रे तिङन्तकाण्डे लङ्विलसितोऽष्टादशः सर्गः ।**

**अन्वयः**—त्वम् भ्रातुः अनन्तराणि कृत्यानि अस्य जनस्य शोकभङ्गं च कर्तुम् अर्हसि । हे क्षणदाचरेन्द्र ! धुर्ये त्वयि विपन्ने सति अनूढो राज्यभारो मज्जति ।

**हिन्दी**—हे राक्षसराज ! तुम अपने भाईके आगेके कृत्योंको और इन लोगों के शोकको दूर करनेके योग्य हो । तुम ही एक मात्र प्रधान होकर यदि विचलित होते हो तो सारा राज्यभार किसीके मानके न होने से डूब जायगा ।

**छन्द**—उपजाति छन्द है, इन्द्रवज्रोपेन्द्रवज्रा छन्दके मिले रहने पर उपजाति छन्द होता है । तल्लक्षणं यथा—'स्यादिन्द्रवज्रा यदि तौ जगौ गः' ।

उपेन्द्रवज्रा 'जतजास्ततो गौ' । 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः। इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम' ।। इति।

**व्याख्या**—अये क्षणदाचरेन्द्र राक्षसराज ! त्वम् भ्रातुः दशास्यस्य, अनन्तराणि कृत्यानि, अस्य समक्षे स्थितस्य, जनस्य लोकस्य, शोकभङ्गं शोकापनयं च कर्तुम्, अर्हसि समर्थोऽसि । धुर्ये भारवहे, त्वयि विभीषणे, विपन्ने शोकसन्तप्ते सति, अनूढः अन्यैः गृहीतः, राज्यभारः राज्यधुरा, मज्जति विनश्यति ।

**तिङन्तः**—टुमस्जो शुद्धौ ( तु० अनुदात्तोदात्तेत् ) । लटि 'झलां जश् झशि ८।४।५३' इति जश्त्वेन दकारे, श्चुत्वेन जकारे मज्जति । अर्ह पूजायाम् (भ्वा० उदात्तोदात्तेत्) । लटि शपि अर्हसि ।

**शिक्षा**–'शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि' इति पद्यम् उभावपि शिक्षयतः रामो रावणं प्रशंसन् विभीषणश्च तदर्थं विलपन् ।। ४२ ।।

इति श्रीभट्टिमहाकाव्यशास्त्रेऽष्टादशसर्गे विभीषणविलापाख्ये मर्मविमर्शाख्यटीकोपेते तिङन्तकाण्डे लड्विलसितम् समाप्तम् ।। ४२ ।।

# ऊनविंशः सर्गः

## ( उपक्रमः )

सर्गेऽस्मिन् लिङ्विलसितं विद्यते। तत्र सार्वधातुकार्द्धधातुकभेदेन द्विधा लिङ्लकारोऽस्ति । सार्वधातुक-लकारो विधिलिङ् उच्यते । तस्य भिन्नाः प्रत्ययाः । आर्धधातुकलकार आशीर्लिङ् इत्युच्यते । तस्य भिन्नाः प्रत्ययाः । तथाहि—

अदन्तविकरणीयगणानां चतुर्णाम् १,४,६,१०

| | विधिलिङ् परस्मैपदे | | | विधिलिङ् आत्मनेपदे | | |
|---|---|---|---|---|---|---|
| प्र० | इत् | इताम् | इयुः | ईत | ईयाताम् | ईरन् |
| म० | इः | इतम् | इत | ईथाः | ईयाथाम् | ईध्वम् |
| उ० | इयम् | इव | इम | ईय | ईवहि | ईमहि |

विभिन्नविकरणीयगणानां षण्णां प्रत्ययाः २।३।५।७।८।९

| | विधिलिङ् परस्मैपदे | | |
|---|---|---|---|
| प्र० | यात् | याताम् | युः |
| म० | याः | यातम् | यात |
| उ० | याम् | याव | याम |

(आत्मनेपदे तु सर्वत्रैव इमे एवोपरिस्थाः प्रत्ययाः)

आशीर्लिङि गणभेदकृत्यं किमपि न भवति । तत्र दशगणीय-धातूनां कृते एकविधा एव प्रत्ययाः परस्मैपदात्मनेपदभेदेन द्विधा भवन्ति । तत्र परस्मैपदे नाममात्रेणैव धातुषु विकारो जायते। यथा—आदन्तानां घुमास्थागापाजहातिसां नित्यमेत्वम् । संयोगादीनामन्येषामादन्तानां वा एत्वम् । य्वोर्दीर्घः । ऋदन्तानां रिङ् । ॠदन्तानामिर् । हलन्तानां सम्प्रसारिणां सम्प्रसारणम् । गुणवृद्ध्यभावोऽत्र केवलम् । गुणोऽर्तिसंयोगाद्योर्जायते । इत्यलम् । आत्मनेपदे तु सेडनिड्भेदेन इड्व्यवस्थापि भवतीत्यलम् ।

| | परस्मैपदे सर्वगणीयाः प्रत्ययाः | | | आत्मनेपदे सर्वगणीयाः प्रत्ययाः | | |
|---|---|---|---|---|---|---|
| प्र० | यात् | यास्ताम् | यासुः | सीष्ट | सीयास्ताम् | सीरन् |
| म० | याः | यास्तम् | यास्त | सीष्ठाः | सीयास्थाम् | सीध्वम् |
| उ० | यासम् | यास्व | यास्म | सीय | सीवहि | सीमहि |
| | ( अतिसरलोऽत्र पदक्रमः ) | | | ( इडनिड्भेदेनैव पदक्रमः ) | | |

उदाहरणम् प्रथमपद्ये—विधिलिङि स्वादौ परस्मैपदे—दुनुयात् दुनुयाताम्

दुनुयुः । द्वितीयपद्ये–आशीर्लिङि-विधेयात् विधेयास्ताम् विधेयासुः । अधिजीयात् अधिजीयास्ताम् अधिजीयासुः । आत्मनेपदे–मृषीष्ट मृषीयास्ताम् मृषीरन् । मृषीष्ठाः मृषीयास्थाम् मृषीध्वम् । मृषीय मृषीवहि मृषीमहि । एवमेवानुगमेन सर्वोऽपि पदक्रमः स्वयं चालनीयः । नाममात्रेण धातुविकारः पूर्वोक्त एव कार्यः । षत्वष्टुत्वादिकं तु साधारणम् । आत्मनेपदे आशिषि इडनिडनुगमस्तु अनिट्कारिकया ज्ञेयः । कियतां सूत्राणामनुगम इह प्रदर्श्यते–'स्नुक्रमोरात्मनेपदनिमित्ते ७।२।३६', 'ग्रहोऽलिटि दीर्घः ७।२।३७', 'वृतो वा ७।२।३८', 'न लिङि ७।२।२९', इट् वेत्यनुवर्तमाने 'लिङ्सिचोरात्मनेपदेषु ७।२।४२', 'ऋतश्च संयोगादेः ७।२।४३' इत्यतोऽन्यसूत्राणि यथावसरं दृश्यानि ।

## ( सर्गारम्भः )

**अप मन्युस् ततो वाक्यं पौलस्त्यो राममुक्तवान् ।**
**अ-शोच्योऽपि व्रजन्नस्तं सनाभिर् दुनुयान् न किम् ॥ १ ॥**

**अन्वयः**—ततः अपमन्युः पौलस्त्यो विभीषणः रामं वाक्यम् उक्तवान् । अशोच्यः अपि सनाभिः अस्तं व्रजन् किं न दुनुयात् ?[1]

**हिन्दी**—तदनन्तर(श्रीराम के उपदेश के पश्चात्) विभीषण शोकमुक्त होकर रामचन्द्रसे वचन बोले । हे राम ! आपका कहना ठीक है । पर अशोचनीय भी सहोदरके मरनेपर असह्य शोक होता ही है, उसका वियोग मर्मभेदी होता है ।

**व्याख्या**—ततः रामोपदेशानन्तरम्, अपमन्युः अपगतशोकः, पौलस्त्यो विभीषणः, रामं राघवं, वाक्यं वचनम्, उक्तवान् अभिहितवान् । अशोच्योऽशोचनीयोऽपि, सनाभिः सहोदरः, अस्तं पञ्चत्वं, व्रजन् गच्छन्, किं कथं, न नहि, दुनुयात् उपतापयेत् ? उपतापयेदेवेति काकुः ।

**तिङन्तः**–पूर्वोक्तो लिङ्लकारानुगमः सम्यगभ्यस्य विधिलिङि, त्रिकरणप्रयोगेणात्राशिषि लिङि तु पूर्वोक्तविकारेणैव पदक्रमश्चालनीयोऽत्राऽवधेयम् ॥ १ ॥

**तं नो देवा विधेयासुर् येन रावण-वद् वयम् ।**
**सपत्नांश् चाऽधिजीयास्म संग्रामे च मृषीमहि ॥ २ ॥**

**अन्वयः**—हे राम ! देवाः नः तं विधेयासुः, येन वयं रावणवद् सपत्नान् अधिजीयास्म, संग्रामे मृषीमहि च ।

**हिन्दी**—हे राम ! देवतालोग हमलोगोंके लिये ऐसा करें कि रावणके समान ही हम लोग शत्रुओं पर विजयी होवें और संग्राममें ही मरें ।

---

[1] टिप्पणी–इत्येवं लिङ् प्रयोगाः कुत्र कियन्त इति स्वयं छात्रैर्मृग्यम् । मार्गो दर्शितोऽस्माभिः ।

**व्याख्या**—हे राम ! देवाः अमराः, नः अस्माक, तम् उपायं, विधेयासुः क्रियासुः । येन वयं सर्वे राक्षसाः, रावणवद् रावणतुल्यमेव, सपत्नान् शत्रून्, अधिजीयास्म पराजीयास्म । संग्रामे रणे एव, मृषीमहि मरणं प्राप्यास्म ।

**तिङन्तः**—**मृषीमहि**–'उश्च १।२।१२' इति लिङः कित्वान्न गुणः ॥ २ ॥

**क्रियेरंश् च दशाऽऽस्येन यथाऽन्येनाऽपि नः कुले ।**
**देवद्र्यञ्चो नराहारा न्यञ्चश्च द्विषतां गणाः ॥ ३ ॥**

**अन्वयः**—यथा दशास्येन नराहारा देवद्र्यञ्चः द्विषतां गणाः न्यञ्चः कृताः । तथैव नः कुले अन्येनापि क्रियेरन् ।

**हिन्दी**—जैसे रावणने राक्षसोंको देवताओंके साथ चलनेवाले शत्रुगणोंको नीचे चलनेवाला बना दिया था। वैसा ही हमारे खानदानमें दूसरे लोग भी करें।

**व्याख्या**—यथा यद्वद्, दशास्येन रावणेन, नराहारा राक्षसाः, देवद्र्यञ्चः देवैः सहाञ्चन्तः गच्छन्तः, द्विषता शत्रूणां, गणाः समूहाः, न्यञ्चः न्यूनाः कृताः विहिताः । तथैव तद्वदेव, नः अस्माकं, कुले वंशे, अन्येन अपि अपरेणापि, क्रियेरन् सम्पाद्येरन् ।

**तिङन्तः**—'विष्वग्देवयोश्च० ६।३।९२' इति टेरद्र्यादेशः । आशंसायां कर्मणि लिङ् ॥ ३ ॥

**स एव धारयेत् प्राणानीदृशे बन्धु-विप्लवे ।**
**भवेदाश्वासको यस्य सुहृच्छक्तो भवादृशः ॥ ४ ॥**

**अन्वयः**—ईदृशे बन्धु-विप्लवे स एव प्राणान् धारयेत् । यस्य भवादृशः शक्तः सुहृत् आश्वासकः भवेत् ।

**हिन्दी**—ऐसे भाईके नाश हो जानेपर वही जी सकता है, जिसको आपके समान समर्थ मित्र समझाने वाले होंगे ।

**व्याख्या**—ईदृशे एतादृशे, बन्धुविप्लवे भ्रातृनाशे, स एव प्राणी, प्राणान् असून्, धारयेत् स्थापयेत् । यस्य प्राणिनः, भवादृशः त्वत्तुल्यः, सुहृत् सखा, आश्वासको बोधकः, भवेत् स्यात् ॥ ४ ॥

**म्रियेयोर्ध्वं मुहूर्ताद्धि, न स्यास् त्वं यदि मे गतिः ।**
**आशंसा न हि नः प्रेते जीवेम दशमूर्धनि ॥ ५ ॥**

**अन्वयः**—यदि त्वं मे गतिः न स्याः, तर्हि मुहूर्तात् ऊर्ध्वं हि म्रियेय । दशमूर्द्धनि प्रेते जीवेम ( इति ) नः आशंसा न हि ।

**हिन्दी**—यदि आप मेरे गति नहीं होते तो मुहूर्त भरके बादही मैं मर गया होता। रावणके मर जानेपर भी जीते रहें ऐसी आकांक्षा हमारी न हो।

**व्याख्या**—यदि चेत्, त्वं भवान्, मे मम, गतिः शरणं, न नहि, स्याः भवेः, तदा यस्मिन् मुहूर्ते, रावणो नष्टोऽभूत्, ततो मूहूर्तात्, ऊर्ध्वम् उपरि, म्रियेय मृतः स्याम्। हि यतः, दशमूर्धनि दशास्ये, प्रेते मृतेऽपि, जीवेम प्राणान् धारयाम इति नोऽस्माकम्, आशंसा आकांक्षा, न नहि, स्यात् भवेत्।

**तिङन्तः**—'लिङ् चोर्ध्वमौहूर्तिके ३।३।१६४' इति लिङ्। 'आशंसावचने लिङ् ३।३।१३४' इति लिङ्। 'म्रियतेर्लुङ्लिङोश्च १।३।६१' इति लिङ्॥ ५॥

**प्रकुर्याम वयं देशे गर्ह्यां तत्र कथं रतिम्।**
**यत्र विंशति-हस्तस्य न सोदर्यस्य सम्भवः॥ ६॥**

**अन्वयः**—वयं तत्र देशे गर्ह्यां रतिं कथं प्रकुर्याम, यत्र विंशतिहस्तस्य सोदर्यस्य सम्भवो नास्ति।

**हिन्दी**—हमलोग वहां रहनेकी निन्दनीय इच्छा कैसे करें, जहां रावण ऐसे भाईका रहना न हो।

**व्याख्या**—वयं विभीषणादयः, तत्र तस्मिन् देशे, गर्ह्यां निन्द्यां, रतिं प्रेमाणं, कथं केन प्रकारेण, कुर्याम आचरेम। यत्र देशे, विंशतिहस्तस्य दशाननस्य, सम्भवः स्थितिर्नास्ति न वर्तते।

**तिङन्तः**—'विभाषा कथमि लिङ् च ३।३।१४३' गर्हायामुत्क्षिप्तायां कथमि उपपदे लिङ्। सार्वधातुकक्त्यमष्टमगणीयं डुकृञ्धातोः कार्यम्। कुर्यामिति 'ये च ६।४।१०९' इति विकरणलोपो विशेषः॥ ६॥

**आमन्त्रयेत तान् प्रह्वान् मन्त्रिणोऽथ विभीषणः।**
**गच्छेत त्वरितं लङ्कां राज-वेश्म विशेत च॥ ७॥**

**अन्वयः**—अथ विभीषणः तान् प्रह्वान् मन्त्रिणः आमन्त्रयेत। लङ्कां त्वरितं गच्छेत, राजवेश्म च विशेत।

**हिन्दी**—बाद विभीषणने उन विनीत मन्त्रियोंको बुलाया जो चारों उनके साथ रावणसभासे उठ आये थे। वे ही तो बचे थे। उनको कहा कि आपलोग शीघ्र लङ्का जाकर राजगृहमें प्रवेश करें।

**व्याख्या**—अथ अनन्तरम्, विभीषणः रावणानुजः, तान् चतुरो मन्त्रिणः, प्रह्वान् विनीतान्, तेन सहैव रावणसभातः समुत्थितान्, आमन्त्रयेत कर्मसु नियोगतः संहितवान्। यूयं, त्वरितं तूर्णं, लङ्कां हेमपुरीं, गच्छेत व्रजेत। राजवेश्म रावणभवनम्, विशेत प्रविशेत च।

**तिङन्तः**—अत्र विधौ प्रेषणे लिङ् पूर्वत्र निमन्त्रणे इति सर्वं स्वयमूह्यम् ॥ ७ ॥

आददीध्वं महाऽर्हाणि तत्र वासांसि स-त्वराः ।
उद्धुनीयात सत्-केतून्, निर्हरेताऽग्र्य-चन्दनम् ॥ ८ ॥

**अन्वयः**—तत्र सत्वराः महार्हाणि वासांसि आददीध्वम् । सत्केतून् उद्धुनीयात, अग्र्यचन्दनम् निर्हरेत ।

**हिन्दी**—वहां शीघ्र ही बहुमूल्य वस्त्रोंको ले लेना, अच्छे-अच्छे ध्वज सजा लेना तथा अच्छी चन्दनकी लकड़ी ले लेना ।

**व्याख्या**—तत्र सत्वराः शीघ्रतराः, महार्हाणि बहुमूल्यानि, वासांसि वस्त्राणि, आददीध्वम् गृह्णीध्वम् । सत्केतून् दीर्घध्वजान्, उद्धुनीयात ऊर्ध्वीकुर्वीध्वम् । अग्र्यचन्दनम् सच्चन्दनकाष्ठानि. निर्हरेत निर्णमयेत ।

**तिङन्तः**—'श्नाभ्यस्तयोरातः ६।४।११२' इत्यालोपे आददीध्वम् । 'ईहल्यघोः ६।४।११३' इतीत्वे, 'प्वादीनां ह्रस्वः ७।३।८०' इति ह्रस्वे उद्धुनीयात ॥ ८ ॥

मुञ्चेताऽऽकाश-धूपांश्च ग्रथ्नीयात स्रजः शुभाः ।
आनयेताऽमितं दारु कर्पूराऽगुरु-कुङ्कुमम् ॥ ९ ॥

**अन्वयः**—आकाश-धूपान् च मुञ्चेत, शुभाः स्रजः ग्रथ्नीयात । कर्पूरागुरुकुङ्कुमम् अमितं दारु आनयेत ।

**हिन्दी**—आकाशमें गुब्बारे छोड़ना, अच्छी-अच्छी मालायें गूंथना, कपूर-अगर-कुङ्कुमके सहित बहुतसी लकड़ियां लाना ।

**व्याख्या**—आकाशधूपान् गगनोड्डीयमानान् यन्त्रदीपान्, मुञ्चेत प्रवर्तयेत । शुभाः शोभनाः, स्रजः पुष्पमालाः, ग्रथ्नीयात गुम्फेत । कर्पूरागुरुकुङ्कुमम् वृक्षनिर्यासागरुकुङ्कुमादिसुगन्धिद्रव्योपेतम्, अमितं भूरि, दारु काष्ठम्, आनयेत संगृह्णीयात ।

**तिङन्तः**—श्रन्थ, ग्रन्थ सन्दर्भे ( क्र्या० उदात्तोदात्तेत् ) ।'अनिदितां हल उपधायाः क्ङिति ६।४।२४' इति नलोपे, 'ई हल्यघोः ६।४।११३' इतीत्वम्—ग्रथ्नीयात ॥ ९ ॥

उह्येरन् यज्ञ-पात्राणि, ह्रियेत च विभावसुः ।
भ्रियेत चाऽऽज्यमृत्विग्भिः, कल्प्येत च समित्-कुशम् ॥ १० ॥

**अन्वयः**—यज्ञ-पात्राणि उह्येरन्, विभावसुः ह्रियेत । ऋत्विग्भिः आज्यं भ्रियेत, पात्रेषु समित्कुशम् कल्प्येत ।

**हिन्दी**—यज्ञपात्र(रावणके अग्निहोत्र पात्र)लाये जायें। चिता जलानेके वास्ते आग लाई जाय। ऋत्विज् लोग यज्ञपात्रोंमें घी भरें तथा समिधा और कुश रखें।

**व्याख्या**—यज्ञपात्राणि रावणाग्निहोत्रपात्राणि, उह्येरन् चितायां स्थापनायानीयेरन्। विभावसुरग्निः, ह्रियेत चितादीपनायानीयेत। ऋत्विग्भिः रावणयाज्ञिकैः, आज्यं घृतं, (पात्रेषु यज्ञियेषु) भ्रियेत पूर्येत। समित्कुशम् अपामार्गादिपवित्रक्षुपकुशादितृणम्, कल्प्येत संगृह्येत। तैरेवेति शेषः। ( सर्वमिदं शवदाहसम्भारजातमेव )।

**तिङन्तः**—सर्वत्र विधौ कर्मणि लिङि सम्प्रसारणरिङादिकृत्यम्। कल्प्येतेति क्लृपेर्ण्यन्तात्कर्मणि लिङ्विधिः॥ १०॥

स्नानीयैः स्नापयेताऽऽशु रम्यैर् लिम्पेत वर्णकैः।
अलङ्कुर्यात रत्नैश्च रावणाऽर्हैर् दशाऽऽननम्॥ ११॥

**अन्वयः**—दशाननम् आशु स्नानीयैः चूर्णैः स्नापयेत। रम्यैर्वर्णकैः लिम्पेत। रावणार्हैः रत्नैः अलङ्कुर्यात।

**हिन्दी**—दशाननके शवको जल्दी स्नानकी सामग्रियोंसे आप लोग नहलावें। रमणीय लेप अर्थात् सुगन्धि, कर्पूर, चन्दनादि से लेप करें। रावणके योग्य बहुमूल्य रत्नोंसे अलंकृत करें।

**व्याख्या**—दशाननम् रावणशवम्, आशु शीघ्रम्, स्नानीयैः स्नातुं योग्यैः, चूर्णैः पिष्टातकैः, स्नापयेत स्नापयिष्यथ यूयम्। रम्यैः शोभनैः, वर्णकैश्चित्रद्रव्यैः चन्दनादिभिः, लिम्पेत विलेप्स्यथ। रावणार्हैः लङ्केशयोग्यैः, बहुमूल्यैः रत्नैर्हीरकादिभिरलङ्कुर्यात विभूषयेत।

**तिङन्तः**—'ग्लास्नावनुवमां च' इति वैकल्पिकं मित्वम्। तेन स्नापयेत स्नपयेतेत्युभयं सिध्यति॥ ११॥

वासयेत सु-वासोभ्यां मेध्याभ्यां राक्षसाऽऽधिपम्।
ऋत्विक् स्रग्विणमादध्यात् प्राङ्-मूर्धानं मृगाऽजिने॥ १२॥

**अन्वयः**—राक्षसाधिपम् मेध्याभ्यां सुवासोभ्याम् वासयेत यूयम्। ऋत्विक् मृगाजिने स्रग्विणं प्राङ्मूर्धानम् आदध्यात् ( चितायां दाहार्थम् )।

**हिन्दी**—आपलोग लङ्केशके शवको पवित्र सुन्दर दो वस्त्रोंसे वेष्टित करें। तथा ऋत्विक् लोग मृगचर्मपर माला पहनाकर पूर्व-शिर करके रखें (चितापर जलानेके वास्ते)।

**व्याख्या**—अत्रान्वयेनैवार्थः स्फुटतीति व्याख्या त्यक्ता। तिङन्तेऽपि न वैशिष्ट्यम्। वसेर्ण्यन्तात्, धाञ् धातोश्च प्रसिद्धाल्लिङ् विध्यादौ॥ १२॥

सम्प्रति विभीषणमुखेन रावणशवदाहविधिमाख्याति[१]—

यज्ञ-पत्राणि गात्रेषु चिनुयाच् च यथा- विधि ।
जुहुयाच् च हविर् वह्नौ, गायेयुः साम सामगाः ॥ १३ ॥

**अन्वयः**—ऋत्विगेव यथाविधि गात्रेषु यज्ञपात्राणि चिनुयात् । वह्नौ हविर्जुहुयात् । सामगाः साम गायेयुः ।

**हिन्दी**—ऋत्विज् महोदय शास्त्रविधि के अनुसार अग्निहोत्र के पात्रों को रावण के शव के अङ्गों पर रखें तथा अग्नि में हविष्य हवन करें। साम-गायक ब्राह्मण लोग सामगान करें ।

**व्याख्या**—ऋत्विक् याज्ञिकः, यथाविधि शास्त्रोल्लिखितविधानानुरूपम्, अग्निहोत्रिणो रावणस्य शवस्य, गात्रेषु अङ्गेषु, यज्ञपत्राणि स्रुक्स्फ्यप्रोक्षणी-प्रणीतादीनि अग्निहोत्रप्रयुक्तभाजनानि, चिनुयात् स्थापयेत् ( दाहार्थं ) । वह्नौ अग्नौ, हविः आज्यम्, जुहुयात् धारयेत् । सामगाः छन्दोगाः, साम च, गायेयुः स्वरेण सम्यगुच्चारयेयुः ।

**तिङन्तः**—सर्वत्र सार्वधातुको लिङ् विधौ । जुहोत्यादिस्वादिभ्वादिगा एव धातवो विकरणयोगेन साध्याः ॥ १३ ॥

सम्प्रति सम्पादितान्तेष्टिका मन्त्रिणो विभीषणमवशिष्टं भ्रातुरौर्ध्वदैहिकं कर्तुं लोकाचारमाख्यान्ति—

गत्वाऽथ ते पुरीं लङ्कां कृत्वा सर्वं यथोदितम् ।
समीपेऽन्त्याऽऽहुतेः साऽस्राः प्रोक्तवन्तो विभीषणम् ॥ १४ ॥

**अन्वयः**—अथ ते मन्त्रिणो लंकां पुरीं गत्वा सर्वं यथोदितं कृत्वा अन्त्याहुतेः समीपे सास्राः सन्तो विभीषणं प्रोक्तवन्तः ।

**हिन्दी**—बाद वे मन्त्रीगण लङ्कापुरी में जाकर विभीषण के कथनानुसार सभी कृत्यों को करके अन्त्येष्टि के समीप रोते हुये बोले ।

**व्याख्या**—अथ विभीषणादेशानन्तरं, ते मन्त्रिणः, लङ्कां पुरीं, गत्वा संगम्य, यथोदितं विभीषणकथनानुरूपं, सर्वं सकलं कृत्यं, कृत्वा सम्पाद्य, अन्त्याहुतेः अन्त्येष्टिकृत्यस्य, समीपे सन्निधाने, सास्राः प्ररुदन्तः, प्रोक्तवन्तः प्रोचुः ॥१४॥

---

[१] रावण विद्वान् ब्राह्मण होनेके कारण अग्निहोत्री भी था । शास्त्रोंमें अग्निहोत्रियों को जलाने की विशेष विधि है । तदनुसार अग्निहोत्रके पात्रोंको चितापर रखे हुए अग्निहोत्री के शवके अङ्गों पर रखनेकी भी विधि है। किस अङ्ग पर कौन पात्र रखना चाहिये, किस विधि से जलाना चाहिये इत्यादि । उसी बात को विभीषण इस पद्य द्वारा कहते हैं ।

**'कृतं सर्वं यथोद्दिष्टं, कर्तुं वह्नि-जल-क्रियाम् ।**
**प्रयतेथा महाराज ! सह सर्वैः स्वबन्धुभिः ॥ १५ ॥**

**अन्वयः**—हे महाराज ! ( अस्माभिः ) सर्वं यथोद्दिष्टं कृतम् । (त्वम्) सर्वैः स्वबन्धुभिः सह वह्निजलक्रियां प्रयतेथाः ।

**हिन्दी**—हे महाराज ! हमलोगों ने सभी आपके कथनानुसार कृत्यों को कर दिया है। अब आप अपने सभी बन्धुओं के साथ मिलकर अग्नि तथा जल की बाकी क्रियायों के करने का प्रयास करें ।

**व्याख्या**—हे महाराज विभीषण ! ( अस्माभिः ) सर्वं समग्रं, यथोदितं भवदुपदिष्टानुरूपम् कृत्यं, कृतं सम्पादितम् । (सम्प्रति त्वम्) सर्वैः सकलैः, स्वबन्धुभिः निजबान्धवैः, सह सार्द्धम्, अवशिष्टं कृत्यं, वह्निजलक्रियाम् अग्निनीराद्यनुष्ठानं, कर्तुं सम्पादयितुं, प्रयतेथाः आयास्येः ॥ १५ ॥

**अज्ञ-वन्-नोत्सहेथास् त्वं धेया धीर-त्वम-च्युतम् ।**
**स्थेयाः कार्येषु बन्धूनां हेयाः शोकोद्भवं तमः ॥ १६ ॥**

**अन्वयः**—त्वम् अज्ञवत् न उत्सहेथाः । अच्युतं धीरत्वं धेयाः । बन्धूनां कार्येषु स्थेयाः । शोकोद्भवं तमः हेयाः ।

**हिन्दी**—आप नासमझ के समान न पड़े रहें । अटूट धैर्य धारण करें। भाई के श्राद्धकृत्य पर स्थिर रहें। शोक से उत्पन्न मोह को छोड़ दें।

**व्याख्या**—त्वं विभीषणः, अज्ञवत् अज्ञानितुल्यं, न नहि, उत्सहेथाः अवसीदेः। गर्हितमेतत् इति शोकादनिवर्तमानं तं बोधयन्ति । अच्युतम् अक्षतं, धीरत्वं धैर्यं, धेयाः धत्स्व। बन्धूनाम् रावणस्य (आदरे बहुत्वम्), कार्येषु कृत्येषु श्राद्धादिषु, स्थेयाः तिष्ठस्व । शोकोद्भवं मन्युजन्यं, तमोऽज्ञानं, हेयाः त्यजेः। त्वादृशानामस्मिन्नवसरे शोककरणमनुचिततरमित्यर्थः ।

**तिङन्तः**—'किंवृत्ते लिङ्-लृटौ ३।३।१४४' इति गर्हायां लिङ् उत्सहेथाः इत्यत्र । धेया इत्यादिषु 'एर्लिङि ६।४।६७' इत्येत्वमाशीर्लिङ आर्द्धधातुकत्वात् ॥ १६ ॥

**नाऽवकल्प्यमिदं, ग्लायेद् यत् कृच्छ्रेषु भवानपि ।**
**न पृथग्-जन-वज् जातु प्रमुह्येत् पण्डितो जनः ॥ १७ ॥**

**अन्वयः**—इदं न अवकल्प्यम् यद् भवान् अपि कृच्छ्रेषु ग्लायेत् । पण्डितो जनः न जातु पृथग्जनवत् प्रमुह्येत ।

**हिन्दी**—ऐसी सम्भावना नहीं की जा सकती कि आप ऐसे आदमी भी सङ्कट

पड़ने पर मोहमें पड़ेगा । पण्डित व्यक्ति कभी भी अज्ञानियोंके समान मोहमें नहीं पड़ता है ।

**व्याख्या**—इदम् भवतोऽवस्थानम् न नहि, अवकल्प्यम् सम्भाव्यम्, यत् भवान् विभीषणोऽपि सन्, कृच्छ्रेषु सङ्कटेषु, ग्लायेत् अवसीदेत् । पण्डितो ज्ञानी, जनो लोकः, जातु कदाचिदपि, पृथग्जनवत् अपण्डिततुल्यं, न नहि, प्रमुह्येत् मोहं यायात् ।

**तिङन्तः**—'अनवक्लृप्त्यमर्षयोः ३।३।१४५' इति अकिंवृत्तेऽपि अनवक्लृप्तौ असम्भावनायाम् ग्लायेदित्यत्र लिङ् । यद्-योगे 'जातुयदोर्लिङ् ३।३।१४७' इति प्रमुह्येदित्यत्र लिङ् ॥ १७ ॥

**यच्च यत्र भवांस् तिष्ठेत्, तत्राऽन्यो रावणस्य न ।**
**यच्च यत्र भवान् सीदेन् महद्भिस् तद् विगर्हितम् ॥ १८ ॥**

**अन्वयः**—यच्च यत्र भवान् तिष्ठेत्, तत्र रावणस्य अन्यः न तिष्ठेत् । (कोऽप्यन्यो नास्ति तस्य, भवानेव एकाकी अवशिष्टः) यच्च यत्र भवान् सीदेत्, तत् महद्भिः विगर्हितम् ।

**हिन्दी**–जो भी (हो) जहां आप रहेंगे वहाँ रावणका दूसरा नहीं रहेगा। (कोई दूसरा उनका बचा ही नहीं । आप ही तो एक बचे है) । जो भी जहाँ आपको कष्ट हो, यह तो बड़ोंने गर्हित बताया है ।

**व्याख्या**—यच्च यत्र देशे अपरः, भवान् विभीषणः, तिष्ठेत् वसेत्, तत्र देशे, रावणस्य दशास्यस्य, अन्यः अपरः, न नहि, तिष्ठेत् वसेत्, विनाशात् । यच्च यत्र प्रदेशे, भवान् रामभक्तः, सीदेत् कष्टं प्राप्नुयात्, तत् महद्भिराप्तैर्विगर्हितम् निन्दितम् । भगवद्भक्तः कथं कष्टाश्रितः स्यादिति भावः ।

**तिङन्तः**—'यच्च-यत्रयोः ३।३।१४८' इत्यवक्लृप्तौ भविष्यति तिष्ठेदित्यत्र लिङ् । 'गर्हायां च १४९' इति लिङितरत्र ।

**शिक्षा**—'लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥' इति शाश्वतिकी शिक्षोदेति ॥१८॥

**आश्चर्यं, यच्च यत्र त्वां प्रब्रूयाम वयं हितम् ।**
**अपि साक्षात् प्रशिष्यास् त्वं कृच्छ्रेष्विन्द्र-पुरोहितम् ॥ १९ ॥**

**अन्वयः**—आश्चर्यं यच्च यत्र वयं ( मन्त्रिणः ) त्वां हितं प्रब्रूयाम । त्वं तु कृच्छ्रेषु साक्षात् इन्द्रपुरोहितम् अपि शिष्यात् ।

**हिन्दी**—यह आश्चर्य है कि यहाँ कुछ भी हम मन्त्रीगण आपको हित

बातका उपदेश करें, क्योंकि आप तो स्वयं सङ्कटमें साक्षात् इन्द्रके पुरोहित बृहस्पतिजीको शिक्षा दे सकते है।

**व्याख्या**–आश्चर्यं चित्रमिदं, यच्च यत्र, वयं भवन्मन्त्रिणोऽनुगन्तारः, त्वाम् भवन्तं, हितं प्रब्रूयाम। त्वं विभीषणस्तु, नीतिनिपुणत्वात्, कृच्छ्रेषु सङ्कटेषु, साक्षात् प्रत्यक्षम्, इन्द्रपुरोहितम् बृहस्पतिमपि, प्रशिष्यात् प्रशिक्षयेत्।

**तिङन्तः**––'**चित्रीकरणे च** ३।३।१५०' इति लिङ् यच्च यत्रयोरनुप्रयोगे। अपि प्रशिष्यादित्यत्र '**उताप्योः समर्थयोर्लिङ्** ३।३।१५२' इति अनयोः बाढमित्यर्थे सामर्थ्यम्। अतो लिङ्। '**शास इदङ्हलोः** ६।४।३४' इतीत्वम्। '**शासिवसिघसीनां च** ८।३।६०' इति षत्वम्। त्वामिति द्वितीया तु अकथितकर्मत्वाज्ज्ञेया।

**कामो जनस्य 'जह्यास् त्वं प्रमादं नैर्ऋताऽधिप !।**
**उत द्विषोऽनुशोचेयुर् विप्लवे, किमु बान्धवाः ॥ २० ॥**

**अन्वयः**–हे नैर्ऋताधिप ! त्वं प्रमादं जह्याः इति जनस्य कामः। विप्लव द्विष उत अनुशोचेयुः,बान्धवाः किमु? (अयन्तु स्वभावः स हि पण्डितैर्निरोद्धव्यो नहि तत्र तैः पतनीयम्, प्रकृतिनिरोधः पण्डितकार्यम् )।

**हिन्दी**–हे राक्षसराज ! आप शोक छोड़ दें, यह सभी लोग चाहते हैं। विपत्तिमें तो शत्रु भी दुःखी होता है, बन्धुबान्धवों का क्या कहना है ? ( यह तो प्राणीकी प्रकृति है। इसे रोकना ही तो पण्डितका काम है )।

**व्याख्या**––हे नैर्ऋताधिप राक्षसराज ! त्वं भवान्, प्रमादं मोहं, जह्याः त्यजेः। इति एवं, जनस्य लोकस्यः, कामः इच्छा। विप्लवे विनाशे, द्विषोऽरयोऽपि, उतानुशोचयेयुः चिन्तेयुः। बान्धवाः सुहृदः किमु ? अतो बन्धुभिर्धैर्यं बद्ध्वौर्ध्वदैहिकमेव कार्यम्।

**तिङन्तः**––'**कामप्रवेदनेऽकच्चिति** ३।३।१५३' इति लिङ्। उतयोगेऽपि पूर्वसूत्रेणैव लिङ् –'**उताप्योः**० ३।३।१५२' ॥ २० ॥

**स भवान् भ्रातृ-वद् रक्षेद् यथावदखिलं जनम्।**
**न भवान् संप्रमुह्येच् चेदाश्वस्युश् च निशाचराः ॥ २१ ॥**

**अन्वयः**––चेद् भवान् न सम्प्रमुह्येत्, तदा स भवान् अखिलं जनं भ्रातृवद् यथावत् रक्षेत्। निशाचराः च आश्वस्युः।

**हिन्दी**–यदि आप मोहमें नहीं पड़ेंगे तो दृढ़ होकर आप सब लोगोंकी भाईकी तरह रक्षा करेंगें। राक्षस लोग भी आश्वस्त रहेंगे।

**व्याख्या**–चेद् यदि, भवान् आर्यः, न नहि, सम्प्रमुह्येत मोहं सम्प्राप्नुयात

तदा स दृढः, भवान् आर्यः, अखिलं निखिलं, जनं लोकं, यथावत् सम्यक्, भ्रातृवत् भ्रातृतुल्यं, रक्षेत्। निशाचराः राक्षसाः च, सर्वे, आश्वस्युः आश्वस्ताः स्युः।

**तिङन्तः**–'हेतुहेतुमतोर्लिङ् ३।३।१५६' इति लिङ्। अत्राप्रमोहो हेतुः, जनरक्षणं राक्षसाश्वसनं च हेतुमत्। श्वसेरदादित्वात् शपो लुकि आश्वस्युः। 'उस्यपदान्ताद् ६।१।९६' इति पररूपम्। आश्वसेयुरिति पाठान्तरे भ्वादिस्थो धातुराङ्पूर्वः ॥ २१ ॥

**ततः स गतवान् कर्तुं भ्रातुरग्नि-जल-क्रियाम्।**
**प्रोक्तवान् कृत-कर्तव्यं वचो रामोऽथ राक्षसम् ॥ २२ ॥**

**अन्वयः**—ततः स भ्रातुः अग्निजलक्रियां कर्तुं गतवान्। अथ रामः कृतकर्तव्यं राक्षसं वचः प्रोक्तवान्।

**हिन्दी**–मन्त्रियोंके समझाने पर विभीषण भाईकी अग्नि-जल-क्रिया करनेके लिये गये। अपने भाईके सभी श्राद्धादि कृत्य करचुकनेपर रामने भी राक्षसराजसे बात कही ( उपदेश दिया )।

**व्याख्या**—ततः मन्त्रिभिः कृतोपदेशः, स विभीषणः, भ्रातुः रावणस्य, अग्निजलक्रियामवशिष्टां श्राद्धाद्यनुष्ठानम्, कर्तुं विधातुम्, गतवान् प्रस्थितः, रामपार्श्वात् लङ्काम्। अथ सर्वकृत्यसमाप्तौ, लङ्कां गतो रामोऽपि, राक्षसं विभीषणं, वचः उपदेशं, प्रोक्तवान् उपदिष्टवान् ॥ २२ ॥

सम्प्रति रामकर्तृकविभीषणराज्यप्रदानमाख्याति कविः—

**अम्भांसि रुक्म-कुम्भेन सिञ्चन् मूर्ध्नि समाधिमान्।**
**त्वं राजा रक्षसां लङ्कामवेक्षेथा विभीषण ! ॥ २३ ॥**

**अन्वयः**—रामः समाधिमान् सन् रुक्मकुम्भेन विभीषणस्य मूर्ध्नि अम्भांसि सिञ्चन् प्रोक्तवान् इति पूर्वेणान्वयः। हे विभीषण ! त्वं रक्षसां राजा संजातः, लङ्काम् अवेक्षेथाः। लङ्कारक्षाभारः सम्प्रति त्वयि पतितः। मत्तस्त्वं लङ्काशासको नियुक्त इति यावत्। रामस्य समाधित्वं रावणाद्वियुक्तस्य विभीषणस्य कृते लङ्केशत्वप्रतिज्ञानं सूचयति ॥ २३ ॥

**हिन्दी**—श्रीरामने ध्यानस्थ होकर स्वर्णकलशसे विभीषणके मस्तक पर जलाभिषेक ( सिञ्चन ) करते हुए उनसे कहा—'हे विभीषण ! तुम ( अब ) आजसे राक्षसोंके राजा हो गये हो, लङ्का-नगरीको देखना ( ध्यान रखना ), इस समय इस नगरीका पूर्ण भार तुम्हारे ऊपर आ पड़ा है।' कहनेका अभिप्राय यह है कि–मेरे द्वारा तुम लङ्काके रक्षणार्थं प्रमुख शासक नियुक्त किये गये हो।

**व्याख्या**–रामः लङ्काविजयी श्रीरामः, समाधिमान् ध्यानवान् भूत्वा, रुक्मकुम्भेन सुवर्णकलशेन, विभीषणस्य एतन्नामकस्य रावणभ्रातुः, मूर्ध्नि मस्तके, अम्भांसि जलानि, सिञ्चन् अभिषेकं कुर्वन्, प्रोक्तवान् प्रोवाच। हे विभीषण मद्भक्तवर पौलस्त्य! त्वं भवान्, रक्षसां राक्षसानां, राजा शासकः, संजातः नियुक्तोऽसि। (अतः) लङ्कां लङ्कानगरीम्, अवेक्षेथाः कार्याकार्यनिरूपणेनावलोकयेः। केन प्रकारेण लङ्कायाःसुरक्षा भवेदिति भारः सम्प्रति रावणे हते त्वयि पतितः आपतितः। मत्तः रामात् त्वं भवान् लङ्काशासको नियुक्त इति भावः ॥२३॥

सम्प्रति रामकर्तृकं राजनीत्युपदेशमाख्याति—

**क्रुद्धाननुनयेः सम्यक्, धनैर्लुब्धानुपार्जयेः।**
**मानिनो मानयेः काले, त्रस्तान् पौलस्त्य! सान्त्वयेः ॥ २४ ॥**

**अन्वयः**—हे पौलस्त्य! क्रुद्धान् सम्यक् अनुनयेः, लुब्धान् धनैः उपार्जयेः। काले मानिनो मानयेः, त्रस्तान् सान्त्वयेः।

**हिन्दी**–हे विभीषण! क्रुद्ध राजनीतिज्ञोंको खूब प्रसन्न करना, लोभियोंको धनसे फुसला लेना। समयपर मानियोंको मान देना,डरे भीरुओंकी रक्षा करना। डाकू लुटेरे तेरे राज्यम न रहने पावें। यह राजाके लिये बड़ा ही कलङ्क है।

**व्याख्या**—हे पौलस्त्य विभीषण! क्रुद्धान् केनाप्युचितनिमित्तेन कुपितान् राजनीतिज्ञान्, सम्यक् साधु, अनुनयेः प्रसादयेः। लुब्धान् लोभिनः, धनैः अनुदानादिभिः, उपार्जयेः वशीकुर्याः। काले उत्सवादिनिमित्ते, मानिनो मानार्हान् राज्यविदुषः,मानयेः उपाध्यादिना सत्कुर्याः। त्रस्तान् भीरून्, चौर्यप्रसह्यवित्तापहरादिभिरुद्विग्नान्, सान्त्वयेः सान्त्वनां कुर्याः। नेदृक् कृत्यं मद्राज्ये पुनः स्यादिति विश्वासं जनयेः। इदं हि शासकानां कलङ्करूपं जघन्यदोषं चौर्यप्रसह्यवित्तापहारादि ॥ २४ ॥

**इच्छा मे परमाऽऽनन्देः कथं त्वं वृत्र-शत्रु-वत्।**
**इच्छेद्धि सुहृदं सर्वो वृद्धि-संस्थं यतः सुहृत् ॥ २५ ॥**

**अन्वयः**—हे पौलस्त्य! मे मम परमा इच्छा (यत्) त्वं वृत्रशत्रुवत् कथं नन्देः। यतः सर्वः सुहृत वृद्धिसंस्थं हि सुहृदम् इच्छेत्।

**हिन्दी**—हे विभीषण! मेरी उत्कट इच्छा है कि तुम इन्द्रके समान आनन्दित रहो, क्योंकि सभी लोग अपने मित्रको उन्नति पर आरूढ ही रहना चाहते हैं।

**व्याख्या**–हे पौलस्त्य हे विभीषण! मे मम, परमा उत्कटा, इच्छा स्पृहा,

अस्ति, यत्, त्वं विभीषणः, कथं केन प्रकारेण, वृत्रशत्रुवत् इन्द्रतुल्यम्, आनन्देः । यतः यस्मात्, समग्रः सर्वः, सुहृत् मित्रवर्गः, सुहृदं मित्रं, वृद्धि-संस्थं अभ्युन्नति-स्थितम्, इच्छेत् वाञ्छेत् ।

तिङन्तः--'इच्छार्थेषु लिङ्लोटौ ३।३।१५७' इति लिङ् । 'इच्छार्थेभ्यो विभाषा वर्तमाने ३।३।१६०' इति लिङ् ।। २५ ।।

**वर्धिषीष्ठाः स्वजातेषु, वध्यास् त्वं रिपु-संहतीः ।**
**भूयास् त्वं गुणिनां मान्यस्, तेषां स्थेया व्यवस्थितौ ।। २६ ।।**

**अन्वयः**--त्वम् स्वजातेषु वर्धिषीष्ठाः, रिपुसंहतीः वध्याः । त्वं गुणिनां मान्यो भूयाः, तेषां व्यवस्थितौ स्थेयाः ।

**हिन्दी**–तुम अपने समुदायमें वृद्धि पाओ । रिपुओंके समुदायको मार डालो । गुणियोंमें तुम मान्य होओ और उनकी व्यवस्था करनेमें तत्पर रहो ।

**व्याख्या**–त्वम् विभीषणः, स्वजातेषु निजजातिषु राक्षसेषु, वर्धिषीष्ठाः वृद्धि प्राप्याः । रिपु-संहतीः शत्रुसमूहान्, वध्याः हिंस्याः । त्वं विभीषणः, गुणिनां श्रुत-शीलवतां,मान्यः पूज्यः,भूयाः भवेः। तेषां,व्यवस्थितौ व्यवस्थायां,स्थेयाः दृढो भूयाः।

**तिङन्तः**—'**आशिषि लिङ्लोटौ** ३।३।१७३' इति लिङ् ।। २६ ।।

**घेयास् त्वं सुहृदां प्रीतिं, वन्दिषीष्ठा दिवौकसः ।**
**सोमं पेयाश् च हेयाश् च हिंस्रा हानि-करीः क्रियाः ।। २७ ।।**

**अन्वयः**--त्वं सुहृदां प्रीतिं घेयाः, दिवौकसः वन्दिषीष्ठाः, सोमं पेयाः; हिंस्रा हानिकरीः क्रियाः हेयाः ।

**हिन्दी**--तुम मित्रोंका प्रेम प्राप्त करो या मित्रोंसे प्रेम करो । देवताओंका पूजन करो । सोमपान करो और दूसरोंकी घातक एवं अपनी हानि करनेवाली क्रियाओंको मत करो ।

**व्याख्या**—हे विभीषण ! त्वं,सुहृदां मित्राणां,प्रीतिं प्रेमाणं,घेयाः लप्सीष्ठाः । अथवा त्वं,मित्राणां मित्रेषु, प्रीतिं प्रेमाणं,घेयाः पालयेथाः, कृषीष्ठाः इति यावत् । दिवौकसः देवान्, वन्दिषीष्ठाः । सोमं सोमलताम्, यज्ञेषु यागेषु, पेयाः घेयाः । हिंस्रा घातुकीः,हानिकरीः आत्मविनाशिनीः, क्रियाः कर्तव्यानि,हेयाः त्याज्याः ।

**तिङन्तः**—इतः सर्वत्रैव आशिष्यादिष्वेवावशिष्टेषु लिङ् । पेया इत्यादिषु '**घुमास्थागापाजहातिसां हलि** ६।४।६६' इत्येत्वं सर्वत्र ।। २७ ।।

**अवसेयाश् च कार्याणि धर्मेण पुर-वासिनाम् ।**
**अनुरागं क्रिया राजन् ! सदा सर्व-गतं जने ।। २८ ।।**

**अन्वयः**—हे राजन् ! पुरवासिनां कार्याणि धर्मेण अवसेयाः । सदा जने सर्वगतम् अनुरागम् क्रियाः ।

**हिन्दी**–हे राजन् ! लङ्कानिवासियोंके कार्यको धर्मानुसार समाप्त करना। सभी समय लोगोंमें सर्वव्यापी स्नेह रखना ।

**व्याख्या**––हे राजन् लङ्केश ! पुरवासिनां लङ्कास्थितानां, कार्याणि व्यवहारकृत्यानि, धर्मेण संविधानानुसारम्, अवसेयाः समाप्ति नेयाः । सदा सर्वदा, जने लोके, सर्वगतं सर्वेषां, अनुरागं स्नेहं, क्रियाः अनुष्ठेयाः ।। २८ ।।

**घानिषीष्ट त्वया मन्युर् ग्राहिषीष्ट समुन्नतिः ।**
**रक्षोभिर् दर्शिषीष्ठास् त्वं द्रक्षीरन् भवता च ते ।। २९ ।।**

**अन्वयः**––त्वया मन्युः घानिषीष्ट, समुन्नतिः ग्राहिषीष्ट । रक्षोभिस्त्वं दर्शिषीष्ठाः, भवता च ते द्रक्षीरन् ।

**हिन्दी**––तुम्हें अपना क्रोध या शोक दूर करना होगा। अपनी समुन्नति करनी होगी। प्रजाजन तुम्हारा दर्शन करें। तुम भी सुख-दुःखमें उनको देखने जाओ ।

**व्याख्या**–त्वया विभीषणेन, मन्युः दैन्यं क्रोधो वा, घानिपीष्ट हंसीष्ट वा, घनिषीष्ट हंसीष्ट वा, घानिष्यते इत्यर्थः । समुन्नतिः अभ्युदयः, ग्राहिषीष्ट ग्रहीषीष्ट वा, ग्राहिष्यते इत्यर्थः । रक्षोभिः क्रव्याद्भिः, त्वं दर्शिषीष्ठाः द्रक्षीष्ठाः वा, दर्शिष्यसे इत्यर्थः । भवता त्वया च, ते राक्षसाः, द्रक्षीरन् दर्शिषीरन् वा दर्शिष्यन्ते इत्यर्थः।

**तिङन्तः**–‘स्यसिच्सीयुट्०६।४।६२’ इति वैकल्पिकचिण्वद्भावेटौ सर्वत्र।।२९।।

उपसंहरन् स्वाशिषं रामो निष्कर्षं राजनीतेरुपदिशति—

**मन्युं वध्या भट-वध-कृतं बाल-वृद्धस्य राजन् !**
**शास्त्राऽभिज्ञाः सदसि सु-धियः सन्निधि ते क्रियासुः ।**
**संरंसीष्ठाः सुर-मुनि-गते वर्त्मनि प्राज्य-धर्मे**
**संभुत्सीष्ठाः सु-नय-नयनैर् विद्विषामीहितानि ।। ३० ।।**

**इति भट्टिकाव्यशास्त्रे तिङन्तकाण्डे लक्षणरूपे लिङ्विलसिते लक्ष्यरूपकथानके विभीषणाभिषेको नामोनविंशः सर्गः समाप्तः ।**

**अन्वयः**—हे राजन् ! बालवृद्धस्य भटवधकृतं मन्युं वध्याः । शास्त्राभिज्ञाः सुधियस्ते सदसि सन्निधि क्रियासुः । सुरमुनिगते प्राज्यधर्मे वर्त्मनि संरंसीष्ठाः । सुनयनयनैः विद्विषाम् ईहितानि संभुत्सीष्ठाः ।

**हिन्दी**–हे राजन् ! बालवृद्धोंका सैनिकों द्वारा भटोंके वध करनेके कारण जो शोक है उसे प्रिय आदेश तथा आर्थिक सहायताद्वारा दूर करना । शास्त्रके जानकार राजनीतिज्ञ विद्वान् तुम्हारी सभामें रहा करें । देवों मुनियों द्वारा सेवित प्रचुर पुण्यशाली मार्गमें तुम्हारा प्रेम वना रहे । अच्छी नीतिके जानकारों द्वारा ( गुप्तचरों के द्वारा ) शत्रुओंके कर्त्तव्योंका ज्ञान करना ।

**व्याख्या**—हे राजन् लङ्केश ! बालवृद्धस्य कुमारस्थविरस्य, भटवधकृतं सैन्यविनाशोत्पन्नं, मन्युं शोकं क्रोधं वा, प्रियादेशैरार्थिकसाहाय्यैश्च, वध्याः अपनेषीष्ठाः । शास्त्राभिज्ञाः राजनीतिशास्त्रमर्मज्ञाः, सुधियो विद्वांसः, ते तव, सदसि सभायां, सन्निधिं सान्निध्यं, क्रियासुः सम्पादयिषीरन् । सुरमुनिगते देवर्षिसेविते, प्राज्यधर्मे प्रचुरपुण्यशालिनि, वर्त्मनि पथि, संरंसीष्ठाः संसृक्षीष्ठाः । सुनयनयनैः सुनीतिनेत्रैः गुप्तचरैः, विद्विषां शत्रूणां, ईहितानि चेष्टितानि, संभुत्सीष्ठाः ज्ञेयाः । मन्दाक्रान्ता छन्दः । **'मन्दाक्रान्ताऽम्बुधिरसनगैर्भोभनौ गौ ययुग्मम्'** इति लक्षणम् ।

**तिङन्तः**——बुध अवगमने दैवादिकस्याशिषि लिङि **'लिङ्सिचावात्मनेपदेषु १।२।११'** इति कित्वाद् गुणाभावे भष्भावः—**'एकाचो बशो भष्० ८।२।३७'** इति ।

इति श्रीभट्टिमहाकाव्यशास्त्रे तिङन्तकाण्डे लक्षणरूपे लिङ्विलसिते
मर्मविमर्शिकाख्यटीकोपेते लक्ष्यरूपे कथानके विभीषणाभिषेको[1]
नामोनविंशः सर्गः समाप्तः ॥ १९ ॥

---

टिप्पणी—१. सर्गोऽयमेतद्धि सर्वान् प्रत्यक्षं दर्शयति यत् विद्यमानेषु अपि प्रबलधर्मसंकटेषु सत्यपक्षपातिभिरेव भवितव्यम् । पुम्भिः बहुभिः कविभिरपि विवृतोऽयं विभीषणस्य रामपक्षपातः श्रेष्ठतया । 'यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् । अपन्थानन्तु गच्छन्तं सोदरोऽपि विमुञ्चति"॥ इति अनर्घराघवनाटकमेव ग्रथितं जयदेवेन महाकविनेत्यलम् । विमृशन्तु सुधियः स्वतन्त्रप्रज्ञाः । लोकनिन्दा-प्रवादो महतामग्रे नगण्योऽस्ति । मायिका हि लोकाद् बिभ्यति, नहि ज्ञानिनः । तेहि न्याय्यं मार्गं पश्यन्ति । विभीषणस्य पुरो द्वौ मार्गौ स्तः–भ्रात्रा सह तिष्ठेत्, रामेण सह वा । भ्राता हि कुमार्गगामित्वात् शत्रुः, रामः सन्मार्गगामीति मित्रम् । अतः स तेन सङ्गतिमकरोत् । मूर्खा उपहसेयुर्नाम विभीषणो बन्धुद्रोहीति । स न बिभेति मूर्खोपहासात् । 'प्रकृत्यमित्रा हि सतामसाधवः'–इति स जानाति । इति शिवम् ।

# विंशः सर्गः

## ( उपक्रमः )

अस्मिन् सर्गेऽपि सार्व-धातुकलकारस्य लोट[1] एव विलसितमस्ति । अतश्च लोट्प्रत्ययेषु तत्तद्गणविकरणयोगेन पदानि निर्मातव्यानि । तथा हि—

| | परस्मैपदे लोटः प्रत्ययाः<br>अदन्तविकरणगणानां | | | आत्मनेपदे लोटः प्रत्ययाः<br>चतुर्णां भ्वादिदिवादितुदादिचुरादीनाम् | | |
|---|---|---|---|---|---|---|
| प्र० | तु, तात् | ताम् | अन्तु | ताम् | इताम् | अन्ताम् |
| म० | हि, तात् | तम् | त | स्व | इथाम् | ध्वम् |
| उ० | आनि | आव | आम | ऐ | आवहै | आमहै |

अदन्तेतरविकरणगणानां षण्णामदादिजुहोत्यादिस्वादिरुधादितनादिक्र्यादीनां प्रत्यया अधस्तान्निर्दिश्यन्ते । अत्रोत्तमपुरुषे सर्वत्र गुणः पित्त्वात् ।

| | परस्मैपदे लोटः प्रत्ययाः | | | आत्मनेपदे लोटः प्रत्ययाः | | |
|---|---|---|---|---|---|---|
| प्र० | तु, तात् | ताम् | अन्तु | ताम् | आताम् | अताम् |
| म० | हि, तात् | तम् | त | स्व | आथाम् | ध्वम् |
| उ० | आनि | आव | आम | ऐ | आवहै | आमहै |

जुहोत्यादौ 'अन्तु' स्थाने 'अतु' भवति **'अदभ्यस्तात् ७।१।४'** इति सूत्रबलात् । अपरेषां प्रत्ययानां साधन-प्रकारः तृतीयाध्यायस्य चतुर्थपादे 'लोटो लङ्वत् ३।४।८५' इति सूत्रतोऽग्रेतनैः सूत्रैर्यथाप्राप्तं कार्यस्तथा सप्तमाध्याय-प्रथमपादीयैः **'झोऽन्तः ७।१।३'** इत्यादिभिर्यथाप्राप्तं कार्यः ।

लोट् लकारस्तु **'विध्यादिसूत्रात् ३।३।१६१'** आरभ्य **'समुच्चये सामान्यवचनस्य** ३।४।५ इति सूत्रावधि अर्थेषु कार्यः । क्रमण यथाप्राप्तमुदाहरणं सूत्रोपन्यासेन तत्तत्पद्ये साधनीयम् ।

---

[1] अन्यसर्गेषु लोट् प्रयोगाः—१-१९, २१।२-२७, २८, ५१, ५२।३-१२, १५, ५१, ५३, ५६।४-२४, २९, ३५-३६, ३८।५-१५, २१, २३, २७, ३२, ३८, ४७, ५४, ९०-९३।६-४, १८, २०, २६, २९, ३१, ५५, ७३-७४, ९३, ९६, ९८, १०३, १४२।७-२५, २०-२१, ३६, ४६, ४९, ६९, ९३, ९७, ९९, १०।८-११, १४, १६-१७, ७८-७९, ८२-८४, ८८, ९२, ९६, ९९, ११९, १२१, १२४ ।

## ( सर्गारम्भः )

तत्र विजये जाते सैन्यस्वातन्त्र्यकाले सर्व-पूर्वं हनूमान् सीतां समेत्य स्वातन्त्र्यम्प्रदर्शयन् स्वयं स्वमनसा ब्रूते—

समुपेत्य ततः सीतामुक्तवान् पवनाऽऽत्मजः ।
दिष्ट्या वर्धस्व वैदेहि ! हतस् त्रैलोक्य-कण्टकः ॥ १ ॥

**अन्वयः**—ततः पवनात्मजः सीतां समुपेत्य उक्तवान् । हे वैदेहि ! दिष्ट्या वर्द्धस्व, त्रैलोक्यकण्टकः हतः ।

**हिन्दी**—विजय होजाने पर सैन्य-स्वातन्त्र्यके समय हनूमान् जी सीताके पास आकर कहने लगे—'हे वैदेहि ! भाग्यसे आपकी विजय हो गयी । तीनो लोकोंका कण्टक रावण मारा गया' ।

**व्याख्या**—ततो विजयानन्तरं, सैन्यस्वातन्त्र्यकाले विनिर्गतः स्वतन्त्रः पवनात्मजो हनूमान्, सीतां जानकीं, समुपेत्य समुपागम्य, उक्तवान् अभ्यधात् । हे वैदेहि मैथिलि! दिष्ट्या भाग्येन, वर्द्धस्व विजयस्व । त्रैलोक्य-कण्टकः त्रिलोकीत्रिशूलरूपः ( प्रतोदकत्वादित्यर्थः ) रावणः, हतः हिंसितः ।

**तिङन्तः**—विध्यादिषु निमिन्त्रणेऽर्थेऽत्र लोट् । वृधु वृद्धौ (भ्वादिस्थ उदात्तानुदात्तेत् ) ॥ १ ॥

प्रथमपद्ये वृधेर्धातोरुपादानेनाध्येतुरभ्युदयः स्यादिति ध्वनितमित इतिवृत्तं प्रस्तौति—

अनुजानीहि हन्यन्तां मयैताः क्षुद्र-मानसाः ।
रक्षिकास् तव राक्षस्यो, गृहाणैतासु मत्सरम् ॥ २ ॥

**अन्वयः**—अनुजानीहि, तव रक्षिकाः एताः क्षुद्रमानसाः राक्षस्यः मया हन्यन्ताम् । आसु मत्सरम् गृहाण ।

**हिन्दी**—मुझे आज्ञा दो, तुम्हारी रक्षिकाओं—क्षुद्रबुद्धि इन राक्षसियोंको—मैं मार डालूं । इनमें अपनी ईर्ष्याको पूरा करो ।

**व्याख्या**—अनुजानीहि अनुज्ञां देहि, रावणाज्ञया तव भर्त्सनार्थं, रक्षिकाः एताः, क्षुद्रमानसाः पापाशयाः, राक्षस्यो निशाचर्यः, हन्यन्ताम् मया हनुमता हिंस्यन्ताम् । आसु सर्वासु, मत्सरम्, ईर्ष्यां क्रोधं, गृहाण आदत्स्व, पूरय स्वकण्टप्रतीकारमित्यर्थः ।

**तिङन्तः**—अनुजानीहि गृहाणेत्यत्र प्रार्थनायाम्, हन्यन्तामित्यत्र विधौ कर्मणि लोट् । सिद्धिस्तु क्र्यादिस्थयोर्जाग्रहोः 'ज्ञाजनोर्जा ७।३।७९' 'हलः श्नः शानज्झौ ३।१।८३' ग्रहिज्या० ६।१।१६' इत्येतैः कार्या । हन्यतामिति 'सार्वधातुके यक् ३।१।६७' इति ॥ २ ॥

तृणहानि दुराऽऽचारा घोर-रूपाऽऽशय-क्रियाः ।
हिंस्रा भवतु ते बुद्धिरेतासु कुरु निष्ठुरम् ॥ ३ ॥

**अन्वयः**—दुराचारा घोररूपाशयक्रिया एताः तृणहानि । एतासु ते बुद्धिः हिंस्रा भवतु । निष्ठुरं कुरु चेत इति शेषः ।

**हिन्दी**—दुष्ट आचार-विचार वाली तथा भयानक रूप एवम् अभिप्राय (कामना) वाली इनको मार डालूं । इनके प्रति तुम्हारी क्रूरबुद्धि होनी चाहिये और तुम्हें अपने चित्तको निष्ठुर करना चाहिये ।

**व्याख्या**—दुराचाराः दुराचारिण्यः, घोररूपाशयक्रियाः भयानकाकाराभिप्रायकर्माणश्चेति ताः, तृणहानि हिनसानि । एतासु दुष्टासु, ते तव, बुद्धिः मतिः, हिंस्रा क्रूरा, भवतु अस्तु । तथा चेतः, निष्ठुरं क्रूर, कुरु विधेहि ।

**तिङन्तः**–प्रार्थनायां विधौ च लोट् । दुः दुष्टः आचारो यासां ताः । घोराः रूपाशयक्रियाः यासाम् ताः इति पृथक् बहुव्रीहिं विधाय, रूपाणि च आशयाश्च क्रियाश्चेति अनेकपदबहुव्रीह्यपेक्षया द्वन्द्व एव कार्यः । शसि विभक्तौ रूपाणि ॥३॥

पश्चिमं करवामैतत् प्रियं देवि ! वयं तव ।
ततः प्रोक्तवती सीता वानरं करुणाऽऽशया ॥ ४ ॥

**अन्वयः**—हे देवि ! वयम् एतत् तव पश्चिमं प्रियं करवाम । ततः करुणाशया सीता वानरं प्रोक्तवती ।

**हिन्दी**—हे देवि ! यदि आप आज्ञा दें तो हम आपका यह आखिरी प्रिय कार्य सम्पन्न करें । तब सीताजी दयार्द्रहृदय होकर वानरसे बोलीं ।

**व्याख्या**–हे देवि पूज्ये सीते ! वयम् एतत् पुरोक्तम्, तव सीतायाः, पश्चिमं चरमम्, प्रियम् इष्टं, करवाम सम्पादयाम, यदि त्वमनुजानीहि । ततः करुणाशया दयार्द्रहृदया, सीता जानकी, वानरं मारुतिं, प्रोक्तवती अभ्यधात् ।

**तिङन्तः**—अनुज्ञायां लोट् । 'अस्मदो द्वयोश्च १।२।५९' इत्येकत्वेऽन्यतरस्यां बहुत्वम् । 'आडुत्तमस्य पिच्च ३।४।९२' इति पित्त्वाद् गुणेऽवादेशः ॥ ४ ॥

'उपशाम्यतु ते बुद्धिः पिण्ड-निर्वेश-कारिषु ।
लघु-सत्त्वेषु दोषोऽयं यत्-कृतो निहतोऽसकौ ॥ ५ ॥

**अन्वयः**—पिण्डनिर्वेशकारिषु लघुसत्त्वेषु ते बुद्धिः उपशाम्यतु । यत्कृतः अयं दोषः असकौ निहतः ।

**हिन्दी**–अपना ऋण चुकाने वाले क्षुद्रप्राणियोंके प्रति तुम्हें करुणाबुद्धि करनी

चाहिए ऐसी नहीं । जिसके द्वारा यह दोष हुआ था वह तुच्छ तो मार ही डाला गया है ।

**व्याख्या**—पिण्डनिर्वेशकारिषु ग्रासनिष्क्रयपूरकेषु, लघुसत्त्वेषु क्षुद्रप्राणिषु,ते तव,बुद्धिर्मतिः,उपशाम्यतु शान्ता करुणार्द्रा भवतु, न क्रूरा । यत्कृतो यद्विहितोऽयं मत्कष्टप्रदानरूपो दोषोऽपराधः, असकौ कुत्सितो रावणः, निहतो विनष्ट एव ।

**तिङन्तः**—सर्वत्रैव विधौ लोट् । '**शमामष्टानां दीर्घः श्यनि ७।३।७४**' इति दीर्घः । असकौ इति कुत्सायामकच् '**अव्ययसर्वनाम्नामकच् प्राक् टेः ५।३।७१**' इति । '**अदस औ सुलोपश्च ७।२।१०७**' इत्यादिना रूपसिद्धिः ॥ ५ ॥

**न हि प्रेष्य-वधं घोरं करवाण्यस्तु ते मतिः ।**
**एधि कार्य-करस् त्वं मे गत्वा प्रवद राघवम् ॥ ६ ॥**

**अन्वयः**—हि यतः घोरं प्रेष्यवधं करवाणीति ते मतिर्न अस्तु । त्वं मे कार्यकर एधि, गत्वा राघवं प्रवद ।

**हिन्दी**—देखो हनुमान् ! महापापजनक नौकरोंका वध करनेकी बुद्धि मत करो । मेरा एक काम करो, जाकर रामचन्द्रजीसे कहो ।

**व्याख्या**—हि यतः, घोरं महापापजनकं, प्रेष्यवधं भृत्यघातं, करवाणि विदधानि इति, ते तव, मतिः बुद्धिः, न नहि, अस्तु भवतु । त्वं हनुमान्, मे मम,कार्यकरः कृत्यकरणेऽनुकूलः, एधि भव । गत्वा प्रगम्य, राघवं रामं, प्रवद ब्रूहि।

**तिङन्तः**—'**आशिषि लिङ्लोटौ ३।३।१७३**' इति लोटः अस्तु रूपम् । एवमेव एधि ब्रूहि इत्यत्राप्याशिष्येव लोट् । सिद्धिस्तु शपो लुकि '**श्नसोरल्लोपः ६।४।१११**' इति अल्लोपे '**घ्वसोरेद्धावभ्यासलोपश्च ६।४।११९**' इति स एत्वे '**असिद्धवदत्राभात् ६।४।२२**' इति समानाश्रयत्वादेत्वस्यासिद्धया '**हुझल्भ्यो हेर्धिः ६।४।१०१**' इति धत्वम् । एवम् ब्रूहि शपो लुका सिध्यति । कार्यकर इत्यत्रानुलोम्ये '**कृञो हेतुता० ३।२।२०**' इति टः ॥ ६ ॥

**'दिदृक्षुर् मैथिली राम ! पश्यतु त्वाऽविलम्बितम्' ।**
**तथेति स प्रतिज्ञाय गत्वा राघवमुक्तवान् ॥ ७ ॥**

**अन्वयः**—हे राम ! दिदृक्षुः मैथिली त्वा अविलम्बितं पश्यतु । स तथा इति प्रतिज्ञाय रामं गत्वा उक्तवान् ।

**हिन्दी**—हे राम ! सीताजी आपको देखना चाहती हैं । वह जल्दी आपको देख सकें ऐसा करें । 'अच्छा मैं ऐसा करूँगा' यह प्रतिज्ञा कर हनुमान् रामके पास जाकर बोले ।

**व्याख्या**——हे राम ! दिदृक्षुः दर्शनेच्छुः, मैथिली सीता, त्वा भवन्तमित्यर्थः, अविलम्बितं द्रुतं, पश्यतु अवलोकयतु । हनूमान्, तथा 'एवं करिष्यामि', इति एवं, प्रतिज्ञाय प्रतिश्रुत्य, रामं राघवं, गत्वा प्रणम्य, उक्तवान् अभिहितवान् ।

**तिङन्तः**——सर्वत्र प्रार्थनायां लोट् । दिदृक्षुः इति दृशेः सन्नन्तात् 'सनाशंसभिक्ष उः ३।२।१६८' इत्युः । '**त्वामौ द्वितीयायाः** ८।१।२३' इति त्वादेशः ॥७॥

हनुमान् राममाख्याति सीताप्रतिज्ञातम्——

**उत्सुकाऽऽनीयतां देवी काकुत्स्थ-कुल-नन्दन ! ।**
**क्ष्मां लिखित्वा विनिश्वस्य स्वराऽऽलोक्य विभीषणम् ॥ ८ ॥**
**उक्तवान् राघवः 'सीतामानयाऽलंकृतामिति' ।**
**गत्वा प्रणम्य तेनोक्ता मैथिली मधुरं वचः ॥ ९ ॥**

**अन्वयः**——हे काकुत्स्थकुलनन्दन ! उत्सुका देवी आनीयताम् । ततः राघवः क्ष्माम् अङ्गुष्ठेन लिखित्वा, विनिश्वस्य, स्वः आलोक्य, विभीषणम् अलङ्कृताम् सीताम् आनय इति उक्तवान् । तेन गत्वा मधुरं वचः मैथिली उक्ता ।

**हिन्दी**—हे ककुत्स्थकुलके नन्दन राम ! सीताजी आपको देखनेके लिये उत्सुक हैं । उन्हें बुलवाइये । इसके बाद रामने अँगूठेसे पृथ्वी कुरेदी, लम्बी श्वास ली और आकाशकी ओर ताककर विभीषणसे कहा—'सीताजी को सजाकर ले आओ' । तब वे जाकर सीताजीसे मधुर वचन बोले ।

**व्याख्या**——हे काकुत्स्थकुलनन्दन रघुवंशशिरोमणे ! देवी मैथिली, भवन्तं भगवन्तं, द्रष्टुम् अवलोकयितुम्, उत्सुकाऽस्ति, आनीयताम् आनेतुमादिश्यताम् इति । ततः राघवः रामः, क्ष्मां कुम्, अंगुष्ठेन लिखित्वा उल्लिख्य, विनिश्वस्य दीर्घश्वासमाकृष्य, स्वर्दिवम्, आलोक्य वीक्ष्य, विभीषणं लङ्केशमुक्तवान् अवोचत्, अलङ्कृतां भूषितां, सीतां जानकीम्, आनय इति । तेन विभीषणेन, गत्वा प्रणम्य, मधुरं मृदु, वचः वचनं, मैथिली सीता, उक्ता अभिहिता ।

**तिङन्तः**——आनीयतामिति प्रार्थनायां कर्मणि लोट् । आनयेति आज्ञायां कर्तरि लोट । सिद्धिरुभयत्र सरला ॥ ८–९ ॥

विभीषणो रामाज्ञया द्वादशपद्यान्तं सीतां विविधं वक्ति—

**'जहीहि शोकं वैदेहि ! प्रीतये धेहि मानसम् ।**
**रावणे जहिहि द्वेषं, जहाहि प्रमदा-वनम् ॥ १० ॥**

**अन्वयः**——हे वैदेहि ! शोकं जहीहि, प्रीतये मानसं धेहि । रावणे द्वेषं जहिहि, प्रमदावनं जहाहि ।

**हिन्दी**——हे जनकनन्दिनि ! शोक छोड़िये, मनमें प्रसन्नता लाइये। रावणके प्रति विद्वेष छोड़िये। इस प्रमदावन ( अशोक वाटिका ) को भी छोड़िये।

**व्याख्या**—हे वैदेहि विदेहनन्दिनि ! शोकं परितापं, जहीहि त्यज। प्रीतये प्रेम्णे, मानसं चेतः, धेहि स्थापय, घटयस्वेति यावत्। रावणे लङ्केशे, विद्वेषं मत्सरं, जहिहि अपहर। प्रमदावनम् रावणरक्षितम् अशोकवनं, जहाहि परिहर।

**तिङन्तः**——ओहाक् त्यागे इति जुहोत्यादिस्थस्य विधौ लोटि 'जहातेश्च ६।४।११६' इति ईत्वमित्वं च पाक्षिकम्। 'आ च हौ ११७' इति आत्वे च त्रीणि रूपाणि। 'घ्वसोरेद्धाव० ६।४।११९' इति एत्वमभ्यासलोपश्च ॥ १० ॥

पुनर्युग्मेन सीताकर्तव्यमादिशति—

**स्नाह्यनुलिम्प धूपाय, निवस्स्वाऽऽविध्य च स्रजम्।**
**रत्नान्याऽऽमुञ्च, संदीप्ते हविर् जुहुधि पावके ॥ ११ ॥**
**अद्धि त्वं पञ्च-गव्यं च, छिन्धि संरोध-जं तमः।**
**आरोह शिबिकां हैमीं, द्विषां जहि मनो-रथान् ॥ १२ ॥**

**अन्वयः**— हे सीते ! त्वं पञ्चगव्यं च अद्धि, स्नाहि, निवस्स्व, अनुलिम्प, धूपाय (केशान्), स्रजम् आविध्य, रत्नानि आमुञ्च, संदीप्ते पावके हविः जुहुधि, संरोधजं तमः छिन्धि, हैमीं शिबिकाम् आरोह, द्विषो मनोरथान् जहि।

**हिन्दी**—हे सीते ! आप पञ्चगव्य पान करें, स्नान करें, वस्त्र पहनें, चन्दन कुङ्कुम लगावें, बालोंको धूपित करें, माला धारण करें, आभूषणोंको पहनें, प्रज्वलित अग्निमें हवन करें, रावणके घरमें रहनेके अपने सन्तापको दूर करें, सोनेकी पालकी पर चढ़ें तथा शत्रुओंके मनोरथको चूर्ण करें।

**व्याख्या**—हे सीते ! सर्वप्रथमं त्वं, पञ्चगव्यम्, अद्धि अशान। ततः स्नाहि सुनुहि। निवस्स्व=वस्त्रे परिधेहि। अनुलिम्प=चन्दनादिनाङ्गलेपं कुरु। धूपाय=धूपितान् केशान् धेहि। स्रजं पुष्पमालाम्, आविध्य बधान। रत्नानि भूषणानि, आमुञ्च=विन्यस्य यथास्थानम्। संदीप्ते समिद्धतमे, पावके वह्नौ, हविः हव्यम्, जहुधि अर्पय। संरोधजं रावणगृहवासजन्यं, शोकं सन्तापं, छिन्धि अपनय। हैमीं सौवर्णीम्, शिबिकाम् स्त्रीयानम्, आरोह अधितिष्ठ। द्विषां शत्रूणां, मनोरथान् संकल्पान्, जहि विनाशय।

**तिङन्तः**——सर्वत्र विधौ लोट्। वस आच्छादने इति आदादिकस्य शपो लुकि न्युपसर्गयोगः। आविध्येति व्यधेः दैवादिकस्य सम्प्रसारणम्। जहीति 'हन्तेर्जः

६।४।३६' इति जादेशः । '**असिद्धवदत्राभात्** ६।४।२२' इति जादेशस्यासिद्धया न हिलोपः ॥ ११-१२ ॥

**तृणेढु त्वद्-वियोगोत्थां राजन्यानां पतिः शुचम् ।**
**भवतादधियुक्ता त्वमत ऊर्ध्वं स्व-वेश्मनि ॥ १३ ॥**

**अन्वयः**—राजन्यानां पतिः त्वद्वियोगोत्थां शुचं तृणेढु । अत ऊर्ध्वं त्वं स्ववेश्मनि अधियुक्ता भवतात् ।

**हिन्दी**—हे सीते ! राजाओके स्वामी तुम्हारे वियोगसे उत्पन्न शोकको दूर करें; और तुम इसके वाद अपने घरमें आरामसे निवास करो ।

**व्याख्या**—हे सीते ! गतायां त्वयि, राजन्यानां क्षत्रियाणां, पतिः रामः, स्वामी राघवः, त्वद्वियोगोत्थां भवद्विरहजां, शुचं शोकं, तृणेढु हिनस्तु । अतः अस्मात् कालात्, ऊर्ध्वम् उपरि, त्वम् भवती, स्ववेश्मनि निजभवने, अधियुक्ता अधिष्ठिता, भवतात् भूयाः ।

**तिङन्तः**—आशिषि लोटि '**तृणह इम्** ७।३।९२' इति इमि,ढत्व-घत्व-ष्टुत्व ढ-लोपाः। '**तुह्योः तातङ्ङाशिष्यन्तरस्याम्**७।१।३५'इति ङित्वेऽपि सर्वादेशः॥१३॥

**दीक्षस्व सह रामेण त्वरितं तुरगाऽध्वरे ।**
**दृश्यस्व पत्या प्रीतेन प्रीत्या प्रेक्षस्व राघवम् ॥ १४ ॥**

**अन्वयः**—तथैव तुरगाध्वरे त्वरितं रामेण सह दीक्षस्व । प्रीतेन पत्या त्वं दृश्यस्व । तथा त्वं प्रीत्या रामं वीक्षस्व ।

**हिन्दी**—उसी प्रकार तुम अश्वमेध यज्ञमें जल्दी ही अपने पति रामके साथ दीक्षित हो जाओ । प्रसन्न होकर राम तुम्हें देखें और तुम प्रसन्नतासे उन्हें देखो ।

**व्याख्या**–तथैव तद्वत्, हे सीते ! त्वं, तुरगाध्वरे अश्वमेधयागे, त्वरितं तूर्णं, रामेण स्वपतिना, सह सार्द्धं, दीक्षस्व दीक्षां गृहाण । प्रीतेन प्रसन्नेन, पत्या भर्त्रा, दृश्यस्व वीक्षस्व । त्वं च, प्रीत्या प्रेम्णा, राघवं रामं, प्रेक्षस्व पश्य[1] ।

**तिङन्तः**—दृश्यस्वेति कर्मणि लोट् । अन्यत्र सर्वत्र कर्तरि । उभयत्रापि विभीषणकर्तृकाशीरेव ॥ १४ ॥

**अयं नियोगः पत्युस् ते, कार्या नाऽत्र विचारणा ।**
**भूषयाऽङ्गं प्रमाणं चेद्, रामं गन्तुं यतस्व च ॥ १५ ॥**

---

[1] यत्र भार्या च भर्ता च सन्तुष्टौ स्तः परस्परम् ।
तत्र शक्तिशिवौ प्रीतौ श्रीदीप्तिबलवृद्धिभिः ॥ इति शिक्षयति पद्यम् ।

**अन्वयः**—अयं ते पत्युः नियोगः । अत्र विचारणा न कार्या । यदि ते मद्वचसि प्रमाणं, तर्हि अङ्गं भूषय, रामं गन्तुं यतस्व च ।

**हिन्दी**—हे महारानि ! यह आपके पतिका आदेश है । इस पर कुछ ननु नच न करें । यदि आपको मेरी बातोंपर विश्वास है तो अङ्गोंको विभूषितकर चलनेकी तैयारी करें ।

**व्याख्या**—हे महाराज्ञि ! अयम् एषः, ते तव, पत्युः भर्तुः, नियोगः आदेशः । अत्र अस्मिन्, विचारणा न वेति परामर्शः, न नहि, कार्या कर्तव्या । चेद् यदि, मद्वचसि मद्वाक्ये,प्रमाणं तव आस्था,तर्हि तदा,अङ्गं शरीरं, भूषय विभूषय, रामं विजयिनं रामचन्द्रं, गन्तुमुपस्थातुं, यतस्व घटयस्व । सर्वत्र विधौ लोट् ॥१५॥

**मुदा संयुहि काकुत्स्थं, स्वयं चाऽऽप्नुहि सम्मदम् ।**
**उपेह्यूर्ध्वं मुहूर्तात् त्वं देवि ! राघव-सन्निधिम् ॥ १६ ॥**

**अन्वयः**—हे देवि ! त्वं मुदा काकुत्स्थं संयुहि । स्वयं च सम्मदम् आप्नुहि । मुहूर्तात् ऊर्ध्वं राघव-सन्निधिम् उपेहि ।

**हिन्दी**—हे देवि ! आप रामचन्द्रको आनन्दित कर दें । स्वयं भी (सम्मद) हर्ष प्राप्त करें । थोड़ी देर बाद रामचन्द्रका सान्निध्य प्राप्त कर लें ।

**व्याख्या**—हे देवि सीते ! त्वं भवती, मुदा आनन्देन, काकुत्स्थं रामं,संयुहि मिश्रय । स्वयं च अपि, सम्मदं प्रमोदम्, आप्नुहि लभस्व । मुहूर्तात् क्षणात्, ऊर्ध्वम् उपरि, राघवसन्निधिं राम-सान्निध्यम्, उपेहि अधिगच्छ ।

**तिङन्तः**—सर्वत्र प्रार्थनायां लोट् । '**प्रमदसम्मदौ हर्षे** ३।३।६८' इत्यप् । '**कर्मण्यधिकरणे च** ३।३।९३' इति कि प्रत्ययः । '**आतो लोप इटि च** ६।४।६३' इत्यालोपः सन्निधिः ॥ १६ ॥

**ऊर्ध्वं मुहूर्तादह्नोऽङ्ग ! स्वामिनी स्म भव क्षितेः ।**
**राज-पत्नी-नियोग-स्थमनुशाधि पुरी-जनम् ॥ १७ ॥**

**अन्वयः**—अङ्ग ! अह्नः मुहूर्तात् ऊर्ध्वं क्षितेः स्वामिनी भव स्म । राजपत्नी-नियोगस्थं पुरीजनम् अनुशाधि ।

**हिन्दी**—हे सीते ! दिनके एक मुहूर्तके बाद आप पृथ्वीकी स्वामिनी हो जायें और अयोध्याके नागरिकों पर पटरानीकी आज्ञामें स्थित जानकर शासन करें ।

**व्याख्या**—अङ्ग हे देवि ! अह्नो दिवसस्य, मुहूर्तात् तदात्मकात् कालात्, ऊर्ध्वम् उपरि, पृथिव्याः भुवः, स्वामिनी ईश्वरी, भव स्म=एधि स्म । पुरीजनं

अयोध्यानगरीनिवासिनं लोकं, राजपत्नीनियोगस्थं सन्तम् राममहिषीसमादेश पालकं सन्तम्, अनुशाधि विधेहि, कुरु इत्यर्थः ।

**तिङन्तः**––'स्मे लोट् ३।३।१६५' इति प्रैषे लोट् । अनुशाधीति आशिषि लोट् । 'शा हौ ६।४।३५' इति शादेशे समानाश्रयत्वादसिद्धत्वे 'हुझल्भ्यो हेर्धिः ६।४।१०१' इति धिः ॥ १७ ॥

कदाचिल्लज्जया नोत्सहेत सीतेति भूयो भूयः पूर्वोक्तमेवावर्तयति––

**उत्तिष्ठस्व मते पत्युर्, यतस्वाऽलङ्कृतौ तथा ।**
**प्रतिष्ठस्व च तं द्रष्टुं द्रष्टव्यं त्वं मही-पतिम् ॥ १८ ॥**

**अन्वयः**––पत्युः मते उत्तिष्ठस्व तथा अलङ्कृतौ यतस्व । द्रष्टव्यं तं महीपतिम् द्रष्टुम् त्वं प्रतिष्ठस्व ।

**हिन्दी**––आप स्वामी की सम्मतिको पूरा करें तथा अपनेको सजानेमें लग जायँ । दर्शनीय उस विजयी राजाको देखनेके लिये आप प्रस्थान करें ।

**व्याख्या**––पत्युः भर्तुः, मते सम्मतौ, उत्तिष्ठस्व सन्नद्धा भव । तथा तद्वत्, अलङ्कृतौ भूषणक्रियायाम्, यतस्व यत्नं कुरु । ( अलङ्कृत्य च ) द्रष्टव्यं दर्शनार्हम् अवश्यद्रष्टव्यं, तं विजयिनं, महीपतिम् राजानं, द्रष्टुम् समर्चितुं, प्रतिष्ठस्व गच्छ । ११ एकादशोक्तमेवेहापि पुनरुक्तमुत्साहयितुम् आनन्दातिरेके ।

**तिङन्तः**––'उदोऽनूर्ध्वकर्मणि १।३।२४' इति तङ् । 'अर्हे कृत्यतृचश्च ३।३।१६९' आहो आवश्यकत्वे 'कृत्याश्च ३।३।१७१' इति वा । प्रार्थनायां लोट् । 'समवप्रविभ्य० १।३।२२' इति तङ् ॥ १८ ॥

एवं विभीषणोक्ता सीता सन्नह्यति पतिं गन्तुम्––

**अनुष्ठाय यथाऽऽदिष्टं नियोगं जनकात्मजा ।**
**समारूढवती यानं पट्टांऽशुक-वृताऽऽनना ॥ १९ ॥**

**अन्वयः**––जनकात्मजा यथादिष्टं नियोगं ( पत्युः ) अनुष्ठाय पट्टांशुकवृतानना सती यानं समारूढवती ।

**हिन्दी**––सीताजी विभीषणके कथनानुसार पतिकी आज्ञाका पालनकर रेशमी वस्त्रसे घूँघट करती हुई सवारी पर सवार हो गयीं ।

**व्याख्या**––जनकात्मजा सीता, यथादिष्टं विभीषणोक्तं, (पत्युः) नियोगम् आदेशम्, अनुष्ठाय सम्पाद्य, पट्टांशुकवृतानना क्षौमदुकूलसंवृतमुखी, यानं शिविकाम्, समारूढवती अध्यासितवती ॥ १९ ॥

तदनन्तरकृत्यमाह--

लज्जाऽऽनता विसंयोग-दुःख-स्मरण-विह्वला ।
साऽस्रा गत्वाऽन्तिकं पत्युर् दीना रुदितवत्यसौ ॥ २० ॥

**अन्वयः**--असौ पत्युरन्तिकं गत्वा लज्जाऽऽनता विसंयोगदुःखस्मरणविह्वला दीना सास्रा सती रुदितवती ।

**हिन्दी**—सीताजी पतिके पास जाकर लज्ज़ासे झुकी हुई 'वियोग दु:खको याद करके विह्वल होती हुई, दुःखिनी, आंसू भरे नेत्रोंसे रोने लगीं।' ।

**व्याख्या**—असौ सीता, पत्युः भर्तुः, अन्तिकं समीपं, गत्वा उपस्थाय, लज्जानता ह्रीविनम्रा, विसंयोगदुःखस्मरणविह्वला विरहसन्तापस्मृतिकातरा, दीना दुःखिनी, सास्रा अश्रुरुद्धकण्ठा, रुदितवती रोदनं कृतवती । इतिवृत्तवर्णनसौविध्याल्लोटोऽप्रयोगः । स्त्रीस्वभाव एव विवृतोऽत्र पद्ये ॥ २० ॥

इतो रामोक्तिमाख्याति—

प्राप्त-चारित्र्य-सन्देहस् ततस् तामुक्तवान् नृपः ।
इच्छा मे 'नाऽऽददे सीते ! त्वामहं गम्यतामतः' ॥ २१ ॥

**अन्वयः**--ततः प्राप्तचारित्र्य-सन्देहः नृपः ताम् उक्तवान् । हे सीते ! अहं त्वां न आददे इति मे इच्छा, अतः गम्यताम् ।

**हिन्दी**--सीताजीके वहां पहुँचने पर, उनके चरित्रके सम्बन्धमें सन्देह उत्पन्न होने पर रामने कहा—'हे सीते ! मैं तुम्हें ग्रहण न करूँ, यह मेरी इच्छा हुई है । अतः तुम यहाँसे इच्छानुसार चली जाओ' ।

**व्याख्या**--ततः तत्र सीतोपस्थितौ, प्राप्तचारित्र्यसन्देहः रावणोऽस्यां खण्डितचरित्रशीलो न वा इति सन्दिग्धचेताः, नृपः रामः, तां सीताम्, उक्तवान् व्याहरत् । हे सीते ! अहं त्वाम् 'न आददे न अङ्गीकरवै' इति इत्थं, मे मम, इच्छा संकल्पः, स्फुरति । अतः अस्मात् कारणात्, यथेष्टं गम्यताम् ।

**तिङन्तः**—'इच्छार्थेषु लिङ्-लोटौ ३।३।१५७' इत्युभयत्रापि लोट् ॥२१॥

रामकल्पितकारणमाख्याति तन्मुखेन—

रावणाऽङ्क-परिश्लिष्टा त्वं हृल्-लेख-करी मम ।
मतिं बधान सुग्रीवे राक्षसेन्द्रं गृहाण वा ॥ २२ ॥

**अन्वयः**—हे सीते! रावणाङ्क-परिश्लिष्टा त्व मम हृल्लेखकरी असि। सुग्रीवे मतिं बधान, राक्षसेन्द्रं वा गृहाण ।

**हिन्दी**—हे सीते देवि ! रावणके अङ्कके स्पर्श करनेके कारण तुमने मेरे हृदयमें सन्देह पैदा कर दिया है। अतः तुम सुग्रीवमें अपनी इच्छा व्यक्त करो अथवा ( या ) विभीषणको स्वीकार कर लो।

**व्याख्या**—हे सीते देवि ! रावणाङ्कपरिश्लिष्टा दशाननवक्षःस्थलक्लेशिता, त्वम् भवती, मम रामस्य, हृल्लेखकरी हृदयतापिनी जातासि। सुग्रीवे कपीन्द्रे, मतिम् इच्छां, बधान व्यक्तीकुरु। वाऽथवा, राक्षसेन्द्रं विभीषणं लङ्केशं, गृहाण स्वीकुरु।

**तिङन्तः**—हृल्लेखकरी इत्यत्र **'कृञो हेतुताच्छील्यानुलोम्येषु ३।२।२०'** इति ताच्छील्ये टः। **'हृदयस्य हृल्लेखयदण्लासेषु ६।३।५०'** इति हृदादेशः ॥ ५२ ॥

**अशान भरताद् भोगान् लक्ष्मण प्रवृणीष्व वा।**
**कामाद् वा याहि मुच्यन्तामाशा राम-निबन्धनाः ॥ २३ ॥**

**अन्वयः**—उत भरताद् भोगान् अशान, लक्ष्मणं वा वृणीष्व। कामाद् वा याहि, रामनिबन्धना आशाः मुच्यन्ताम्।

**हिन्दी**—या तो भरतजी से ही भोगोंको भोगो, अथवा लक्ष्मणजी को वर लो। अथवा इच्छानुसार चली जाओ। रामके सम्बन्धकी आशा तो छोड़ दो।

**व्याख्या**—उताहो, भरताद् मत्कनिष्ठभ्रातुः सकाशात्, भोगान् कामान्, अशान उपभुङ्क्ष्व। लक्ष्मणं वा मदीयानुजं सौमित्रिं वा, वृणीष्व। कामात् स्वेच्छया वा, याहि यत्र भवत्यै रोचेत तत्रैवोपसर्प। रामनिबन्धनाः मत्सम्बन्धिन्यः, आशाः कामनाः, मुच्यन्ताम् त्यज्यन्ताम्।

**तिङन्तः**—गतपद्ये गृहाण, इह अशान इत्युभयत्रैव **'हलः श्नः शानज्झौ ३।१।८३'** शानजादेशः। वृणीष्वेति **'प्वादीनां ह्रस्वः ७।३।८०'** ह्रस्वे, **'ई हल्यघोः ६।४।११३'** इतीत्वम् ॥ २३ ॥

निष्कर्षमाख्याति—

**क्व च ख्याता रघोर् वंशः, क्व त्वं पर-गृहोषिता।**
**अन्यस्मै हृदयं देहि नाऽनभीष्टे घटामहे ॥ २४ ॥**

**अन्वयः**—क्व च ख्यातः रघोः वंशः, परगृहोषिता च त्वं क्व, अतस्त्वम् अन्यस्मै हृदयं देहि। ( वयम् ) अनभीष्टे न घटामहे।

**हिन्दी**—कहां प्रसिद्ध रघुका वंश और कहां दूसरेके भवनमें रहनेवाली तुम ? दोनोंमें कितना अन्तर है। इसलिये तुम दूसरेको अपना हृदय दो। हम रघुवंशी क्षत्रिय अनभीष्ट कार्योंमें अपनेको नहीं लगावेंगे।

**व्याख्या**—क्व दूरम्, ख्यातः परमप्रसिद्धः, रघोः राज्ञः, वंशः कुलम् । परगृहोषिता अन्यभवनस्थिता च, त्वं सीता, क्व दूरम् । उभौ क्व–शब्दौ महदन्तरं बिभृतः । अतः अस्मात् कारणात्, त्वं परगृहगता सीता, अन्यस्मै पुरुषाय, हृदयं स्वाशयं, देहि अर्पय । वयम् रघुवंशीयाः, अनभीष्टे अनभिमते विषये, न नहि, घटामहै वर्तामहै ।

**तिङन्तः**—देहीति विधौ लोट् । घटामहै इति निमन्त्रणे लोट् ।। २४ ।।

**यथेष्टं चर वैदेहि ! पन्थानः सन्तु ते शिवाः ।**
**कामास् तेऽन्यत्र तायन्तां, विशङ्कां त्यज मद्-गताम् ।। २५ ।।**

**अन्वयः**—हे वैदेहि ! त्वं यथेष्टं चर । ते पन्थानः शिवाः सन्तु । अन्यत्र ( पुंसि ) ते कामाः तायन्ताम् । मद्गतां विशङ्काम् अपि त्यज ।

**हिन्दी**—हे वैदेहि ! तुम यथेष्ट जहाँ चाहो वहाँ चली जाओ । तुम्हारा मार्ग कल्याणकारी होवे । तुम्हारी इच्छाएँ अन्य पुरुषोंद्वारा ही पूर्ण हों । मेरे विषयमें कोई सन्देह मत रखो कि यह क्या कहेगें । मेरी ओरसे तो तुम्हें छुट्टी है ।

**व्याख्या**—हे वैदेहि जनकनन्दिनि ! त्वं, यथेष्टं यथाकामं, चर अनुतिष्ठस्व । ते तव, पन्थानो मार्गाः, शिवाः निर्विघ्नाः, सन्तु भूयासुः । ते तव, कामाः संकल्पाः, अन्यत्र परस्मिन् पुंसि, तायन्ताम् वर्द्धन्ताम् । मद्गतां विशङ्कां, 'रामः किं मां वक्ष्यति' इति सन्देहम् अपि, निश्चयेन, त्यज जहिहि । मत्तस्तु भवती सर्वथा परित्यक्तमात्मानं जानातु इत्यर्थः ।

**तिङन्तः**—अत्रादावन्ते च विधौ लोटौ । मध्ये तूभयत्रैवाशिषि लोटौ ।।२५।।

इतः प्रभृति सर्वैर्या सीता सम्यगुत्तरयति—

**ततः प्रगदिता वाक्यं मैथिलाऽभिजना नृपम् ।**
**स्त्रीसामान्येन सम्भूता शङ्का मयि विमुच्यताम् ।। २६ ।।**

**अन्वयः**—ततः मैथिलाभिजना नृपं वाक्यं प्रगदिता । हे राम ! स्त्रीसामान्येन मयि सम्भूता शङ्का विमुच्यताम् ( मिथ्यात्वादिति भावः ) ।

**हिन्दी**—तत्पश्चात् सीताने राजा रामचन्द्रसे कहना प्रारम्भ किया—'हे राम ! आप स्त्री-सामान्यके द्वारा उत्पन्न शङ्काको मेरे विषयमें न करें ।'

**व्याख्या**—ततः रामोक्तेरनन्तरम्, मैथिलाभिजना विदेहपुत्री, नृपं क्षत्रियाभिमानिनं रामं, वाक्यम् उत्तरवचनं, प्रगदिता वक्तुं प्रारभत । हे राम ! स्त्रीसामान्येन नारीसाधारण्येन, सम्भूना समुत्पन्ना, शङ्का सन्देहः, मयि

सीतायां, विमुच्यताम् त्यज्यताम् । नाहं साधारण-स्त्री अस्मि, यत्परपुरुषसम्पर्कमाचरिष्यामि इति भावः ।

**तिङन्तः**—प्रगद्भितेति 'आदिकर्मणि क्तः कर्तरि च ३।४।७१' इति कर्तरि क्तः। प्रार्थनायामिह लोट् ॥ २६ ॥

**दैवाद् बिभीहि काकुत्स्थ ! जिह्रीहि त्वं तथा जनात् ।**
**मिथ्या मामभिसंक्रुध्यन्न-वशां शत्रुणा हृताम् ॥ २७ ॥**

**अन्वयः**—हे काकुत्स्थ ! त्वं दैवाद् बिभीहि, तथा शत्रुणा हृताम् माम् मिथ्या अभिसंक्रुध्यन् जनात् जिह्रीहि ।

**हिन्दी**—हे ककुत्स्थ राजाके वंशज ! आप देवताओंसे तो डरें । एवं शत्रुसे हर ली गयी पराधीन मुझ सीताके ऊपर मिथ्या आरोपसे क्रुद्ध होते हुए आप लोगोंसे तो लज्जित होइये ।

**व्याख्या**—हे काकुत्स्थ ! ककुत्स्थस्य राज्ञोऽपत्यं पुमान्, त्वं दैवाद् देवसमूहात्, बिभीहि भयं कुरु । तथा तद्वत्, शत्रुणा अरिणा, हृताम् अपवाहिताम्, अवशां पराधीनाम्, माम् सीताम्, मिथ्या मुधा, अभिसंक्रुध्यन् अभिद्रुह्यन्, जनात् लोकात्, जिह्रीहि लज्जस्व, अभिवीक्ष्येत्यर्थः ।

**तिङन्तः**—'क्रुधद्रुहोरुपसृष्टयोः कर्म १।४।३८' इति सम्प्रदानत्वं निषिध्य कर्मत्वम् । जनादिति ल्यब्लोपे पञ्चमी ॥ २७ ॥

**चेतसस् त्वयि वृत्तिर् मे शरीरं रक्षसा हृतम् ।**
**विदांकुर्वन्तु सम्यञ्चो देवाः सत्यमिदं वचः ॥ २८ ॥**

**अन्वयः**—मे चेतसः वृत्तिः त्वयि, रक्षसा मे शरीरं हृतम् ( न त्वन्यत् किञ्चित् ) । इदं सत्यं वचः । सर्वे सम्यञ्चः देवाः विदांकुर्वन्तु ।

**हिन्दी**—मेरी चित्तवृत्ति तो आपमें ही रहती है । राक्षसने तो केवल मेरी देह हरी थी । मेरी इस सत्य बातको ठीक-ठीक सर्वद्रष्टा देवता लोग जानें ( मैं प्रार्थना करती हूँ ) ।

**व्याख्या**—मे मम सीतायाः, चेतसो मनसः, वृत्तिः संकल्पः, त्वयि रामे एव, तिष्ठति वर्तते । रक्षसा राक्षसेन तु, शरीरं वपुः, हृतम् अपवाहितम् । तत्तु अन्यत् । तेन न किञ्चिन्मेऽपहृतम् । इदम् उच्यमानं, सत्यं तथ्यं, वचः वचनम्, सम्यञ्चः सर्वत्रगाः, देवाः गीर्वाणाः, विदांकुर्वन्तु जानन्तु, विदन्तु वा ।

**तिङन्तः**—अञ्चतिपरकस्य समः 'समः समि ६।३।९३' इति सम्यादेशः । 'विदांकुर्वन्त्वित्यन्यतरस्याम् ३।१।४१' पाक्षिके आमि लोट कार्यम् ॥ २८ ॥

**त्वं पुनीहि पुनीहीति पुनन् वायो ! जगत्-त्रयम् ।**
**चरन् देहेषु भूतानां विद्धि मे बुद्धि-विप्लवम् ॥ २९ ॥**

**अन्वयः**—हे वायो ! पुनीहि पुनीहि इति जगत्त्रयं पुनामीति पुनन् त्वम् भूतानां देहेषु चरन् मे बुद्धिविप्लवं विद्धि ।

**हिन्दी**—हे वायुदेव ! तीनों लोकोंको बार-बार खूब पवित्र करनेवाले, सभी प्राणियोंके शरीरमें सञ्चार करनेवाले,आप मेरी बुद्धिकी तुच्छता (गम्भीरता) को जानें, मैं प्रार्थना करती हूँ ।

**व्याख्या**—हे वायुदेव ! पुनीहि पुनीहीति, पुनामीति, भृश पौनःपुन्येन, जगत्त्रयं लोकत्रयं, पुनन् पुनानः, भूतानां प्राणिनां, देहेषु कायेषु, चरन् ससर्पन्, मे मम, बुद्धिविप्लवम् मत्यन्यथात्वम्, विद्धि जानीहि ।

**तिङन्तः**—अत्र हि पाणिनीयाष्टकस्य तृतीयाध्यायतुरीयपादगपञ्चसूत्राणां क्रमशः उदाहरणानि । तत्र **'धातुसम्बन्धे प्रत्ययाः ३।४।१'** इति चरन्, पुनन् इत्यादौ शतृ । पुनीहि पुनीहि इति पुनन् इत्यादौ **'क्रियासमभिहारे० ३।४।२'** लोट्, **'यथाविध्यनुप्रयोगः पूर्वस्मिन् ३।४।४'** इत्यनुप्रयोगश्च ॥ २९ ॥

**खमट द्यामटाऽटोर्वीमित्यटन्त्योऽति-पावनाः ।**
**यूयमापो ! विजानीत मनो-वृत्तिं शुभां मम ॥ ३० ॥**

**अन्वयः**—खम् अट, द्याम् अट, उर्वीम् अट, अटन्त्यः हे आपः ! यूयम् अतिपावनाः सत्यः मम शुभां मनोवृत्तिं जानीत इति प्रार्थयामि ।

**हिन्दी**—आकाशमें, स्वर्गमें, पृथ्वीपर घूमनेवाले हे वरुणदेव ! मैं आपसे बहुत ही प्रार्थना करती हूँ कि आप मेरी अच्छी चित्तवृत्तिको जानें, क्योंकि राम सन्देहमें हैं ।

**व्याख्या**—खम् नभः, अट व्रज, दिवं स्वः, अट व्रज, उर्वीम् धराम्, अट व्रज, इत्येवम् सर्वत्र अटन्त्यो भ्रमन्त्यः, हे आपो वरुण! यूयम् भवन्त्योऽतिपावनाः भृशं पवित्राः सत्यः, मम सीतायाः, मनोवृत्तिम् चित्तसंकल्पं, विजानीत वित्त, इति प्रार्थयामि ।

**तिङन्तः**—अत्र खमटाम दिवमटाम उर्वीमटाम इत्यभिप्राया अटनक्रियाः आकाशादिभेदाद् भिन्ना इति क्रियासमुच्चयात् **'समुच्चयेऽन्यतरस्याम् ३।४।३'** इति लोट् । बहुत्वेऽपि हि तस्य लुक् इत्यादि कार्यम् । समुच्चये सामान्यवचनस्याटतेरेवानुप्रयोगश्च । जानीतेति प्रार्थनायां लोट् ॥ ३० ॥

**जगन्ति धत्स्व धत्स्वेति दधती त्वं वसुन्धरे !**
**अवेहि मम चारित्रं नक्तं-दिवम-विच्युतम् ॥ ३१ ॥**

**अन्वयः**—धत्स्व धत्स्व इति जगन्ति दधती त्वं वसुन्धरे ! नक्तं दिनम् अविच्युतम् मम चारित्रम् अवेहि ।

**हिन्दी**—हे वसुन्धरे ! तुम तो सारे जगत्को अपने ऊपर धारण करती रहती हो । अतः रात दिन बराबर रहते हुए तुम मेरे अखण्डित चरित्रको जानो, यह मेरी प्रार्थना है ।

**व्याख्या**—अहं पुनः पुनः भृशं दधे इति धत्स्व धत्स्व, जगन्ति लोकान्, दधती दधाना, त्वं, वसुन्धरे पृथ्वि देवि! नक्तं-दिवं रात्रिन्दिवम्, अविच्युतम् अखण्डितम्, मम सीतायाः, चारित्रम् इतिवृत्तम्, अवेहि जानीहि ।

**तिङन्तः**—जानीहि प्रार्थनायां, पूर्वत्र च क्रियासमभिव्याहारे लोट् । तस्य चात्मनेपद-सम्बन्धिनः स्वादेशः ॥ ३१ ॥

**रसान् संहर, दीप्यस्व, ध्वान्तं जहि, नभो भ्रम ।**
**इतीहमानस् तिग्मांऽशो ! वृत्तं ज्ञातुं घटस्व मे ॥ ३२ ॥**

**अन्वयः**—हे तिग्मांशो भानो ! रसान् संहर, दीप्यस्व, ध्वान्तं जहि, नभो भ्रम, इति ईहमानः त्वम् मे वृत्तं ज्ञातुं घटस्व ।

**हिन्दी**—हे सूर्य भगवन् ! आप तो रसोंको संहारते हैं, सोखते हैं, चमकते हैं, अन्धकार दूर करते हैं, आकाशमें घूमते हैं । ये सभी कुछ करते हुए आप मेरा हाल जानिये, यही मेरी प्रार्थना है ।

**व्याख्या**—हे तिग्मांशो सहस्ररश्मिन् ! रसान् संहरामि, दीप्ये चकास्मि, ध्वान्तम् अन्धकारं, हन्मि, नभो व्योम, भ्रमामि इति ईहमानः चेष्टमानः, त्वम् सूर्यो भगवान्, स्वयं, मे मम, वृत्तं चरितं, ज्ञातुं वेत्तुं, घटस्व यतस्व । इति प्रार्थये ।

**तिङन्तः**—अत्र संहरेत्यादिविभिन्नक्रियाणाम् ईहमान इति सामान्यस्यानुप्रयोगात् 'समुच्चये० ३।४।३' लोट् । तस्य च यथोचितं हि-स्वादेशादयः । 'समुच्चये० ३।४।५' इति सामान्यानुप्रयोगश्च ॥ ३२ ॥

**स्वर्गे विद्यस्व, भुव्याऽऽस्स्व, भुजङ्ग-निलये भव ।**
**एवं वसन् ममाऽऽकाश ! संबुध्यस्व कृताऽकृतम् ॥ ३३ ॥**

**अन्वयः**—हे आकाश ! स्वर्गे विद्यस्व । भुवि आस्स्व । भुजङ्गनिलये भव । एवं वसन् त्वम् मम कृताकृतम् संबुध्यस्व ।

**हिन्दी**—हे आकाश ! तुम तो स्वर्ग में, पृथ्वी पर, पाताल में, सभी जगह रहते हुए, मेरा किया, न किया, सभी को जानो।

**व्याख्या**—हे आकाश=गगन! स्वर्गे नाके,(अहं) विद्ये वर्ते। भुवि कौ,आस्त्वा तिष्ठामि। भुजङ्गनिलये पाताले,भवामि तिष्ठामि। एवम् इत्थं, सर्वत्र वसन् प्रतिष्ठमानः, (त्वं) मम सीतायाः, कृताकृतं युक्तायुक्तं. चरित्रं, संबुध्यस्व जानीहि।

**तिङन्तः**—अन्ते प्रार्थनायां,पूर्वत्र विद्यस्वेत्यादि विभिन्नक्रियाणां 'समुच्चये० ३।४।५इति लोट्। हि-स्वादेशादयः। वसन्निति सामान्यप्रयोगश्च पूर्वसूत्रेण।।३३।।

सीता सम्प्रति सर्वभूतसम्बोधनानन्तरं लक्ष्मणं शास्ति—

**चितां कुरु च सौमित्रे ! व्यसनस्यास्य भेषजम्।**
**रामस् तुष्यतु मे वाऽद्य, पापां प्लुष्णातु वाऽनलः ।। ३३ ।।**

**अन्वयः**—हे सौमित्रे ! अस्य व्यसनस्य भेषजम् चितां कुरु। रामः निष्पापां मे अद्य तुष्यतु, वा ( अथवा ) अनलः पापां ( मां ) प्लुष्णातु वा।

**हिन्दी**—देखो लक्ष्मण ! इस दूषणकी औषध-रूप चिता तुम रच दो। आज मुझे शुद्ध जानकर चाहे राम प्रसन्न हो जाँय या अनलदेव मुझे पापी समझकर जला डालें।

**व्याख्या**—हे सौमित्रे लक्ष्मण ! अस्य वर्तमानस्य, व्यसनस्य सङ्कटस्य, भेषजम् औषधम्, चिताम् शवदाहकाष्ठपर्यङ्कम्, कुरु रचय। अद्याधुना, रामो राघवः मे मम निष्पापायाः, तुष्यतु प्रसीदतु। वाऽथवा, अनलो वह्निदेवः, पापां चरित्रहीनां, प्लुष्णातु दहतु।

**तिङन्तः**—कुरु इति विधौ, अन्यत्र निमन्त्रणे लोट्। प्लुष प्रुष स्नेहनमोचनपूरणार्थस्यापि धातूनामनेकार्थत्वादत्र दाहोऽर्थः ।। ३४ ।।

**राघवस्य मतेनाऽथ लक्ष्मणेनाऽऽचितां चिताम्।**
**दृष्ट्वा प्रदक्षिणीकृत्य रामं प्रगदिता वचः ।। ३५ ।।**

**अन्वयः**—अथ ( सीता ) राघवस्य मतेन लक्ष्मणन आचितां चितां दृष्ट्वा प्रदक्षिणीकृत्य रामं वचः प्रगदिता।

**हिन्दी**—इसके बाद रामकी सम्मति पाकर लक्ष्मणद्वारा विरचित चिताको देखकर उसकी प्रदक्षिणा कर सीताने रामसे बात कही।

**व्याख्या**—अथ सीतोक्तेरनन्तरम्, राघवस्य रामस्य, मतेन अनुज्ञया, लक्ष्मणेन सौमित्रिणा, आचितां विहितां, चितां दाहकाष्ठशय्यां, दृष्ट्वा वीक्ष्य, प्रदक्षिणीकृत्य त्रिः परिक्रम्य,(सीता) रामं रामचन्द्रं,वचः वाक्यं, प्रगदिता प्रगदितुं प्रवृत्ता।

**तिङन्तः**—मतेनेति **'मतिबुद्धिपूजार्थेभ्यश्च ३।२।१८८'** इति वर्तमाने क्तः। राघवस्येति **'क्तस्य च वर्तमाने २।३।६७'** इति षष्ठी। प्रगदितेति **'आदिकर्मणि० ३।४।७१'** इति कर्तरि क्तः ॥ ३५ ॥

सीतावाक्यमाह—

**प्रवपाणि वपुर् वह्नौ रामाऽहं शङ्किता त्वया।**
**सर्वे विदन्तु शृण्वन्तु भवन्तः स-प्लवङ्गमाः ॥ ३६ ॥**

**अन्वयः**—हे राम! त्वया शङ्किता अहं वह्नौ वपुः प्रवपाणि। भवन्तः सप्लवङ्गमाः सर्वे शृण्वन्तु विदन्तु च।

**हिन्दी**—हे राम! आपकी शङ्का पर मैं अपनी देहको अग्निमें हवन करती हूँ। आप सभी बन्दरोंके साथ इस बातको चित्तसे सोचें और कानसे सुनें।

**व्याख्या**—हे राम क्षत्रियाभिमानिन्! त्वया शङ्किता सती, अहं सीता, वह्नौ अग्नौ, वपुः स्वदेहं, प्रवपाणि नियोगतः प्रक्षिपाणि। भवन्तः सर्वे समग्रा अपि, सप्लवङ्गमाः सकपयः, (श्रोत्राभ्यां) शृण्वन्तु आकर्णयन्तु, (चेतसा) विदन्तु अवधारयन्तु च।

**तिङन्तः**—अत्र निमन्त्रणे लोट्। **'आनि लोट् ८।४।१६'** इति णत्वे प्रवपाणि ॥ ३६ ॥

सम्प्रति समुपहरति वसोर्धारारूपप्रहर्षणीच्छन्दसा सर्गावसानम्—

**मां दुष्टां ज्वलित-वपुः प्लुषाण वह्ने!**
**संरक्ष क्षत-मलिनां सुहृद् यथा वा।**
**एषाऽहं क्रतुषु वसोर् यथाऽऽज्य-धारा**
**त्वां प्राप्ता विधि-वदुदीर्ण-दीप्ति-मालम् ॥ ३७ ॥**

**इति भट्टि-काव्ये तिङन्त-काण्डे लोट्-प्रदर्शनं नाम विंशतितमः सर्गः ॥ २० ॥**

**अन्वयः**—हे ज्वलितवपुः! वह्ने! उदीर्णदीप्तिमालं त्वाम् एषा अहम् क्रतुषु वसोः आज्यधारा यथा विधिवत् प्राप्ता। दुष्टां (रामशङ्कयेत्यर्थः) प्लुषाण, वा क्षतमलिनां मां सुहृद् यथा संरक्ष।

**हिन्दी**—हे समिद्धतम! अग्निदेव! खूब दह दह धधकते हुए आपके पास यज्ञमें (वसु)राजाकी पवित्र आज्यधाराके समान मैं प्राप्त हूँ। रामसे शङ्कित दुष्टाको जला डालें या निष्पापा मुझे मित्र समझ कर संरक्षा करें। दोनोंमें आप ही प्रमाण हैं।

**व्याख्या**—हे ज्वलितवपुः दीप्तदेह! वह्ने अग्ने! उदीर्णदीप्तिमालम् उद्गतज्वालासमूहम्, त्वां भवन्तम्, क्रतुषु यागेषु, वसोः राज्ञः, पवित्रा आज्यधारा

सर्पिरिवाविच्छिन्नस्रोतः, यथा इव, एषा अहं, रामशङ्किता सीता, प्राप्ता समुपस्थिता। रामशङ्कया दुष्टां कलुषितां, प्लुषाण दह। वा अथवा, क्षतमलिनां निष्पापां, मां सीतां, सुहृद् मित्रं, यथा इव, संरक्ष संगोपायय। इत्युभयत्र भवान् प्रमाणम्।

**तिङन्तः**——प्लुष दाहे क्र्यादिस्थस्य 'हलः श्नः० ३।१।८३' इति श्नः शानजादेशः। 'विधि० ३।३।१६१' इति निमन्त्रणे कामचारकरणे उभयत्र लोट। ( म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षणीयम् ) इति छन्दोलक्षणम्।

**शिक्षा**——मर्यादापुरुषोत्तमस्य रामस्य महाशक्तेः सीतायाः सतीत्व-रक्षा-प्रदर्शनकृत्यमिदं भारतीयनारीः शिक्षयति। यत् घोरातिघोरसङ्कटेऽपि भारतमहिलाः स्वदिव्यसतीत्वसंरक्षणं विदधत्येवेति शिवम् ॥ ३७ ॥

इति श्रीभट्टिमहाकाव्यशास्त्रे तिङन्तकाण्डे लोड्विलसिते सीताप्रत्याख्यानाख्ये मर्मविमर्शिकाटीकोपेते विंशः सर्गः समाप्तः[1] ॥ २० ॥

---

टिप्पणी—[1] स्त्रीणां चारित्र्यसंरक्षणं भारतीय संस्कृतिहृदयम् इति रामकर्तृकसीताप्रत्याख्यानाभिनयेन सन्दिष्टम्। सम्प्रति सूर्पणखाबहुलपाश्चात्यसंस्कृतिसम्पर्कितेऽस्मिन् स्वतन्त्रभारतेऽत्रधानीयमार्य्यनारीभिरिति शिक्षयति सर्गोऽयं विंशः।

# एकविंशः सर्गः

## ( उपक्रमः )

सर्गेऽस्मिन् लृङ्विलासश्चलति[1]। आर्धधातुकोऽयं लकारो लृड्वद्रूपाणि ज्ञेयानि। इडनिड्भेदेनैव रूपसिद्धिः। प्रत्यया अपि '**इतश्च ३।४।१००**' '**तस्थस्थमिपां तांतंतामः १०१**' '**स उत्तमस्य ३।४।९८**' इति वर्तमानेषु '**नित्यं ङितः ९९**' '**झोऽन्तः ७।१।३**' इत्यादिसूत्रैः परस्मैपदे। '**आतो ङितः ७।२।८१**' '**लोपो व्योर्वलि ६।१।६६**' '**झोऽन्तः ७।१।३**' '**अतो गुणे ६।१।९७**' '**आद् गुणः ६।१।८७**' इत्यादिसूत्रैः प्रत्ययसिद्धिः। '**स्यतासी लृलुटोः ३।१।३३**' इति स्यविकरणमुभयत्र। '**अतो दीर्घो० ७।३।१०१**'। धातोः पूर्वमेव '**लुङ्लङ्लृङ्क्ष्वडुदात्तः ६।४।७१**' '**आडजादीनाम् ६।४।७२**' इति प्रयोज्यौ अडाटौ।

| | **परस्मैपदे लृङः** | | | **आत्मनेपदे लृङः** | | |
|---|---|---|---|---|---|---|
| प्र. | स्यत् | स्यताम् | स्यन् | स्यत | स्येताम् | स्यन्त |
| म. | स्यः | स्यतम् | स्यत | स्यथाः | स्येथाम् | स्यध्वम् |
| उ. | स्यम् | स्याव | स्याम | स्ये | स्यावहि | स्यामहि |

नात्र दशगणभेदः केवलमिडनिड्भेद इत्युक्तं प्राक्। अत्र ऋदन्ता अनिटोऽपि धातवः '**ऋद्धनोः स्ये ७।२।७०**' इति सूत्रबलादिड्भाजः। विशेषसूत्राणि सर्गे देयानि स्युः। इत्थमनुगमेन सर्वाणि पदानि साध्यानि। सरलोऽयं प्रकारः सर्वथा छात्रैः स्मरणीय इत्यलम्। '**लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३।३।१३९**' ( भविष्यति ) '**भूते च ३।३।१४०**' इत्यादि प्रधानसूत्राणि।

---

[1] अन्यत्र सर्गेषु लृङ् प्रदर्श्यंते—५-८, ७२। ८–६९। निरलप्रयोगो लृङन्यत्र। एकं २१ विंशेऽस्मिन् सर्गे विषयदिशापि सीतायाः शुद्धिदार्ढ्यं द्योतयितुमेव कविना लृङ्विलसितम् उपनिबद्धम्। अत्र '**लिङ् निमित्ते लृङ् क्रियातिपत्तौ ३।३।१३९**' इत्यत एवाधिकृतं ज्ञेयम्। तत्र भविष्यति भूते च हेतुहेतुमतोर्लिङ् इत्येवमादिकं लिङो निमित्तं, क्रियातिपत्तिश्च लृङ्निमित्तं ज्ञेयम्। कुतश्चिद्वैगुण्याद् क्रियाया अनिष्पत्तिर्हि क्रियातिपत्तिर्ज्ञेया। वैगुण्यन्तु विरुद्धप्रत्ययोपनिपाताद् सामग्रयभावाच्च ज्ञेयम्।

## ( सर्गारम्भः )

सीतामग्निपतितां गृह्णन् वह्निदेवो रामं भर्त्सयति—

**समुत्क्षिप्य ततो वह्निर् मैथिलीं राममुक्तवान् ।**
**'काकुत्स्थ ! दयितां साध्वीं त्वमाशङ्किष्यथाः कथम्' ॥ १ ॥**

अन्वयः—ततः वह्निः मैथिलीं समुत्क्षिप्य रामम् उक्तवान् । हे काकुत्स्थ ! त्वम् साध्वीं दयितां कथम् आशङ्किष्यथाः । गर्हितमेतत् । न युक्तमाशङ्कितुमित्यर्थः।

हिन्दी—सीताजीके अग्निपातके बाद अग्निदेव सीताजीको उठाकर रामसे कहने लगे । हे ककुत्स्थराजाके वंशज राम ! आपने अपनी सती साध्वी प्रियाके प्रति क्यों शङ्का की है ? यह गर्हित बात है । यह आपको उचित नहीं ।

**व्याख्या**–ततः सीतायाः, अग्निपातानन्तरम्, वह्निरग्निदेवः,मैथिलीं सीतां, समुत्क्षिप्य हस्ताभ्यामाकाशे धृत्वा, रामं राघवम्, उक्तवान् अवोचत् । हे काकुत्स्थ ककुत्स्थवंशापत्य राम ! त्वम् भवान्, साध्वीं शुद्धतमां, दयितां प्रियां सीतां, कथम् (अशुद्धाम्), आशङ्किष्यथाः शङ्कितवान्।गर्हितमेतद् भवद्विधानामित्यलम् ।

**तिङन्तः**—'**विभाषा कथमि लिङ् च** ३।३।१४३' इति कथं शब्दो गर्हायां लिङो निमित्तम् । '**लिङ्निमित्ते लृङ् क्रियातिपत्तौ** ३।१।१३९' इति लृङ् । भविष्यतीत्यधिकृतम् । क्रियायाः अत्रासाधुत्वं तद्विरुद्धसाधुत्वाभियोगोपनिपातादप्रतिपत्तिर्गम्यते ॥ १ ॥

इत्यतो द्वादशपद्यान्तं विविधप्रकारतयाग्निकर्तृकरामभर्त्सनमेव सयुक्तिकं ज्ञेयम् । अनेन सीतासाधुत्वं दर्शयति—

**नाऽभविष्यदियं शुद्धा यद्यपास्यमहं ततः ।**
**न चैनां, पक्षपातो मे धर्मादन्यत्र राघव ! ॥ २ ॥**

**अन्वयः**—यदि इयं शुद्धा न अभविष्यत् ततः अहम् एनां न अपास्यम् । हे राघव ! धर्माद् अन्यत्र मे पक्षपातो नास्ति ।

**हिन्दी**—यदि यह शुद्ध नहीं होती तो मैं इसे नहीं बचाता । हे राम ! धर्मसे अन्यत्र पापमें मेरा पक्षपात नहीं होता ।

**व्याख्या**—यदि चेत्, इयं सीता, शुद्धा पवित्रा, न नहि, अभविष्यत् अभूत् । ततः तदा, अहम् वह्निः, एनां सीताम्, न नहि, अपास्यम् अरक्षिष्यम् । हे राघव राम ! धर्मात् सुकृतात्, अन्यत्र अधर्मे, मे मम, पक्षपातोऽनुरागः नास्ति ।

**तिङन्तः**—अत्र शुद्धिपालनयोर्हेतुहेतुमद्भावः । अत्रापालनोपनिपातादप्रतिपत्तिर्गम्यत इति भूते क्रियातिपत्तौ लृङ् ॥ २ ॥

सम्प्रति रावणसम्बन्धतः सीताशुद्धि दर्शयति—

**अपि तत्र रिपुः सीतां नाऽऽर्थयिष्यत दुर्-मतिः ।**
**क्रूरं जात्ववदिष्यन्न च जात्वस्तोष्यच्छ्रियं स्वकाम् ॥ ३ ॥**

**अन्वयः**—यदि तत्र (भवान्) रिपुः दुर्मतिः अभविष्यत्, अपि सीतां न आर्थयिष्यत । जातु क्रूरम् न अवदिष्यत्, जातु स्वकां श्रियम् न अस्तोष्यत् । नैवं कुर्यादित्यर्थः ।

**हिन्दी**—यदि वह श्रेष्ठ शत्रु दुर्मति होता तो सीताकी प्रार्थना नहीं करता, उसे क्रूर बातें नहीं सुनाता तथा अपनी विभूतिकी प्रशंसा नहीं करता ।

**व्याख्या**—यदि तत्र भवान् ( इह 'तत्र' पदप्रयोगात् 'भवान्' इति पदप्रश्लेषो ज्ञेयः ), रिपुः शत्रुः रावणः, दुर्मतिः दुष्टबुद्धिः, अभविष्यत् चेत् ( सीतां भ्रष्टशीलामकरिष्यच्चेत् ), अपि तदा, सीतां जनकसुतां, न नहि, आर्थयिष्यत् प्रार्थनामकरिष्यत्। जातु, क्रूरम, न अवदिष्यत । स्वकां श्रियम्, न नहि, अस्तोष्यत्।

**तिङन्तः**—अर्थनक्रियायाः तद्विरुद्धदुर्मतित्वोपनिपातादप्रतिपत्तिर्गम्यते। एवम् क्रूराभिधानविभूतिस्तवनक्रियायाः तद्विरुद्धदुर्मतित्वावनिपातादप्रतिपत्तिर्ज्ञेया । 'जातुयदोर्लिङ् ३।३।१४७' इत्यत्र जातु शब्दाऽनवक्लृप्तिश्च लिङो निमित्तम् । तत्र 'अनवक्लृप्त्यमर्षयोः ३।३।१४५' इत्यनुवर्तते ॥ ३ ॥

**सङ्कल्पं नाऽकरिष्यच् च तत्रेयं शुद्ध-मानसा ।**
**सत्याऽमर्षमवाप्स्यस् त्वं रामः सीता-निबन्धनम् ॥ ४ ॥**

**अन्वयः**—तत्र इयं शुद्धमानसा न अभविष्यत् तदा तत्र संकल्पम् अकरिष्यत् । तदा त्वं रामोऽपि सीता-निबन्धनं सत्यामर्षम् अवाप्स्यः । इदानीं तु त्वं मिथ्याक्रोधोऽस्मीति भावः ।

**हिन्दी**—देखो राम ! यदि सीता शुद्ध मनवाली नहीं होती तो (रावणके द्वारा इतनी प्रार्थना, क्रूरयन्त्रणा तथा लोभ-लालच दिखाने पर) उससे विवाहका ही सङ्कल्प कर ली होती । तब तुम राम भी सीता–सम्बन्धी सत्यक्रोधी सिद्ध हो जाते (अर्थात् तुम्हारा क्रोध सच्चा होता) । यों तो इस समय तुम्हारा क्रोध झूठा है । तुम नाहक क्रोध करते हो । सीता तो महती शुद्धा है ।

**व्याख्या**—तत्र यदि, शुद्धमानसा पवित्रचेता इयं सीता, न नहि, अभविष्यत्, तदा रावणानुरोधे सर्वथा महति विद्यमाने, तेन विवाहस्य, संकल्पं समीहाम्, अकरिष्यत्

कृतवती स्यात् । न च कृतवती शुद्धमानसत्वमेव तत्र हेतुः । एवं च त्वं रामोऽपि, सीतानिबन्धनं जानकीसम्बन्धिनं, सत्यामर्षम् ऋतक्रोधम्, अवाप्स्यः । अधुना तु मिथ्याक्रोधोऽसि त्वम् । तव क्रोधो निराधारोऽस्तीति यावत् ।

**तिङन्तः**–अत्र सङ्कल्पक्रियायाः सत्यामर्षक्रियायाश्च तद्विरुद्धशुद्धमानसत्वोपनिपातादतिपत्तिर्ज्ञेया । **'अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि** ३।३।१४५' इत्यत्र अनवक्लृप्त्यमर्षयोः लिङ् निमित्तम्। तस्मिन् लिङ्निमित्ते क्रियातिपत्तौ भूते लृङ् ॥ ४ ॥

अत्र तु भवतोऽपि प्रमाणत्वमुचितमिति भर्त्सयति—

**त्वयाऽद्रक्ष्यत किं नाऽस्याः शीलं संवसता चिरम् ।**
**अदर्शिष्यन्त वा चेष्टाः कालेन बहुना न किम् ॥ ५ ॥**

**अन्वयः**–चिरं संवसता त्वया अस्याः शीलं किं न अद्रक्ष्यत ? अवश्यं दृष्टम् स्यात् (शीलस्यान्तर्वृत्तित्वेऽपि ) । वा बहुना कालेन अस्याः चेष्टाः किं न अदर्शिष्यन्त ? अवश्यं दृष्टाः स्युः ( बाह्यवृत्तित्वात् ) ।

**हिन्दी**—बहुत वर्षों तक इसके साथ रहते हुए आपने क्या इसके शील को नहीं देखा है ? अवश्य देखा है । मान लें कि शील आभ्यरन्तवृत्तिवाला है, तो बहुत काल तक साथमें रहकर इसकी चेष्टा को (बाह्याचारों को ) भी क्या आपने नहीं देखा ? अवश्य देखा है ।

**व्याख्या**—हे राम ! चिरं बहुकालं यावत्, संवसता अनया सह संतिष्ठमानेन, त्वया भवता, अस्याः सत्याः सीतायाः, शीलं चरित्रं, किं कथं, न अद्रक्ष्यत नोपाज्ञायिष्यत । अवश्यं ज्ञातं स्यात् अस्याभ्यन्तरीणत्वेऽपि । वा अथवा, बहुना भृशेन, कालेन समयेन, अस्याः परमसत्याः, चेष्टाः शीलनिबन्धनाः, बाह्याः क्रियाः, किं कथम्, न नहि, अदर्शिष्यन्त दृष्टा अभूवन् ? अपि तु दृष्टा एवेत्यर्थः ।

**तिङन्तः**—किम् शब्दो गर्हा च लिङ्निमित्तं, तत्र लिङ्निमित्ते कियातिपत्तौ भूते लृङ् । शीलापरिचयक्रियायाः तद्विरुद्धचिरवासोपनिपातादतिपत्तिर्गम्यते । तथाहि **'शीलं संवसता ज्ञेयं तच्च कालेन भूयसा'** इति ॥ ५ ॥

**यावज्जीवमशोचिष्यो, नाऽहास्यश् चेदिदं तमः ।**
**भानुरप्यपतिष्यत् क्ष्मामक्षोभिष्यत चेदियम् ॥ ६ ॥**

**अन्वयः**—हे राम ! इदं तमः न अहास्यः चेत् यावज्जीवम् अशोचिष्यः । इयं यदि अक्षोभिष्यत, भानुः अपि क्ष्माम् अपतिष्यत् ।

**हिन्दी**--हे राम ! यदि आप इस अज्ञान को न छोड़ेंगे तो जन्मभर दुःख करेंगे। यदि यह अपने चरित्रसे डिग गयी होती. तो सूर्य भी पृथ्वी पर गिर गया होता ।

**व्याख्या**—हे राम ! त्वम्, इदं वर्तमानं, तमः परगृहोषितत्वादियमशुद्धेति अज्ञानं, न नहि, अहास्यः त्यक्ष्यसि, तदाऽस्य वैलक्षण्येन, मरणाद्यावज्जीवम्, अशोचिष्यः शोकमवाप्स्यसि। अतो मयाभिधीयमानः स्वयं च विमृशन् परिशुद्धां हि इयमित्यवेहि। येन न शोचिष्यसि। अन्यच्च असम्भववस्तूत्पत्तिसूचक उत्पातो भवति। न च तथाभूतोऽप्यस्तीति दर्शयति—चेद् यदि, इयं परम-सती सीता, अक्षोभिष्यत चरित्रचलिता स्यात्तदा भानुः सूर्योऽपि, क्ष्मां धराम्, अपतिष्यत् पतितः स्यात्। एतदपि प्रमाणमस्याः शुद्धौ ।

**तिङन्तः**—भविष्यदज्ञानत्यागो हेतुः, यावज्जीवशोचनं हेतुमत्। तयोर्हेतुहेतुमत्त्वे लिङ्निमित्ते क्रियात्तिपत्तौ सत्त्यां भविष्यति लृङ्। उत्तरत्रापि क्षोभो हेतुः, भानुपातो हेतुमान्। तयोर्हेतुहेनुमत्त्वे लिङ्निमित्ते क्रियातिपत्तौ भूते लृङ्। पूर्वत्र अज्ञानत्यागक्रियायाः तद्विरुद्धोपदेशत्वस्वयंविमर्शनज्ञानोत्पादनिपातादप्रतिपत्तिर्ज्ञेया। उत्तरत्र क्षोभक्रियायाः तद्विरुद्धसूर्यपातोत्पातनिपातादप्रतिपत्तिर्ज्ञेया ॥ ६ ॥

सत्येन लोकपाला अदुष्टचित्तेषु सन्निधीयन्ते इति दर्शयति—

**समपत्स्यत राजेन्द्र ! स्त्रैणं यद्यत्र चापलम्।**
**लोक-पाला इहाऽऽयास्यंस् ततो नाऽमी कलि-द्रुहः ॥ ७ ॥**

**अन्वयः**—हे राजेन्द्र ! अत्र यदि स्त्रैणं चापलं समपत्स्यत, ततोऽमी कलिद्रुहो लोकपाला इह न आयास्यन्।

**हिन्दी**—हे राजराज ! यहां पर यदि स्त्रीचाञ्चल्य हुआ होता, तो पापसे द्रोह करनेवाले ये लोकपाल यहां न आये होते।

**व्याख्या**—हे राजेन्द्र नृपेश ! अत्र प्रसङ्गे, यदि चेत्, स्त्रैणं स्त्रीसम्बन्धि, चापलं चरित्रपातः, समपत्स्यत समभविष्यत्, ततस्तदा, अमी प्रत्यक्षस्थिताः, कलिद्रुहः पापारयः, लोकपाला मूर्तिमन्त इन्द्रादयः, इह नायास्यन् नोपास्थास्यन्।

**तिङन्तः**—स्त्रीचापल हेतुः, लोकपालानागमनं हेतुमत्। इत्थं हेतुहेतुमत्त्वे लिङ्निमित्ते क्रियातिपत्तौ सत्यां भूते लृङ्। चापलाचरणक्रियायाः तद्विरुद्धलोकपालाऽगमनोपनिपातादतिपत्तिः ॥ ७ ॥

योषित्सामान्येनेयं नैव दृश्येत्याह—

**आश्चर्यं यच्च यत्र स्त्री कृच्छ्रेऽवत्स्यन् मते तव ।**
**त्रासादस्यां विनष्टायां किं किमालप्स्यथाः फलम् ॥ ८ ॥**

**अन्वयः**—यच्च यत्र स्त्री तव कृच्छ्रे मते अवत्स्यंत्, आश्चर्यम् अभविष्यत् । त्रासाद् विनष्टायाम् अस्याम् किं किं फलम् आलप्स्यथाः ?

**हिन्दी**—अगर जो यह असाधारण स्त्री आपके कष्टकर मतमें रही हो तो यह आश्चर्य है। ( यह परगृहमें रहकर चरित्रभ्रष्ट हो गयी है, यह आपका मत इसके लिये कष्टदायी है; और हमारे लिये इस हेतु आश्चर्यकारी है कि आप भी इसके विषयमें ऐसा मत रखते हैं )। कहिये यदि इसी आक्षेपसे यह मरण कर लेती तो क्या-क्या फल आप पा जाते ?

**व्याख्या**—यच्च यत्रेति चित्रीकारे असम्भवे, कृच्छ्रे कष्टदे, तव रामस्य, मते अभिप्राये, इयं स्त्री, अवत्स्यंत् इत्याश्चर्यम् अभविष्यत् । त्रासाद् भवत आक्षेपभयात्, विनष्टायाम् अस्याम् यदीयं विनष्टा अभविष्यत्, ततः किं किं फलम्, त्वम् आलप्स्यथाः प्राप्स्यः । इति नाहमत्र कल्पयामि ।

**तिङन्त**.—'**यच्च-यत्रयोः**३।३।१४८' इत्यनुवर्तमाने '**चित्रीकरणे च**३।३।१५०' इति यच्च यत्रोपपदे चित्रीकरणे लिङ्-निमित्ते क्रियातिपत्तौ सत्यां भूते लृङ् । अत्र कृच्छ्राभिप्रायानुवर्तनक्रिययोः विरुद्धप्रतिपत्तिराश्चर्यशब्दोपादानाद् गम्यते । उत्तरत्र च—'**अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि** ३।३।१४५' इत्यत्रापि—शब्दात् किंवृत्तम्, अनवक्लृप्तिश्च लिङ्निमित्तम्, तस्मिन् सति क्रियातिपत्तौ सत्यां भविष्यति लृङ् । विनाशक्रियायाः तद्विरुद्धानेककुफलप्राप्त्यतिपातादप्रतिपत्तिर्ज्ञेया ॥ ८ ॥

**यत्र यच्चाऽमरिष्यत् स्त्री साध्वसाद् दोष-वर्जिता ।**
**तदसूया-रतौ लोके तस्या वाच्याऽऽस्पदं मृषा ॥ ९ ॥**

**अन्वयः**—यच्च यत्रेति ( चित्रीभावे ) दोषवर्जिता स्त्री यदि साध्वसात् अमरिष्यत् । तद् (तदा) असूयारतौ लोके तस्या मृषा वाच्यास्पदम् अभविष्यत् ।

**हिन्दी**—आश्चर्यकी बात है कि यदि निर्दोष स्त्री आक्षेपके भयसे मर गयी होती तो असूया ( डाह ) करने वाले लोगोंके बीच झूठे उसकी बदनामी हो जाती 'यदि दोषी नहीं थी तो मरी क्यों ?' इत्यादि ।

**व्याख्या**—यच्च यत्रेति आश्चर्ये, दोषवर्जिता निर्दोषाऽपि, स्त्री सती नारी, यदि चेत्, साध्वसात् आक्षेपभयात्, अमरिष्यत् नष्टा अभविष्यत् । तद् तदा, ईर्ष्या-कलुषिते, लोके जने, तस्याः साध्व्याः, अपि, मृषा मुधा, वाच्यास्पदं निन्दास्थानम्, अभविष्यत् ।

**तिङन्तः**–'गर्हायां च३।३।१४९' इत्यत्र यच्च यत्र शब्द उपपदं, गर्हा च लिङ्निमित्तम्, तस्मिन् सति क्रियातिपत्तौ सत्यां भूते लृङ्। यदि मरणमकरिष्यत् मृषा वचनीयास्पदमभविष्यत् इति क्रियातिपत्तिर्ज्ञेया ॥ ९ ॥

**अमंस्यत भवान् यद्वद् तथैव च पिता तव।**
**नाऽऽगमिष्यद् विमान-स्थः साक्षाद् दशरथो नृपः ॥ १० ॥**

**अन्वयः**––यद्वद् भवान् इमां दुष्टाम् अमंस्यत तथैव तव पिता दशरथो यदि अमंस्यत चेत् तदा विमानस्थः साक्षादेव न आगमिष्यत्।

**हिन्दी**––हे राम ! जैसे तुमने इसे दुष्टा मान लिया, वैसे ही यदि आपके पिता दशरथजी मान लिये होते तो विमान पर बैठकर साक्षात् रूपसे यहाँ नहीं आये होते।

**व्याख्या**––हे राम ! यद्वद् भवान् रामः, इमामदुष्टां दुष्टा इत्यमंस्यत अज्ञास्यत, तद्वदेव, पिता दशरथो नृपः, चेदमंस्यत अवेदिष्यत, तदा विमानस्थः स्वयानस्थितः, साक्षात् स्वरूपेणैव, न नहि, आगमिष्यत् आयास्यत्। इत्यतः प्रतीयताम् नेयं दुष्टेति।

**तिङन्तः**––दुष्टताभवनं हेतुः, दशरथानागमनं च हेतुमत्। तयोर्हेतुहेतुमत्त्वे लिङ्निमित्ते क्रियातिपत्तौ सत्यां भूते लृङ्। दुष्टताभवनक्रियायाः तद्विरुद्धदशरथागमनोपनिपातादतिपत्तिः ॥ १० ॥

**नाऽकल्प्स्यत् सन्निधिं स्थाणुः शूली वृषभ-वाहनः।**
**अन्वभाविष्यताऽन्येन मैथिली चेत् पतिव्रता ॥ ११ ॥**

**अन्वयः**––पतिव्रता मैथिली अन्येन अन्वभाविष्यत चेत्, तदा वृषभवाहनः शूली स्थाणुः सन्निधिम् न अकल्प्स्यत्।

**हिन्दी**––अये राम ! पतिव्रता मैथिलीको यदि किसी दूसरेने ( रावणने ) अनुभव किया होता तो वृषभपर चढ़कर त्रिशूल लिए हुए ( साक्षात् अपने रूपमें ) शिवजी नहीं आये होते।

**व्याख्या**–हे राम ! हृदये विमृश। पतिव्रतेयं मैथीली सीता, अन्येन पुरुषान्तरेण (रावणेन), अन्वभाविष्यत अनुभूता स्यात्, चेत् यदि, तदा वृषभवाहनः वृषारूढः, शूली त्रिशूलधारी, स्थाणुः शिवः, सन्निधिं सानिध्यं, न अकल्प्स्यत् नाकरिष्यत्।

**तिङन्तः**–अन्याननुभवनं हेतुः,स्थाण्वागमनं हेतुमत्। तन्निमित्ते क्रियातिपत्तौ मते लृङ्। अत्रान्यानुभवनक्रियायाः तद्विरुद्धस्थाण्वागमनोपनिपातादतिपत्तिः

**आनन्दयिष्यदागम्य कथं त्वामरविन्द-सत् ।**
**राजेन्द्र ! विश्व-सूर् धाता चारित्र्ये सीतया क्षते ॥ १२ ॥**

**अन्वयः**—हे राजेन्द्र ! सीतया चारित्र्ये क्षते विश्वसूः अरविन्द-सत् धाता आगम्य कथं त्वाम् आनन्दयिष्यत् ?

**हिन्दी**—हे राजराजेश्वर ! सीताजीने यदि अपना चरित्र बिगाड़ दिया होता तो जगत्के स्रष्टा कमलासन ब्रह्माजी महाराज आकर आपको कैसे आनन्दित करते ?

**व्याख्या**—हे राजेन्द्र राजराज ! सीतया जानक्या, चारित्र्ये शीले, क्षते विनाशिते, विश्वसूः जगत्स्रष्टा, अरविन्द-सत् कमलासनः, धाता ब्रह्मा, आगम्य समेत्य, त्वां भवन्तं, कथं केन प्रकारेण, आनन्दयिष्यत् प्रामोदयिष्यत्, दर्शनाशीर्वादादिभिः । गर्हितमेतत् ।

**तिङन्तः**—'**विभाषा कथमि लिङ् च ३।३।१४३**' इति कथ शब्दो गर्हा च लिङ्निमित्तम् । तस्मिन् क्रियातिपत्तौ भूते लृङ् । अत्रानन्दक्रियायाः तद्विरुद्धचारित्र्यक्षतोपनिपातादतिपत्तिः । '**सत्सूद्विष० ३।२।६१**' इति क्विपि अरविन्दसत् ॥ १२ ॥

इतो ब्रह्मण उक्तिः प्रारभ्यते—

**प्रणमन् ब्रह्मणा प्रोक्तो राजकाऽधिपतिस् ततः ।**
**'नाऽशोत्स्यन् मैथिली लोके, नाऽऽचरिष्यदिदं यदि ॥ १३ ॥**

**अन्वयः**—ततः ब्रह्मणा प्रणमन् राजकाधिपतिः प्रोक्तः अभूत् । यदि भवान् इदं न आचरिष्यत् तदा मैथिली लोके न अशोत्स्यत् ।

**हिन्दी**—अग्निदेवके फटकारके बाद ब्रह्माजी मलहमपट्टी करते हैं । रामचन्द्रके प्रणाम कर चुकने पर ब्रह्माजी बोले—'हे राम ! यदि आपने यह नाटक न किया होता तो सीताजी लोकमें शुद्ध नहीं मानी गयी होतीं' । अतः आपने ठीक किया है ।

**व्याख्या**—ततोऽग्निकर्तृकरामभर्त्सनानन्तरं, ब्रह्मा पितामहः, वत्सं रामं, शान्तयति । ब्रह्मणा पितामहेन समागतेन, प्रणमन् नम्रतया समर्चयन् (तं ब्रह्माणमिति शेषः), राजकाधिपतिः राजन्यस्वामी रामः, प्रोक्तोऽभिहितोऽभूत् । हे राम ! भवान् यदि इदं सीताग्निप्रवेशाभिनयनाटचम्, नाचरिष्यत्, तदा, लोके जगति, मैथिली सीता, न अशोत्स्यत् । केचन मैथिलीकर्तृकमेवाचरणमामनन्ति कर्तृं, अत्र क्रियायाम् यदि मैथिली इदमग्निप्रवेशनं नाचरिष्यत्तदा लोके नाशोत्स्यदिति ।

**तिङन्तः**—शुध शौचे दिवादिः । अत्राग्निप्रवेशो हेतुः, शोधनं हेतुमत् । एवं

लिङ्निमित्ते क्रियातिपत्तौ भूते लृङ् । अत्राग्निप्रवेशक्रियायाः तद्विरुद्धाशुद्धिप्रतिक्षेपादतिपत्तिः । राजकं राजसमूहः । 'गोत्रोऽक्ष० ४।२।३९' वुञ् । तेषामधिपतिरिति ॥ १३ ॥

**नाऽमोक्ष्याम वयं शङ्कामिहाधास्यन् न चेद् भवान् ।**
**किं वा चित्रमिदं युक्तं, भवान् यदकरिष्यत ॥ १४ ॥**

**अन्वयः**—चेद् भवान् इह अस्यां स्थितौ ( इमां ) न अधास्यत् तदा वयम् ( सर्वे अमराः ) ( बहुत्वं सर्वजनोपलक्षकं, ब्रह्मणः सर्वज्ञत्वात् ) शङ्कां न अमोक्ष्याम । वा युक्तं इदं यद् भवान् अकरिष्यत् तत् किं चित्रम् अभविष्यत् ? ( न हि साधारणमेवेदम् ) ।

**हिन्दी**—हे राम ! यदि आप यहाँ इस रूपमें सीताको नहीं रखते तो हम सभी देवताओंको ( यहाँ 'वयम्' यह बहुवचन सभी देव-मानवोंके लिये प्रयुक्त हुआ है न कि ब्रह्माजीके लिये । वे तो सर्वज्ञ हैं ही, वे तो सीताको शुद्ध जानते ही हैं ) क्या शङ्का थी कि उसके छोड़नेकी बात करते ? ( उत्तरार्धका अर्थ ) अथवा आपने जो ( युक्त ) उचित बातकी है वह क्या कोई ( चित्र ) अद्भुत बात है ? राजाके लिये तो यह उचित ही है । परगृहोषिता स्त्रीकी परीक्षाकरके ग्रहण करे ताकि प्रजा भी वैसा ही करे ।

**व्याख्या**—हे राम ! चेत् यदि, मर्य्यादापुरुषोत्तमो भवान्, इह अग्निप्रवेशाभिनयस्थितौ, इमां सीतां, न अधास्यत् नास्थापयिष्यत्, तदा वयं सर्वे देवमानवाः, (बहुत्वं सर्वदेवमानवोपलक्षकं, ब्रह्मणः सर्वज्ञत्वात्) शङ्कां सीता शुद्धा न वेति, न अमोक्ष्याम नाऽत्यक्ष्याम । (उत्तरार्धं ब्रूते) वा अथवा, युक्तं न्याय्यम्, इदं सीताग्निप्रवेशकृत्यं, यद्, भवान्, अकरिष्यत् कृतवान्, तत् किं चित्रम् आश्चर्यकरम् अभविष्यत्? नहि किञ्चित् । राज्ञः कृते उचितमेवेदं परीक्ष्य परगृहोषितां योषितम् ग्रहीतुम् । येन प्रजा अपि एवं कुर्युः । मर्यादापुरुषोत्तमस्य भवतस्तु उचिततममिदमित्यलम् ।

**तिङन्तः**—अत्राधानं हेतुः, शङ्कात्यागो हेतुमान् । तस्मिन् लिङ्निमित्ते क्रियातिपत्तौ भूते लृङ् । अनाधानक्रियायाः तद्विरुद्धशङ्काविमोकोपनिपातादतिपत्तिर्ज्ञेया । उत्तरार्धे—'अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ३।३।१४५' इत्यत्रापिशब्दात् किंवृत्तमनवक्लृप्तिश्च लिङ्निमित्तम्, तस्मिन् क्रियातिपत्तौ भूते लृङ् । अत्राकरणक्रियायाः तद्विरुद्धचित्रीभावोपनिपातादतिपत्तिर्ज्ञेया ॥ १४ ॥

**प्रावर्तिष्यन्त चेष्टाश् चेद्-याथातथ्य-वत् तव ।**
**अनुशास्ये त्वया लोके रामाऽवत्स्यंस्तरां ततः ॥ १५ ॥**

**अन्वयः**—हे राम ! तव चेष्टाः चेत् अयाथातथ्यवत् प्रावर्तिष्यन्त । ततः त्वया अनुशास्ये ताः अवत्स्यंस्तराम् ( न चैव तव प्रवृत्तास्तास्तथा लोकेऽपि न दृश्यन्ते )।

**हिन्दी**—हे राम यदि आपकी चेष्टाएँ कर्तव्य-शास्त्रके विरुद्ध बेढङ्गी हुई होतीं तो आपके द्वारा अनुशासित इस संसारमें तो वे और बढ़ी होतीं। ( सो-न तो आपकी वैसी चेष्टाएँ हुईं और न लोकमें ही वैसी दीख पड़ती हैं )।

**व्याख्या**—हे राम मर्यादापुरुषोत्तम ! तव भवतः, चेष्टाः कर्तव्यानि, चेद् यदि, अयाथातथ्यवत् असमीक्ष्यकारितया अज्ञवत्, प्रावर्तिष्यन्त प्रवृत्ता अभविष्यन् । ततः तर्हि, त्वया नृपेण, अनुशास्ये व्यवस्थया स्थाप्ये, लोके जगति, ताः चेष्टाः, अवत्स्यंस्तराम् सुतराम् प्रवृत्ता अभविष्यन् । तदुभयमपि नास्ति । न भवानेव विगुणितं व्यवहरति, नापि भवत्प्रजाः । इति ।

**तिङन्तः**—अत्र रामचेष्टाप्रवृत्तिर्हेतुः, लोकचेष्टाप्रवृत्तिर्हेतुमदिति तस्मिन् लिङ्-निमित्ते क्रियातिपत्तौ भूते लृङ्। अत्र रामस्य परीक्ष्यकारित्व-क्रियायाः तद्विरुद्धलोकप्रवृत्यतिपातादतिपत्तिर्ज्ञेया। वृतुधातोरुभयपदित्वं सूत्रतो ज्ञेयम् ।।१५।।

**प्रणमन्तं ततो राममुक्तवानिति शङ्करः ।**
**'किं नारायणमात्मानं नाऽभोत्स्यत भवानजम्' ।। १६ ।।**

**अन्वयः**—ततः शङ्करः प्रणमन्तं रामम् इति उक्तवान् । भवान् आत्मानं नारायणम् अजं न अभोत्स्यत किम् ? अपि तु अभोत्स्यत । अत एव तु एवमनुष्ठितवान् ।

**हिन्दी**—बाद शिवजीने भी प्रणाम करनेवाले रामसे इस बातको कहा कि आप अपनेको नारायण अज क्या नहीं जानते ? जानते ही हैं । तभी तो ऐसा आपने किया है ।

**व्याख्या**—ततो ब्रह्मोक्तेरनन्तरम्, शङ्करः शिवः, प्रणमन्तं नमस्यन्तं, रामं राघवम्, इति वक्ष्यमाणम्, उक्तवान् अवोचत् । भवान् रामः, आत्मानम् स्वम्, नारायणं विष्णुम्, अजं नित्यं, न अभोत्स्यत नाज्ञास्यत् किम् ? इत्याक्षेपे । ज्ञातवानेवेत्यर्थः । अत एव तु एवं सीतापरीक्षणं प्रारब्धवान् ।

**तिङन्तः**—अत्र नारायणानवबोधक्रियायाः तद्विरुद्धतादृशानुष्ठानोपनिपातादतिपत्तिर्ज्ञेया । भूते क्रियापिपत्तौ लृङ् । नारायणावबोधो हेतुः, एवमनुष्ठानम हेतुमदिति हेतुहेतुमत्त्वं लिङ्निमित्तं ज्ञेयम् ।। १६ ।।

कोऽन्योऽकर्त्स्यदिह प्राणान् दृप्तानां च सुर-द्विषाम् ।
को वा विश्वजनीनेषु कर्मसु प्राघटिष्यत ॥ १७ ॥

**अन्वयः**—यदि भवान् नारायणो नाभविष्यत् तर्हि अन्यः कः दृप्तानां सुरद्विषाम् प्राणान् अकर्त्स्यत् ( नान्यः कोऽपीत्यर्थः )। वा (अथवा) कः अन्यः विश्वजनीनेषु कर्मसु प्राघटिष्यत ।

**हिन्दी**—यदि आप नारायण नहीं होते तो दूसरा कौन घमण्डी देवद्वेषियोंके प्राणोंको काटता या कौन दूसरा सारे संसारकी भलाई करनेवाले कार्योंको कर सकता ? कोई नहीं । अतः आप नारायण ही हैं ।

**व्याख्या**—यदि चेत्, भवान् रामः, नारायणो विष्णुर्नाभविष्यत्, तदा तर्हि, अन्यः अपरः, कः, दृप्तानां गर्वभृतां, सुरद्विषां राक्षसानां, प्राणान् असून्, अकर्त्स्यत् छिन्नवान् स्यात् । वा अथवा, विश्वजनीनेषु लोकहितकरेषु, कर्मसु कार्येषु, कोऽन्योऽपरः प्राघटिष्यत चेष्टितवान् स्यात् । न कोऽपीत्यर्थ इति काकुः ।

**तिङन्तः**—अत्राच्छेदनाघटनक्रियायाः तद्विरुद्धछेदनघटनकर्तृनारायणभवनोपनिपातादतिपत्तिः । सर्वत्र ‘किं वृत्ते लृङ्लृटौ ३।३।१४४’ इति क्रियातिपत्तौ भूते लृङ् ॥ १७ ॥

दैत्य-क्षये महाराज ! यच्च यत्राऽघटिष्यथाः ।
समाप्तिं जातु तत्रापि किं वाऽनेष्यस् त्वमीहितम् ॥ १८ ॥

**अन्वयः**—हे महाराज ! दैत्यक्षये यच्च यत्र त्वम् अघटिष्यथाः (यां पुनरात्मनो घटनां करिष्यसि ), तत्रापि ईहितं प्रादुर्भावत्वं जातु समाप्तिं वा त्वमनेष्यः किम् ? नैव नेष्यसीत्यर्थः ।

**हिन्दी**—हे महाराज ! दैत्योंके क्षयनिमित्त जो कुछ आप अपना प्रादुर्भाव आगे करेगें, क्या वहाँ पर भी आप अपना अभीष्ट प्रादुर्भाव कभी समाप्त करेगें ? नहीं नहीं । वह तो बराबर जारी ही रहेगा । वह कभी समाप्त होने वाला नहीं ।

**व्याख्या**—हे महाराज महेश्वर ! दैत्यक्षये असुरविनाशाय, यच्च यत्र, त्वम् अघटिष्यथाः यां पुनः आत्मनो घटनां करिष्यसि । पुनः प्रादुर्भावे घटिष्यसे । तत्रापि किं त्वं, जातु कदाचित्, ईहितम् अभीष्टं, प्रादुर्भावत्व समाप्तिम् पर्यन्त सिद्धि वा प्राप्स्यः । तत्तु सर्वदा स्थास्यत्येवेति काकुः ।

**तिङन्तः**—‘जातुयदोर्लिङ् ३।३।१४७’ इति जातुयच्छब्दौ अनवक्लृप्तिश्च लिङ्-

निमित्तम्, तस्मिन् क्रियातिपत्तौ भविष्यति लृङ् । अत्राघटनक्रियायाश्चातिपत्तिः ज्ञानेनोपलब्धभविष्यत्प्रादुर्भावसमाप्तिनयनयोस्तद्विरुद्धयोरुपनिपाताज्ज्ञेया ।।१८।।

इत आरभ्य सामान्यतिङन्तकाण्डेन सर्गेतिवृत्तमुपसहरति—

**तातं प्रसाद्य कैकेय्या भरताय प्रपीडितम् ।**
**सहस्र-चक्षुवं रामो निनंसुः परिदृष्टवान् ।। १९ ।।**

**अन्वयः**—निनंसुः रामः भरताय कैकेय्या प्रपीडितं तात (दशरथं) प्रसाद्य सहस्रचक्षुषं परिदृष्टवान् ।

**हिन्दी**—प्रणाम करना चाहते हुए रामने भरतके लिये राज्य माँगकर कैकेयी द्वारा पीड़ित किये गये पिताको प्रसन्न कर इन्द्रदेवका दर्शन किया ।

**व्याख्या**–निनंसुः प्रणामेच्छुः, रामो राघवः, भरताय भरतराज्यलाभाय(एवञ्च रावणं हन्तुं वनविचरणाय रामं प्रस्थाप्य), कैकय्या मात्रा, प्रपीडितं ताडितं, तातं दशरथं, प्रसाद्य प्रसन्नं कृत्वा, सहस्रचक्षुषम् इन्द्रं, परिदृष्टवान् अवलोकितवान् ।

**तिङन्तः**—नम्धातोः सन्नन्तादुः—निनंसुः । प्र-सादि धातोः क्त्वा प्रत्यये, क्त्वो ल्यपि प्रसाद्येति सिध्यति । परिपूर्वक–दृशेः क्तवतौ परिदृष्टवान् ।।१९।।

**प्रेता वरेण शक्रस्य प्राणन्तः कपयस् ततः ।**
**संजाताः फलिताऽऽनम्ररोचिष्णु-द्रुम-सद्रवः ।। २० ।।**

**अन्वयः**—ततः प्रेताः कपयः शक्रस्य वरेण प्राणन्तः फलिताऽऽनम्ररोचिष्णु-द्रुमसद्रवः सञ्जाताः ।

**हिन्दी**–इन्द्र दर्शनके बाद मरे हुए सब कपि इन्द्रदेवके वरसे जीकर फलोंसे झुके हुए सुन्दर पेड़ों पर बैठनेवाले हो गये । अर्थात् जी जीकर कूद कूदकर पेड़ों पर चढ़कर फल खाने लगे ।

**व्याख्या**—ततः इन्द्रदर्शनानन्तरम्, कपयो वानराः, शक्रस्य इन्द्रस्य, वरेण-प्रसादेन, प्राणन्तो जीवन्तः, फलितानम्ररोचिष्णु-द्रुमसद्रवः फलितनम्रीभूतदीप्त तरुसमारुढाः, सञ्जाताः समभूवन् । अर्थात् सर्वेऽपि मृताः कपयो जीविताः वृक्षानारुह्य फलभोगिनोऽभूवन्

**तिङन्तः**—'दा-धेट्-सि-शद-सदो रुः ३।२।१५९' इति रुः–सद्रवः । प्रपूर्वक-स्यानितेश्शतरि प्राणन्तः ।

**समासः**—फलिताश्च ते आनम्रा रोचिष्णवो ये द्रुमाः—इति कर्मधारयः । ततश्च तत्र सद्रवः इति तत्पुरुषः ।। २० ।।

सर्गावसाने नर्दटकच्छन्दोऽन्तरेणोपसंहरति—

**भ्रमरकुलाऽऽकुलोल्वण-सुगन्धि-सपुष्प-तरुस्,**
**तरुण-मधूक-सम्भव-पिशङ्गित-तुङ्ग-शिखः ।**
**शिखरशिलाऽन्तराल-परिक्लृप्त-जलाऽवसरः**
**स-रस-फल-श्रियं स विततान सुवेल-गिरिः ॥ २१ ॥**

**अन्वयः**—भ्रमरकुलाकुलोल्वणसुगन्धिसपुष्पतरुः, तरुणमधूकसम्भवपिशङ्गित-तुङ्ग-शिखः शिखरशिलान्तरालपरिक्लृप्तजलावसरः सः सुवेलगिरिः सरसफल-श्रियं विततान ।

**हिन्दी**—भ्रमरकुलोंसे घिरे हुए उत्कट सुगन्धि-पुष्पवाले पेड़ोंसे भरा, खूब लहलहाये महुएके पुष्पोंसे पीले शेखरवाला, पत्थरोंके बीच-बीचसे खूब जलधारा बहने वाला वह सुवेल पर्वत, जिसपर राम विराजमान थे—अत्यन्त सुन्दर फलोंकी शोभासे दमक उठा ।

**व्याख्या**—भ्र०……तरुः द्विरेफ-समूहव्याप्तोत्कटसुगन्धिपुष्पोपेत-द्रुमशाली, तरुण०……शिखः अभिनवमधूकवृक्षपुष्पकपिशोच्चशिखरः, शिखर०……दसरः शृङ्गप्रस्तरमध्योद्गतवारिधारः, स राम-वसतिभूतः, सुवेलगिरिः सुवेलाख्योऽचलः, सरसफलश्रियम् अभिनव-फल-शोभां, विततान वितस्तार ।

**समासः**—भ्रमराणां कुलैः आकुलाः सुगन्धयः सपुष्पाः तरवो यत्र सः । तरुणाश्च ते मधूकास्तरुणमधूकाः, तेषां सम्भवः, तेन पिशङ्गिताः शिखा यस्य सः । शिखराणां शिलाः शिखरशिलाः, तासाम् अन्तरालेषु परिक्लृप्ता जलावसरा यत्र सः । फलानां श्रीः फलश्रीः, सरसा चासौ फलश्रीः सरसफलश्रीः, ताम् । नर्दटकवृत्तञ्च 'यदि भवतो नजौ भजजला गुरु नर्दटकम्' ।

**तिङन्तः**—जलमवसरति येभ्यः ते जलावसराः निर्झराः। 'ऋदोरप्३।३।५७' इत्यप् ॥ २१ ॥

**संवाद्भिः स-कुसुम-रेणुभिः समीरै-**
**रानम्रैर् बहु-फल-धारिभिर् वनाऽन्तैः ।**
**श्च्योतद्भिर् मधु-पटलैश् च वानराणाम्**
**आप्यानो रिपु-वध-सम्भवः प्रमोदः ॥ २२ ॥**

**अन्वयः**—पूर्वान्वितमिदं पद्यम् । तथाहि—तत्र सुवेल-गिरौ संवाद्भिः सकुसुम-रेणुभिः बहुफलधारिभिः वनान्तैः श्च्योतद्भिः मधुपटलैः च वानराणां रिपुवध-सम्भवः समीरैः आनम्रैः प्रमोदः आप्यानः अभूत् । प्रहर्षणीवृत्तमुभयत्रास्मिन्नग्रेऽपि । 'म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षणीयम्' इति लक्षणम् ।

**हिन्दी**—उस सुवेल गिरिपर बहते हुए फूलोंके धूलवाले वायुदेवके द्वारा, बहुत फलोंसे लदे झुक गये हुए वनभागों द्वारा, चूने वाले मधुपोंके द्वारा, वानरोंके शत्रुवधके कारण उत्पन्न आनन्द खूब बढ़ चला ।

**व्याख्या**—तत्र सुमेलगिरौ, संवाद्भिः संवहद्भिः, सकुसुमरेणुभिः पुष्पपरागसहितैः, समीरैः वायुभिः, आनम्रैः नम्रतां गतैः, बहुफलधारिभिः प्रभूतफलभृद्भिः, वनान्तैः वनोद्देशैः, श्च्योतद्भिः स्रवद्भिः, मधुपटलैः क्षौद्रमण्डलैश्च, वानराणां कपीनां, रिपुवधसम्भवः शत्रुहिंसाजनितः, प्रमोदः आनन्दः, आप्यानः वृद्धिङ्गतोऽभूत् ।

**तिङन्तः**—'प्यायः पी ६।१।२८' इत्यस्य व्यवस्थितविभाषया सोपसर्गस्य न पीभावः । 'ओदितश्च ८।२।४५' इति निष्ठानत्वम् ॥ २२ ॥

**आयान्त्यः स्व फल-भरेण भङ्गुरत्वं**
**भृङ्गाऽऽली-निचय-चिता लतास् तरूणाम् ।**
**साऽऽमोदाः क्षिति-तल-संस्थिताऽवलोप्या**
**भोक्तॄणां श्रममुदयं न नीतवत्यः ॥ २३ ॥**

**इति भट्टि-काव्ये तिङन्त-काण्डे लक्षणरूपे लृङ्-प्रदर्शनं नाम**
**एकविंशति-तमः सर्गः ॥**

◆

**अन्वयः**—स्वफलभरेण भङ्गुरत्वम् आयान्त्यः भृङ्गालीनिचयचिताः सामोदाः क्षितितलसंस्थितावलोप्याः तरूणां लताः भोक्तॄणां श्रमं उदयं न नीतवत्यः । विनीतवत्य; इति पाठे अपनीतवत्य इति नञर्थको व्युपसर्गः ।

**हिन्दी**—अपने फलभारसे झुक गयी हुई एवं भौंरोंके समूहसे गुञ्जित, पृथ्वी पर खड़े खड़े ही फल जिनका तोड़ लिया जाय ऐसे सुगन्धित पेड़ोंकी शाखायें, फल तोड़नेके परिश्रमको होने ही नहीं देती थीं ।

**व्याख्या**—स्वफलभरेण निजफलभारेण, भङ्गुरत्वं नम्रताम्, आयान्त्यः प्राप्ताः, भृङ्गालीनिचयचिताः भ्रमरपङ्क्तिसमूहसम्भृताः, सामोदाः सुगन्धयः, क्षितितलसंस्थितावलोप्याः पृथ्वीस्थमानवहस्तप्राप्यफलाः, तरूणां वृक्षाणां, लताः वीरुधः, भोक्तॄणां फलग्रहीतॄणां, श्रमं परिश्रमं, उदयं संभूतिं, न नहि, नीतवत्यः प्रापितवत्यः ।

**तिङन्तः**—उदेतीति उदयः, कर्तरि अच् पचादित्वादाकृतिगणतया । आयान्तीति शत्रन्तात् ङीप् । विनीतवत्य इति पाठे विः निषेधार्थकः ।

शिक्षा—स्त्रीणां चारित्र्यबलमेव बलं गण्यत इति मर्य्यादापुरुषोत्तमेन तादृक् सीतापरीक्षणं प्रारब्धम् । यस्य बहुधा बहुभिर्देवैः स्व-स्वभावानुसारं समर्थनं कृतम् । मनुनाऽपि–सतीत्वं समर्थितम् 'अन्योऽन्यस्याव्यभीचारो भवेदामरणान्तिकः । एष धर्मः समासेन ज्ञेयः स्त्रोपुंसयोः परः ।।' इति व्याहरता । एकविंशोऽयं सर्गो भारतीय-नारीरुद्दीपयति स्वचारित्र्यरक्षायै इत्यलम् ।।२३।।

इति श्रीभट्टिमहाकाव्ये लक्षणरूपे तिङन्तकाण्डे लृङ्विलसिते काव्य-
मर्मविमर्शिकाख्यटीकोपेते लक्ष्यरूपे कथानके सीतासंशोधनं
नामैकविंशः सर्गः समाप्तः ।

# अथ द्वाविंशः सर्गः

सर्गेऽस्मिन् २३ त्रयोविंशति-पद्यान्तमेव लुड्विलासो विद्यते । ततस्तु २४-३५ श्लोकावधि सर्गान्तं प्रकीर्णलकार-विलासः । लुट् तु आर्द्धधातुको लकारः सरलतमः अनद्यतन-भविष्यत्काले विधीयते 'अनद्यतने लुट् ३।३।१५' इति सूत्रेण । प्रत्ययनिर्माणसूत्राणि 'स्य-तासी ऌलुटोः ३।१।३३' 'लुटः प्रथमस्य डारौरसः २।४।८५' 'तासस्त्योर्लोपः ७।४।५०', 'रि च ५१' 'ह एति ५२' 'धि च ८।२। २५' इत्यादि । अत्र इडनिड्भेदेनैव रूपनिर्माणं कार्यम । प्रत्ययाः यथा--

'टित आत्मनेपदानां टेरे ३।४।७९' 'थासः से ८०' इत्येते पूर्वसूत्रे लटः प्रत्ययनिर्माणे एवोक्ते ।

**परस्मैपदे—**

| पुरुषाः | १ | २ | ३ |
|---|---|---|---|
| प्र० | ता | तारौ | तारः |
| म० | तासि | तास्थः | तास्थ |
| उ० | तास्मि | तास्वः | तास्मः |

**आत्मनेपदे—**

| पुरुषाः | १ | २ | ३ |
|---|---|---|---|
| प्र० | ता | तारौ | तारः |
| म० | तासे | तासाथे | ताध्वे |
| उ० | ताहे | तास्वहे | तास्महे |

सर्व-प्रथमं रामो भरतप्रतिज्ञातं पूरयितुं लुड्विलसितेन हनुमन्तं स्वजन्मभूमिमयोध्यामभिविसर्जयति--

**ततो रामो हनूमन्तमुक्तवान् हृष्ट-मानसम् ।**
**अयोध्यां श्वः प्रयातासि कपे ! भरत-पालिताम् ॥ १ ॥**

**अन्वयः**—ततो विजयानन्तरं रामः हृष्टमानसं हनूमन्तम् उक्तवान् । हे कपे ! श्वः त्वम् भरतपालिताम् अयोध्याम् प्रयातासि ।

**हिन्दी**—तब विजयके बाद सर्वप्रथम रामचन्द्रजी अपने विजयके कारण प्रसन्न हुए हनुमान् से बोले—हे मारुते ! कल तो तुम भरतसे पालित अयोध्याको जाओगे । ( आज विश्राम करो ) ।

**व्याख्या**—ततो विजयानन्तरम्, रामो राघवः, विजयानन्दहृष्टमानसं प्रसन्नचेतसं, हनूमन्तं मारुतिं गमननिरोधिनम्, उक्तवान् । हे कपे मारुते ! श्वस्त्वम् आगामिनि दिने, भरतपालितामयोध्यां भरतसुरक्षितां मत्पुरीं, गन्तासि यातासि । अद्य विश्रामय ।

---

१. अन्यत्र सर्गेषु लुटः स्थितिरित्थम्—४-३८ । ५-१०, ६-५३, १०२ । ८-७८, ९३-९५ । अत्र सर्गेऽपि २३ त्रयोविंशतिपद्यान्तमित्युक्तमुपरि मूले टीकायाम् ।

तिङन्तः--आदादिकस्य या धातोरनिटोऽनद्यतने लुटि सिपि, तासि, 'तासस्त्योर्लोपः ७।४।५०' इति सलोपे प्रयातासि ।

गाधितासे नभो भूयः स्फुटन्-मेघ-घटाऽऽवलि ।
ईक्षितासेऽम्भसां पत्युः पयः शिशिर-शीकरम् ॥ २ ॥

अन्वय.—भूयः स्फुटन्मेघघटावलि नभो गाहितासे । शिशिरशीकरम् अम्भसां पत्युः पयः ईक्षितासे ।

हिन्दी—फिर तुम अपने वेगसे छितराने वाले मेघोंसे युक्त आकाशको देखोगे तथा ठण्ढे फुहारे निकलते हुए समुद्र जलको देखोगे ।

व्याख्या—भूयः पुनः, (भवद्वेगात्) स्फुटन्मेघघटावलि विच्छिन्दन्मेदुरपङ्क्ति, नभो व्योम, गाहितासे प्रस्थातासे । अम्भसां पत्युः समुद्रस्य, शिशिरशीकरम् शीतलकणं, पयो जलम्, ईक्षितासे द्रष्टासि ।

तिङन्तः—गाधृ प्रतिष्ठालिप्सयोः ( भौवादिकस्यानुदात्तेत उदात्तस्य ) ( तथैवेक्ष दर्शनाङ्कनयोश्च ) ।

सेवितासे प्लवङ्ग ! त्वं महेन्द्राऽद्रेरधित्यकाः ।
व्युत्क्रान्त-वर्त्मनो भानोः सह-ज्योत्स्ना-कुमुद्वतीः ॥ ३ ॥

अन्वयः—हे प्लवङ्ग ! त्वम् भानोः व्युत्क्रान्तवर्त्मनः महेन्द्राद्रेः सह-ज्योत्स्नाकुमुद्वतीः अधित्यकाः सेवितासे ।

हिन्दी—हे मारुते ! तुम सूर्यके मार्गको भी लाँघने वाले हेमाद्रिके ऊपरी भागको, जहाँ ज्योत्स्ना नामकी औषधि तथा कुमुद्वती खिली रहती है, देखोगे ।

व्याख्या—हे प्लवङ्ग मारुते ! त्वं भवान्, भानोः सूर्यस्य, व्युत्क्रान्तवर्त्मनः अतिलङ्घितमार्गस्य, महेन्द्राद्रेः महेन्द्रपर्वतस्य, सह-ज्योत्स्नाकुमुद्वतीः इत्युभयौषधिसमन्विताः, अधित्यकाः ऊर्ध्वभूमीः, सेवितासे प्राप्तासि ।

कोशः—'उपत्यकाऽद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इत्यमरः ।

तिङन्तः—प्लवं गच्छतीति खच् । प्लं वङ्गतीति प्ल-पूर्वकस्य वख वखि चग वगि गतौ इत्यस्य कर्तरि पचादित्वादच वा ॥ ३ ॥

चन्दन-द्रुम-संच्छन्ना निराकृत-हिम-श्रथाः ।
दर्शितारस् त्वया ताश् च मलयोपत्यकाः शुभाः ॥ ४ ॥

अन्वयः—चन्दनद्रुम-संच्छन्ना निराकृत-हिम-श्रथाः शुभाः ताः मलयोपत्यकाश्च त्वया दर्शितारः ।

**हिन्दी**—चन्दनके पेड़ोंसे ढके हुए हिमके प्रभावको दूर कर देने वाले सुन्दर मलयाचलके नीचेके भागोंको भी तुम देखोगे।

**व्याख्या**—चन्दनद्रुमसंच्छन्नाः चन्दनाख्यवृक्षव्याप्ताः, निराकृतहिमश्रथाः दूरीकृतशीतप्रभावाः, शुभाः सुन्दर्यः, ताः प्रसिद्धाः, मलयोपत्यकाः मलयपार्श्वभूमयः, त्वया हनूमता, दर्शयितारः दृष्टा भवितारः। इह हिमश्रया इति पाठे हिमश्रयः चन्द्रः। निरस्तचन्द्रा द्युतौ इति ज्ञेयम्।

**तिङन्तः**—दर्शयितार इति कर्मणि लुट्। 'स्यसिच्० ६।४।६२' इति चिणा सहैवेट्। श्रन्थ सेवनप्रतिहर्षयोः इति कर्मण्यणि 'अवोदैध ० ६।४।२९' इति अनुनासिकलोपे हिमश्रथः॥ ४॥

**प्रतन्व्यः कोमला विन्ध्ये सहितारः स्यदं न ते।**
**लताः स्तबक-शालिन्यो मधुलेहि-कुलाऽऽकुलाः॥ ५॥**

**अन्वयः**—विन्ध्ये प्रतन्व्यः कोमलाः स्तबकशालिन्यः मधुलेहिकुलाकुला लताः ते स्यदं न सहितारः।

**हिन्दी**—विन्ध्याचलपर पतली कोमल फूलके गुच्छोंसे सुशोभित भ्रमरझुण्डसे व्याप्त लतायें तुम्हारे वेगको सह नहीं सकेंगी।

**व्याख्या**—विन्ध्ये तदाख्येऽद्रौ, प्रतन्व्यो दुर्बलाः, कोमला मृदवः, स्तबकशालिन्यः कुसुमस्तोमोपेताः, भ्रमरकुलाः द्विरेफसङ्घसङ्कुलाः, लताः वल्ल्यः, ते हनूमतः, स्यदं जवं, न नहि, सहितारः सोढारः।

**तिङन्तः**—'तीषसहलुभरुषरिषः ७।२।४८' पाक्षिक इट्। 'स्यदो जवे ६।४।३८' इत्यनुनासिकलोपः॥ ५॥

**द्रष्टासि प्रीति-मानारात् सखिभिः सह सेविताम्।**
**स-पक्षपातं किष्किन्धां पूर्व-क्रीडां स्मरन् मुहुः॥ ६॥**

**अन्वयः**—आरात् सखिभिः सहसेवितां पूर्वक्रीडां मुहुः स्मरन् किष्किन्धां प्रीतिमान् सन् सपक्षपातं द्रष्टासि।

**हिन्दी**—समीपमें ही मित्रोंके साथ खूब खेले हुए बाल्य कालके खेलोंको बारबार याद करते हुए तुम खूब प्रसन्न होकर बड़े चावसे किष्किन्धा नगरीको देखोगे।

**व्याख्या**—आरात् समीपे, सखिभिः मित्रैः, सेवितां जुष्टां, पूर्वक्रीडां बाल्यकेलीं, मुहुर्मुहुः, स्मरन् अधीयन्, प्रीतिमान् प्रेमशाली, सपक्षपातं सानुरागमिति क्रियाविशेषणम्, द्रष्टासि ईक्षितासे॥ ६॥

**त्वया सन्दर्शितारौ ते माल्यवद्-दण्डका-वने ।**
**उपद्रुतश् चिरं द्वन्द्वैर् ययोः क्लिशितवानहम् ॥ ७ ॥**

**अन्वयः**—त्वया ते माल्यवद्दण्डकावने सन्दर्शितारौ । ययोः द्वन्द्वैः उपद्रुतोऽहम् चिरं क्लिशितवान् ।

**हिन्दी**—तुम माल्यवान् तथा दण्डकारण्यको देखोगे, जहाँ पर सीताके वियोग-दुःखोंसे त्रस्त होकर मैं वहुत दिनों तक दुःखी रहा ।

**व्याख्या**—ते प्रसिद्धे, माल्यवद्दण्डकावने माल्यवान् नाम पर्वतः दण्डकाख्यं च वनम् अरण्यम्, त्वया हनुमता, दर्शितारौ दृष्टौ भवितारौ । ययोः यत्र, द्वन्द्वैः सीतावियोगदुःखैः, उपद्रुतः त्रस्तः, अहम् रामः, चिरम् बहुलं कालं, क्लिशितवान् पीडामनुभूतवान् ।

**तिङन्तः**—कर्मणि लुट्—दर्शितारौ । क्लिशितवान्—'**क्लिशः क्त्वानिष्ठयोः ७।२।५०**' इतीट् वा । '**मृडमृदगुद ० १।२।७**' इति कित्त्वम् ॥ ७ ॥

**आप्तारौ भवता रम्यावाश्रमौ हरिणाऽऽकुलौ ।**
**पुण्योदक-द्विजाऽऽकीर्णौ सुतीक्ष्ण-शरभङ्गयोः ॥ ८ ॥**

**अन्वयः**—भवता सुतीक्ष्णशरभङ्गयोः रम्यौ हरिणाकुलौ पुण्योदकद्विजाकीर्णौ आश्रमौ आप्तारौ ।

**हिन्दी**—हे हनूमान् ! आप सुतीक्ष्ण मुनि तथा शरभङ्ग मुनिके रमणीय एवं हरिणोंसे भरे तथा पुण्यसलिल एवं पक्षियोंसे (ब्राह्मणोंसे) परिपूर्ण आश्रमोंको प्राप्त करोगे ।

**व्याख्या**—भवता हनूमता, सुतीक्ष्णशरभङ्गयोः तदाख्ययोः प्रतापिनोर्मुन्योः, रम्यौ रमणीयौ, हरिणाकुलौ मृगव्याप्तौ, पुण्योदकद्विजाकीर्णौ पवित्र-सलिलपक्षिदलसङ्कुलौ, अथवा पूतजलपूर्णसरोवरब्राह्मणवर्गसम्भृतौ, आश्रमौ निवासस्थले, आप्तारौ लब्धारौ ।

**तिङन्तः**—आप्लृ व्याप्तौ इति सौवादिकस्य कर्मणि लुटि कर्तृवाच्यवदेव रूपं हलन्तधातुत्वात् ।

**अतिक्रान्ता त्वया रम्यं दुःखमत्रेस् तपो-वनम् ।**
**पवित्र-चित्रकूटेऽद्रौ त्वं स्थातासि कुतूहलात् ॥ ९ ॥**

**अन्वयः**—त्वया अत्रेः रम्यं तपोवनम् दुःखं यथास्यात्तथा अतिक्रान्ता । तथा त्व पवित्रचित्रकूटाद्रौ कुतूहलात् स्थातासि ।

**हिन्दी**–तुम अत्रि मुनिके रमणीय तपोवन को बड़े पछतावेके साथ छोड़ोगे। तथा पावन चित्रकूट अचलपर बड़े कुतूहलके साथ ठहरोगे।

**व्याख्या**––त्वया हनूमता, अत्रेः तन्नाम्नो मुनेः, रम्यम् रमणीयं, तपोवनम् उटज-स्थलं, दुःखम् अतिकष्टं यथास्यात्तथा, अतिक्रान्ता अतिक्रमितव्यम्। तथा चित्रकूटे तदाख्ये, अद्रौ गिरौ, त्वम्, कुतूहलात्, स्थातासि निवस्तासि।

**तिङन्तः**—अतिक्रमेः कर्मणि लुट्। 'स्नुक्रो० ७।२।३६' इति इण्न ॥ ९ ॥

ततः परं भरद्वाजो भवता दर्शिता मुनिः।
द्रष्टारश् च जनाः पुण्या यामुनाऽम्बुक्षतांऽहसः ॥ १० ॥

**अन्वयः**—ततः परं भवता भरद्वाजो मुनिः दर्शिता। यमुनाम्बुक्षतांहसः पुण्याः जनाश्च द्रष्टारः।

**हिन्दी**—इसके बाद तुम भरद्वाज मुनिको देखोगे और यमुनाजीके जलसे स्नानके कारण जिनके पाप दूर हो गये हैं, ऐसे पुण्यात्मा जनोंको भी देखोगे।

**व्याख्या**––ततः परम् तदनन्तरम्, भवता त्वया, भरद्वाजस्तन्नामा, मुनिः यतिः, दर्शिता द्रष्टा। यामुनाम्बुक्षतांहसः श्यामसरिज्जलध्वस्तपापाः, पुण्याः सुकृतिनः, जना लोकाः, द्रष्टारः दर्शितारः।

**तिङन्तः**––उभयत्रापि दृशेः कर्मणि लुट्। 'स्यसिच् ६।४।६२' इति पाक्षिके चिण्वदिटि उभयथा रूपम् ॥ १० ॥

स्यन्त्वा स्यन्त्वा दिवः शम्भोर् मूर्ध्नि स्कन्त्वा भुवं गताम्।
गाहितासेऽथ पुण्यस्य गङ्गां मूर्तिमिव द्रुताम् ॥ ११ ॥

**अन्वयः**—अथ दिवः स्यन्त्वा स्यन्त्वा, शम्भोः मूर्ध्नि स्कन्त्वा, भुवं गतां पुण्यस्य द्रुताम् मूर्त्तिमिव गङ्गां गाहितासे।

**हिन्दी**––बादको आकाशसे बह बह कर शिवजीके शिरसे निकलकर पृथ्वी पर आई पुण्यकी पिघली हुई मूर्तिकी तरह गङ्गाजीमें खूब डुबकी लगाकर नहाओगे।

**व्याख्या**––अथ तदनन्तरम्, दिवः द्योः, स्यन्त्वा स्यन्त्वा स्रुत्वा स्रुत्वा, शम्भोः शिवस्य, मूर्ध्नि मस्तके, स्कन्त्वा उल्लङ्घ्य, भुवं धरां, गतां प्राप्तां, पुण्यस्य सुकृतस्य, प्रस्रुतां द्रवीभूतां, मूर्त्तिम् आकारम् इव, गङ्गां भागीरथीं, गाहितासे स्नातासि, निमज्योन्मज्येत्यर्थः।

**तिङन्तः**–स्यन्दू प्रस्रवणे धातोर्भौवादिकस्योदित्वाद्वेट्। 'क्त्वि स्कन्दिस्यन्दोः ६।४।३१' इति नलोपाभावः। 'आभीक्ष्ण्ये णमुल् ३।४।२२' इति चात् क्त्वा।

'नित्य-वीप्सयोः ८।१।४' इति द्वित्वं च। क्रान्त्वेति पाठे 'क्रमश्च क्त्वि ६।४।१८' इति दीर्घः। ऊदित्वाद्वेट् ॥ ११ ॥

तमसाया महा-नील-पाषाण-सदृश-त्विषः।
वनाऽन्तान् बहु मन्तासे नागराऽऽक्रीड-शाखिनः ॥ १२ ॥

**अन्वयः**—तमसायाः महानीलपाषाणसदृशत्विषः नागराक्रीडशाखिनो वनान्तान् वहु मन्तासे। नगराक्रीडसाक्षिणः इति पाठेऽप्येवमेव।

**हिन्दी**—तमसा ( टौंस ) नदीके महानील शिलाके समान काले रङ्गके ऐसे वनान्त भागोंको, जिनके पेड़ नगरके लोगोंके लिये क्रीडास्थल हो गये हैं, बड़ा आदर करोगे।

**व्याख्या**—तमसाया नद्याः, महानीलपाषाणसदृशत्त्विषः महानीलमणितुल्यकान्तिभृतः, नागराक्रीडाशाखिनः नागरिकजनक्रीडास्थलीभूततरून्, वनान्तान् अरण्यभागान्, बहु भृशम् आदरातिशयात्, मन्तासे श्लाघितासे।

**तिङन्तः**—आक्रीडन्ते यैरिति करणविग्रहे घञि आक्रीडशब्दसिद्धौ नागराक्रीडाः शाखिनो यत्रेति वहुव्रीहिणा वनान्तविशेषणम्। साक्षिण इति पाठे आक्रीडनमाक्रीड इति भावे घञि नगराक्रीडस्य साक्षिण इति तत्पुरुषः ॥१२॥

नगर–स्त्री–स्तन–न्यस्त–धौत–कुङ्कुम–पिञ्जराम्।
विलोक्य सरयूं रम्यां गन्ता ऽयोध्या त्वया पुरी ॥ १३ ॥

**अन्वयः**—नगरस्त्रीस्तनन्यस्त-धौतकुङ्कुमपिञ्जरां रम्यां सरयूं विलोक्य त्वया अयोध्या पुरी गन्ता।

**हिन्दी**—नगरकी स्त्रियोंके स्तनों पर लगाये केसरिया चन्दन और कुंकुमके धो जानेसे पीली हुई रमणीय सरयूको देखकर तुम अयोध्यापुरीको आओगे।

**व्याख्या**—नगरस्त्रीस्तनन्यस्तधौतकुंकुमपिञ्जरां पौरनारीकुचविलिप्त-केसरकुंकुमपरिमार्जितपीतवर्णाम्, रम्यां रमणीयां, सरयूं नदीं, विलोक्य वीक्ष्य, त्वया हनुमता, अयोध्या पुरी मम जन्मभूमिः, गन्ता अयिता।

**समासः**—नगरस्य स्त्रियः, तासां स्तनयोः न्यस्ताश्च ये ते धौताः कुंकुमाः, तैः पिञ्जरा, ताम्।

**तिङन्तः**—गमेः कर्मणि लुट्। हलन्तो धातुरिति न चिण्वदिट्—गन्ता ॥१३॥

आनन्दितारस् त्वां दृष्ट्वा प्रष्टारश् चावयोः शिवम्।
मातरः सह मैथिल्या, तोष्टा च भरतः परम् ॥ १४ ॥

**अन्वयः**—मातरः त्वां दृष्ट्वा आनन्दितारः, सह मैथिल्या आवयोः शिवं प्रष्टारः, भरतश्च परं तोष्टा ।

**हिन्दी**—माताएं तुमको देखकर खूब खुशी होंगी । मैथिलीके साथ हमलोगोंका मङ्गल पूछेंगी और भरतको बड़ा सन्तोष होगा ।

**व्याख्या**—मातरः कौशल्यादयः, त्वां हनूमन्तं, दृष्ट्वा वीक्ष्य, आनन्दितारः प्रहर्षितारः । मैथिल्या सीतया, सह सार्धम्, आवयोः रामलक्ष्मणयोः, शिवं कल्याणं, प्रष्टारः अनुयोक्तारः । भरतो मे लघुभ्राता, च पुनः, परं भृशं, तोष्टा सन्तुष्टो भविता ।

**तिङन्तः**—सर्वत्र कर्तरि लुट् । आमन्त्रितार इति पाठान्तरे मन्त्र आमन्त्रणे इति चौरादिकस्य अनित्यण्यन्ताः चुरादय इति पक्षे णिचोऽभावपक्षे रूपम् । अथवा मन्त्र इव मन्त्र इति घञन्तादाचारे क्विबन्तात्तासि आ इत्युपसर्गयोगे रूपम् । सहमैथिल्योरिति पाठे मैथिल्या सहितौ तयोः सहमैथिल्योरिति । 'नद्यृतश्च ५।४।१५३' इति कपो निषेधे बहुव्रीहिः । सहस्यापि पाक्षिकत्वान्न सादेशः ॥ १४ ॥

**आख्यातासि हतं शत्रुमभिषिक्तं विभीषणम् ।**
**सुग्रीवं चाऽर्जितं मित्रं; सर्वांश् चाऽऽगामुकान् द्रुतम् ॥ १५ ॥**

**अन्वयः**—हतम् शत्रुम्, अभिषिक्तं विभीषणम्, अर्जितं मित्रं सुग्रीवं, सर्वान् द्रुतम् आगामुकान् आख्यातासि ।

**हिन्दी**—शत्रु रावण मारा गया, विभीषण राजा हुए, सुग्रीव एक नये मित्र मिले, सभी लोग जल्दी ही आने वाले हैं । यह सभी तुम्हें कहना होगा ।

**व्याख्या**—शत्रुं रावणं, हतं मारितं, विभीषण च तदनुजमभिषिक्तं लङ्काराज्ये सामन्तत्वेन संस्थापितम् । सुग्रीवं च, मित्रं सुहृदम्, अर्जितम् लब्धम् । द्रुतम् शीघ्रमेवास्मान् आगामुकान् आगतिशीलान्, आख्यातासि कथयितासि, त्वमिति शेषः ।

**तिङन्तः**—ख्या प्रकथने, अथवा चक्षिङ् आख्याने—इत्युभयोः कर्तरि लुटि रूपम् ॥ १५ ॥

**गन्तारः परमां प्रीतिं पौराः श्रुत्वा वचस् तव ।**
**ज्ञात्वैतत् सम्मुखीनश् च समेता भरतो ध्रुवम् ॥ १६ ॥**

**अन्वयः**—पौराः तव वचः श्रुत्वा परमां प्रीतिं गन्तारः । भरतश्च एतत् ज्ञात्वा ध्रुवं सम्मुखीनः समेता ।

**हिन्दी**—नगरके लोग तुम्हारी बात सुनकर परम प्रसन्न हो जायंगे और भरत भी यह सुनकर निश्चय तुम्हारे सामने पहुँचेंगे ।

**व्याख्या**–पौराः नागरिकाः, तव हनूमतः, वचो वाचं, श्रुत्वाऽऽकर्ण्य, परमां भूयसीं, प्रीतिम् सन्तोषं, गन्तारः प्राप्तारः । भरतो मदनुजः च, एतद् त्वदुपस्थानं, ज्ञात्वा विज्ञाय, ध्रुवं निश्चितम्, सम्मुखीनः मत्प्रतिविम्वः, समेता आगन्ता, त्वत्समक्षे इत्यर्थः ।

**तिङन्तः**––गमेरिणश्च कर्तरि लुट् । सम्पूर्वकत्वात् मुखस्य मम प्रतिविम्बरूपः त्वत्सम्मुखीनः समेता । सम्पूर्वकः इण् धातुः समेतेति ।। १६ ।।

**गते त्वयि पथाऽनेन वयमप्यंहितास्महे ।**
**लब्धाहेऽहं धृतिं प्राप्ते भूयो भवति सम्मुखे ।। १७ ।।**

**अन्वयः**––अनेन पथा त्वयि गते वयमपि अंहितास्महे । भूयः सम्मुखे प्राप्ते भवति अहं धृतिं लब्धाहे ।

**हिन्दी**—जब आप इस मार्गसे वहाँ चले जायँगे तब हमलोग भी चलेंगे । फिर जब आप वहाँसे लौटकर मेरे सामने आवेंगे तो मुझे बड़ा धैर्य मिलेगा ।

**व्याख्या**–अनेन मन्निर्दिष्टेन, पथाऽध्वना, त्वयि भवति, गते प्रस्थिते, वयं सर्वे, अंहितास्महे आगन्तारः । भूयः पुनश्च, भवति त्वयि, सम्मुखे ततो मिलित्वा मत्समक्षे, प्राप्ते समागते, अहं रामः स्वयं, धृतिं धैर्यं, लब्धाहे अधिगन्तास्मि ।

**तिङन्तः**––अहि गतौ इति भौवादिकस्य कर्तरि लुट् । लब्धाहे लभेर्भौवादिकस्यानिटो 'ह एति ७।४।५२' इति तासो 'हे' इत्यादेशः ।। १७ ।।

**गते तस्मिन् गृहीताऽर्थे रामः सुग्रीव-राक्षसौ ।**
**उक्तवान् श्वोऽभिगन्तास्थो युवां सह मया पुरम् ।। १८ ।।**

**अन्वयः**–गृहीतार्थे तस्मिन् गते रामः सुग्रीवराक्षसौ उक्तवान् । युवां मया सह श्वः पुरम् अभिगन्तास्थः ।

**हिन्दी**—सन्देश लेकर हनुमान्‌जीके चले जानेपर रामने सुग्रीव और विभीषणसे कहा कि आप दोनों मेरे साथ कल अयोध्याको चलेंगे ।

**व्याख्या**–गृहीतार्थे लब्धसन्देशे, तस्मिन् हनूमति, गते प्रस्थिते सति, रामो राघवः, सुग्रीवराक्षसौ कपीन्द्र-विभीषणौ, उक्तवान् व्याहरत्। युवां भवन्तौ, श्वःआगामिनि दिने, मया सह सार्धं, पुरम् अयोध्याम्, अभिगन्तास्थः प्रस्थातासाथे ।।१८।।

**द्रष्टास्थस् तत्र तिस्रो मे मातॄस् तुष्टान्तराऽऽत्मनः ।**
**आत्यन्तीनं सखि-त्वं च प्राप्तास्थो भरताऽऽश्रयम् ।। १९ ।।**

**अन्वयः**––तत्र मे तिस्रो मातरः तुष्टान्तरात्मनः द्रष्टास्थः । भरताश्रयम् आत्यन्तीनं सखित्वं च प्राप्तास्थः ।

**हिन्दी**–वहाँ पर मेरी तीनों माताओंको संन्तुष्ट अन्तरात्मावाली देखोगे। तथा भरतजीके साथ अटूट मैत्री पाओगे।

**व्याख्या**—तत्रायोध्यायाम्, मे मम, तिस्रोऽग्निमिताः, मातृः प्रसूः, तुष्टान्तरात्मनः प्रहृष्टहृदः, द्रष्टास्थः अवलोकयितास्थः।

**समासतद्धितौ**—तुष्टोऽन्तरात्मा यासां ताः। भरत आश्रयो यस्य तत्। अत्यन्तगामीत्यर्थे 'अयारपार० ५।२।११' इति खः। सख्युर्भावः सखित्वम् ॥ १९ ॥

**नैवं विरह-दुःखेन वयं व्याघानितास्महे।**
**श्रमो ऽनुभाविता नैवं भवद्भ्यां च वियोग-जः ॥ २० ॥**

**अन्वयः**—एवं वयम् वियोगदुःखेन न व्याघानितास्महे। एवं भवद्भ्याम् च वियोगजः श्रमः न अनुभाविता

**हिन्दी**—इस प्रकार हमलोगोंको वियोगदुःख नहीं सतावेगा और आप दोनोंको वियोगजन्य कष्ट नहीं ज्ञात होगा।

**व्याख्या**—एवम् इत्थ, वयं सीतादयः, वियोगदुःखेन भवद्विरहजन्यकष्टेन, न नहि, व्याघानितास्महे व्याहन्तास्महे। भवद्भ्यां उभाभ्यां, च पुनः (अपि), वियोगजः विरहजन्यः, श्रमः क्लेशः, न नहि, अनुभविता।

**तिङन्तः**—कर्मणि लुडुंभयत्रापि। चिण्वदिट् चोभयत्रापि। अनुपूर्वकश्च भूधातुः सकर्मको ज्ञेयः। संयोजितास्महे इति पाठे तु ण्यन्तस्य युजेः चिण्वदिटि **'णेरनिटि ६।४।५१'** इति णिलोपः। चिण्वदिटस्तु असिद्धवदत्राभादिति असिद्धत्वं ज्ञेयम् ॥ २० ॥

**एवं युवां मम प्रीत्यै कल्प्तास्थः कपि-राक्षसौ !।**
**गन्तुं प्रयतितासाथे प्रातः सह मया यदि ॥ २१ ॥**

**अन्वयः**—हे कपिराक्षसौ ! यदि प्रातः मया सह गन्तुं प्रयतितासाथे, एवं युवां मम प्रीत्यै कल्प्तास्थः।

**हिन्दी**—हे सुग्रीव और विभीषण ! यदि आप दोनों प्रातःकाल मेरे साथ चलनेके लिये प्रयत्न करते हैं तो यों सारी प्रसन्नताके आप उद्भावक हो जाते हैं।

**व्याख्या**—हे कपिराक्षसौ सुग्रीवविभीषणौ ! यदि चेत्, प्रातः प्रभाते, मया रामेण, सह सार्धं, गन्तुं प्रस्थातुं, प्रयतितासाथे प्रयत्नं कर्तास्थः, एवम् इत्थं, मम रामस्य, प्रीत्यै प्रेम्णे, कल्प्तास्थः अर्हौ भवितास्थः।

**तिङन्तः**––कल्प्तास्थः इत्यत्र **‘लुटि च क्लृपः १।३।९३’** इति तङभावपक्षे, **‘तासि च क्लृपः ७।२।६०’** इतीट् प्रतिषेधः। **‘क्लृपि सम्पद्यमाने चतुर्थी २।३।१३’** इति वार्तिकबलाच्चतुर्थी ॥ २१ ॥

**उक्तवन्तौ ततो रामं वचः पौलस्त्स्य-वानरौ।**
**अनुग्रहोऽयं काकुत्स्थ ! गन्तास्वो यत् त्वया सह ॥ २२ ॥**
**अनुमन्तास्वहे नाऽऽवां भवन्तं विरहं त्वया।**
**अपि प्राप्य सुरेन्द्र-त्वं, किं नु प्रत्तं, त्वयाऽऽस्पदम् ॥ २३ ॥**

**अन्वयः**—ततः पौलस्त्यवानरौ रामं वचः उक्तवन्तौ। हे काकुत्स्थ ! अयम् अनुग्रहः ( भवतः ) यत् त्वया सह गन्तास्वः। आवाम् सुरेन्द्रत्वम् अपि प्राप्य त्वया भवन्तं विरहम् न अनुमन्तास्वहे। त्वया प्रत्तम् आस्पदम् किन्नु ?

**हिन्दी**––तब विभीषण और सुग्रीव दोनोंने रामचन्द्रसे बातें कहीं ‘हे काकुत्स्थ ! यह आपकी कृपा है कि हम दोनों आपके साथ कल चलेंगे। हम दोनों तो इन्द्रपद पाकर भी आपके साथ होने वाले विरहको नहीं सह सकेंगे। आपके द्वारा राज्यरूपी पुरस्कार प्राप्तिकी चर्चा क्या करनी है’ ?

**व्याख्या**––ततः रामोक्तेरनन्तरम्, पौलस्त्यवानरौ विभीषणसुग्रीवौ, उक्तवन्तौ ऊचतुः। हे काकुत्स्थ ! अयम् वर्तमानः, अनुग्रहः प्रसादः (भवतः)। यत् यतः, त्वया भवता, सह साकम्,गन्तास्वः श्वोऽयोध्यां यातास्वः। आवाम् उभौ, सुरेन्द्रत्वं देवेन्द्रपदम्, अपि, प्राप्य अधिगत्य, त्वया भवता, भवन्तं जायमानं, विरहं वियोगं, न नहि, अनुमन्तास्वहे स्वीकर्तास्वहे। त्वया भवता, प्रत्तम् समर्पितम्, आस्पदम् राज्यं, प्राप्तवन्तौ लब्धवन्तौ, किन्नु कथायावः।

**तिङन्तः**–प्रत्तम्–**‘अच उपसर्गात्तः ७।४।४७’** इति दा धातोः तादेशः। **‘धातुसम्बन्धे प्रत्ययाः ३।४।१’** इति सूत्रबलात् भवन्त विरहमिति वर्तमानकालेन सह अनुमन्तास्वहे इति लुटा सम्बन्धो ज्ञेयः। इत्येतावदेव लुड्-विलसितम् समाप्तम्। अग्रे प्रकीर्णक्रिया–विलसितम् ॥ २२–२३ ॥

अथ सर्गावसानोपयोगि-विविधच्छन्दोभिः क्रियाभिश्च विविधाभिरुपक्रमते–

**ततः कथाभिः समतीत्य दोषामारुह्य सैन्यैः सह पुष्पकं ते।**
**सम्प्रस्थिता वेगवशादगाधं प्रक्षोभयन्तः सलिलं पयोधेः ॥ २४ ॥**

**अन्वयः**––ततः ते कथाभिः दोषां समतीत्य, सैन्यैः सह पुष्पकम् आरुह्य, वेगवशात् पयोधेः अगाधं सलिलं प्रक्षोभयन्तः संप्रस्थिताः। उपजातिवृत्तम् पद्यद्वयं यावत्।

**हिन्दी**—बाद उन सबोंने अनेक प्रकारकी कथाओंसे रात्रि विताकर प्रातःकाल सैन्योंके साथ पुष्पक विमानपर चढ़कर उसके वेगसे समुद्रके अथाह जलको भी प्रक्षुब्ध करते हुए अयोध्याके लिये प्रस्थान किया। अर्थात् सभी साथ ही चले।

**व्याख्या**–ततः,ते रामादयः,सर्वं करणीयं समाप्य,कथाभिः विविधवार्ताभिः, दोषां रात्रिम्, समतीत्य समाप्य, प्रातः प्रभाते, सैन्यैः प्रधानबलैः, सह साकं, पुष्पकं कुबेरयानं रावणापहृतम्, आरुह्य अधिष्ठाय, वेगवशात् पुष्पकोद्भूतरंहःप्रभावात्, पयोधेः समुद्रस्य, अगाधम् अक्षोभ्यम् अतलस्पर्शमपि, सलिलं जलम्, प्रक्षोभयन्तः क्षुब्धं कुर्वन्तः, सम्प्रस्थिताः अयोध्यां प्रति प्रयाणं कृतवन्तः।

**तिङन्तः**—इहापि 'प्रक्षोभयन्तः प्रस्थिताः' इति वर्तमानभूतयोः सम्बन्धः। '**धातुसम्बन्धे प्रत्ययाः** ३।४।१' इत्यस्यैव प्रभावः। वर्तमाने शतृ, भूते क्तः इति।

सम्प्रति रामो मार्गपरिचयं प्रियायै प्रयच्छन्नयोध्यां प्रयाति। तथाहि—

**सेतुं, महेन्द्रं, मलयं, स-विन्ध्यं**
**स-माल्यवन्तं गिरिमृष्यमूकम्।**
**स-दण्डकाऽरण्य-वर्तीं च पम्पां**
**रामः प्रियायाः कथयन् जगाम॥ २५॥**

**अन्वयः**—रामः सेतुं, महेन्द्रं, मलयं, सविन्ध्यं समाल्यवन्तम् ऋष्यमूकं गिरिम्, सदण्डकारण्यवर्तीं पम्पां च प्रियायाः कथयन् जगाम।

**हिन्दी**—रामचन्द्रजी समुद्र पर अपने बनाये पुलको, महेन्द्र पर्वतको, मलयाचलको, विन्ध्यपर्वत तथा माल्यवान् पर्वतके साथ ऋष्यमूक पर्वतको, दण्डकारण्यके साथ-साथ पम्पासर नामक झीलको भी अपनी प्रियाको दिखाते हुए चले।

**व्याख्या**--( तत्र पुष्पकाख्ये व्योमयाने समुपविष्टो ) रामः राघवः, सेतुं स्वनिर्मापितं समुद्रतरणमार्गं, महेन्द्रं तन्नामानं गिरिम्, मलयं मलयाख्यम् अचलम्, सविन्ध्यं विन्ध्याचल-सहितं, समाल्यवन्तं माल्यवदचलोपेतम्, ऋष्यमूकं तन्नामानं च सुग्रीवनिवासभूतं पर्वतम्, सदण्डकारण्यवर्तीं दण्डकाख्य-वन-मध्यस्थां, पम्पाम् तदाख्यं बृहत्तरं तटाकं च, प्रियायाः स्ववल्लभायाः ( जानक्याः सम्बन्धे ), कथयन् निर्दिशन्, जगाम ययौ। अयोध्यामिति शेषः।

**तिङन्तः**--प्रियायाः इति सम्बन्धे षष्ठी। कथयन् जगामेति '**धातु-सम्बन्धे प्रत्ययाः** ३।४।१'.इति लट्-लिटौ॥ २५॥

प्रहर्षणीद्वयेनाग्रेऽपि मार्गमेव वक्ति, सम्प्रति महतोत्साहेन जन्मभूप्रान्तं वर्णयति–

**एते ते मुनि-जन-मण्डिता दिगन्ताः,**
**शैलोऽयं लुलितवनः स चित्रकूटः ।**
**गङ्गेयं सु-तनु ! विशाल-तीर-रम्या,**
**मैथिल्या रघुतनयो दिशन् ननन्द ॥ २६ ॥**

**अन्वयः**—हे सुतनु ! एते ते मुनिजन-मण्डिता दिगन्ताः । अयं स लुलितवनः चित्रकूटः शैलः । इयं सा विशालतीररम्या गङ्गा–इति मैथिल्या निर्दिशन् रघुतनयः ननन्द । ( प्रहर्षणीलक्षणम् २१ सर्गान्ते दत्तम् ) ।

**हिन्दी**—हे सुन्दरि सीते ! ये वे ही मुनिजनोंसे सुशोभित दिग्विभाग हैं, जहां हमलोग रहते थे । यह वही पुष्पक विमानके वेगसे कम्पायमान वनमालावाला चित्रकूट पर्वत है, जहाँ भरत समागम हुआ था । यह वही विशाल तीरके कारण रमणीय गङ्गाजी हैं, जहाँ निषादराजने पार उतारा था । इस प्रकार सीताजीको मार्ग दिखाते हुए रामचन्द्रजी प्रसन्न हो रहे थे ।

**व्याख्या**—हे सुतनु सुन्दरि ! एते पुरो दृश्यमानाः, ते पूर्वानुभूताः, मुनिजनमण्डिताः मननशीललोकविभूषिताः, ( अध्ययन-शील-सज्जनालङ्कृता इत्यर्थः ), दिगन्ताः दिग्विभागाः सन्ति । अयं प्रत्यक्षं दृश्यमानः, स भरत-समागमरम्यः, लुलितवनः पुष्पकवेगकम्पायमानकाननः, चित्रकूटः विचित्रशृङ्गः, शैलः तन्नामा पर्वतः । इयं च सा निषादतारिता, विशालतीररम्या वृहत्तटरमणीया, गङ्गा भागीरथी । इति एवं, मैथिल्याः सीतायाः, दिशन् निर्देशं विदधत्, रघुतनयो रामः, ननन्द मुमुदे ।

**तिङन्तः**—दिशन् ननन्द इति पूर्ववद्धातुसम्बन्धे लट्-लिटौ । सुतनु इति 'कृषि-चमि-तनि०' इत्यौणादिकः तनुः । क्वचित्तनूः इति ऊकारान्तोऽपि स्त्रियां प्रोक्तः । इति सम्बुद्धौ ह्रस्वः । मैथिल्या इति पूर्ववत्सम्बन्धषष्ठी ॥ २६ ॥

**शिञ्जान-भ्रमर-कुलाऽऽकुलाऽग्र-पुष्पाः**
**शीता-ऽम्भः-प्रविलय-संप्लवाऽभिलीनाः ।**
**एते ते सु-तनु ! पुरी-जनोपभोग्या**
**दृश्यन्ते नयन-मनोरमा वनाऽन्ताः ॥ २७ ॥**

**अन्वयः**—हे सुतनु ! एते ते शिञ्जानभ्रमरकुलाऽऽकुलाग्रपुष्पाः शीताम्भः-प्रविलय-सम्प्लवाभिलीनाः पुरीजनोपभोग्याः नयनमनोरमाः वनान्ताः दृश्यन्ते । ( तान् पश्येति शेषः ) ।

**हिन्दी**--हे सुन्दरि ! ये वे ही मेरे बाल्यकालके क्रीडाक्षेत्र नगरोपवन दीख रहे है, जिनके पुष्पोंके अग्रभागपर गुञ्जन करते हुए भ्रमर-समूह बैठा है और वापियोंके शीतल जलके झकोरोंसे जिनके सभी स्थल अभिषिक्त हैं, जो नेत्र और मन दोनोंको लुभा रहे हैं, उन्हें देखो ।

**व्याख्या**—एते पुरो दृश्यमानाः, ते बाल्यकालोपभुक्ता अयोध्यान्तिकस्थाः, शिञ्जातभ्रमरकुलाकुलाग्रपुष्पाः गुञ्जदलिगणाक्रान्तकुसुमप्रान्ताः, शीताम्भः-प्रविलयसम्प्लवाभिलीनाः हिमसलिल-कुल्याप्रवाहसिक्तस्थलाः, नयनमनोरमाः नेत्रमानसाभिरामाः, पुरीजनोपभोग्याः नागरिकलोकसेव्याः, वनान्ताः अभ्यग्रोपवनभागाः, दृश्यन्ते विलोक्यन्ते ( पश्य त्वम् इति शेषः ) ।

**तिङन्तः**—विलीयते जलमस्मिन् इति विलयः तटाकः (कुल्या)। 'निमिमीलियां खलचोरात्वं न' ६।१।५१ इत्यात्वनिषेधे वर्तमाने 'एरच् ३।३।५६' इत्यचि गुणः ।

**समासः**--शिञ्जानाश्च ते भ्रमराः, तेषां कुलानि, तैः आकुलानि अग्राणि येषां तानि शिञ्जानभ्रमरकुलाऽऽकुलाग्राणि पुष्पाणि येषां ते । शीताम्भसां प्रविलयः, तस्य सम्प्लवः ( प्रवाहः ), तेन अभिलीनाः अभिषिक्ताः । पुर्याः जनाः, तैः उपभोग्याः । रमयन्तीति रमाः ( कर्तरि पचाद्यचि ), नयने च मनश्चेति नयनमनसी, तयोः रमाः, लोभकाः इत्यर्थः ।। २७ ।।

सम्प्रति जन्मभूमिं विशिनष्टि स्रग्धरया—

**स्थानं नः पूर्व-जानामियमधिकमसौ प्रेयसी पूरयोध्या,**
**दूरादालोक्यते या हुत-विविध-हविः-प्रीणिताऽशेष-देवा ।**
**सोऽयं देशो रुदन्तं पुर-जनमखिलं यत्र हित्वा प्रयातौ,**
**आवां सीते ! वनाऽन्तं सह धृत-धृतिना लक्ष्मणेन क्षपाऽन्ते ।।२८।।**

**अन्वयः**--हे सीते ! या असौ हुतविविधहविःप्रीणिताशेषदेवा अयोध्या पूः दूराद् अवलोक्यते । असौ (प्रसिद्धा) इयं नः पूर्वजानां प्रेयसी अधिकम् (अविपूर्वकम्) स्थानम् (अधिष्ठानम्) । सोऽयं देशः यत्र क्षपान्ते रुदन्तम् अखिलं पुरजनं हित्वा आवाम् धृतधृतिना लक्ष्मणेन सह वनान्तं प्रयातौ ।

**हिन्दी**--हे सीते ! जहाँ तरह-तरहके हविष्य द्रव्योंसे हवन करके सभी देव तृप्त किये जाते हैं, वह अयोध्यापुरी दूर ही से दीख रही है । यह हमारे पूर्वजोंकी अत्यन्त प्रिय निवास-भूमि है, और यह वही स्थान है जहाँ रात्रिशेषमें

रोदन करते हुए सभी पौरजनोंको छोड़कर हम दोनोंने धैर्यशाली लक्ष्मणके साथ वनके लिये प्रस्थान किया था ।

**व्याख्या**—हे सीते जानकि! या असौ प्रसिद्धा, विमानात् दूरतोऽन्तिकतोऽवलोक्यमाना, अयोध्या पूः नगरी, हुतविविधहविःप्रीणिताशेषदेवा अग्निहुतानेकहविष्य-द्रव्य-सन्तर्पिताखिलगीर्वाणा, दृश्यतेऽवलोक्यते । इयम् ( विमानसान्निध्यान्निर्देशः ), नः अस्माकं, पूर्वजानां ककुत्स्थादीनां, प्रेयसी प्रियतमा, (अधिकं स्थानम) अधिष्ठानं निवासभूरस्ति । (अत्र 'अधि' इत्युपसर्ग एव 'क'-प्रत्यय-योगेन व्युत्पत्या निर्दिष्टः, यथा 'हिरण्यपूर्वं कशिपुं प्रचक्षते' इत्यादि) । अयं पुरो दृश्यमानः देशो भूभागः सोऽस्ति, यस्मिन भागे, क्षपान्ते रात्रिशेषे, रुदन्तं साश्रुम, अखिलम् सर्वं, पुरजनं नगरलोकं, हित्वा विहाय, आवाम् सीतारामौ, धृतधृतिना धैर्यशालिना, लक्ष्मणेन सौमित्रिणा, सह सार्धं, वनान्तं वनोद्देशं, प्रयातौ जग्मिव । प्रस्थितावित्यर्थः ।

**समासः**—हुतानि च तानि विविधहवींषि, तैः प्रीणिता अशेषा देवा यत्र पुर्यां सेति बहुपदा बहुव्रीहिः । धृता धृतिः येनेति । क्षपाया अन्ते । (इत्येवं ज्ञातसमाससाराणामपि स्थूणानिखनन्यायेनेयमुक्तिरिह ) ।। २८ ।।

रामाभीष्टं भरतसमागमं शार्दूलविक्रीडितेनाख्याति—

**तूर्याणामथ निःस्वनेन सकलं लोकं समापूरयन्**
**विक्रान्तैः करिणां गिरीन्द्र-सदृशां क्ष्मां कम्पयन् पर्वतः ।**
**साऽऽनन्दाऽश्रु-विलोचनः प्रकृतिभिः सार्धं सहाऽन्तःपुरः**
**सम्प्राप्तो भरतः स मारुतिरलं नम्रः समं मातृभिः ।। २९ ।।**

**अन्वयः**—अथ तूर्याणां निःस्वनेन सकलं लोकं समापूरयन्, गिरीन्द्र-सदृशां करिणां विक्रान्तैः सर्वतः क्ष्मां कम्पयन्, सानन्दाश्रुविलोचनः, सहान्तःपुरः, समारुतिः, प्रकृतिभिः सार्धम्, मातृभिः समम्—अलं नम्रः भरतः सम्प्राप्तः । स्वागतसम्पादनार्थं भ्रातृसमीपमित्यर्थः ।

**हिन्दी**—बाजों की आवाजसे सभी लोगोंको गुञ्जित करते हुए, पर्वतराजके सदृश हाथियोंके आक्रमणसे पृथ्वीको कँपाते हुए, आनन्दाश्रुसे परिपूर्ण नेत्रवाले, अन्तःपुरकी रानियोंके साथ, हनुमान्जीके साथ, प्रजाके साथ, एवं सभी माताओंके साथ अत्यन्त विनम्र होकर भरतजी बड़े भाई रामजी के स्वागत करनेके लिये पहुँचे ।

**व्याख्या**—अथ रामस्य अयोध्यासमीपोपस्थितौ, तूर्य्याणां वाद्यानां, निःस्वनेन ध्वनिना, सकलं सर्वं, मार्गस्थं लोकं जनं, समापूरयन् व्याप्नुवन्, गिरीन्द्रसदृशां पर्वतराजतुल्यानां, करिणां हस्तिनां, प्रक्रान्तैः पादन्यासैः, क्ष्मां धरां, सर्वतः परितः, कम्पयन् विधूनयन्, आनन्दाश्रुविलोचनः प्रहर्षाश्रुसम्भृताक्षः, सहान्तःपुरः अन्तःपुरस्थनारीगणसमावृतः, समारुतिः पूर्वागतहनुमत्समेतः, प्रकृतिभिः सह सप्रजः, मातृभिः कौशल्यादिभिः, समं सह, अलम् अत्यन्तं, नम्रः विनतः, भरतः रामानुजः ( सानुजः ), सम्प्राप्तः समुपस्थितः, ज्येष्ठभ्रातुः स्वागतार्थम् ।

**तिङन्तः**—'त्यदादिषु दृशोऽनालोचने कञ्च ३।२।६०' इति क्विन् । समानं पश्यन्तीत्यर्थे 'दृग्दृश्वतुषु ६।३।८३' इति समानस्य सादेशः सदृशामिति ।।२९।।

द्रुतविलम्बितेन पुरप्रवेशमाख्याति—

**अथ स-सम्भ्रम-पौर-जनाऽऽवृतो भरत-पाणि-धृतोज्ज्वल-चामरः ।**
**गुरु-जन-द्विज-वन्द्यभिनन्दितः प्रविशति स्म पुरं रघु-नन्दनः ।। ३० ।।**

**अन्वयः**—अथ रघुनन्दनः ससम्भ्रमपौर-जनावृतः भरतपाणि-धृतोज्ज्वल-चामरः गुरुजनद्विजवन्द्यभिनन्दितः सन् पुरम् प्रविशति स्म ।

**हिन्दी**—बाद पुरजनोंसे घिरे हुए भरतजीके द्वारा बड़े आदरसे सफेद चँवर झुलाया जाते हुए एवं गुरुजन–द्विजगण और वन्दीगणों द्वारा अभिनन्दित रामचन्द्रजी १४ चौदह वर्षके बाद अयोध्यापुरीमें प्रविष्ट हुए ।

**व्याख्या**—अथ भरतसङ्गमानन्तरम्;रघुनन्दनः रामः,ससम्भ्रम-पौर-जनावृतः सादर-नागर-जन-सम्पृक्तः, भरतपाणि-धृतोज्ज्वल-चामरः भरत-हस्त-चालित-शुक्लचामरः, गुरुजनद्विजवन्द्यभिनन्दितः श्रेष्ठवशिष्ठादि-मान्यजनैः विद्वद्भिर्वन्दिजनैश्च अभिनन्दितः सत्कृतः, पुरं नगरम् अयोध्यां, प्रविशति स्म । चतुर्दशवर्षानन्तरम् रामस्यायं पुरप्रवेशः कैकेयी-नियमपालनानन्तरमिति विभावनीयम् सुधीभिः ।

**समासः**—ससम्भ्रमैः पौरजनैः आवृतः । भरतस्य पाणिना धृतम् उज्ज्वलम् चामरं यस्येति विग्रहेण अपरं चामरं शत्रुघ्नेन गृहीतमासीदिति ध्वन्यते । गुरुजनाश्च द्विजाश्च वन्दिनश्चेति द्वन्द्वानन्तरम् तैः अभिनन्दित इति तत्पुरुषः ।। ३० ।।

रामस्याश्वमेधयज्ञानुष्ठानमाख्याति सुन्दरीच्छन्दसा—

**प्रविधाय धृतिं परां जनानां युव-राजं भरतं ततोऽभिषिच्य ।**
**जघटे तुरगाध्वरेण यष्टुं कृत-सम्भार-विधिः पतिः प्रजानाम् ।। ३१ ।।**

**अन्वयः**—ततः कृत सम्भारविधिः प्रजानां पतिः (श्रीरामः), जनानां परां धृतिं प्रविधाय, भरतं युवराजम् अभिषिच्य, तुरगाध्वरेण यष्टुं जघटे ।

**हिन्दी**—पुरप्रवेशके बाद सब सामग्री जुटाकर प्रजापति रामचन्द्रजीने पुरवासियोंको धैर्य बँधाकर भरतको युवराजपदपर अभिषिक्त कर अश्वमेधयज्ञ करनेमें जुट गये ।

**व्याख्या**—ततः पुरप्रवेशानन्तरम्, कृतसम्भारविधिः विहितसामग्रीसञ्चयः, प्रजानां प्रकृतीनां, पतिः स्वामी श्रीरामः, जनानां लोकानां, परां श्रेष्ठां, धृतिं धैर्यं च, प्रविधाय कृत्वा, भरतं कैकेयीपुत्रं, युवराजं नवं सहायकं, राजानं च, अभिषिच्य सविधि सिंहासनारूढं विधाय, तुरगाध्वरेण अश्वमेधयज्ञेन राज्याभ्युदयकृता यागेन, यष्टुं देवान् पितॄन् तर्पयितुं, जघटे व्यासमज्ज । सुन्दरीछन्दसो लक्षणम् यथा—'ससजा विषमे गुरू समेऽत्र सभरालो यदि सुन्दरी गुरू चेद्' ॥ ३१ ॥

नायकाभ्युदयान्तं काव्यमिति महाकाव्यकृत्य समाप्य तथ्यं तदध्ययनफलं पुष्पिताग्रया छन्दसा ब्रूते—

**इदमधिगत-मुक्ति-मार्ग-चित्रं विवदिषतां वदतां च सन्-निबन्धात् ।**
**जनयति विजय सदा जनानां युधि सुसमाहितमैश्वरं यथाऽस्त्रम् ॥ ३२ ॥**

**अन्वयः**—उक्तिमार्गचित्रम् अधिगतम् इदं काव्यम् सुसमाहितं सत् सन्निबन्धात् हेतोः युधि अधिगतमुक्तिमार्गचित्रं सुसमाहितम् ऐश्वरम् अस्त्रं यथा विवदिपतां वदतां च जनानाम् विजयं जनयति ।

**हिन्दी**—शब्दार्थकी छटासे एवम् अलङ्कारोंकी विचित्रतासे युक्त यह काव्य यदि खूब मनन कर समझ लिया जाय तो सुसज्जित होनेके कारण संग्राममें प्रयुक्त संहार करनेका ज्ञाता जिस तरह ऐश्वरास्त्रको सावधानीसे चलाकर विजय प्राप्त करता है, वैसे ही यह काव्यशास्त्र भी विवाद करनेके इच्छुक या विवाद करनेवाले दोनोंको अवश्य विजय प्रदान करता है ।

**व्याख्या**—उक्तिमार्गचित्रम् शब्दार्थविन्यासालङ्कारकौशलशालि, इदं महाकाव्यशास्त्रम्, अधिगतम् श्रुतम्, सुसमाहितम सम्यग् मननानुगमादिद्वारा अभ्यस्तं सत्, सन्निबन्धात् प्रसादादिगुणालङ्कारान्वित-पाणिनीयाष्टकपद्धतिशालित्वात्, युधि संगामे, अधिगतमुक्तिमार्गचित्रम् ज्ञात-विमोक-संहारमार्गविलक्षणम् नानावर्णविचित्रम्, सुसमाहितं सम्यक् प्रयुक्तम्, ऐश्वरं शैवम्, अस्त्रम् प्रहरणम्, यथा इव, विवदिषतां विवादं चिकीर्षूणाम्, विवदतां विवादे प्रवृत्तानां च, जनानां

लोकानां, विजयं जययशः, जनयति प्रयच्छति। "अयुजि न-युगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" ( इति लक्षणमर्द्धसमवृत्तस्य )॥ ३२॥

समादरणीयं महाकाव्यशास्त्रमिदं व्याकरणकाव्योभयशास्त्रप्रशिक्षणशालित्वादित्याख्याति—

**दीप-तुल्यः प्रबन्धोऽयं शब्द-लक्षण-चक्षुषाम्।**
**हस्ताऽमर्ष इवाऽन्धानां भवेद् व्याकरणादृते॥ ३३॥**

**अन्वयः**—शब्दलक्षण-चक्षुषां दीपतुल्यः अयं प्रबन्धः व्याकरणाद् ऋते अन्धानां हस्तामर्ष इव भवेत्।

**हिन्दी**—यह काव्यशास्त्र व्याकरणाध्ययनकी बुद्धिसे पढ़नेवालोंको तो दीपतुल्य है। अन्यशास्त्रोंके अध्ययनमें भी दीपक-सा काम करेगा। व्याकरण छोड़कर केवल काव्यदृष्टिसे पढ़ने वालोंको तो अन्धोंके हाथसे टटोले हुए वस्तुज्ञानके समान थोथा ऊपरका ही जान होता है। अतः इस काव्यशास्त्रको व्याकरणज्ञान प्राप्त करनेकी दृष्टिसे ही पढ़ाया जाय। (यह स्वयं ग्रन्थकर्ता कहता है)।

**व्याख्या**—शब्दलक्षणचक्षुषाम् पाणिनीयाष्टकज्ञानवतां पाणिनीयसूत्रपाठदृष्टीनाम्, अयं महाकाव्यशास्त्रलक्षणः, प्रबन्धः निबन्धः, दीपतुल्यः प्रदीपकल्पः फलप्रदः। व्याकरणाद् ऋते व्याकरणविद्याशून्यानां केवलकाव्यदृशाऽध्येतॄणां तु, अन्धाना नेत्रशून्यानां, हस्तामर्ष इव केवलं हस्तस्पर्शेण वस्तुज्ञानत्रदेव, शब्दार्थज्ञानमात्रं स्यात्, न तु यथार्थबोधः। अतः पाणिनीयाष्टकाधारम् अध्येयं काव्यशास्त्रमिदमित्येव मर्मविमर्शिकायाः टीकाया अभिप्रायः। 'युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम्' इति लक्षणम्। 'अनुष्टुप्' इति नामान्तरम्। श्लोको वा पद्यं वेत्यादि पथ्यावक्त्रस्यैव नाम॥ ३३॥

इममेवाभिप्रायं तेनैव च्छन्दसा मुनिर्विवृणोति अत्युपयोगितया—

**व्याख्या-गम्यमिदं काव्यमुत्सवः सु-धियामलम्।**
**हता दुर्-मेधसश्चाऽस्मिन् विद्वत्-प्रिय-तया मया॥ ३४॥**

**अन्वयः**—इदं काव्यं काव्यशास्त्रत्वात् व्याख्यागम्यम्। सुधियाम् अलम् उत्सवः। विद्वत्प्रियतया मया अत्र दुर्मेधसः हताः। (पथ्यावक्त्रमेव च्छन्दः)।

**हिन्दी**—यह काव्यशास्त्र व्याख्या द्वारा ही गम्य होगा। पाणिनीयाष्टाध्यायीसूत्रोके आधारपर ही अधिकार-काण्ड तथा प्रकीर्ण-काण्डोंका अध्ययन सफल होगा। सुन्दर बुद्धि ( वैज्ञानिक पाणिनिपद्धति ) से पढ़ने वालोंके लिये तो पर्याप्त आनन्द ही है, क्योंकि मैंने यक्षद्वारा भगवान् शिवका आदेश

पाकर विद्वानोंको सन्तुष्ट करनेकी दृष्टिसे यह काव्यशास्त्र लिखा है। अतः जो व्याकरण तथा काव्य दोनोंकी शिक्षा लेना चाहें वे ही इसे पढें। मन्दबुद्धियोंका इसमें प्रवेश निषिद्ध है ( दुर्मेधसस्तु मया हताः, निरुद्धा एवेत्यर्थः )।

**व्याख्या**—इदं काव्यं काव्यशास्त्रम्, व्याख्यागम्यम् पाणिनीयाष्टकसूत्रार्थव्याख्याबोध्यम्। सुधियां पाणिनीयव्याकरणज्ञानवताम्, अलं पर्याप्तम्, उत्सवः आनन्दप्रदम्। विद्वत्प्रियतया विज्ञजननिर्माणबुद्ध्या, अस्मिन् काव्यशास्त्रे, दुर्मेधसः अक्रमपद्धत्या पठितारः, हताः निवारितास्ते न पठन्तु। ये हि क्रमसूत्रपाठकास्त एवाधिकारकाण्डपठनाधिकारिण इत्यर्थः ॥ ३४ ॥ अध: पद्ये 'श्रीधरसूनु' इति पाठान्तरम्।

इत्थं स्वाभिप्रायं निगद्यावसाने काव्यशास्त्रप्रणयनदेशकालमाख्याति—

**काव्यमिदं विहितं मया वलभ्यां श्रीधरसेन-नरेन्द्र-पालितायाम्।**
**कीर्तिरतो भवतान्-नृपस्य प्रेम-करः क्षिति-पो यतः प्रजानाम् ॥ ३५ ॥**

**इति भट्टि-काव्ये लक्ष्यरूपे कथानके रामविजयाभिषेको लक्षणाख्ये**
**स-लुङ्विलासविविधलकारविलासो द्वाविंशतितमः सर्गः।**
**समाप्तश्चायं भट्टि-काव्य-शास्त्र-ग्रन्थः।**

**अन्वयः**—मया, इदं काव्यम्, श्रीधरसेननरेन्द्रपालितायां वलभ्यां बलभीनामनगर्य्याम्, विहितम्! अत इदं काव्यशास्त्रम्, तस्य नृपस्य, कीर्तिः भवतात्। यतः प्रजानां क्षेमकरः क्षितिपः (अयमिति शेषः)। अप्राप्तस्य प्रापणम् योगः। स च मया सम्पादितः। प्राप्तस्य रक्षणं क्षेमः। स च प्रचारादिना राज्ञ एव कर्तव्यो भवति। पूर्वकाले विद्वांसो ग्रन्थप्रणयनं कुर्वन्ति स्म। राजानश्च तस्य ग्रन्थस्य लेखकादिभिर्लेखयित्वा स्वराज्ये प्रसारयन्ति स्मेति नीतिः प्रचलिताऽऽसीत्। तदनुसारमेवायं कविरपि स्वाहङ्कारं परिहरन्—

**यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।**
**यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥**

इति भगवदुक्त्या तद्रूपाय राज्ञे समर्प्य तस्यैव कीर्तिः भवतात् इति कर्मत्यागमार्गमप्युपदिशति। यतो हि न हि कर्म बन्धकं भवति, तत्रासक्तिरेव बन्धिकेति न ममासक्तिः कर्मणीत्यपि ध्वनितम् महाकविनानेनेत्यलं शिवम्।

**हिन्दी**—मैंने इस काव्यशास्त्रको ( वर्तमान पाँचवीं शताब्दीमें विद्यमान ) श्रीधरसेन नरेन्द्रद्वारा पालित गुर्जरदेशकी प्रसिद्ध नगरी वलभी में लिखा है। अतः यह इसी राजाके लिये कीर्तिरूप होवे ( मेरी इसमें आसक्ति नहीं है ), क्योंकि राजाही प्रजाका क्षेमकारी रक्षक होता है। मैंने तो भगवान् शिवकी

आज्ञाका पालन कर योगकर्म ( अप्राप्तका प्रापण ) कर दिया है। अब इसका प्रचारादि कर्मद्वारा रक्षण-रूप क्षेम-कार्य राजाका ही कर्तव्य है। राजा भगवान्का अंश माना जाता है। अतः भगवान् रूपसे मैं उन्हींको यह अपनी कृति अर्पण करता हूँ। अर्थात् यह उन्हींकी कृति है। मैं तो निमित्त मात्र हूँ। ( इस प्रकार निष्काम-कर्म-मार्ग की ओर कवि का संकेत है )।

**व्याख्या**–अवसाने पृष्ठमेक न पाठ्यते। गणेशपृष्ठनाम्ना त्यज्यते भारतार्यैः। ईदृशी हि भारतीयविद्वन्मर्य्यादा। तदर्थं मया केवलम् अन्तिमश्लोकस्यास्य व्याख्यामात्रं त्यक्त, स्वयं तदर्थं छात्राः कुर्य्युरिति। अस्या रीतेः (मर्यादायाः)अयमपि अभिप्रायो ध्वन्यते यद् गणेशो हि इन्दुर-वाहनः। इन्दुराः तीक्ष्णदन्ता भवन्ति। तद्वत् तर्कबुद्धयो विद्यार्थिनो निजतीक्ष्णदन्तरूपतर्कैः स्वयं कथमर्थं कर्तुं समर्था भवन्तीति गुरुसमक्षे ते तदन्तिमपृष्ठपाठस्यार्थं स्वयं कुर्य्युः। गुरुश्च परीक्षेत स्वच्छात्रान्। एतदर्थमेव ज्ञानाधिष्ठातुर्गणेशदेवस्य नाम्नाऽऽवसानिकपृष्ठत्यागप्रथयं प्रचलिता। मया रीतिरियं वैज्ञानिकीति रक्षितास्ति। अतः कुर्वन्तु स्वयं भट्टिकाव्यस्य चरमश्लोकव्याख्यानं छात्राः। तेषां कृतं व्याख्यानं च शृण्वन्तु गुरव इति शुभम्।

तत्र आशंसा-वाक्यं मे—

अधीष्व प्रत्यभिज्ञाश्रुतेर्बलेन काव्यं
स्वलङ्कृतिप्रभावात् समाससन्धिबोधात्।
तरस्व शीघ्रमित्थं निजोचितां परीक्षां
दिशत्यमोघशस्त्रं हितं च 'केशरी' त्वाम्॥[1]

इतिश्रीवलभीनगरीवास्तव्यस्य श्रीधरस्वामिसूनोर्भट्टिनाम्ना प्रख्यातस्य महाशाब्दिकस्य महाकवेश्च कृतौ रावणवधाभिधे भट्टिमहाकाव्ये तिङन्तकाण्डे लिङादिविलसिते श्रीक्षेमधारि-कौशल्यात्मज-शाण्डिल्य-विहाराभिजन-काशीवास्तव्य-व्याख्यानवागीश सा० व्या० आचार्य न्यायतीर्थ–म० म० पण्डितराज डा० श्रीगोपालशास्त्रिविरचितकाव्य-विमर्शिकाख्यटीकोपेते रामायोध्याप्रत्यागमनं तदीय–राज्याभिषेको नाम द्वाविंशः सर्गः। समाप्तमिदं महाकाव्यशास्त्रम्, शुभं भूयात्।

●

---

[1] जरौ रजौ गुरू द्वौ महेशवक्त्रमुक्तमिति महेशवक्त्रच्छन्दः।

# प्रासङ्गिकमिदम्

काव्ये भट्टिमहाकवेर्विरचिते टीका समाप्तिङ्गता,
श्रीश्रीकेशरिकृष्णशास्त्रि-सुधियो ज्येष्ठस्य सूनोर्गृहे ।
सस्त्रीकस्य शरात्मजस्य विबुधस्तुत्यस्य श्रीवाग्मिनो
गोण्डामण्डलगे प्रधाननगरे कार्यार्थमातिष्ठतः ॥
दमयन्त्यभिधा पत्नी पितृमुख्यौ च कन्यके ।
त्रयः सत्सूनवो यस्य ब्रह्मविष्णुशिवाख्यया ॥
अस्यैवाऽऽस्तेऽनुजो बन्दी कृष्णोऽयं चतुरात्मजः ।
सूनवस्त्रय एकाऽस्य विदुषी कन्यका मता ॥
सरस्वत्या स्त्रिया सार्धं काश्यामास्ते मया सह ।
महाकाव्यस्य तत्रैव जायते मुद्रणं द्रुतम् ॥
चौखम्बामुद्रणे शुद्धे भारतीयप्रकाशने ।
भट्टेर्महाकवेः काव्य-शास्त्रस्यास्य यशस्विनः ।
काव्यमर्मप्रकाशाख्य-टीकयाऽलङ्कृतस्य ह ॥
कोशव्याकृतिपूर्णस्य सर्वेऽपी मे सहायकाः ।
मिलित्वैते प्रवर्द्धेरन् जनोपकृतिकर्मणा ॥
स स्वतन्त्रः कविः शब्दशास्त्रानुगं,
रामवृत्ताऽमृतप्लावितं सागरम् ।
यच्चकारानुप्रास-प्रसादादिभी
रावणान्ताभिधं काव्यमत्यद्भुतम् ॥
कालतस्तद्विधर्म-क्षितीशार्दिते,
पारतन्त्र्य-प्रधाने युगेऽन्तर्हितम् ।
तस्य काव्यस्य मर्मप्रकाशोऽधुना,
भारते स्यात् स्वतन्त्रे शिवानुग्रहात् ॥
समृद्धिः स्याद्देशे समय-जलदाः सन्तु जलदाः,
पुरन्ध्रिः स्याज्जोषा सुनय-निरता नेतृनिवहाः ।
भवेद् दोग्ध्री धेनुः सतत-सुखिनः सन्तु सुधियो,
युवानः सभ्याः स्युः सुविमलविवेकाऽस्तु जनता ॥

इति शिवम् ।

●

# श्लोकानुक्रमणिका

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| अ | | |
| अकम्पनस् | १४ | ८२ |
| अकुप्यदिन्द्रजित् | १७ | ३२ |
| अकूर्दिष्ट | १५ | ४५ |
| अकोकूयिष्ट | १५ | ११४ |
| अक्रुध्यच्चा० | १५ | १९ |
| अगोपिष्टां | १५ | ११३ |
| अग्नीनवरित्र | १७ | ५१ |
| अग्रसिष्ट | १५ | ६२ |
| अघुरंस्ते० | १७ | ६२ |
| अङ्गदेन | १५ | ७७ |
| अङ्गदेना० | १५ | ११५ |
| अचूर्णयच् च | १७ | ७९ |
| अच्छत्तां च | १५ | ९१ |
| अजिघ्रपंस्० | १५ | १०९ |
| अजिह्लदत् | १५ | ११० |
| अज्ञ-वन्० | १९ | १६ |
| अतत्वरच् च | १५ | ६० |
| अतस्तम्भद० | १५ | ८७ |
| अतिकायाद् | १६ | ३ |
| अतिकाये | १६ | २ |
| अतिक्रान्ता | २२ | ९ |
| अतुषत् | १५ | ८ |
| अतुष्यन्नमराः | १७ | ४७ |
| अतृणेट् | १७ | १५ |
| अतौत्सीद् | १५ | ३७ |
| अथ स-सम्भ्रम० | २२ | ३० |
| अदालिषुः | १५ | ३८ |
| अदिहंश् | १७ | ५४ |
| अदीदिपत् | १५ | ८२ |
| अदृश्यन्ता० | १७ | १०० |
| अद्धि त्वं | २० | १२ |
| अद्राष्टां | १५ | २९ |
| अधर्मान् | १७ | ३४ |
| अध्यगीष्टा० | १५ | ८८ |
| अध्यायच् | १७ | ३१ |
| अध्युवास | १४ | ७५ |
| अनंसीद् | १५ | २५ |
| अनर्दिषुः | १५ | ३५ |
| अ निमित्तानि | १७ | ९ |
| अनुजानीहि | २० | २ |
| अनुमन्तास्त्रहे | २२ | २३ |
| अनुष्ठाय | २० | १९ |
| अन्तःपुराणि | १८ | ३७ |
| अन्ये त्वलङ्घिषुः | १५ | ३२ |
| अ-पथ्यमायत्तौ | १८ | ५ |
| अपप्रथद् | १५ | ७२ |
| अप-मन्युस् | १९ | १ |
| अपि तत्र | २१ | ३ |
| अपिस्फवत् | १५ | ९९ |
| अपूजयंश्० | १७ | ५ |
| अपूजयन् | १७ | २ |
| अपूरयन् | १७ | ५६ |
| अ-पृष्टो | १८ | १७ |
| अपौहद् | १७ | ८३ |
| अबभ्राजत् | १५ | ८३ |
| अबिभ्रजत् | १५ | ९३ |
| अभिनच्० | १७ | ६६ |
| अभेदि | १५ | ६५ |
| अभैषुः | १५ | ५७ |
| अमंस्यत | २१ | १० |
| अमन्थीच् | १५ | ४६ |
| अमर्षो | १६ | २१ |
| अम्भांसि | १९ | २३ |
| अ-युक्तमिदम् | १७ | ४९ |
| अयं नियोगः | २० | १५ |
| अरोदीद् | १७ | ४८ |
| अर्थेन | १६ | २७ |
| अलोठिष्ट | १५ | ५३ |
| अवसेयाश् च | १९ | २८ |
| अवादीन् | १५ | ९ |
| अविवेष्टन् | १५ | ६१ |
| अवोचत् | १५ | १३ |
| अशान | २० | २३ |
| अशृण्वन् | १७ | १७ |
| अशोभिष्टा० | १५ | ५४ |
| अश्च्योतद् | १७ | ७७ |
| अश्वान् वालि | १५ | ७८ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| अश्वान् विभी० | १७ | ९० |
| अष्ट-घण्टां | १७ | ९२ |
| अस्ताविषुः | १५ | ७० |
| अस्तुवन् बन्दिनः | १७ | ८ |
| अस्तुवन् देव | १७ | ७० |
| अस्तृणादधिकं | १७ | १०२ |
| अस्पन्दिष्टाऽक्षि | १५ | २७ |
| अस्त्रसच्चा० | १५ | ८४ |
| अहो जागर्ति | १८ | ११ |
| अहौषीत् | १५ | ९६ |
| आ | | |
| आंहिष्ट | १५ | २८ |
| आकर्क्ष्यामि | १६ | ३० |
| आख्यातासि | २२ | १५ |
| आघूर्णिष्टां | १५ | ११८ |
| आघ्नन् | १७ | ७ |
| आचचक्षे | १४ | ५२ |
| आचिक्याते | १४ | ६७ |
| आचिचाय | १४ | ४६ |
| आच्छादयन् | १७ | ३ |
| आजघ्नुम् | १४ | ९६ |
| आटाट्यत० | १७ | ७५ |
| आददीध्वं | १९ | ८ |
| आदिदेश | १४ | ६४ |
| आनन्दयिष्यदा० | २१ | १२ |
| आनन्दितारस्० | २२ | १४ |
| आक्षारौ | २२ | ८ |
| आबध्नन् | १७ | ११२ |
| आमन्त्रयेत | १६ | ७ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| आमुञ्चद् | १७ | ६ |
| आयान्त्यः | २१ | २३ |
| आयिष्ट | १५ | १०४ |
| आरोक्ष्यामि | १६ | ४२ |
| आर्च्छन् | १७ | १० |
| आलोकयत् | १७ | ८१ |
| आशासत | १७ | १ |
| आश्चर्यं | १९ | १९ |
| आश्चर्यं यच्च | २१ | ८ |
| आश्वासयां० | १४ | ६१ |
| आससञ्ज | १४ | १०४ |
| आसीद् | १७ | ५७ |
| आस्कन्दल् | १७ | ८२ |
| आस्फायताऽन्य | १७ | ५० |
| आस्यन् | १७ | १३ |
| आह्वास्यते | १६ | ११ |
| इ | | |
| इच्छा मे | १९ | २५ |
| इदमधिगत० | २२ | ३२ |
| इन्दोः | १६ | १७ |
| इहाऽऽजीव | १७ | ३३ |
| ई | | |
| ईक्षाञ्चक्रे | १४ | १८ |
| उ | | |
| उक्तवन्तौ | २२ | २२ |
| उक्तवान् | २० | ९ |
| उच्चख्नाते | १४ | ३२ |
| उज्जगूरे | १४ | ५१ |
| उत्तिष्ठध्व | २० | १८ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| उत्तेरिथ | १४ | ५७ |
| उत्पाताः | १५ | २६ |
| उत्सुकाऽऽनीयतां | २० | ८ |
| उदजीवत् | १७ | ९५ |
| उदतारिषुरं० | १५ | ३३ |
| उदतारीद् | १५ | १० |
| उदरे | १५ | ५० |
| उद्यंस्यति | १६ | ५ |
| उन्मोलिष्यति | १६ | ८ |
| उन्मुच्य | १८ | ३४ |
| उपशाम्यतु | २० | ५ |
| उभावकृन्ततां | १७ | १०४ |
| उभौ मायां | १७ | १०५ |
| उल्का | १४ | २१ |
| उष्णीषं | १४ | ९५ |
| उह्येरन् | १९ | १० |
| ऊ | | |
| ऊर्णुनाव | १४ | १०३ |
| ऊर्ध्वं | २० | १७ |
| ऊर्ध्वं भ्रिये | १८ | ३६ |
| ऊहिरे | १४ | ९१ |
| ऋ | | |
| ऋषभोऽद्रीन् | १५ | ४४ |
| ए | | |
| एते ते मुनि० | २२ | २६ |
| एवं युवां | २२ | २१ |
| एवं विजिग्ये | १४ | १०६ |
| एष पेक्ष्याम्य० | १६ | ३८ |
| एष रावणिरा० | १५ | ८९ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| ऐ | | |
| ऐन्द्रेण | १५ | ६९ |
| क | | |
| कथं | १५ | ७३ |
| कपयोऽविभयुस् | १७ | ५८ |
| कम्बूनथ | १४ | २ |
| कल्पिष्यते | १६ | १२ |
| कामो जनस्य | १९ | २० |
| काव्यमिदं | २२ | ३५ |
| कुम्भकर्ण | १५ | ११२ |
| कुम्भकर्णम् | १५ | २१ |
| कुम्भकर्णे | १६ | १९ |
| कुम्भकर्णो | १६ | १८ |
| कृतं सर्वं | १९ | १५ |
| कृत्तैरपि | १४ | ४१ |
| केचित् | १४ | १०५ |
| केन | १६ | १५ |
| केन संविद्यते | १८ | २९ |
| केशानलुञ्चिषुस् | १५ | ३ |
| कोट्या | १४ | २९ |
| कोऽन्योऽक० | २१ | १७ |
| क्रियेरंश्० | १९ | ३ |
| क्रुद्धान् | १९ | २४ |
| क्व च ख्यातो | २० | १४ |
| ख | | |
| खमट | २० | ३० |
| खमूयुर् | १४ | ८४ |
| ग | | |
| गजानां | १४ | ११ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| गत्वाऽथ ते | १९ | १४ |
| गते त्वयि | २२ | १७ |
| गते तस्मिन् | २२ | १८ |
| गदा | १४ | ३६ |
| गन्तारः | २२ | १६ |
| गम्भीर० | १४ | १३ |
| गम्भीराः | १७ | ६३ |
| गाधितासे | २२ | २ |
| गान्धर्वेण | १४ | ८८ |
| घ | | |
| घनानामीशते | १८ | २० |
| घानिपीष्ट | १९ | २९ |
| घ्नन्तं | १५ | ४१ |
| च | | |
| चकासांचक्रुः | १४ | १९ |
| चकराण'ऽशा० | १४ | ८९ |
| चञ्चूर्यन्ते | १८ | २५ |
| चत्स्र्यन्ति | १६ | २० |
| चन्दन द्रुमं० | २२ | ४ |
| चिचेत | १४ | ६२ |
| चितां कुरु | २० | ३४ |
| चुक्रुधे | १४ | १०१ |
| चुकोपेन्द्र० | १४ | ४४ |
| चेतसस्० | २० | २८ |
| छ | | |
| छिन्नानैक्षन्त | १७ | ६५ |
| ज | | |
| जगन्ति | २० | ३१ |
| जगर्जुर् | १४ | ७ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| जगाहिरे | १४ | ६७ |
| जग्लौ | १४ | ६० |
| जहसे | १४ | ९३ |
| जहीहि | २० | १० |
| ज्ञायिष्यन्ते | १६ | ४१ |
| ड | | |
| डुढौकिरे | १४ | ७१ |
| त | | |
| तं नो | १९ | २ |
| तं यान्तं | १४ | ९७ |
| ततः कथाभिः | २२ | २४ |
| ततः परं | २२ | १० |
| ततः प्रगदिता | २० | २६ |
| ततः प्रजघटे | १४ | ७७ |
| ततः प्ररुदितो | १६ | १ |
| ततः प्रामुह्यतां | १७ | २४ |
| ततः प्रोद्सहन् | १७ | ९६ |
| ततः शत·स० | १७ | ९९ |
| ततः स गतवान् | १९ | २२ |
| ततः समभवद् | १७ | ५९ |
| ततः सौमित्रिर० | १५ | ९४ |
| ततस् त्रिशिरसं | १७ | ८९ |
| ततोऽकुष्णाद् | १७ | ८० |
| ततोऽक्रन्दीद् | १५ | ९५ |
| ततोऽचित्रीयता० | १७ | ६४ |
| ततो दशाऽऽस्यः | १४ | १ |
| ततोऽद्विषुर् | १७ | ६१ |
| ततोऽधावन् | १७ | ७३ |
| ततो नील० | १५ | ८० |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| ततो मातलिना | १७ | १०९ |
| ततो माया-मयीं | १७ | २० |
| ततोमायामयान् | १७ | १०७ |
| ततो रामेति | १४ | ४८ |
| ततो रामो | २२ | १ |
| ततो रौद्र | १७ | ४६ |
| ततो विजघटे | १४ | ६६ |
| तत् कर्म | १४ | ३७ |
| तत्र जेतुं | १६ | ३४ |
| तत्रेन्द्रजितम् | १७ | ३० |
| तत्रेपज् | १५ | १०२ |
| तमभ्याश्लिष्ट | १५ | ९७ |
| तमलाया | २२ | १२ |
| तमेवं-वादिनं | १६ | २५ |
| तस्तनुर् | १४ | ३० |
| तस्मान् | १७ | ४५ |
| तस्य क्षेमे | १५ | १०३ |
| तस्याऽप्यत्यक्र० | १५ | १७ |
| तस्याऽप्यबेभि० | १५ | ११६ |
| तस्याऽहारिषत | १५ | ७९ |
| तां प्रत्यैच्छन् | १७ | २८ |
| तातं प्रसाद्य | २१ | १९ |
| ताभ्यामन्यो | १७ | १०१ |
| तामापतन्तीं | १७ | ९१ |
| तावभाषत | १७ | २५ |
| तावस्फावयतां | १७ | ४३ |
| तिरोबभूवे | १४ | ४३ |
| तीव्रं | १६ | ७ |
| तुतुपुर् | १४ | ११२ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| तुरङ्गाः | १४ | ६ |
| तूर्याणामथ | २२ | २९ |
| तृणहानि | २० | ३ |
| तृणेढु | २० | १३ |
| तृणेह्मि | १८ | ३३ |
| ते तं व्याशिषता | १५ | ४३ |
| ते परस्परम् | १७ | ४४ |
| तेऽभाषिषत | १५ | ६ |
| तेऽभ्यगुर्भवनं | १५ | २ |
| ते व्यरासिषुरा० | १५ | ४२ |
| तैरजेषत | १५ | ७६ |
| तौ हनुमन्तम् | १५ | १०५ |
| त्वं पुनीहि | २० | २९ |
| त्वं स्म | १८ | १८ |
| त्वक्-त्रैः | १४ | ७४ |
| त्वमजानन्निदं | १८ | १५ |
| त्वमर्हसि | १८ | ४२ |
| त्वयाऽद्रक्ष्यत | २१ | ५ |
| त्वयाऽपि | १८ | ३२ |
| त्वया सन्दर्शि | २२ | ७ |
| द | | |
| दग्ध-शैल | १५ | २३ |
| ददाल | १४ | २० |
| दधावाऽद्भिस् | १४ | ५० |
| दर्शयांचक्रिरे | १४ | ५४ |
| दशग्रीवो० | १७ | २८ |
| दश दन्ति० | १७ | ६७ |
| दातुः स्यातुर् | १८ | ४० |
| दिक्पालैः | १७ | २९ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| दिदृक्षुर् | २० | ७ |
| दिद्विषुर् | १४ | १०१ |
| दिशो व्यश्नुवते | १८ | २६ |
| दीप-तुल्यः | २२ | २३ |
| दीक्षस्व | २० | १४ |
| देवान्तको० | १५ | ७४ |
| दैत्य-क्षये | २१ | १८ |
| दैवाद् | २० | २७ |
| दोषैररमत | १७ | ४० |
| द्रष्टास्थस्० | २२ | १९ |
| द्रष्टासि | २२ | ६ |
| द्रुतमग्रास्त | १५ | १२० |
| द्वेष्टि प्रायो | १८ | ९ |
| ध | | |
| धनाता० | १८ | २० |
| धनूंष्यारोपयां | १४ | ८ |
| धिङ् मां | १६ | ९ |
| धूम्राक्षोऽथ | १४ | ७३ |
| धेयास् त्वं | १९ | २७ |
| ध्वजानुद्० | १४ | ५३ |
| न | | |
| नखैरकर्तिपुस् | १५ | ४ |
| न गच्छामि | १८ | ३५ |
| नगर-घ्नो० | २२ | १३ |
| न चोभावप्य० | १७ | १०६ |
| न जिजीवा० | १४ | ५८ |
| न तानगणयन् | १७ | ११ |
| न त्वजायत | १७ | ३७ |
| न प्रावोचमहं | १५ | ११ |
| नभस्वान् | १७ | ११० |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| न योद्धुं | १५ | ४९ |
| न हि प्रेष्य-वधं | २० | ६ |
| नाऽक्रल्प्स्यत् | २१ | ११ |
| नागाऽध्यसिदम् | १४ | ६५ |
| नाऽजानन् | १७ | १६ |
| नाऽन्तुरोत्स्ये | १६ | २३ |
| नाऽभविष्यदियं | २१ | २ |
| नाऽभिज्ञा ते महाराज ! | १६ | ३६ |
| नाऽभिज्ञाते स० | १६ | ३७ |
| नाऽमोक्ष्यास | २१ | १४ |
| नाऽवक्रल्प्यम् | १९ | १७ |
| निकुम्भो | १५ | १२१ |
| निरचायि | १५ | १०७ |
| निराकृत्य | १७ | ३५ |
| निरासू | १४ | २३ |
| निलिल्ये | १४ | ७६ |
| नेदानीं | १८ | ३१ |
| नैवं विरह० | २२ | २० |
| न्यकृन्तंश् | १७ | १२ |
| न्यत्रसिष्ट | १५ | ७ |
| न्यश्यन् | १७ | ४ |
| न्यषेधत् | १७ | ८७ |

प

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| पपात | १४ | ८१ |
| पतिष्यति | १६ | १६ |
| परिघेणाऽवधि० | १५ | ८१ |
| परितः | १७ | ५२ |
| पश्रिसं | २० | ४ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| पस्पन्दे | १४ | ८३ |
| पीडा-करम० | १७ | २२ |
| प्रकुर्यास | १९ | ६ |
| प्रणमन्तं | २१ | १६ |
| प्रणमन् | २१ | १३ |
| प्रतन्व्यः | २२ | ५ |
| प्रतोदा | १४ | ९९ |
| प्रययाविन्द्र० | १४ | १६ |
| प्रवपाणि | २० | ३६ |
| प्रविधाय | २२ | ३१ |
| प्रहस्तमर्थयाचंक्रे | १४ | ८८ |
| प्रहस्तस्य | १४ | १०२ |
| प्राङ् मुहूर्तात् | १६ | ३३ |
| प्राचुचूर्णच् | १५ | ३६ |
| प्राच्यमाञ्जिहिषां | १४ | १५ |
| प्राज्ञ० | १५ | १४ |
| प्राज्ञास् | १८ | ६ |
| प्राणा | १४ | ५५ |
| प्राणिषुर् | १५ | १०८ |
| प्रादुन्वन् | १७ | १४ |
| प्राप्त-चारित्र्य० | २० | २१ |
| प्रालोठन्त | १७ | १८ |
| प्रावर्तिष्यन्त | २१ | १५ |
| प्रावर्धत | १७ | ६० |
| प्राशीन् | १५ | २९ |
| प्रेता वरेण | २१ | २० |
| प्रोदपाति | १५ | १०६ |
| प्रोर्णोति | १८ | २८ |
| प्रौर्णावीच् | १५ | ११९ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| प्रौर्णुवीत् | १५ | १२२ |

ब

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| बबाधे | १४ | ४५ |
| बिभ्रत्यस्त्राणि | १८ | २४ |
| बोभवीति | १८ | ४१ |
| ब्रह्माऽददाद् | १७ | २७ |

भ

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| भजन्ति | १८ | ४ |
| भल्लैश् च | १४ | २४ |
| भूमि-छस्या० | १७ | ९७ |
| भूमौ शेते | १८ | २ |
| भेष्यते | १६ | ४० |
| भ्रमरकुला० | २१ | २१ |
| भ्रेजिरेऽक्षत | १४ | ६८ |

म

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| मण्डलान्याटतां | १७ | ८४ |
| मत्तेनाऽमारि | १५ | ८५ |
| मन्तूयिष्यति | १६ | ३१ |
| मन्त्रे जातु | १८ | १६ |
| मन्युं वध्या | १९ | ३० |
| मन्युं शेकुर् न | १४ | ४९ |
| मरिष्यामि | १६ | १३ |
| मां दुष्टां | २० | ३७ |
| मांसेना० | १५ | ३० |
| माऽपराध्नोदियं | १७ | २१ |
| मानुषो नाम | १६ | २८ |
| मारयिष्यामि | १६ | २२ |
| मा शोचिष्ट | १५ | १०१ |
| मा स्म | १७ | २६ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| मिथ्या मा | १७ | ३६ |
| मित्रघ्नस्य | १४ | ३३ |
| मिमेह | १४ | १०० |
| मुञ्चेताऽऽकाश० | १९ | ९ |
| मुदा संयुहि | २० | १६ |
| मूर्खास् | १५ | १५ |
| मूर्धजान् | १८ | ३८ |
| मूर्ध्ना | १५ | २२ |
| मृगाः | १४ | १४ |
| मृदङ्गा | १४ | ४ |
| मेघाः | १७ | ७४ |
| मोज्झिग्रहः | १५ | २० |
| मोदिष्ये | १६ | २४ |
| म्रियेथोर्ध्वं | १९ | ५ |
| य | | |
| यक्षेन्द्र० | १५ | ४० |
| यच्च तत्र | १९ | १८ |
| यज्ञ-पात्राणि | १९ | १३ |
| यत्-कृतेऽरीन् | १७ | २३ |
| यत्र यच्चाऽमरि० | २१ | ९ |
| यथेष्टं चर | २० | २५ |
| यदा न फेलुः | १४ | ११३ |
| यम लोकम् | १७ | ६९ |
| यमायाऽकम्पनं | १४ | ८६ |
| याः सुहृत्सु | १६ | २५ |
| यावज्जीवम् | २१ | ६ |
| युद्धोन्मत्तं | १५ | ७५ |
| युयुत्सुः | १४ | ९० |
| येन पूत-क्रतोर् | १८ | १३ |
| यैरघानि | १५ | ६६ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| योद्धारोऽबिभरुः | १७ | ५३ |
| योद्धुं सो० | १५ | ५२ |
| र | | |
| रक्त-पङ्के | १४ | २८ |
| रक्तं प्रचुश्चुतुः | १४ | ७९ |
| रक्तमश्च्योतिषुः | १५ | ५१ |
| रक्तेनाऽचि० | १५ | ४८ |
| रणे चिक्रीड | १४ | ८० |
| रथेना० | १५ | ८३ |
| रविस् | १६ | ६ |
| रसान् | २० | ३२ |
| राक्षसस्य | १५ | ५८ |
| राक्षसेन्द्रस् | १५ | १ |
| राक्षसोऽतर्जयत् | १७ | १०३ |
| राक्षस्यः | १७ | ७१ |
| राघवस्य मतेनाऽथ | २० | ३५ |
| राघवस्याभृशायन्त | १७ | ९३ |
| राघवस्याऽसुपः | १५ | १६ |
| राघवो | १४ | ४२ |
| राजितं | १७ | १११ |
| रावणः | १४ | २२ |
| रावणस्य | १८ | ३९ |
| रावणाऽङ्क० | २० | २२ |
| रुरुजुर् | १४ | ७८ |
| रोदिम्यनाथमा० | १८ | ३० |
| ल | | |
| लक्षे च द्वे | १७ | ६८ |

| श्लोकाः | सर्गः | श्लो० |
|---|---|---|
| लज्जाऽनता | २० | २० |
| ललुः खड्गान् | १४ | ९२ |
| लाङ्गूलैर् | १४ | २६ |
| लेढि | १८ | ७ |
| लोह-बन्धैर् | १४ | ५३ |
| व | | |
| वज्रमुष्टेर् | १४ | ३४ |
| वर्धिषीष्टाः | १९ | २६ |
| वाद्यांचक्रिरे | १४ | ३ |
| वानरा | १४ | २५ |
| वायव्याऽस्त्रेण | १५ | ६७ |
| वासयेत | १९ | १२ |
| विनङ्क्ष्यति | १६ | २६ |
| विपाकोऽयं | १८ | ३ |
| विभिन्ना | १४ | ४० |
| विभीषणस् | १५ | १०० |
| वियत्यान० | १४ | ११० |
| विरूपाक्षस् | १७ | ७८ |
| विरूपाक्षो | १४ | ३५ |
| विशिश्वासयिषां | १४ | १२ |
| वीर्यं मा | १५ | १२ |
| व्यक्रुक्षद् | १५ | ४७ |
| व्यजिघृक्षत् | १७ | ३९ |
| व्यनाशयंस० | १७ | ७६ |
| व्यश्नुते | १८ | १ |
| व्याख्या-गम्य० | २२ | ३४ |
| व्योम | १७ | ८५ |
| श | | |
| शक्तिं | १८ | २३ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| शक्तिरित्यकुप्यद् | १५ | ५५ |
| शत्रुभिर् | १६ | १० |
| शमं शमं | १८ | २७ |
| शरीरं | १५ | ११७ |
| शरैरताडयद् | १७ | ४१ |
| शाम्यत्यनु० | १८ | २१ |
| शिक्षान० | २२ | २७ |
| शिवाः | १८ | १२ |
| शुश्राव | १४ | १७ |
| शूलानि | १४ | ६ |
| श्रीर् निष्कुष्यति | १८ | २२ |
| श्लाघिष्ये | १६ | ४ |

स

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| संत्रस्तानाम० | १५ | ६४ |
| संदुधुक्षे | १४ | १०६ |
| संपस्पर्शाऽथ | १४ | ६६ |
| संबभूवुः | १४ | २७ |
| संवर्गयाञ्चकार | १४ | ६४ |
| संवाद्भिः | २१ | २२ |
| स एव | १६ | ४ |
| सङ्कल्पं | २१ | ४ |
| स चाऽपि | १५ | ६३ |
| स तान् | १५ | ५ |
| स तामबिभ्रमद् | १५ | ५३ |
| सत्त्वं | १५ | ३४ |
| सन्धान० | १५ | १८ |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| सन्नत्स्यामि | १६ | २६ |
| सपक्षोऽद्रिर् | १५ | २४ |
| सत-यष्टिं | १५ | ६८ |
| स बिभ्रेप | १४ | ८७ |
| स भवान् | १६ | २१ |
| स भस्मसाच् | १४ | ८५ |
| समक्ष्भ्नन् | १७ | १०८ |
| समक्षणुवत | १७ | ५५ |
| समगत | १५ | १२३ |
| समनात्सीत् | १५ | १११ |
| समवत्स्यत | २१ | ७ |
| समीरयाञ्चकार | १४ | १११ |
| समुत्क्षिप्य | २१ | १ |
| समुपेत्य | २० | १ |
| समाधत्ताऽऽसुरं | १७ | ८३ |
| समाश्वसिमि | १८ | १० |
| समोहे | १४ | ६३ |
| समुत्पेतुः | १४ | १० |
| सम्पातिना | १४ | ३१ |
| सर्वतश्० | १७ | ७२ |
| सर्वस्य जायते | १८ | ८ |
| सवृक्षम० | १५ | ६८ |
| सस्यन्दे | १४ | ६८ |
| स-स्फुरस्य | १७ | ६४ |
| सस्वंशे | १४ | ७२ |
| सह-भृत्यः | [illegible] | [illegible] |

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| सा जुगुप्सान् | १४ | ५६ |
| सामर्थ्यं | १५ | ३१ |
| सारथिं | १७ | ४२ |
| सुखं | १६ | ३२ |
| सुग्रीवो | १४ | ३८ |
| सुग्रीवोऽस्या० | १५ | ५६ |
| सेतुं महेन्द्रं | २२ | २५ |
| सेवितास्ते | २२ | ३ |
| सेहे कपी | १४ | १०८ |
| सोऽभ्यर्छायत | १७ | ६८ |
| सौमित्रिः सर्पवत् | १५ | ६० |
| सौमित्रिराकुलः | १७ | १६ |
| सौर्याऽऽग्नेये | १५ | ६२ |
| स्थान नः | २२ | २८ |
| स्नानीयैः | १६ | ११ |
| स्नाह्यनुलिम्प | २० | ११ |
| स्मेष्यन्ते | १६ | १४ |
| स्यन्त्वा | २२ | ११ |
| स्वर्गं विद्यस्व | २० | ३३ |
| स्वर्भानुर् | १८ | १४ |
| स्वेनुस् | १४ | ७० |

ह

| श्लोकः | सर्गः | श्लो० |
|---|---|---|
| हतं | १५ | ७१ |
| हया | १४ | ५ |
| हविर् | १८ | १६ |
| [illegible] | १४ | ३९ |

Bhawan's Sri Sanmatacharya Mahavidyalaya Bharatiya Vidya
527

## आदर्श हिन्दी-संस्कृत-कोशः

डॉ० रामसरूप शास्त्री

मूल्य १५०—००

*

## 'बाल' हिन्दी-संस्कृत-कोशः

श्रीरामजी लाल शर्मा

मूल्य १०—००

*

## अमरकोषः

विद्वद्वरभानुजिदीक्षितकृतया 'सुधा'ख्यया
'रामाश्रमी'त्यपरनामधेयया
व्याख्यया सहितः
मूल्य १५०—००